चतुष्के सानियोक्तव्या कृत्वा मन्त्रं [क: मन्त्र] द्विरक्षरम् ।

प्रशवन्तु कपालीनां वक्रनेत्राङ्गसंयुताम् [क: -ङ्ग *
युताम्] ॥ ५ ॥

हसाख्यं भैरवं चात्र पूर्वसूत्रणचोदितम् । (?)

वक्रनेत्राङ्गसंयुक्तं मुपरिबीज प्रकीर्तितम्॥ ६॥ (?)

रूपेषाश्चात्र [क: रूपेषा चात्र] नेत्राणि कर्त्तव्यानि न संशयः।

क् १४२अ) स्मरणं तु शिवं [क: शिव] दद्या शिवशक्तिं तु पूर्ववत्॥ ७॥

सेषन्तु पूर्ववत् सर्वं भैरवस्य न संशयः। (?)

रक्ता बीजं कराल्या च एकी कृत्वा वरानने ॥ ८॥

मूलमन्त्रसमाख्यातो [क: -त] रक्ता या प्रणवादिकम् [क: प्रशवा-]।

नुत्पन्ता [क: नुत्पन्नन्ता] जपपूजायां [क: -या] स्वाहान्तश्चाग्निकर्मणि ॥ ९॥

पूर्वोद्धृतं तु यत्बीजं रक्ताख्यं नवके विधौ ।

वक्राणि तत्र यान्येव नेत्रान्यन्तानि चैव हि [क: द्धि] ॥ १० ॥

रक्ताया नात्र सन्देहश्चतुष्केतानि योजयेत् ।

द्वितीयन्तु विकेयस्तु? क्रमेणैव व्यवस्थितम् ॥ ११ ॥

विद्याया प्रणवं मन्त्रा [क: मुक्ता] कराल्यायाः [क:
करालायाः] प्रकीर्तितम्? ।

मूलमन्त्रे नसन्देहो नुत्पन्तप्रणवादिके [क: -प्र * वादिके] ॥ १२ ॥

वरा प्रख्यं च महोच्छुष्मं नात्र कार्या विचारणात् । (?)

चण्डाक्षा यास्तु यानिस्यु वक्रनेत्राङ्गकानि [क: वक्त-] तु ॥ १३ ॥

नवके चोद्धृता नित्यः कराल्यायाः [क: -या] प्रकल्पयेत् ।

निर्विकल्पं महादेवि चतुष्कस्मिं न संशयः ॥ १४ ॥

ख् १०७अ) तृतीयन्तु द्विकं यन्तु क्रमेणैव व्यवस्थितम्।

चण्डाक्षा [क: -ख्या] या समाख्यात तृतीयस्वरसंयुताम् ॥ १५ ॥

नुत्पन्तं प्रणवाद्यञ्च मूलमन्त्रं प्रकीर्तितम्।

अस्मिन् तन्त्रे यदा दस्या दृक्षरे तु [क: -रेन्तु] वरानने [क: वनानने] ॥ १६ ॥

तृतीये नवियुक्तस्या [क: -स्य] स्वरे ह्रस्वन्तु योजयेत्।

स्वविन्दु शिववक्त्रास्तु [क: शिववक्त्रास्तु] रूपेशा पूर्ववद्यथा ॥ १७ ॥

नेत्राणि तु विजानीया चण्डाक्षा या न संशयः।

अङ्गानिपूर्ववद् देवि आदिमे न तु कारयेत् ॥ १८ ॥

चतुर्थन्तु द्विकेकन्तु [क: द्विर्कंकन्तु] भीमवक्त्रा महावलम्।

मूलमन्त्रसमाख्यातं महोच्छुष्मा न संशयः ॥ १९ ॥

आदिमन्त्रद्विके बीजं स्वरैर्ह्रस्वैस्तु [क: स्वरैह्रीस्वैस्तु] भेदितम्
।

वक्त्रानि तु विजानीया नेत्रानि [क: नेत्रासि] पूर्वमेव हि ॥ २० ॥

अङ्गानि आदिमं [क: आदिमे] चैव स्वरैर्भिन्नन्तु [क: नास्ति]
दीर्घकैः [क: नास्ति]।

उच्छुष्माञ्चैव [कः नास्ति] कायोनि विन्दुयुक्तानि पूर्ववत् ॥ २१ ॥

चतुष्कान्तु समाख्यातां विद्या भेदेन [कः भेदन] सुव्रते ।

भैरवेन [कः -ने] समायुक्तो प्रति प्रति न संशयः ॥ २२ ॥

एतदेव चतुष्कं स्यात् कर्त्तव्यास्तु [कः कर्तेव्यास्तु] यथाक्रमम् ।

भैरवं पूर्वसूत्रोक्ता भैरव्या सहपञ्चमम् [कः -माम्] ॥
२३ ॥

पञ्चकन्तु समाख्यातं वक्त्रनेत्राङ्गसंयुतम् [कः वक्त-] ।

अधुना संप्रवक्ष्यामि मन्त्रोधारन्तु सप्तके ॥ २४ ॥

क् १४२ब्) मातृणान्नवकं [कः मातृशान्नवकं] यन्तु सप्तपत्रे
तु पद्मके ।

वीरशक्त्या विहीनन्तु वीरं तस्मिन्तु कारयेत् ॥ २५॥

आदिमन्त्र न्यसेत्मन्त्री पूर्वसूत्रेण चोदितम् [क: चोदितो] ।

वीरस्य पूर्वपार्श्वे तु मेषां [क: मेखां] पत्रेषु विन्यसेत् ॥
२६ ॥

वीरेणसंयुतां सर्वा वामपार्श्वे तु वर्त्तिना [क: वर्तिन] ।

कर्त्तव्या साधकेन्द्रेण वीराष्टक [क: -के] विधौ सदा ॥ २७ ॥

वीराष्टकं समाख्यातं तृकन्तु शृणु सांप्रतम्।

बीजशक्ति त्रयं यन्तु बीजयागेषु मुद्धृताम् ॥ २८ ॥

दक्षिणायास्तु [क: -यान्तु] यद्बीजं नुत्पन्तं प्रणवादिकम्।

मूलमन्त्रं [क: -मन्त्र] समाख्यातं वक्राणि [क: -शि] शृणु
सांप्रतम् ॥ २९ ॥

चतुर्थेन वियुक्तं स्यात् स्वरैह्रस्वैस्समन्वितम् [क: स्वरैह्रस्वस्-]
।

वक्रानान्तु चतुष्कान्तु [क: चतुष्टान्तु] पञ्चमं शृणु
सांप्रतम् ॥ ३० ॥

चतुर्दशेन संयुक्तं [क: -क्त] स्वरेणैव सविन्दुकम् ।

दक्षिणायाम् समाख्यातं पञ्चमस्य न संशयः ॥ ३१ ॥

रूपेशानेषु कानिस्यु दीर्घैर्युक्तं [क: दीर्घैयुक्तं]
स्वरैस्तथा [क: स्वरेस्-] ।

ख् १०७ब्] अङ्गानि तु विजानीया दक्षिणाया यथाक्रमम् ॥ ३२ ॥

वक्त्रानिदिग्विभागेन यानि दन्तानि सुव्रते ।

तेनैव तु विभागेन सद्यादी तत्र योजयेत् ॥ ३३ ॥

योयस्मिं [क: -स्मिन] संस्थितो [क: सस्थितो] मन्त्रो दिग्विभागेन वक्त्रके ।

तस्य मन्त्रस्य तद्वाच्य व्रह्मं भवति नान्यथा ॥ ३४ ॥

अनेनैव विभागेन वामयो परिकल्पयेत् ।

वक्त्रनेत्राङ्गकानिस्यु सद्यादिश्च न संशयः ॥ ३५ ॥ (?)

मध्यमायाञ्च [क: -यां श्चा] क्तव्या एष एव क्रमः [क: क्रम] प्रिये [क: प्रिया] ।

स्वबीजेन यथा न्याय नात्र कार्य [क: -कार्या] विचारणात् ॥ ३६ ॥

मूलाग्रेषु न्यसेत् पूर्वं तृखण्डी कृत विग्रहः [क: -हम्] ।

नवाक्षरान्तु [क: -रा तु] वै देवि ततो मन्त्राणि [क: मन्त्राशि]
विन्यसेत् ॥ ३७ ॥

प्रणवेन समं आद्यं यदुक्तं चाक्षरद्वयम् ।

मूलबीजान्तसंयुक्तं विन्यसे दक्षिणाग्रके ॥ ३८ ॥

तत्रोपरिचतुष्कं स्याद् दक्षिणायां यदुधृतम् [क: -त] ।

वामबीजान्तसंयुक्तं [क: -युक्त] वामबीजे तु विन्यसेत् [क: वि *
सेत्] ॥ ३९ ॥

शेषं पदन्तिमं [क: -मे] चैव तिष्टते अक्षरद्वयम् ।

बीजेन मध्यमायान्तु अन्तयुक्तं ततो न्यसेत् ॥ ४० ॥

मध्यमे शृङ्गकाग्रे तु विद्यामूर्त्तिं [क: -मूर्ति] न
संशयः ।

क् १४३अ) ततो बीजानिविन्यस्य [क: शक्तिनान्यस्य] शक्तिनान्यत्र
संशयः ॥ ४१ ॥

अनेनैव विधानेन [क: -भागेन] भोगाङ्गानि समुद्धरेत् ।

दक्षिणायास्तु [क: -यान्तु] यद्बीजं [क: -बीज] चतुर्थश्वरयोजितम्
[क: -स्वर-] ॥ ४२ ॥

स्वरागैर्भेदयित्वा? तु विद्याखण्डनियोजयेत् ।

आदिमे प्रणवाद्ये [क: प्रणवामे] तु प्रतिप्रति न संशयः ॥ ४३ ॥

विद्याङ्गानि तथैतानि दक्षिणायां न संशयः।

वामशक्त्या तथा बीजं स्वरागेश्चैव [क: -श्चेव] भेदितम् ॥ ४४ ॥

विद्याखण्डा द्वितीया तु प्रतिप्रति नियोजयेत्।

विद्याङ्गानि तु वामायास्तथान्येव भवन्ति हि ॥ ४५॥

मध्यमायास्तु [क: -मायान्तु] यद्बीजं षष्टे? स्वरनियोजितम्?।

स्वराङ्गे? भेदयित्वा? [क: भैदयित्वा] तु तृतीये योजयेत् पुनः ॥ ४६॥

विद्याखण्डतिमे देवि प्रतिप्रति यथाक्रमम्।

एतानि मध्यमायास्तु विद्याङ्गानि न संशयः ॥ ४७ ॥

अथान्यं [क: अधुना] संप्रवक्ष्यामि [क: श –] मंत्रोद्धारं
[क: विद्यो–] शृणुष्व मे ।

हंसाख्यं परमं बीजं तेजस्यो [क: –स्या] परिसंस्थितम् [क: –
स–] ॥ ४८ ॥

चतुर्थश्वरसंयुक्तं [क: –स्वर–] विन्दुनापरिभूषितम् ।

नुत्पंन्तं प्रणवाद्यञ्च [क: प्रशवाद्य च] भैरव्या नात्र
संशयः ॥ ४९ ॥

ख् १०८अ) मूलमन्त्रं समाख्यातं वक्राङ्गानि शृणुष्व मे
।

तदेव मूलमन्त्रन्तु ह्रस्वैः स्वरैस्समायुतम् ॥ ५० ॥

वक्राणान्तु [क: -शान्तु] चतुःष्कं [क: चतुष्कं] स्यात्
पञ्चमं शृणुसाप्रतम्।

तदेवं च महादे [क: -देवी] -

योजितम् ॥ ५१ ॥

चतुर्दसेन [क: -शेन] संयुक्तं स्वरेणैव महोदयम्।

विन्दुयुक्तं भवेद्वक्रं पञ्चमश्चरवर्णिनि [क: -स्वरयोजित]
॥ ५२ ॥

[क: वर्णिनि]।

प्रणवाङ्गैस्तथा भीत्वा अङ्गानि तु नियोजयेत्?।

प्रणवाद्यानि [क: यो] सर्वाणि नुत्पन्तानि [क: नुत्पकानि]
यथाक्रमः [क: -म] ॥ ५३ ॥

भैरव्या या समाख्यातामेतन्मन्त्रं वरानने ।

तारकं [क: तारेकं] यत् मया प्रोक्तं वक्त्रनेत्राङ्ग
संयुतम् [क: -तः] ॥ ५४ ॥

भैरवस्य [क: भैरव्याया] समाख्यातं मूलमन्त्रं न
संशयः ।

हंसरेवपरम्बीजं तारकस्तु नियोजितम् ॥ ५५ ॥

अङ्गैश्चैव यथान्यायं वक्त्राङ्गानि नियोजयेत् ।

रूपेशान्तु [क: -णन्तु] तथा चैव नेत्रानि [क: मन्त्राणि] परिकल्पयेत्
॥ ५६ ॥

यं येस्मिं संस्थितं वक्रदिग्भागेन व पूर्ववत्।

तत्तस्य [क: तंतस्य] वाचकं ज्ञेयं सद्यादी नात्र संशयः

॥ ५७ ॥

क् १४३ब्) हंसाख्यं परमं बीजं द्वितीयस्वर संयुतम् [क: -

त]।

सविन्दुपरमाशक्ति भैरव्यो [क: -व्या] परिदापयेत् ॥ ५८ ॥

वक्रनेत्राङ्गसंयुक्तं पूर्वसूत्रेण चोदितम्।

सद्यादीं [क: -दी] पूर्वव चास्याद् वक्रनेत्रेषु चोद्धरेत् ॥ ५९ ॥

शिवशक्षादिकं [क: -स्साधिकं] पूर्वं [क: पूर्व] पूर्वमेव

न संशयः।

विद्यामूर्ति तथादौ तु भवते तु यथा शृणु ॥ ६० ॥

तद्विकस्य तु देवेसि [क: -शि] यथावत् कथ्यते पुनः [क: पुन] ।

विद्याङ्गानि यथान्यायं [क: -न्या *] भवन्तीह शृणुष्व मे ॥
६१ ॥

भैरव्या मूलमन्त्रन्तु विद्यायां [क: विद्या *] ते नियोजयेत् ।

भैरवी यान्तथाबीजं भैरव्यान्ते तथैव हि ॥ ६२ ॥

भैरव्या भैरवीयञ्च बीजैर्विद्यां [क: -द्विद्यां] तु
संस्थितैः [क: -तौ] ।

युग्मेन वहिरुद्भिन्नौ विद्यामूर्ति न संशयः ॥ ६३ ॥ [क: नास्ति]

ताभ्यां स्वरवियुक्तौ तु विद्याया तु व्यवस्थितौ । [क: नास्ति]

अंङ्गस्वरसमायुक्तौ भोगाङ्गानि प्रदापयेत् ॥ ६४ ॥

द्विकन्तु कथितं देवि यथा वन्तु [कः वन] व शोभने।

द्विकैकवीरं वक्ष्यामि यं ज्ञात्वानावसीदति [कः तात्वा-] ॥
६५ ॥

एवं [कः एव] स्थितो महादेवी विद्यामूर्त्ति तु कारयेत्।

भैरवी तारकं [कः * * कां] देवी युग्मे [कः युग्मं] नैव
व्यवस्थितौ ॥ ६६ ॥

नुत्पन्तौ प्रणवाद्यौ च नभिन्नौ [कः नास्ति]चोद्धरेद्बुधः [कः
नास्ति]।

विद्यामुर्तौ परिष्टौ तु दातव्यौ युग्मसंस्थितौ ॥ ६७ ॥ [कः नास्ति]

खु १०८बु युग्मे नैव विभिन्नौ तु वक्रनेत्राङ्गकैः स्वरैः। [कः नास्ति]

नुत्पन्तौ [कः नास्ति] प्रणवाद्यौ [कः नास्ति] च [कः नास्ति]

वक्राङ्गैस्वथयोजयेत् [कः वक्राङ्गे-] ॥ ६८ ॥

द्विगुणी कृतन्तु रूपेसं नेत्रस्थानेषु योजयेत्।

भैरवं मन्त्रमुद्धृत्य हन्साख्यं वरवर्णिनि ॥ ६९॥ [कः नास्ति]

परमा च तथा शक्तिर्युग्मी कृत्वा ततोर्चयेत्। [कः नास्ति]

प्रथमं भैरवं वीजं ततः शक्तिं समुच्चरेत् ॥ ७० ॥ [कः नास्ति]

युग्मे नैव तु भिन्नं तु नुत्पन्तौ प्रणवादिकौ। [कः नास्ति]

वक्राङ्गानि तथैवेह कर्त्तव्यानि न संशयः ॥ ७१ ॥ [कः नास्ति]

रूपेशौ तुतः कृत्वा नेत्रस्थानेषु योजयेत्। [कः नास्ति]

उपरियुग्म तु सद्यादि वक्त्रमन्त्रैस्तु कारयेत् ॥ ७२ ॥

युग्मान्तान्तु जपेद् विद्या द्विकैकेपिद्विकस्तथा ।

नित्यनैमित्तिके [क: -को] काम्ये कल्पकाले च नान्यथा ॥ ७३ ॥

कर्मकल्पे तथा चैव स्ववीजैः [क: -वीजै] पुटितास्तथा [क: पुजितास्तथा] ।

त्रिकेपि द्विजपेद् विद्या त्रिकान्ता नात्र संशयः ॥ ७४ ॥

सर्वकर्मेषु मन्त्रज्ञः [क: -ज्ञ] पूर्वबीजै यथाक्रमम् ।

चतुष्का तु जपेद् विद्यां [क: विद्या] स्वरूपेण व्यवस्थिताः [क: -ता] ॥ ७५ ॥

पञ्चके नवके चैव षट्के वै सप्तके तथा ।

वीराष्टके तथा चैव मातृणां [क: मातृणां] नवकस्तथा

॥ ७६ ॥

स्वरूपा वस्थितां विद्या जपेत् मन्त्री न संशयः ।

कर्मकाले यथा न्यायं स्वबीजैः [क: -जं] पुटितां न्यसेत् ॥ ७७

॥

एते योगाः समाख्याताः स्वरूपेण व्यवस्थिताः [क: -ता] ।

विद्या भेदेन वक्ष्यामि यथावन्तन् [क: -न्त] निवोधमे ॥ ७८ ॥

क् १४४अ) नवकमध्ये तु देवस्य उद्धारायः प्रकीर्तितः ।

साध्ये [क: साध्य] व विपरीतन्तु एकवीरविधौ भवेत् ॥ ७९ ॥

चतुर्दसेन [क: -शेन] संयुक्तं [क: संयुक्त] स्मरणं [क: -
णां] वै स्वरेण [क: -श] तु ।

भैरवीयं समाख्यातं सदाशिवतनु स्थितः [क: स्थिताम्] ॥ ८०
॥

अग्निमूर्द्धिर्नसमारूढा [क: अग्निमूर्द्धिन-] हंसमेव
वरानने ।

चतुर्थश्वरसंयुक्तौ [क: -स्वर-] विन्दुनोपरिभूषितम् ॥ ८१ ॥

एषा तु भैरवी देवी वामाद्धे संव्यवस्थिता ।

विद्यान्ते तु प्रयोक्तव्या क्रमे नैव वरानने ॥ ८२ ॥

मूर्तित्वेन प्रदातव्यो [क: -तव्या] विद्येयं [क: विद्ये ये]
भैरवस्य तु ।

स्वराङ्गैभेदयित्वा तु एतौ देवि यथा स्थितौ ॥ ८३॥

विद्यायान्त स्थितौ कृत्वा भोगांगेषु नियोजयेत्।

एत युक्तां जपेद् विद्यां सर्वकालेन संशयः ॥ ८४॥

कर्मकाले तु बीजैस्तु स्वकल्पोक्तैस्तु संपुटम्।

नवकभेदं मयाप्रोक्तं एकवीरन्तु भैरव [क: -वी] ॥ ८५॥

[क: स्वक्ष एकवीरवि] अधुना भैरवी वक्ष्य एकवीर विधिक्रमैः

[क: -मौः]।

ख् १०९अ) भैरव्यायान्तु यद्बीजं [क: -ज] विद्यान्ते

संव्यवस्थितम् ॥ ८६॥

भैरवीयं ततो बीजं तस्यान्ते तु प्रदापयेत्।

मूर्तित्वे [क: -त्वं] नस्थिता विद्या भैरव्याया यथोदिता ॥ ८७ ॥

स्वराङ्गे [क: -ङ्गै] भेदयित्वा तु विद्यायान्ते नियोजितौ।

भोगस्थानेषु देयांनि विद्याङ्गानि न संशयः ॥ ८८ ॥

शेषन्तु पूर्ववत् सर्वं [क: सर्व] भैरव्या भैरवस्य च [क: तु]।

एवम् विधा जपेद् विद्या नित्यनैमित्तिके विधौ ॥ ८९ ॥

कर्मकाला [क: -रा] तथैवेह कर्त्तव्या बीजसंपुटाम्।

भैरव्या यः समाख्यातां योगोद्यं वरवर्णिनि ॥ ९० ॥

रक्ताया संप्रवक्ष्यामि एकवीरविधिः क्रमः।

रक्ता बीजं महादेवी विद्यान्ते तु नियोजयेत् ॥ ९१ ॥

भैरवी यं ततो बीजं दापयेत् [कः -यत्] पूर्वमुद्धृतम् ।

एवं स्थितां ततो विद्यां मूर्तित्वे न प्रदपयेत् ॥ ९२ ॥

रक्तायां नात्र संदेहः [कः -ह] कर्णिकायां न संशयः ।

स्वराङ्गैर्भेदयित्वा [कः ङ्गै भेदयित्वा] तु एतौ
बीजैर्यथाक्रमम् ॥ ९३ ॥

विद्यान्ते संस्थितौ देवि भोगस्थानेषु दापयेत् ।

शेषं तु पूर्ववत् सर्वं [कः सर्व] रक्तायां भैरवस्य च ॥ ९४ ॥

शेषं च पञ्चमं वक्त्रं रक्तायां परिकीर्तितम् ।

क् १४४ब्] रक्ता बीजन्तु यत्प्रोक्तं तदेवात्र महाधिपे ॥ ९५ ॥

पञ्चमं वक्त्रमित्युक्तं सद्यादीञ्च [कः -दी च] प्रदापयेत् ।

वक्त्रनेत्रेषु [कः वक्तदेनेत्रेषु] देवेशि स्वस्थानस्थेषु चैव हि ॥
९६ ॥

दन्तपङ्क्ति [कः दत्तपक्ति] तथैवेह कपालानी [कः -ती] तथैव च ।

लान्तान्तं [कः लोकान्य] विन्यस्येत् सर्वं रक्ताया भैरवस्य च ॥
९७ ॥

सेषन्तु [कः शे-] अङ्गविन्यासं [कः अग-] पूर्ववत् सदा हृतम् [कः
नास्ति] ।

अनेनैव विधानेन सर्वासाम् परिकीर्तितम् ॥ ९८ ॥

स्वमन्त्रबीजमार्गेण देवीनान्तु [क: दे * नान्तु] न संशयः।

दूतीनां [क: -ना] संप्रवक्ष्यामि एकवीरविधिः [क: -विधि]

क्रमात् ॥ ९९॥

तद्बीजान्तं यथा विद्यां भैरवांताव सुव्रते।

मूर्तौ तु जपे काले [क: तपकाले] तु भोगस्थानेषु चैव हि ॥ १००॥

दापयत् सर्वदूतीनां स्वबीजैः किङ्करेण च।

सद्याद्या नात्र विद्यन्ते दूतीनां किंकरस्य तु ॥ १०१॥

दन्तं पङ्क्त्याः [क: पक्त्याः] कपालालीन [क: कपालीनां]

किञ्चिदपि [क: केचिदपि] विन्यसेत्।

शिवशक्त्यान्तकं [क: -क्त्यातकं] चैव कारयेन् नात्र
संशयः ॥ १०२ ॥

नवकभेदो समाख्यातो [क: -ती] यथावत् तव सुव्रते ।

एकवीरविधानेन सर्वकर्मफलः प्रदः ॥ १०३ ॥

योयस्मिं संस्थितौ [क: सस्थितौ] वर्णा विद्यायान्ते महायमे ।

ताभ्यां युक्तं जपेद् विद्यां सर्वकालस्वके स्वके ॥ १०४ ॥

ख् १०९ब्) सप्तकं भेदयिष्यामि [क: भेदयित्वा तु] एकवीरविधौ
शृणु ।

वीरन्तु [क: वीरन्त] पूर्ववद् देवि वीरशक्त्या समन्वितम् ॥ १०५ ॥

ताभ्यां युक्तं न्यसेद् विद्यां मूर्तौ जपविधौ सदा ।

स्वराङ्गैभेदितौ [क: -तो] कृत्वा भोगस्थानेषु चैव हि ॥ १०६ ॥

दापयेन् नात्र संदेहः शेषं पूर्वोद्धृतं तथा ।

योगिनीनां यथा भेद एव वीरविधिः [क: चीन-] क्रमैः ॥ १०७ ॥

तथा ते कथयिष्यामि संक्षेपेण [क: सजपेण] तथा शृणु ।

येन मन्त्रेण या प्रोक्तं विद्यायान्त [क: -न्तं] स्थिते न तु [क: तुः] ॥ १०८ ॥

योगिनी तस्य मन्त्रस्य वीरमन्त्र प्रदापयेत् ।

सा मूर्तिस्तु तयो [क: तया] ज्ञेया ततो भिन्नास्तु [क: -न्तु] पूजयेत् ॥ १०९ ॥

वक्त्रनेत्राङ्गविन्यासे [क: -स] सर्वमेव मयं [क: मय] कृतम्
[क: करम्] ।

अङ्गभेदं प्रवक्ष्यामि प्रत्येकन्तु [क: -स्तु] शृणुष्व मे ॥ ११० ॥

योज्यस्यैव स्थितो [क: स्थिता] मन्त्रो विद्यायान्ते महाधिपे ।

तस्य मन्त्रस्य अन्तस्थम् अक्षरं [क: -र] भेदयन् ततः ॥ १११ ॥

क: १४५अ) स्वराङ्गै पूर्ववद्देवि विद्यान्ते संस्थितं ततः ।

अङ्गानियोजयेत् तस्य स्वकेमन्त्रैस्तु भेदितैः ॥ ११२ ॥

सर्वेषां णात्र [क: नात्र] संदेहो नात्र कार्य विचारणात् ।

वीरन्तु पूर्वसूत्रोक्तं [क: -क्त] तासां पार्श्वे [क: पार्श्व]
तथा न्यसेत् ॥ ११३ ॥

सद्यादि वर्जितं चैव चतुर्वक्त्रविभूषितम् [क: -त] ।

स्वकीयानि तु अङ्गानि यस्या योनि स्थितानि तु ॥ ११४ ॥

वीरबीजं [क: -ज] स्वरैर्भित्वा [क: स्वरै-] तेषां मन्त्रे नियोजयेत् ।

भोगाङ्गानि महादेवि विद्यां भेद स्थितानि तु ॥ ११५ ॥

योगिनीनां ततोङ्गानि तेषाम् उपरिदापयेत् ।

वीराङ्गानि ततो दद्याद् एकवीरादिके विधौ ॥ ११६ ॥

भेदोयं सप्तकस्यायं [क: -य] समाख्यातो न संशयः ।

अधुना संप्रवक्ष्यामि [क: शं -] मातृभेदं शृणुष्व मे ॥

११७ ॥

वीरबीजं तु पूर्वोक्तं विद्यान्ते तु नियोजयेत्।

वीरशक्त्या ततो वीजं [क: वीज] तस्यान्ते योजयेद्बुधः ॥ ११८ ॥

एषा मूर्तौ स्थिता विद्या वीरैकैकविधौ प्रिये।

शेषन्तु पूर्ववत् सर्वं वीरशक्त्याथवीरयो ॥ ११९ ॥

स्वराङ्गना स्थिता विद्या शक्त्यागान्ता तथैव च।

उभयो तौ महा देवि भोगस्थानेषु योजयेत् ॥ १२० ॥

सद्यादि दन्तपंक्तैस्तु निरस्कां [क: निरस्था] लान्तकान्तकौ [क: -कैः]।

वीरशक्तौ समाख्यातौ मातृणां अपि नान्यथा ॥ १२१ ॥

यस्य यद्बीजमाख्यातं तदान्ताकारयेद् [क: -येत्] बुधः।

वीरबीजेन व तथा सर्वमातृगणश्यपि ॥ १२२॥

विद्याततन्तकां [क: -न्तदन्तका] कृत्वा प्रति प्रति नियोजयेत्।

ख् ११०अ) मूर्त्तित्वेन यथा [क: तथा] न्यायं स्वराङ्गै भेदितौ

[क: -तो] तथा ॥ १२३॥

प्रति प्रति तथाकार्यौ [क: -कार्यो] भोगस्थानेषु पूर्ववत्।

शेषन्तु पूर्ववत् सर्वं सद्यादिलान्तकं तथा ॥ १२४॥

स्वबीजवीरबीजानां जपेद्विद्यां [क: -विद्या] प्रयोजयेत्।

स्वकैस्स्वकैस्तथा योगैर् एकवीरविधिः [क: -विधि] क्रमैः ॥ १२५॥

मातृभेदो मयाप्रोक्तम् एकवीरविधिः [क: एव-] क्रमे [क: क्रमम्]
।

अधुना शंप्रवक्ष्यामि विद्ययास्त्वेककं [क: विद्या *
स्त्वेककं] प्रिये [क: प्रिय] ॥ १२६ ॥

दक्षिणायान्तु यद्बीजं सक्तश्चैव व्यवस्थितम् ।

१४५ब्] तदान्तं कारयेद् विद्या मूर्तिस्तस्या प्रकीर्तिताम् ॥ १२७ ॥

तम् बीजवक्रभेदेन स्वरैर्भित्वा [क: स्वरैभित्वा] यथाक्रमम् ।

चतुर्थेन वियुक्तस्यात् [क: वियुक्तस्यान्] तत् [क: त] स्वरं वरवर्णिनि
॥ १२८ ॥

विद्यायान्ते स्थितं कृत्वा प्रति प्रति यथाक्रमम् ।

वक्रस्थानेषु संयोज्य रूपेशं [क: रूपेणं] नेत्रकस्तथा ॥
१२९॥

विद्यायुक्तं नसंदेहो वक्रे वक्रे नियोजयेत्।

दक्षिणायास्तथा वीजं [क: वीज] स्वरेभीत्वा यथाक्रमम् ॥ १३०
॥

अङ्गस्थानेषु संयोज्य विद्यायान्ते [क: -यान्तं] न संशयः।

विद्याया रहितं कृत्वा स्वरूपेण व्यवस्थितम् [क: -ताम्] ॥ १३१ ॥

उपरिबीजं [क: -ज] समाख्यातं भैरव्याया न संशयः।

वक्राणि [क: -नि] पूर्ववत् कृत्वा स्वरैर्भेदितकानि [क:
स्वरैर्भेदितकादि] तु ॥ १३२ ॥

पञ्च एव विजानिया दिग्भागे तु नियोजयेत्।

रूपेशान्तु स्वरूपेण [क: -पण] नेत्रे स्थानेषु कीर्तिताः [क: -ता]
॥ १३३ ॥

अङ्गानि [क: अगानि] तु स्वरैर्भित्वा [क: स्वरैभित्वा] उपरीबीजस्य
कारयेत्।

अयं यागो मया प्रोक्तो दीक्षाकाले नियोजयेत् ॥ १३४ ॥

यजनं चास्यकर्त्तव्यं कदाचिदपि [क: -चि] साधकैः।

अतः परं प्रवक्ष्यामि उत्तिमसिद्धिमिच्छताम् [क:
उत्तिमेसिद्धिमिछताम्] ॥ १३५ ॥

यागत्रयं महादेवी भुक्तिदं कैवलं स्मृतम्।

भैरवेन समायुक्तं तृसृङ्गेन नवाक्षरा [क: नराक्षरा] ॥

१३६ ॥

विद्यामूर्ति नियोक्तव्या यागेस्मिं [क: -स्मि] नात्र संशयः? ।

एतद् एव वियुक्तं [क: वियुक्त] स्यात् कलयाषष्टया पुनः ॥ १३७ ॥

पञ्चमं वक्रमित्युक्तं ततः शृङ्गैर्विवर्जितम् [क:
शृङ्गैविवर्जितम्] ।

ह्रस्वस्वरैः [क: -रंः] समायुक्तं भवे वक्रा चतुष्टयम् ॥

१३८ ॥

दीर्घस्वरैस्समायुक्तं षडङ्गपरिकीर्तितम् [क: षडङ्गं-] ।

नेत्रत्रयं भवेच्चिव रूपेषां नात्र संशयः ॥ १३९ ॥

एतदेवषडंगं तु विद्यायान्तं व्यवस्थितम् [क: -ते]।

भोगस्थानेषु दातव्या यागेस्मिं मुक्तिलक्षणे ॥ १४० ॥

हंसरूपन्तु [क: -पेन्तु] यः प्रोक्तं कलया षष्टया युतम्।

ख् ११०ब्] चतुर्दशेन संयुक्तं कलाविन्दु विभूषितम् ॥ १४१ ॥

भैरवन्तु समाख्यातं परां [क: परा] सिद्धिप्रदं प्रिये।

भैरवस्य समाख्यातं भैरव्या वर्जितस्य तु ॥ १४२ ॥

अतः परं प्रवक्ष्यामि शक्तियागन्तु [क: -वन्तु] केवलम्।

उद्धृत्य या परे [क: परा] शक्ति विद्यायुक्तं तु कारयेत् ॥ १४३ ॥

क् १४६अ) मूर्तित्वेन प्रदातव्या [क: -स्या] शिवसक्तेन [क: -शक्तेन]
संशयः [क: संशय] ।

सा एव केवला देवि शिवशक्तिः प्रकीर्तितः ॥ १४४ ॥

ह्रस्वस्वरसमायुक्ता चतुर्दशमसंयुता [क: -तम्] ।

शिवशक्तैः समाख्यातं वक्राणाम् [क: वक्राशाम्]
पञ्चकं प्रिये ॥ १४५ ॥

स्वरूपा वस्थिता सा तु भवेत् नेत्रत्रयं पुनः ।

स्वराङ्गैस्तु समायुक्त [क: -युक्ता] अङ्गषट्काः प्रकीर्तिता ॥ १४६
॥

एत [क: एतद्] देव षडङ्गस्या विद्यायान्तु व्यवस्थिता ।

भोगस्थानेषु दातव्यं शिवशक्त्या महायमे ॥ १४७ ॥

शिवशक्त्या समाख्यातो यागोयं मुक्तिलक्षणः [क: -णेः] ।

अधुना संप्रवक्ष्यामि केवलस्य शिवस्य च ॥ १४८ ॥

स्मरणरूप स्थितो यं शिवं परमकारणम् ।

विद्यायान्त स्थितं शान्तं विद्यामूर्तिप्रकीर्तिता ॥ १४९ ॥

विद्या वियोजितस्यैव [क: -स्ये व] शिवमूर्तिः प्रकीर्तितः ।

ह्रस्वस्वरसमायुक्तः [क: -युक्ताः] पञ्चवक्त्रत्व ताङ्गतः ॥

१५० ॥

शक्तिश्चैव त्रिनेत्राणि वक्त्रे वक्त्रे त्रिकं त्रिकम् ।

स्वराङ्गैर्भेदिता [क: स्वराङ्गैभीदता] सा तु षडंङ्गं

परिकीर्तिताम् [क: -तम्] ॥ १५१ ॥

विद्यायान्त स्थितं यच्च [क: यत्व] भोगस्थानेषु दापयेत्।

एतद् यागत्रयं देवि परं यागजिगीषिणाम् ॥ १५२ ॥

समाख्यातं नसंदेहो ज्ञानमन्त्रफलः प्रदम्।

भुक्तेप्सुसाधको [क: भुक्तेप्स-] देवि मनसापिन चिन्तयेत् ॥ १५३ ॥

निस्कलं [क: निष्कल] सून्यभावस्थं [क: दूत्य- -स्थ]

यतोयुग्मं विवर्जितम्।

आदिमं व्यञ्जनानान्तु तथा चैवेक [क: चैव क] तृन्समः [क: -

मम्] ॥ १५४ ॥

अधस्तो तु प्रदातव्यम् आदिव्यं जनकस्य तु ।

एतत् संयोगमन्त्रं तु वर्गान्तं [क: चर्मान्तं]

लान्तसंज्ञकम् [क: लान्तं-] ॥ १५५ ॥

चतुर्थश्वरसंयुक्तं [क: -स्वर-] क्षीराब्धे [क: कृराङ्ग]

मन्त्रमुद्धृतम् ।

अमृताख्यं समाख्यातं क्षीरोदं वरवर्णिनि ॥ १५६ ॥

प्रोता धेयं [क: ध्येयं] प्रदातव्यं सर्वयागेषु [क: -योगेषु]

मन्त्रिणा ।

यतो क्षीरोदमध्यस्था [क: जीनोद-] कृतन्तु? देवता? सदा? ॥ १५७ ॥

प्रोतारूढं? न? सन्देहो? मज्यन्ति? वरमन्ति [क: च तमनि] च [क:

चम्] ।

ख् १११अ) क्षीरोदे पूजिता नित्यं ध्यानमार्गेण [क: -न]
मन्त्रिणा ॥ १५८ ॥

आयुर्वलं प्रयछन्ति जरासीघ्रं हरन्ति च ।

मृत्युं विनासमन्ती [क: -मन्ति] ह विधिना पूजिता प्रिये ॥ १५९ ॥

क्षीरोदस्य महादेवि मुद्रावन्धं [क: -वध] शृणुष्व मे ।

क् १४६ब्) अङ्गुल्यौ ग्रंथितौ [क: -ता] कृत्वा उभयोः [क: -यो]
करयोस्तथा ॥ १६० ॥

दक्षिणे [क: दक्षिण] मध्यमायान्तु वामतर्जनिकाग्रके ।

संस्लिष्टं [क: -तिस्तं] तु प्रकर्त्तव्यं तथा चैव पुनः क्रमात्
॥ १६१ ॥

मध्यमाग्रन्तु तत्रैव दक्षतर्जनिका [क: -तजेनिका] सृता [क: मृतान्] ।

ना [क: नास्ति] दक्षिणा नामिकाग्रन्तु [क: नानामि-] कनिष्टाग्रे [क: कनिष्टानामग्रे] तु नामके ॥ १६२ ॥

तथा स्लिष्टं [क: श्लिष्टं] प्रकर्त्तव्यं द्वितीयं च तथैव हि ।

वामदक्षिणयोरग्रं [क: -नग्रं] श्लिष्टं च कारयन्तथा ॥ १६३ ॥

अङ्गुष्टौ [क: -ष्टो] तु तथा कार्यौ [क: कार्या] अग्रे संश्लिष्टकौ पुनः ।

एषा मुद्रा समाख्याता क्षीरोदस्य वरानने ॥ १६४ ॥

वृषभस्य तथा प्रोक्तामियमेव न संशयः।

मृत्युञ्जयस्य मुद्रेयं तथा च परिकीर्तिता ॥ १६५॥

न्यासो [कः न्यासा] परिन्यसेन्नित्यं मस्तकेद्यस्तु साधकः [कः साधक]।

अचिरेणैव कालेन ममृत्युन्नामयिष्यति ॥ १६६॥

मन्त्रयुक्ता तथा देवि ज्ञात्वा कुर्वीत साधकः।

मृत्युंजयं तथा मन्त्रं सर्वयागेषु संस्थितम् [कः स-] ॥ १६७॥

प्रति प्रति तु यागेषु कथ्यमानन्निवोधमे [कः यथा-]।

हन्साख्यं केवलं बीजं षोडसश्वरसंयुतम् [कः

षोडशेश्वर- -त] ॥ १६८ ॥

स्मरणन्तु द्वितीयं स्यात् [क: स्या] पूर्वसूत्रेण [क: -श] चोदितम्।

अक्षरद्वयमेतद्धि [क: अक्षय-] युग्मे युग्मे महायमे ॥ १६९ ॥

प्रणववर्जिता विद्या आद्यन्ते पिहि संस्थितम्।

दर्भनं च तथा प्रोक्तं युग्मं [क: युग्म] युग्मं [क:
युग्मे] न संशयः ॥ १७० ॥

एतत् मृत्युञ्जयमन्त्रं विद्याभेदे व्यवस्थितम्।

मूलयागे चतुष्के च नवके पञ्चके [क: -कं] तथा ॥ १७१ ॥

षट्के च सप्तके चैव अष्टके नवके तथा।
[क: एतत् मृत्युञ्जयमन्त्रं विद्याभेदे व्यवस्थितम्।

मूलयागे चतुष्के च नवके पञ्चकं तथा ।

षट्के च सप्तक चैव अष्टके नवके तथा ।]

एतत् मृत्युञ्जयं देवि कथितं तवशोभते ॥ १७२ ॥

एकवीरादियोगेषु यदान्ता संस्थितं तथा ।

मूलविद्या महादेवि युग्मेन तेन दर्भिता ॥ १७३ ॥

मृत्युञ्जयं समाख्यातं सर्वयागेषु नान्यथा ।

एकवीरेषु सर्वेषु द्विके चैव द्विकैकके ॥ १७४ ॥

त्रिकेपि हि त्रिबीजान्ता अनेनैव [कः अने * व] विदर्भयेत् ।

मृत्युंजयं भवेद् देवि स्वयागेषु प्रति प्रति ॥ १७५ ॥

अशुभेषु च स्वप्नेषु उन्निमित्तेषु चैव हि [क: द्धि] ।

क् १४७अ) जपेत्? मृत्युञ्जयम् [क: मृत्युञ्जयत्] मन्त्रं [क: मन्त्र]
ज्ञात्वा च गुरुलाघवम् ॥ १७६ ॥

ख् १११ब्) प्रायस्चित्तन्तु [क: -श्चितं तु] कर्त्तव्यमनेनैव वरानने
।

मूचकं [क: -क] दुर्न्निमित्तं स्यात् संख्या ज्ञात्वा
यथार्थतः ॥ १७७ ॥

शान्तिकेष्वथ कर्मेषु जपेत् कुर्याद् विचक्षणः [क: -ण] ।

अस्यैव साधको देवि स्वयागोत्थास्य मन्त्रवित् ॥ १७८ ॥

प्रतिष्टायां तथोक्तानि [क: तथांकानि] प्रायश्चित्तानि कारयेत् ।

अनेनैव तु कार्याणि ज्ञात्वा च गुरुलाघवम् ॥ १७९॥

कालमृत्युंजयं यागं प्रति तं चासनादिकम्।

अनेनैव तु युग्मेन ईष्टायागञ्जपेत् [क: -याग ज-] ततः ॥ १८० ॥

कल्पोक्तविधिना देवि ततो मृत्युञ्जयिष्यति।

व्याधिग्रस्तो यदा मन्त्री उपसर्गेण केनचित् ॥ १८१ ॥

मृत्युञ्जय जपेत् मन्त्री सर्वकर्मज्ञ साधकः [क: साधके]।

समयलंघण [क: -श] भूयिष्टे [क: -ष्ट] आपदा या उपस्थिते ॥
१८२ ॥

अनेन जाप्यमानेन विद्रवन्ति ततो यथा।

आदित्यरस्मयत्सृष्टो [क: -त्येनस्मयेन्सृष्तो] नात्र कार्य [क: कार्या] विचारणात् ॥ १८३ ॥

इति पिचुमते मृत्युञ्जयविधिः [क: मृत्युञ्जय * *] मन्त्रोधारपटलः [क: -* विधिः] त्रयोविन्सतिमः [क: त्रयोविशति पटलः] ॥ २३ ॥

चतुर्विंशतिमः पटलः

अतः परं प्रवक्ष्यामि गुह्य चक्रामृतोद्भवम् ।

तालमार्ग स्थितस्याथ साधकस्य वरानने ॥ १ ॥

अष्टारं चक्रमालिख्य पूर्वारे तु नपुंसकम् ।

द्वितीयदक्षिणे चैव तृतीयं पश्चिमे तथा ॥ २ ॥

उत्तरे च चतुर्थं [कः चतुर्थ] स्याद् [कः स्या] अग्नेये आदिमं [कः - म] श्वरम् ।

द्वितीये नैरिते चैव वायव्ये च तृतीयकम् ॥ ३ ॥

इशाने च चतुर्थं [कः चतुर्थ] स्यात् पूर्वारे [कः पूर्वोरे] तु नपुन्सकम् ।

वाह्यत्र [कः वाज्यत] पञ्चमं लिख्य शेषाः सर्वक्रमा स्थिताः ॥ ४ ॥

कादिवर्गविभागेन द्वौ द्वौ वर्णौ [कः वर्णा] यथाक्रमम् ।

पूर्व [कः पूर्वं] तु नाडीसञ्चारे द्वयोन्नाडीमुखे स्थितौ ॥ ५ ॥

धर्मराजं तथान्तस्थं नाभिमध्ये तु विन्यसेत्।

ज्ञानशक्तिस्तयोरूर्द्ध्वं [क: -रूर्ध्वेन्] देया चक्राधिदेवता ॥
६॥

परितोरेखया [क: -रखया] चक्र [क: चक्रं] वेष्टयित्वा
यथाक्रमम्।

पूर्वारका दकारादि मातृका विन्यसेद्बुधः ॥ ७॥

क् १४७ब्] गुह्यामृतविभागे तु शक्तिचक्रं [क: -चक्र] प्रकीर्तितम्
[क: -ता]।

निश्चेष्टां [क: टा] कारये छक्तिं [क: छक्ति] क्षरे च
पदविह्वलाम् [क: मेद-] ॥ ८॥

क्षोभकाले तु न्यस्तव्यं शक्तिपीठे महायमे।

अन्यश्चापि प्रयोक्तव्यं [क: प्रयोक्तव्य] क्षोभयेत् [क: -यत्]
कौतुकेन तु ॥ ९॥

रजस्वला [क: -रा] तु या शक्ति भवन्ति रिभवोद्भवेत्।

निसायान्तु निराहारः [क: -र] स्वयागं कारयेद्बुधः [क:
काम्येद्बुधः] ॥ १० ॥

ख् ११२अ) तर्पणं तु ततः कृत्वा क्षोभमन्त्री समाचरेत्।

क्षोभयित्वा ततो शक्तिं योनिं प्रक्षालयेत् ततः ॥ ११ ॥

क्षालनं [क: क्षालन] भाण्डके [क: भाणुके] गृह्ण [क: गृह्यत्]
असेषं [क: मशेष] रक्तं [क: रक्त] संयुतम् [क: -त]।

पूर्वोक्तेन विधानेन चरुकं श्रावयेत् ततः ॥ १२ ॥

[क: क्षालने भातु के गृह्यत्मशेषं रक्तसंयुत ।

पूर्वोक्ते न विधानेन चरुकं श्रावयं ततः ।]

तेन द्रव्येणमन्त्रज्ञो ज्ञानोघे [क: जानाद्ये] पूजितेन तु ।

ते नैव तु विधानेन [क: -ने] त्रिभागं कारयेद्बुधः [क:
काम्येद्बुधः] ॥ १३ ॥

देव्याग्नौ [क: देव्याग्रौ] तु ततो दत्वाद् [क: दत्वान्] नैवेद्यानि [क:
नैव-] तु दापयेत् ।

नित्यन्नैमित्तिकं [क: -कै] कृत्वा चरुकं [क: चक्रकं] भक्षयेत्
ततः ॥ १४ ॥

देवीनामग्रतश्चैव सहसक्त्या तथैव च ।

प्रासयीतचरुं दिव्यं [क: दिव्य] पूजितं विमलात्मके ॥ १५ ॥

अनेनैव विधानेन त्रिरात्रं कारयेद् वुधः।

अप्रवासी महासत्वः सहशक्त्या महाधिपे [कः -पः] ॥ १६ ॥

जपयुक्तौ जपेत् मन्त्री प्रातमध्याह्निकोत्तरम् [कः -कान्तरम्]।

शास्त्रसङ्गेन [कः -सङ्गन] वा संस्थो [कः नास्ति] अथवा [कः नास्ति] समाधिषु [कः ममाधिषु] स्थिता ॥ १७ ॥

दिवास्थित्वा महादेवि रात्रौ च श्रावयेच्चरुम्।

वहिनिष्क्रम्य रात्रौ तु त्रिरात्रं कल्पितं [कः कल्पतं] व्रजेत् ॥ १८ ॥

समयी प्रेमयेत् कश्चिन् [कः कश्चि] नैवेद्यादि [कः त्रै-] दिनत्रयम्।

त्रिरात्रे तु ततः पूर्णे निष्कामये [क: -य] तदा तु तौ ॥ १९॥

गुह्यामृतचरुं दिव्यमप्रकास्यो महात्मभिः [क: -भि]।

सिद्धामृतविभागेन कथितं तव सोभने [क: शोभने] ॥ २० ॥

विघ्नतौ [क: विघ्नुत्यै] तु सदा वंद्या [क: वंद्यौ] सततं
साधकेन तु।

विघ्नतौ [क: विघ्नूत्रौ] नात्र संदेहं ज्ञानोघं [क:
ज्ञानायो] पूजितस्य या ॥ २१ ॥

अवस्यके [क: अवस्यके] सदावन्दे [क: -वन्द] नात्र कार्य
विचारणात्।

प्रमादावन्दता [क: प्रसादा-] भावे प्रायश्चित्तं समाचरेत् ॥
२२ ॥

स्वमन्त्रस्य जपेद् देवि शतमष्टोत्तरस्य तु ।

क् १४८अ) आत्मीयौ [क: आत्मोयौ] तु महादेवि पवित्रः साधकोत्तमः
[क: -म] ॥ २३ ॥

नैवेद्यं दापयेन् [क: -यन्] नित्यं आह्निकेभ्यो नचान्यथा ।

पूर्वमध्यं [क: -मध्येन्] दिनैह्नेपि [क: दिनह्नेपि]
त्रयोवह्निक्रतुः [क: -तु] स्मृतम् ॥ २४ ॥

अवश्यम् [क: अवस्यम्] एव दातव्यं अथवा सर्वकालिकः? [क: -क] ।

अर्घपात्रे तु सूत्रस्यात् [क: -स्या] कल्पयेद् अह्निकत्रयम् [क: दह्निक-
] ॥ २५ ॥

सर्वकालं [क: सर्वाकाल] महादेवि उदकेन समन्वितम् [क: -तः] ।

तदापयेद् यदात्मन्त्री [क: यथात्-] प्रमादा कार्यमोहितम् ॥ २६ ॥

अर्घदानं तथा चैव प्रायश्चितं समाचरेत् ।

अष्टोत्तरशतं कुर्याद् अदाते उभयोरपि ॥ २७ ॥

निर्विकल्पेन कर्त्तव्यं कल्पोक्तं [क: -नं] तु महामति [क: -मते] ।

नार्चये तु यदा मोहा दृष्टज्ञानञ्च साधकः [क: -क] ॥ २८ ॥

ख् ११२ब्) प्रायश्चित्तं [क: -त्त] तदा कुर्याद् अष्टोत्तरशतं
वुधः ।

योव्यतिक्रमते देवि दशसाहस्त्रकं जपः ॥ २९ ॥

प्रायश्चितं प्रकर्त्तव्यं विधिनानेन साधकः ।

तपाभियुक्तो [क: तपो-] मन्त्रज्ञो निर्विकल्पं [क: नि-] समाचरेत् ॥ ३० ॥

कल्पोक्त [क: कल्पाक्त] सर्वकर्माणि [क: मथ-] ध्यानजाप्य विधिस्तथा ।

गुरुशक्ति प्रदा गछे कल्पोक्तन्तु समाचरेत् ॥ ३१ ॥

कर्म कार्योषु [क: कार्यो *] * *? [क: पराधीन] आदेशेन [क: -श्यन] गुरोस्तथा ।

तत्रापि क्षोभकर्त्तव्या निराचारपदो यदा ॥ ३२ ॥

माता च भगिनी पूत्रि भार्या वै दूतयः [क: द्वष्टय] स्मृता ।

दातव्यन् [क: -व्यत्] तन्त्रसद्भावं [क: -व] नान्यथा तु

कदाचनः [क: -न] ॥ ३३ ॥

स्वशक्ति साधकस्याथ अधिकारपदे स्थिताः [क: -ता] ।

अविकल्पकरानित्यं ज्ञानतत्त्वार्थभाविता ॥ ३४ ॥

नान्यं वै तरणे चैव स्वामिवत् सर्वभावतः [क: -त] ।

भ्रातरं पितरं [क: -र] पुत्रं पतिम् वा पश्यते सदा ॥ ३५ ॥

तस्ये [क: तस्य] मोहिविधिः [क: -विधि] प्रोक्ता [क: प्रोक्तो]
सूत्रविष्टादिलक्षणः [क: -णा] ।

यस्यमन्त्रं ददे नित्यं ज्ञानं [क: ज्ञान] सास्त्रं [क:
शास्त्रं] च सूव्रते ॥ ३६ ॥

तस्येदं [क: तस्यद] हि विधिः प्रोक्ते [क: प्रोक्ता] अधिकारी यस्य

नास्तिवेः ।

गुह्यामृतं [कः -त] समाख्यातं [कः -त] गुह्ययागं

प्रकल्पयेत् ॥ ३७ ॥

वन्दनः प्रासनञ्चैव कर्त्तव्यं साधकेन तु ।

शक्त्यापि साधकी यौ [कः या] तु प्रासितव्यस्तथैव हि ॥ ३८ ॥

वन्दनीयस्तथाश्चैव निर्विकल्पेन चेतसा ।

क् १४८ब्) अविधिना तु [कः नास्ति] यदा कुर्यात् प्रायश्चितं समाचरेत्

॥ ३९ ॥

दशसाहस्त्रकं जाप्य ततो दूति [कः नास्ति] विसुध्यति ।

विद्मुत्रौ [कः -त्रा] तु सदासस्तो [कः -सस्थौ] ननिंद्याद् [कः

नर्विद्या] गन्धदर्शने ॥ ४० ॥

पर्शने च तथा देवि अभिन्नं दोसदेव हि ।

विकल्पे कुरुते मोहान् नसिद्धिफलभाग्भवेत् ॥ ४१ ॥

नरके प्रविपच्यंते प्राणैश्चैव वियुज्यते ।

स्वकीयो परकीयो वा पवित्रौ नविकल्पयेत् [क: र-] ॥ ४२ ॥

गोमये [क: -य] चन्दने नैव भक्ष्यभोज्यादिभिः सहः [क: सह] ।

समदृष्टिमसंदिग्धे [क: -संदिश्वे] सदासुद्धिविलक्षयेत् ॥ ४३ ॥

आत्मानं साधकोद् देवि तदा द्रव्यारुहो [क: -भा] भवेत् ।

दानवन्दन भक्षे च नात्र कार्य [क: -कार्या] विचारणा [क: -

णात्] ॥ ४४ ॥

परविष्टौ न वै वद्यौ [क: वद्यौ] न च प्रास्यैकदाचनः [क: -
न] ।

सदाभक्षादिकं कुर्या सदातौन विकल्पयेत् ॥ ४५ ॥

स्पर्शने तु अङ्गुष्टौ स्याद् गोमयाद् [क: -गामयाद्] इव नित्यसः
[क: नित्यस] ।

रथ्या धूलि [क: -रि] पवित्राणां स्पर्शने भोगयोषिताम् [क: -तम्]
॥ ४६ ॥

ख् ११३अ) निर्विकल्पोभवेन्नित्यं शुद्धदेहस्तु [क: -देहं तु]
साधकः ।

निराचार पदावस्थो [क: -स्था] यदा पस्यति नित्यशः ॥ ४७ ॥

मदीय वेष्टितां सर्वां हूफकान्तं [क: -कान्त]
विजृम्भिताम् [क: -ता] ।

तृप्यन्ते तु समोत्थैस्तु परमामृत सम्भवै ॥ ४८ ॥

प्रीणिता [क: प्रीशिता] शक्तियुग्माश्च मया चैव [क: मयाश्चैव]
प्रचोदिता ।

सर्वकार्यक्षमा चैव यदा पश्यति साधकः ॥ ४९ ॥

तदा [क: सदा] सर्वाणि कर्माणि कुरुते नात्र संशयः ।

नद्वितीयं यदा कश्चित् यस्यते [क: -श्यते] शुद्धमानसः ॥ ५० ॥

निर्द्वन्द्वो [क: निर्द्वनो] ईप्सितां चैव तदा सिद्धि प्रजायते [क:
प्रदायते] ।

याज्योहं [क: -ज्याहं] याजकश्चाहं [क: -यातथाश्चाहं]

शृष्टिभेद व्यवस्थिताः [क: -ता] ॥ ५१ ॥

पालयामि [क: पार-] जगत्सर्वं तदा मन्त्री प्रसिद्धयति ।

आत्मदूती सदासस्ता ईदृछा ईवशिवस्य च ॥ ५२ ॥

सर्वकार्यक्षमाश्चैव जायते नात्र संशयः ।

तद्रय्वं सर्वथा सिद्धि सर्वसिद्धिकरं महत् ॥ ५३ ॥

परामृतं यथा शक्ते [क: शक्ति] सर्वसंदोहलक्षणम् ।

गुह्यामृतविभागं तु सारात्सारतरम् [क: -सारतरस्] महत् ॥ ५४

॥

कथितन्तु [क: ककथितन्तु] मयातुभ्यं नान्यः [क: नान्य]
परतरं [क: -तं] यतः ।

क् १४९अ) नानेन रहितासिद्धिर्जायते सर्वयोगिना ॥ ५५ ॥

गोपितव्यं [क: -व्य] प्रयत्नेन एवं वै भैरवो [क: -वा] ब्रवीत् ।

मुक्तिमुक्ता महादेवि मिश्राशुद्धि [क: मिश्रा-] विकल्पिताम् [क: -
ते] ॥ ५६ ॥

अणिमादि गुणैस्वर्यं [क: -स्वर्य] नान्यथान्यप्नुयात् क्वचित् ।

अशुद्धवादिनोयोपि [क: -ताया पि] भावशुद्धिः पुरः [क: पुर]
सरम् ॥ ५७ ॥

लभिष्यन्ति न संदेहो अणिमादि गुणोदयम् [क: गुणा-] ।

कुलक्रमानुसारेण [क: -णुसारेण] परमामृत पूजनैः ॥ ५८ ॥

योगिन्यो [क: -न्या] योगसम्यन् नासास्वतं [क: नासाश्वरतं]
सिद्धिमुत्तमा [क: -म] ।

मातासिद्धि प्रदा प्रोक्ता भगिनी च तथैव च ॥ ५९ ॥

पुत्रि चैव निजाशक्ति सर्वसिद्धि प्रदायिका ।

तत्काल व्यतिरेकेन [क: -रक्तेन] पुनस्त्रोभोनसंभजेत् ॥ ६० ॥

गर्भिणि नैव क्षोभीत द्रव्यार्थं साधकोत्तमः ।

भार्यामाह्निकवर्ज्या [क: -वह्या] तु गर्भिणीम् [क: -नीम्] अपि
क्षोभयेत् ॥ ६१ ॥

भगिणी [क: -नी] वाथ पुत्रीम् वा नकुर्या कुरुते यदा ।

देवागारं ततो विश्य [क: विश्व] मासंतस्यात् [क: मासतस्यात्]
प्रकल्पयेत् ॥ ६२ ॥

देहे भूम्यान्ततो पीठे ततो योग्यन्तु कारयेत्।

वहिर्देव गृहे वापि न्यासं पूर्वसमारभेत् ॥ ६३ ॥

योगोयं योगद्रव्यार्थे एवं संकल्पसाधकः।

ख् ११३ब्] सामान्यकल्पमायान्तु प्रायश्चित्तं [क: -श्चित]
समाचरेत् ॥ ६४ ॥

यथातन्तु प्रवेसाद् वा क्षोभ्ययोगा नवै भवेत्।

संघर्षस्त्विह [क: स-] कर्त्तव्या क्षोभोभवतु भावना ॥ ६५ ॥

वुहि पृष्य? यदा मन्त्री क्षुभते? पीठसन्निधौ।

तद्रव्यं सर्वकर्मासु योक्तव्यमविसङ्किना [क: -सत्तिना] ॥ ६६ ॥

तक्षुभत [क: -वे] यदा [क: यथा] मन्त्री प्रायश्चित्तं यथोदितम्
[क: यथो भवेत्]।

संघर्षचुम्वनाद्यन्तु साधको नैव मोचयेत् ॥ ६७ ॥

शक्त्याधिकारयुक्ताय यावक्षोभरुहो भवेत्।

भगिनी पुत्रिणी [क: -णि] भार्या आद्या काले विधिः [क: विधि]
स्मृतः ॥ ६८ ॥

मातामही [क: मेनामहि] पितामही [क: -हि] तथा
मातृम्वमामपि।

पितृभ्रातृस्तथा भार्या भ्रातुभार्यास्तथैव [क: -भ्रातास्-] च

॥ ६९ ॥

भाग्नेयी तु श्रूषा चैव पौतृदोहि तृकन्तथा ।

क् १४९ब्) सा तु नस्य तथा पितृ मातृस्वमा तथा पितृन् ॥ ७० ॥

भ्राता तथा पिता वापि पुतृभ्रातास्तथा पिवा ।

एषाम् आदि तथा [क: ताथा] चान्यो शक्तयश्चैव [क:

शक्तियश्चैव] कारयेत् ॥ ७१ ॥

मातुः स्वपत्निमाते वा शुक्त्या वै कारयेद्बुधः ।

अन्यथा कुरुते मोहात् प्रायश्चित्तं समाचरेत् ॥ ७२ ॥

मालिदानं नतासाम् [क: न-] वै कारयेत् मनसा अपि ।

चोदयित्वा तु लोभेन मोक्षयित्वा [क: योजयित्वा] भजो [क: भजा]
यथा ॥ ७३ ॥

कारयेत् मात्मसामान्यां प्रायश्चित्तं [क: -त्त] समाचरेत् ।

अनाधिकारिणी [क: -णि] वापि भजते काम मोहिताः [क: -ता] ॥ ७४ ॥

प्रायश्चित्तं भवे तस्य चोदितं सक्ति कारणे ।

पूर्वाधिकारिणी वापि नगछेत् साधकोत्तमः ॥ ७५ ॥

आसां [क: आसा] मध्ये कदाचित् स्याद् [क: स्या] योगिनीशक्ति चोदितः
।

इछते साधकं देवि भोक्तव्या मेवशङ्किते ॥ ७६ ॥

देवागारे वहिर्वापि गुप्तदेशे [क: -येशे] विधानवित्।

योगं कृत्वा यथा न्यायं हृद्यागादि पुरस्सराम् ॥ ७७ ॥

तेनैव क्रमयोगेन क्षभयेत् साधकोत्तमः।

संक्षेपेनाथ वा कुर्यात् स्वल्पयागं स्वकं वुधः ॥ ७८ ॥

सकृदुच्चार्य मन्त्रम् [क: मन्त्र] वा भूमौ पुष्पाणि विन्यसेत्।

ते नैव क्रमयोगेन क्षोभन्तस्याः समाचरेत् ॥ ७९ ॥

द्रव्याकार्यम् तथा कृत्वा निर्विकल्प मनः [क: मन] स्थितः।

अनेन क्रमयोगेन योगिन्याक्षोभयेत् सदा ॥ ८० ॥

व्यतिक्रमेत तस्ता सामन्यमामपि साधकः।

योगिनीनां महादेवि प्रायश्चित्तं समाचरेत् ॥ ८१ ॥

ख् ११४अ) समया ज्ञानकर्त्तव्यम् [क: -व्य] एष [क: नास्ति] एवविधिः [क: सम-] क्रमात्।

कदाचिद्योगिनी कश्चिद् व्याजेनैव प्रलोभयेत् [क: -वेत्]।

अनेन क्रमयोगेन सिद्धिहानिर्न्नजायते [क: -हानिन्न-] ॥ ८२ ॥

उत्कर्षञ्चैव जपेत [क: जाय्यंत] यदा सा योगिनी भवेत्।

नाधिकारी विधानेपि वहिस्तत्रापि कारयेत् ॥ ८३ ॥

तस्या न्यासं महाप्राज्ञो तावत् कालविचक्षणः।

हृद्यागमात्मनः कृत्वा क्षोभं तस्य समाचरेत् ॥ ८४ ॥

पुष्पाणि भूम्यां प्रक्षिष्यविनियोगन्तु कारयेत्।

क् १५०अ) यथा न जायते सातु तथा द्रव्यविनिर्णयम् ॥ ८५॥

आत्मानन्तु हितार्थाय देवतार्थन्तु साधकः।

अदिष्टोनाथ वा दिष्टा ज्ञात्वा गुप्ताधिकारिणीम् ॥ ८६॥

शक्त्या तु कारयेद् [क: क्तारयेद्] देवि नित्यमेव हि साधकः।

पक्षम् [क: पक्ष] मासं रितुं [क: निरं] वापि षट्मास [क: षद् -

] सव्दमेव च ॥ ८७॥

अगन्तुनाम् विधिह्येषा [क: -ज्येषा] शक्तिनां तालकस्य तु।

तालकः शक्तिहीनस्तु [क: -न्तु] देवकर्मन् [क: -कर्म] नकारयेत् ॥

८८ ॥

अप्राप्तौ [क: आप्राप्तौ] तु महादेवि देवं विज्ञाप्य साधकः ।

प्रायश्चितं पुनः कृत्वा ततः शक्तिस्य रिग्रहत [क: निग्रहम्] ॥
८९ ॥

नान्यसङ्गमसञ्चारां [क: -नां] शक्तिं [क: शक्ति] कुर्याद्
[क: कुर्या] विचक्षणः ।

अधिकारी भवेद् यस्य नभर्तासङ्ग [क: रभर्ता] सङ्गमाचरेत्
॥ ९० ॥

साधकस्य न दुष्टा तु सा शक्तिः कालमागता ।

पिता च भगिनी स्वामी जामाता वामहा यमे ॥ ९१ ॥

तत् संपर्कान दुष्येत अन्य संपर्कजे पिवा ।

उत्कृष्टस्तु सदा देया स्वसक्त्या [क: -सेक्त्या] साधकेन तु [क: तुः] ॥ ९२ ॥

आभ्या [क: आगा] गतस्य देवेशि देवकर्मरतस्य च ।

प्रार्थिते न स्वयम्वापि यागकाले न संशयः ॥ ९३ ॥

सामान्यस्यापि [क: सामानस्यापि] दातव्या स्रोतशुद्धि प्रपालना ।

स्वसिष्यायि हि दातव्या आचार्येण [क: आचार्यश] महायमे [क: -ते] ॥ ९४ ॥

स्वयागे शिष्ययागे वा निर्विकल्पे न चेतसा ।

स्वतन्तु समयो ह्येष [क: -याज्येष] भैरवेण [क: -न] प्रभाषिते ॥ ९५ ॥

कर्त्तव्या सिद्धिकामेण ईषाया [क: दुसाया] वर्जितेन तु ।

तत्कलन्तु महादेवि प्रलोभं [क: प्रलाभं] नैव कारयेत् [क: कास्येत्] ॥ ९६ ॥

यस्य शक्ति समर्प्पित [क: समाप्पीतं] तेन देवि न संशयः ।

तालकस्तु [क: -न्तु] द्विधा प्रोक्ता एकशक्तिपरिग्रहम् [क: -ग्रह] ॥ ९७ ॥

बाहुशक्ति परिग्राही अथवा जायते सदा ।

नाक्रमेत् [क: -क्रमे] समयज्ञानी तस्यामोहिविधिः [क: -विधि] स्मृतः [क: स्मृत] ॥ ९८ ॥

ख् ११४ब्) दूतीमुक्तान चान्येत्र नगछेत् कासमाहितः [क: -त] ।

एक शक्ति परिग्राही एषा वै मृमयः स्मृतः ॥ ९९ ॥

तालकस्य महादेवि द्विविधस्यापि सोभने ।

तिथौ तु गमने नैव गृह्यते शक्ति पालना ॥ १०० ॥

क् १५०ब्) किंचित् मात्रं [क: पात्रं] भवेत् तस्य प्रायश्चित्तं
यथोदितम् ।

मिश्रकः पूर्वकल्पानि [क: -णि] आकृष्या कृष्य कारयेत् ॥ १०१ ॥

तावन् मात्रविधस्तस्य कुर्याच्छक्ति [क: -शक्ति] परिग्रहः ।

तत्काल व्यतिरेकेन मिश्रको नैव कामवत् ॥ १०२ ॥

शक्तिस्तु [क: शक्तिस्क] गमनं [क: ज्यै] कुर्यात्तीर्थे चैव
विशेषेतः ।

चतुर्थी पञ्चमी चैव अष्टमी नवमी तथा ॥ १०३ ॥

एकादशी तथा चैव भूतरात्रि तथैव च ।

एतास्तु तिथयः प्रोक्तं तन्त्रविमल संज्ञके [क: -क] ॥ १०४ ॥

आगन्तिका तिथौ ग्राह्या समया यागकर्मणि ।

तृतीयायां व्यतीतायां यागतिः [क: -ति] माप्रसस्यते ॥ १०५ ॥

चतुर्थ्यायां तथा चैव सप्तम्यायां तथैव च ।

अष्टम्याया । म् तथा चैव दशम्यां च तथा पुनः ॥ १०६ ॥

त्रयोदस्यां [क: -श्या] तथा चैव एताः सस्ताः [क: सस्ता] सदा पृये।

यागकालेपि देवेशि सर्वकामार्थ साधिकाः [क: सोधिता] ॥ १०७ ॥

एतेषु समयः कार्यो [क: कार्या] यागं चैव विशेषतः।

साधकैस्तु महादेवि मिश्रकेन विशेषेतः [क: -त] ॥ १०८ ॥
[क: साधकैस्तु महादेवि मिश्रके नविशेषतः।

साधकेस्तु महादेवि मिश्रके नविशेषतः।]

तिथिष्वेताषु देवेसि मिश्रके न सदैव [क: सदेव] हि।

संयमस्तु प्रकर्त्तव्यं सिद्धिकामेन निश्चयात् ॥ १०९ ॥

ब्रह्मचर्यस्य [क: ब्रह्मचर्ज्यस्य] भङ्गस्तु एतेश्चेव प्रजायते।

कल्पोक्तं तु पुनः कुर्या मिश्रकेन न संशयः ॥ ११० ॥

एकशक्तिपरिग्राही [क: -हि] आशुः सिध्यति तालकः।

दुश्वरं [क: इश्वरं] भैरवस्यापि एकशक्ति परिग्रहम् ॥ १११ ॥

स्वशक्तिन्तु [क: -स्तु] परित्यज्य नान्याः [क: नान्या] कुर्याः [क: कुर्या] कदाचनः [क: -न]।

मनसापि हि देवेसि [क: देविशि] एकशक्ति परिग्रहे ॥ ११२ ॥

योगिन्यायोगसिद्धास्तु [क: -न्तु] यदा ता इच्छयन्ति [क: इछायन्ति] हि।

ताभिः [क: ताहि] सार्द्धं [क: सार्ध] नकर्त्तव्यं सङ्गा वै सिद्धिमिछता ॥ ११३ ॥

व्यतिक्रमेपि कर्त्तव्यं प्रायश्चित्तं विजानता ।

व्यतिक्रमोपि कर्त्तव्या नात्र संगं समाचरेत् ॥ ११४ ॥

प्रलाभयन्ति चैतास्तु कदाचिद् विघ्नप्रेरिता ।

दुस्वरं [क: इश्वरं] भैरवस्यापि एकशक्ति परिग्रहः [क: -ह] ॥ ११५ ॥

क् १५१अ) ख् ११५अ) वहुशक्ति परिग्राहि सिध्यते [क: सिद्धयंते] कालगोचरात् [क: -रेत्] ।

मुखो पाया प्रकारेण नानाशक्ति विजृम्भकः [क: विजुम्भकः] ॥ ११६ ॥

इप्सितां [क: -ता] लभते सिद्धिं [क: सिद्धि] समयापालन [क: -* लन] तत् परः ।

वहवः [क: -व] शक्तयो यस्य परिपाद्या समाचरेत् ॥ ११७ ॥

क्षोभं तालकमार्गे तु आह्विके [क: आक्षिके] चाह्विके तथा ।

कल्पोक्त [क: कल्पाक्त] जपकाले तु यदा योनि प्रजायते ॥ ११८ ॥

रजस्वला [क: -ना] तथा चैव कल्पोक्तन्तु समाचरेत् ।

नचरुं साधयेत् तत्र गुह्यामृत विधिः प्रति ॥ ११९ ॥

कल्पकाले यदाशक्ति आवस्येक समुत्सुका ।

निजं तत्रैव कारीत आगन्तुकं [क: -क] नकारयेत् [क: नकारीत] ॥ १२० ॥

[क: आगन्तुकं न कारयेत् ।]

वहिसौ चन्तु कृत्वा तु न्यासं तत्र समाचरेत्।

तस्मिन्नेवासने स्थाप्य तथैव जप [कः जय] माचरेत् ॥ १२१ ॥

परिपाट्या [कः -पाट्या] यदा मन्त्री स्तोभञ्चैव [कः क्षोभं चैव] समाचरेत्।

दशसाहस्त्रकं देवि प्रायश्चित्तं समाचरेत् ॥ १२२ ॥

जपयाग [कः -मागे] रतो नित्यं पश्चाल्लभन तत्पराः [कः -रा]।

इप्सितां लभते कामां समयापाल तत्परः ॥ १२३ ॥

रहस्यं परमं ह्येतद् [कः ज्येतद्] गुहितव्यं प्रयत्नतः।

आदेशेन वैनादेवि कथ्यं यस्य कस्यचित् ॥ १२४ ॥

त्वया पूर्वं [कः पूर्व] समाख्यातं परिजनस्य निजस्य तु।

एतज्ञानं महादेवि तेन [कः तन] तप्ता मया तदा ॥ १२५॥

आदेशेन विनावश्यं [कः -वश्य] नकथ्यं केनचित् कचित्।

सिद्धे नापि हि [कः सि] देवेसि [कः -शि] नात्र कार्यं [कः -कार्या] विचारणात् ॥ १२६॥

सिद्धस्तु [कः -न्तु] भवते तस्य असिद्धो मृयते ध्रुवं।

कुक्षिते नाथवा देवि सिद्धिन्तस्य न जायते ॥ १२७॥

अपिकोटिभिवर्षाणां [कः -णा] अभियुक्तो भवेद्यदि।

मृयते च तत शीघ्रं [कः शीघ्रं] नरकेपि विपच्यते ॥ १२८॥

सकृत् कुत्सितके चैव प्रायश्चित्तं समाचरेत् ।

लक्षपादं जपेत् मन्त्री भाव [कः च] सुद्धो [कः सुद्धि] यदा
भवेत् ॥ १२९ ॥

गुह्यामृतपवित्रे तु कथितास्तव शोभने [कः –वे] ।

अधुना संप्रवक्ष्यामि आसवानान्तु लक्षणम् ॥ १३० ॥

अभिष्टं वं च वै तेषां द्रव्याणां चैव कल्पना ।

क् १५१ब्) यैस्तु सिद्धानि ह्यानि आसवानि भवन्ति हि ॥ १३१ ॥

सुरापिस्त्रिविधाप्रोक्ता गौडीपैष्टी [कः गौत्रीचैष्टी] च माधवी ।

एकैका वहुभेदान्तु नामतः [कः नामते] कर्मतः [कः कल्पत]
शृणु ॥ १३२ ॥

गोत्रक इच्छडश्चैव [क: इक्तडश्चैव] तथा डभडको [क:
डभद्रको] परः ।

मासिको [क: सोसिको] पू?मिकाश्चैव गौडिभेदा प्रकीर्तिताः ॥ १३३
॥

ख् ११५ब्) प्रसन्ना वल्कली [क: वल्कीली] चैव तथाकाष्टसुरापरा ।

लोध्रिका च तथा प्रोक्ता मूलावर्ता तथा पराः [क: परा] ॥ १३४ ॥

तथाजीरावली चैव भण्डोपरिकरास्तथा ।

तथा कौद्रविका चैव यैष्टाह्येताः [क: यैस्ताज्येताः]
प्रकीर्तिताः [क: -ता] ॥ १३५ ॥

द्रव्याणामां? प्रवक्ष्यामि यथा ह्येता [क: ज्येता] भवन्ति हि ।

तृकटुकं [क: कवूकं] जीरकं चैव चव्यवल्कलमेव? च ॥ १३६

॥

पत्रकञ्च [क: पत्रक च] तथा ह्येला [क: ज्येला] त्वचामान्सी [क:

त्वयामान्सी] तथैव च।

ग्रन्थिपर्णैन्तथा चैव समभागानि कारयेत् ॥ १३७ ॥

सर्वेषामथद्रव्याणां अर्द्धेन [क: अधोन] तु [क: त]

गुडन्तथा।

गुडवकानि [क: गुभव-] द्रव्यानि पीष्टाविन्सान्सकेन तु ॥ १३८ ॥

दातव्यानि नसन्देहः प्रसन्नां [क: प्रसान्नां] या न

संशयः।

घटे [क: घट] घटे तथा? वस्य? प्रस्थं प्रस्थं [क:
प्रस्थं] तु दापदायेत् ॥ १३९॥

मालिपिष्टस्य देवेसि षष्टिकानामथापिवा।

प्रस्थस्य लक्षणम् वक्ष्ये प्रमाणं द्वादशाङ्गुलम् ॥ १४० ॥

कृत्वा तु दण्डकं देवि प्रस्थास्याभ्यान्तरे ततः।

कोणे [क: कोशे] तु स्थापयेच्चैव द्वितीये [क: -या] प्रस्थकाग्रके ॥
१४१ ॥

भ्रामयीत चतुर्दिक्षु प्रमाणं प्रस्थकस्य तु।

द्वादशैस्तु [क: द्वादश्रेस्तु] तथा प्रस्थै घटकस्य [क:
घटेकस्य] प्रकीर्तितः ॥ १४२ ॥

अनेन तु प्रमाणेन सधानं? कारयेत्? ततः।

प्रसन्ना यास्समाख्याता एवं संधानको विधिः ॥ १४३॥

षड्मासा जायते अत्र सन्धिता नात्र संशयः।

वत्सरं क्षमते ह्येषा [क: ज्येषा] अविनष्टो महायमे ॥ १४४॥

एते तु द्विगुणं द्रव्यां [क: द्रव्या] पादेन [क: यांदेन] तु
गुडः [क: गुत्र] स्मृतः।

दसांसेन [क: दशांशेन] तु पृष्टस्य द्रव्यान्येतानिनिक् ।इपेत् [क:
द्रव्यान्येतानिनिक्षेपेत्] ॥ १४५॥

उदकस्य [क: उदकस्या] समाख्याता [क: माख्योता] नात्र
कार्याद् [क: -कार्या] विचारणात्।

द्रव्यं तु मोदकञ्चैव [क: साधदकं चैव]

भण्डमर्धतृतस्तथा [क: भशु-] ॥ १४६ ॥

क् १५२अ) कर्त्तव्यन्तु [क: -स्तु] ततो देवि स्थित्वा वै दिवसत्रयम् ।

उदकेन तु वै भान्तं [क: भाण्डं] विन्दता? [क: विशृतांत्]

संधकः [क: स-] पुनः ॥ १४७ ॥

ढक्कयित्या [क: टर्क-] ततो लेप्य [क: सेव्य] कर्दमेन महायमे

[क: -ममे] ।

वत्सरेण ततो घाट्या मुखा दा भवते त्वियम् [क: धिपम्] ॥ १४८ ॥

जीरावली [क: क्षी-] समाख्याता वत्सरं यावतिष्ठति ।

प्रसन्नायास्तु [क: -यस्ति] देवेसि [क: -शि] भाण्डं [क: भाण्ड]

कार्धं मृतम् [क: भृततं] तथा ॥ १४९ ॥

स्थापयित्वा द्विसप्ताहं [क: वि-] स्फेनश्चोतिष्ठते सदा ।

उदकेन तथा भाण्डं विभृयान् [क: विशृयान्] सत्वकः [क: -क] पुनः [क: पुन] ॥ १५० ॥

ढक्कयित्वा [क: टक्कयित्वा] ततः स्थाप्य षण्मासेन प्रसिद्धयति ।

ख् ११६अ) तान्येव समभागानि पूर्वद्रव्यानि सुव्रते [क: -तेः] ॥ १५१ ॥

तथैवेकगुणं कृत्वा पिष्टन्ततश्चतुर्गुणम् ।

पिप्पिलीमूलमादाय घटोपञ्चपलानि तु ॥ १५२ ॥

अनेन क्रमयोगेन कारयेद् यावदिछया ।

अष्टभागा व शेषन्तु [क: गैषं तु] क्वाथं [क: त्कालं]
गृह्यथ साधकः [क: -क] ॥ १५३ ॥

द्रव्याणि पिष्टयुक्तानि तेन पिण्डीकृतानि तु ।

मल्लकानि ततः कृत्वा अर्कपत्रेस्तु [क: अर्कपत्रैस्तु] ढक्कयेत् ॥ १५४
॥

निवाते स्थापयेद् [क: -यि] देवि दिछायां सत्वके तथा ।

पुष्पितानि ततो घृष्ट मूलानाञ्च [क: -नां व] समुद्धरेत् ॥
१५५ ॥

उदुम्वरकं ततो घृस्य घर्मशुल्कानि [क: घर्मेशुल्कानि]
कारयेत् ।

कार्तिकाग्रहणे मासे कर्त्तव्या बीजसंग्रहः [क: -ह] ॥ १५६ ॥

किञ्चति [क: किंचैति] च समाख्यातं एवं वै भैरवो ब्रवीत् ।

पूर्वोक्तानि [क: पूर्वाक्तानि] तु द्रव्यानि समभागी [क: -गा]
कृतानि तु ॥ १५७ ॥

तेषाम् अर्द्धेन [क: अर्त्यन] तद् [क: तत्] बीजं दापयेत्
साधकोत्तमः ।

अबीजानान्तु द्रव्याणां पिष्टं विन्सगुणं ततः ॥ १५८ ॥

उदकं च तथा देयं तेन मासेन [क: मानेन] चैव हि ।

ढक्कयित्वा [क: टक्कयित्वा] ततः स्थाप्य मासे द्वित्रयकं
पुनः ॥ १५९ ॥

उद्घाटयात् [क: उघ्याघा] सत्वितन् [क: सधितन्] द्वष्ट्वा [क: दृष्ट्वा] विनियोगन्तु [क: -यागन्तु] कारयेत्।

मूलावर्तसमाख्याता सुरेयसुरपूजितम् [क: -तां] ॥ १६० ॥

सविजानि [क: -ति] तथा? चैव पूर्वद्रव्याणि सुव्रते।

पिष्टको दशमान्सेन प्रविस्यति न संशयः ॥ १६१ ॥

क् १५२ब्) जलन्ते नैव मानेन दापयेत् [क: -यत्] सत्विकस्तथा [क: सेधिकस्तथा]।

ढक्कयित्वा [क: टक्क-] ततः स्थाप्य द्विमासेन ततोद्धरेत् ॥ १६२ ॥

भण्डकुर्पणिकाख्याता [क: शुभकुर्पणिका-] विनियोगन्तु कारयेत्।

षट्सुरास्तु [क: षत्सुरास्तु] समाख्याता भैरवेण [क: -न]

पुरासमः ॥ १६३ ॥

अधुना संप्रवक्ष्यामि आसवानान्तु लक्षणम् ।

मेधासवं? भवेद् देवि तथा तालासवः स्मृतः ॥ १६४ ॥

फेनासव तथा प्रोक्ता माण्डवीचापरः स्मृतः ।

चत्वार्यें [क: -त्वायो] त समाख्याता आसवा वरवर्णिनि ॥ १६५ ॥

लक्षणे न प्रवक्ष्यामि शृणुष्वेकाग्रमानसा ।

मधुपुष्परसं गृह्य साद्राणाम् वरवर्णिनि ॥ १६६ ॥

धातकी चूर्णकं तत्र प्रक्षिपेत् साधकोत्तमः ।

दिवसे नैव जायेत नात्र कार्य [क: -कार्या] विचारणात् ॥ १६७ ॥

तालासवे तु सद्यन्तु [क: सद्ये तु] प्रक्षिपेद् वरवर्णिनि ।

धातकी सर्जचूर्णन्तु फलाद्यां प्रक्षिपेद्बुधः [क:
प्रतिपेद्बुधः] ॥ १६८ ॥

ख् ११६ब्] धातकी मजचूर्णन्तु मण्डव्यां प्रक्षिपेत् तथा ।

माधवी सोद्विधा [क: सोधिधा] ज्ञेयां [क: ज्ञंया]
द्राक्षीख्यर्जरिका तथा ॥ १६९ ॥

धातकी होहिणीचूर्णम् [क: -चूर्ण] हेमजाद्रुमवल्कलः [क:
वल्कल] ।

चूर्ण [क: चूर्ण] कृत्वा क्षिपेत् तत्र मधुव्याम् [क: -स्याम्]

वरवर्णिनि ॥ १७० ॥

प्रत्यग्रमास? व वक्ष्ये शृणु ष्वकाग्रमानसा ।

जम्वुपत्राणि संगृह्य तथा जम्वु [क: जेम्वु] फलानि च ॥ १७१ ॥

अर्धपत्रानि देवेशि शुष्कचूर्णानि कारयेत् ।

अम्वुचूर्ण [क: -र्णे] तथा चैव उदके प्रक्षिपेद् वुधः ॥ १७२ ॥

तत्क्षणा भवते चैव आसुवोधर्मयोगतः ।

वालजम्वुफलं चूर्ण सर्जचूर्णस्तथैव च ॥ १७३ ॥

ततो गृह्यगुडं चैव तथैवे तु न संशयः ।

समभागानि वै कृत्वा उदके प्रक्षिपेत् ततः ॥ १७४ ॥

धर्मकृतो भवेत् सीघ्रमासार्धम्वीडुगत्विनः [कः -
स्वादुगधिनः] ।

वल्कली पूर्वमाख्याता तस्याम् एलक्षणं शृणु ॥ १७५ ॥

पिष्टस्यैवद [कः पिष्टस्यवद] मान्सेन सर्जचूर्णन्तु प्रक्षिपेत्
[कः -पे] ।

प्रस्थस्य द्विघटं दद्या सत्वको यावदीप्सया ॥ १७६ ॥

क् १५३अ) जीर्णे [कः जीर्ण] जीर्णे [कः जीर्ण] ततो वारि [कः वानि] प्रक्षिपेत्
तत् पुनः पुनः ।

मासेन जायते मासम् अथवा अर्धमासिकाम् [कः -का] ॥ १७७ ॥

धातकी चूर्णभागौ तु ताभ्यां लोध्रं चतुर्गुणम् ।

द्रव्याणि तानि पिष्टस्य [क: -स्ये] दशान्से न प्रवेशयत् ॥ १७८ ॥

प्रस्थस्य द्विघटम् [क: द्विघट] मान मुदकस्य प्रवेशयेत् ।

जीर्णे [क: जीर्ण] जीर्णेक्षिपेद् [क: जीर्णक्षिपेद्] वारि मासे [क: सोमे]
नैव प्रजायते [क: -तो] ॥ १७९ ॥

रौद्दका तु समाख्याता सुरायां वरवर्णिनि ।

धातकी रोहणी मर्ज एव वल्कलम् [क: वत्कलम्] एव च ॥ १८० ॥

पिष्टस्यैव दशान्सेन [क: दशासेन] एतच्चूर्णं क्षिपेद्बुधः
[क: -वुध] ।

पिष्टम् वै कोद्रवं यन्तु दलयित्वा [क: दश-] तु कारयेत् ॥ १८१ ॥

तुषाश्च उपनीयाश्च एतत् पिष्टा तु कारयेत्।

उदकं च तथैवेह प्रस्थस्य द्विगुणं भवेत् ॥ १८२॥

घटमानेन [क: घनमानेन] प्रक्षिप्य मासे [क: माने] नैव
प्रजायते।

एषा कौ द्रविकानाम सुरेयं परिकीर्तिता ॥ १८३॥

एवमादि तथा चान्या सत्वयेत् साधक्स्तथा।

गौडू वा चैव [क: गौडीवाद्यै व] सर्वासां
धातकीमर्जमेव [क: -सर्ज-] च ॥ १८४॥

किंचित् मात्रं [क: मात्र] ततो क्षिप्य मत्वयेन्नात्र [क:
मधयन्नात्र] सन्सयः [क: संशयः]।

स्वल्पे च मधुरा प्रोक्ता कषाय [क: -या] वहुलीक्षरा ॥ १८५॥

गौडीभेदाः प्रजायन्ते नात्र कार्यविचारणात्।

ख् ११७अ) प्रसन्नाजीरवालिक्ष [क: -ख्य] भाशुकोर्परिका तथा ॥ १८६॥

मूलावर्ता तथा चैव सर्वसिद्धिः प्रदासुरा।

एतेषान्तु अलाभेन लात्विकास्तास्तु [क: लोधिकाम्तास्तु] कल्पयेत् [क: कल्पये] ॥ १८७॥

अलाभे लोम्ब्रिकादीनां [क: लोध्रिका-] गुडजम् परिकल्पयेत्।

गुडजानाम् अलाभेन मथान्देविन्तु [क: मेधान्देविन्तु] कल्पयेत् ॥ १८८॥

मथा [क: मेधा] भावे तथा प्रोक्ता आसवावृक्ष संभवा ।

आसवानाम् [क: -न्याम्] अलाभे तु कल्पयेत् [क: -ये तत्]

क्षणासवाम् ॥ १८९॥

कालेन सिद्धिदा प्रोक्ता एवं वै भैरवो ब्रवीत् ।

इति पिचुमते द्वादशसाहस्त्रके गुह्यामृत [क: -ष्टन] पटल [क:

नास्ति] चतुर्विंशतिमः [क: -शति] पटलः [क: नास्ति] ॥ २४ ॥

पञ्चविंशतिमः पटलः

देव्युवाच

मन्त्रोद्धारः कृतो देव पूर्वमेव त्वया नघ [क: नघे] ।

क् १५३ब्) यागानां [क: योगाना] निर्णयं प्रोक्तं

साधकानां [क: -ना] हिताय वै ॥ १ ॥

नाना प्रकारभिन्नास्तु जन्तुनान्च निवृतये ।

संक्षेप [क: स-] रूपयो [क: -या] केचिकेचिद्विस्तारकांक्षिणाम्
[क: वैचिके- -णा] ॥ २ ॥

संक्षेपविस्तरं किंचिदिछन्ति मन्त्रवादिनः [क: -न] ।

योगानां निर्णयं ब्रूहि यथावत् सुरपूजितं [क: -त] ॥ ३ ॥

कति [क: कतिं] यागा समाख्याता अस्मिन् तत्रे महेश्वर [क: -रः] ।

न्यासं याग विधिं चैव कथयस्व [क: -येस्व] मम प्रभो ॥ ४ ॥

ईश्वर उवाच [क: ईश्वरो वाच]

कथयामि नसन्देहो [क: -सान्देहो] यत्वयोहं प्रपृछितः [क: -

छीतम्] ।

विशेषेण यथा न्यायं [क: न्यास] शृणुष्वेकाग्रमानसा [क: –
सः] ॥ ५ ॥

पञ्चषष्टिसमाख्याता यागेस्मिं भैरवेण तु ।

सामान्यातृविधस्यापि साधकस्य महाधिपे ॥ ६ ॥

चतुर्दश तथान्येपि विशेषेण [क: –षण] व्यवस्थिताः ।

अधिकारो भवेत्तेषां [क: भवतेषां] मिश्रतालकयः [क: –या]
पर ॥ ७ ॥

अशुद्धस्तु [क: अशुस्तु] महादेवि मनसापिन चिन्तयेत् ।

त्रितत्त्वयागे पूर्वोक्ते नवकं च [क: हि] तथैव [क: तथाव] हि ॥ ८

॥

चतुष्कयागान्देवेसि [क: चतुष्कयागानन्दवेसि] शृणु

ष्वेकाग्रमानसा [क: ष्वकाग्र-] ।

तृपत्रं पद्ममालिख्य यथा सोभं न संशयः ॥ ९॥

आसनं पूर्वमेवोक्तं कर्णिकान्ता तथैव [क: तथाव] हि ।

भैरवं [क: भैरव] कर्णिकायान्तु पूर्ववक्राङ्गसंयुतम्

[क: -वक्ताङ्गसयुत] ॥ १० ॥

कर्णिकायां [क: -या] तथैवेह [क: -व] रक्ता वामेन विन्यसेत् ।

भैरवस्य न सन्देहो वक्रनेत्राङ संयुताः [क: -युतम्] ॥ ११ ॥

पूर्वपत्रे न्यसेद् देवि कलाला सर्वकामहा ।

ख् ११७ब्) पूर्वोक्ते नासने चैव वीजयाग [क: -गं] विकल्पिते [क: विकल्पत्] ॥ १२ ॥

याम्ये [क: यागे] नैरितके चैव चण्डाक्षी विन्यसेत् तथा ।

सौम्यवायव्यके चैव महोच्छुष्मा तु विन्यसेत् ॥ १३ ॥

कर्णिकायां तथाङ्गानि भैरवीयानि विन्यसेत् ।

रक्तायाश्च तथाङ्गानि भोगस्थानेषु पूर्ववत् ॥ १४ ॥

अस्त्राणि दिक्षु विन्यस्य पूर्ववच्चादितानि तु ।

अङ्गन्यासं [क: अग-] पुरा कृत्वा ततो यागं [क: याग] प्रकल्पयेत् ॥ १५ ॥

तर्जन्या या [क: तर्जयान्या] न्यसद् देवं [क: देवे] रक्तायाम् [क: -
या] सहभैरवम् ।

मध्यमायाकरालान्तु [क: -न्तरालान्तु] भैरवेण [क: -वण]
सहन्यसेत् ॥ १६ ॥

क् १५४अ) अनामिकाभ्यां चण्डाक्षी युग्मां नैव न संशयः
।

कनिष्टिका महोछुष्मां युग्मे नैव व्यवस्थिताम् [क: -ता] ॥ १७ ॥

वक्रनेत्राङ्गसंयुक्तं आसनादि [क: आसनानि] प्रकल्पिताम् [क:
* कल्पिताम्] ।

युग्मं [क: युग्म] युग्मं न्यसेद् देवि [क: देवी] संपुटौ [क:
सपुटौ] उभयोरपि ॥ १८ ॥

अङ्गुष्टयोः शिवं न्यस्य [कः वाम्य] परया संयुतं [कः संयुत] तथा ।

अङ्गन्यासस्तथैवेह चतुष्पद्म प्रकल्पितम् ॥ १९ ॥

हृदये गुह्ये [कः गुह्य] तथा जानौ पादयोश्च [कः पादयाश्च] प्रकल्पयेत् ।

पद्ममालां ततो न्यासां देवतानां प्रकल्पयेत् ॥ २० ॥

आमूध्ना [कः आमूधा] हृदयं यावद् रक्ताया सहभैरवम् ।

वक्त्रनेत्राङ्ग संयुक्तं [कः संयुक्ता] रक्तायाश्च पृथक् पृथक् ॥ २१ ॥

हृदयां गुह्यकायावत् करालाम् [कः -ला] विन्यसेत् तेतः ।

गुह्यजानुनि यावन्तु चण्डाक्षी [क: -क्षि] विन्यसेत् ततः ॥ २२ ॥

जानुभ्याम् पादयो [क: आदयो] यावत् महोच्छुष्मान्तु विन्यसेत् ।

वक्त्रनेत्राङ्गसंयुक्ता युग्मे [क: युक्तायु] नैव प्रतिष्ठिताः
[क: प्रतिश्चिता] ॥ २३ ॥

आसनैः [क: -नै] पूर्वमुदिष्टैश्चतुष्के [क:
पूर्वदिष्टैश्चतुष्के] तु न संशयः ।

भैरवि यानि विन्यस्य वक्त्रानिदात्मनोत्मनि ॥ २४ ॥

पूर्वोक्तानि च नेत्रानि पञ्चवक्त्रेषु विन्यसेत् ।

हृदयं हृदये [क: हृदयो] न्यस्य शिरं शिरसि विन्यसेत् [क: *
न्येसेत्] ॥ २५ ॥

शिखायान्तु शिखाज्ञेया सर्वाङ्गं कवचं न्यसेत्।

हस्तयोरस्त्रमित्युक्तं धनुनाराजसंयुतम् ॥ २६ ॥

नेत्रं [क: नेत्रे] चैव ललाटस्या भैरवाङ्गानि वै [क: चै]
क्रमात्।

मद्यादीन्तु ततो दद्या दन्तपक्ति मुखे मुखे ॥ २७ ॥

अधोर्द्धं [क: अधोर्ध] नात्र सन्देहो अन्यमालाशिरे तथा।

क्षकारं [क: -र] मस्तके दद्या मातृकायान्तु कौण्डले [क:
कौशुल] ॥ २८ ॥

ख् ११८अ) शिवी [क: गिवी] कृत्वा ततो देवि शिवशक्ति मतं तथा।

मुद्राश्च वद्धयेत् [क: वधयेत्] पञ्चभैरवीया न संशयः

॥ २९ ॥

एतन्यासं सदा कुर्या नित्यनैमित्तिके तथा ।

काम्ये [क: काम्य] चैव महायागे विशेषः [क: -ष] कथितम् तव

[क: अव] ॥ ३० ॥

सौम्ये कर्मेषु सर्वेषु अनुलोमं प्रकल्पयेत् ।

देहयागे तथा चैव स्ववीजैः [क: -बीजै] सम्पुटन्तथा ॥ ३१ ॥

वलोमेषु विलोमंस्या त्वबीजैरेव संयुतम् ।

क् १५४ब्) यागस्थान तथा चैव युगमं युग्मं प्रकल्पयेत् ॥ ३२

॥

विलोमे तु विलोमं स्या सौम्यकर्मे तु लोमकम् [क: -क] ।

देहयागे तथा चैव वक्त्रनेत्राङ्ग वर्जितम् [क: -त] ॥ ३३ ॥

बीजमन्त्रां [क: -मन्त्रा] न्यसेत् सर्वां [क: सर्वा]
पूर्वसेवाविधिः क्रमात् ।

कर्मकालेषु सर्वेषु एवमेविधि [क: -वधि] स्मृतः ॥ ३४ ॥

आसनादि [क: -नि] विभज्यन्तु [क: विभज्यन्ते] वक्त्राङ्गानि तु विन्यसेत्
।

भैरवी यानि चान्यानि स्वदेह साधकोत्तमः ॥ ३५ ॥

नित्यन्यासं पुराकृत्वा बीजमात्रं [क: -मात्र] न संशयः ।

कर्मन्यासं ततः कुर्या कर्मकालेपि सुप्रिये ॥ ३६ ॥

विलोमं [क: -म] चानुलोमम्वा [क: -लोमेश्चा] नात्र कार्य [क: -कार्या] विचारणात्।

चतुष्काख्ये [क: -ख्य] समाख्यातं पञ्चकं
शृणुसांप्रतम् ॥ ३७ ॥

चतुष्पत्रं लिखेत्पत्रं भौतिकं चक्रमेव वा।

कर्णिकायां न्यसेद् देवं [क: देव] वक्त्रनेत्रांगसंयुतम् ॥
३८ ॥

एवं विन्यस्य यत्नेन पूर्वसूत्रेण चोदितम्।

भैरवीश्च [क: -वां च] तथैवेह [क: -वह] वामभागे तु
विन्यसेत् ॥ ३९ ॥

पूर्वपत्रे तथा रक्ता कराला दक्षिणे [क: क्षीदणे] न्यसेत्।

चण्डाक्षी [क: -ङ्गी] पश्चिमे [क: पक्षिमे] न्यस्य महोच्छुष्मां
[क: महाछुष्मा] तु चोत्तरे ॥ ४० ॥

दिक्षुरस्त्राणि [क: -रक्षाणि] विन्यस्य ततोङ्गानि तु विन्यसेत्।

विद्याङ्गानि तथैवेह कर्णिकायान्तु [क: कस्तुकायान्तु] विन्यसेत् ॥
४१ ॥

भैरवाङ्गा ततो न्यस्य द्विविधान्यषि [क: -यि] साधकः [क: -क]।

भैरव्या या [क: ङु] तथाङ्गानि विन्यसेत् मन्त्र विक्रमात् ॥ ४२ ॥

न्यासपूर्वं [क: -पूर्व] यजेद् यागं करन्यास समन्वितम्।

अंगुष्टयो न्यसेद् देवं [क: देव] आसने पूर्वकल्पिते ॥ ४३ ॥

वक्त्रनेत्राङ्गसंयुक्तं भैरव्या सह पूर्ववत्।

तर्जन्याभ्यां [क: -भ्या] तथा रक्ता भैरवेन समन्वितम् ॥ ४४

॥

मध्यमाभ्याङ्करालान्तु [क: -भ्याङ्ककरालान्तु] सम्पुटेन

[क: -ना] तु विन्यसेत्।

अनामिकाभ्याञ्चण्डाक्षी [क: -भ्या चण्डाक्षी]

महोल्बुष्माकनिष्टकौ ॥ ४५॥

उभयो संपुटं कृत्वा वामदक्षिणहस्तयोः।

क् १५५अ) ख् ११८ब्) ततो न्यसं प्रकुर्वीत अङ्गुष्टादिविकल्पितम् ॥ ४६॥

शरीरे पद्ममालान्तु पञ्चस्थानेषु विन्यसेत्।

शिखायां कण्ठदेशे तु नाभ्यां चैव वरानने ॥ ४७ ॥

जानुभ्यां पादयोश्चैव आसनादिपुरः सरः ।

शिखायां भैरवं [क: -व] न्यस्य भैरव्या सह पूर्ववत् ॥ ७८
॥

सस्त्रकात्कण्टकं [क: सस्ककात्कण्ठकं] यावद् रक्तादेवी
प्रकल्पयेत् ।

आकण्ठानाभिपद्मन्तु न्यस्तव्या तु करालिनी ॥ ४९ ॥

नाभ्यान्तु जानुनी यावच्चण्डाक्षी विन्यन्ततः [क: -विन्यसेत्]
ततः ।

जानुभ्याम् पादयो [क: -या] यावत् महोछुष्मान्तु विन्यसेत् ॥ ५० ॥

वक्त्रनेत्राङ्गसंयुक्तं युग्मम् युग्मं [क: युग्म] दले दले ।

वक्त्रानि [क: वक्तानि] भैरवी यानि [क: योने] विन्यसेत्

पूर्यवद्बुधः ॥ ५१ ॥

भैरवी यानि सर्वाणि शेषं पूर्ववदाचरेत् ।

नित्ये नैमित्तिके [क: नैमित्ये] काम्ये महायागे तथैव च ॥ ५२ ॥

एतद् यागं तथा न्यासं विन्यसेत् साधकोत्तमः ।

कल्पकाले तथा चैव पदमन्त्रस्तु [क: -मन्त्र तु] विन्यसेत् ॥ ५३ ॥

कर्मकाले तथैवेह स्ववीजैस्तु [क: -वीजेस्तु] पुटीकृतम् ।

अनुलोमविलोमाभ्यां [क: -भ्या] न्यासं यागं तथैव च ॥ ५४

॥

पञ्चकं [कः -क] तु [कः तुं] समाख्यातं षट्कं [कः षट्क]
शृणु वरानने ।

षट्पत्रं पद्ममालिख्य कण्कार्यां [कः -या] न्यसेत् ततः ॥ ५५
॥

योगिवीरं पुराप्रोक्तं वीरशक्त्या [कः -सक्त्या] समन्वितम् ।

कर्णिकायां तथाङ्गानि भोगस्थानेषु विन्यसेत् ॥ ५६ ॥

वीरस्य वीरशक्त्या च पूर्वोक्तानि न संशयः ।

क्रोष्टकी पुर्वपत्रे तु विजयामग्नियाम्यके [कः -को] ॥ ५७ ॥

याम्ये नैरितके चैव गजकर्णी [कः -कर्णा] तु विन्यसेत् ।

वारुणे पद्मपत्रे तु विन्यसे च महामुखी [कः -मुखि] ॥ ५८ ॥

वायुसौम्यदले चैव चक्रवेगा ततो न्यसेत्।

सौम्यमीशानके चैव महानामां प्रकल्पयेत् ॥ ५९॥

वक्त्रनेत्राङ्गसंयुक्तां वीरेण [कः विरण] तु समन्विताम् [कः -तम्]।

युग्मं [कः युग्मां] युग्मं यथान्यायं योगिषट्कं तु विन्यसेत् ॥ ६० ॥

अस्त्राणि दिक्षु वै दद्यान् तथैवेह न संशयः।

क् १५५ब्) करसंस्कारपूर्वन्तु [कः करसंस्था तु-] न्यासं पूर्वञ्च [कः पूर्व च] विन्यसेत् ॥ ६१ ॥

अङ्गुष्टे वीरविन्यस्य [क: विर-] वीरशक्ति [क: विर-] समन्वितम् ।

वक्रनेत्राङ्ग [क: -ङ्गा] संयुक्तं पूर्वसुत्रेणचोदितम् [क: -
तः] ॥ ६२ ॥

ख् ११९अ) वामपार्श्वे न्यसेद्योगी [क: ण्य सद्योगि] क्रोष्टुकी [क:
क्राष्टुकी] नात्र संशयः ।

दक्षिणे विजया न्यस्य [क: न्यस्ये] तर्जन्यागजकर्णिकाम् [क: -का] ॥
६३ ॥

मध्यमाया माहामुख्या [क: -मुख्य] चक्रवेगामनामिके ।

कनिष्टां तु माहानासा [क: -मा?] दक्षिणे? प्येवमेव? तु? ॥ ६४
॥

वक्रनेत्राङ्गसंयुक्तं स्वबीजरहितां [क: -ता] तथा ।

पूर्वासने स्थिताश्चैव युग्मं [क: युग्मे] युग्मं [क: युग्मे] न संशयः ॥ ६५ ॥

शरीरे पद्ममालान्तु सप्तपद्मे परिछदाम् ।

शिखायां प्रथमं पद्मं द्वितीयं कण्ठमाश्रितम् [क: -माश्रृणु] ॥ ६६ ॥

तृतीये हृदये चैव चतुर्थं नाभिमण्डले ।

पञ्चमं [क: -म] गुह्यदेशे तु षष्टं जानुषु संस्थितम् ॥ ६७ ॥

सप्तमं पादयोश्चैव [क: -याश्चैव] एवं सचिन्त्यसाधकः ।

आसनानि ततो दत्वा योगिन्या संप्रकल्पयेत् ॥ ६८ ॥

शिखायां वीरविन्यस्य वीरशक्त्या समन्वितम्।

मस्तकात् कण्ठदेशे [क: -दे *] तु यावद्वौ क्रोष्टकी न्यसेत् ॥ ६९ ॥

आकण्ठ [क: अकण्ठ] हृदयं [क: हृदये] याववियजया
विन्यसेद्बुधः [क: विन्येसेद्-]।

नाभिहृदयगुह्ये च गजकर्णा तु विन्यसेत् ॥ ७० ॥

नाभ्यां गुह्यदेसे [क: -दसं] यावत् महामुख्या तु विन्येसेत्।

आगुह्यजानुनी यावच्चक्रवेगान् ततो न्यसेत् ॥ ७१ ॥

जानुभ्यां [क: -भ्या] पादयोर्यावत् [क: पादयो यावत्]
महानासां प्रकल्पयेत्?।

वक्त्रनेत्रांगसंयुक्ताम् वीरेणसहितांस्तथा ॥ ७२ ॥

पद्मासनस्थां [क: -स्था] न्यस्तव्यां युग्मं [क: युग्मे]
युग्मं [क: युग्मं] न संशयः ।

पूर्वोक्तेषु विधानेन सर्वयागेषु [क: -योगेषु] कल्पयेत् ॥ ७३ ॥

कर्मयोगेषु [क: -यागेषु] चैवेह [क: चवह] कर्मकल्पोक्तके तथा
।

पूर्वमेवाविधाने तु पूर्व एवे विधिस्मृतः ॥ ७४ ॥

सर्वेष्वे वहियागेषु कर्मकाले शुभा शुभे ।

आग्नेयादीनिसङ्गानि कर्णिकायां निवेशयेत् ॥ ७५ ॥

क् १५६अ) अनुकुलां [क: -ला] ततो देव्यां यागे यागे प्रकल्पयेत् [क: तु कल्पयेत्] ।

अनुकुलेषु कर्मेषु नात्र कार्य विचारणात् ॥ ७६ ॥

द्विद्वेषादिषु [क: द्विद्वेष्मुदिषु] कर्मेषु विपरीतेषु चैव हि ।

वायव्यादीनिचाङ्गानि [क: -दिनि-] कर्णिकायां [क: यान्तु] निवेशयेत् [क: वेशयेत्] ॥ ७७ ॥

विपरीतास्तथा देव्या यष्टव्यास्तु न संशयः ।

व्यस्तेयं [क: -षां] कर्णिकायान्तु कर्त्तव्यं भैरवस्य पि [क: तु] ॥ ७८ ॥

भैरवी भैरवस्थां तु भैरव्यायास्तु भैरवम् ।

दले दले यथा न्यायं कर्त्तव्यं [क: -व्यां] तु इयं प्रियो [क:
प्रियां] ॥ ७९ ॥

वहिरस्त्राणि योज्यानिनि [क: योज्यानि] परीतानि चैव [क: चौव] हि ।

ख् ११९ब्) कल्पकाले तु कर्माणि बीजमन्त्राणि [क: -नु] योजयेत् ॥ ८० ॥

नित्य न्यासं [क: न्यास] पुराकृत्वा शरिरे साधकोत्तमः ।

कर्मन्यास ततः कुर्यात् कल्पकाले न संशयः ॥ ८१ ॥

कर्मकालेपि कर्त्तव्यं विस्तरेण तथैव हि ।

षट्कयागो [क: -गा] मयाख्यातो अपरं शृणु सांप्रतम् [क: -त]
॥ ८२ ॥

नचकस्यैव विन्यासो मातृणां परिकल्पयेत् ।

यागे चैव करन्यासे देहन्यासे तथैव च ॥ ८३॥

स्वमन्त्रेषु [क: -ण] तथा कुर्या प्रति प्रति पुरास्थिता।

बीजन्यासोथवा [क: -सां थवा] कार्यात् सद्यादीन्मन्त्रयोजयेत् ॥ ८४॥

वीरस्य वीरशक्त्या च दन्तपङ्क्त्या तथैव च।

कपालमालां तथैवेह लान्तं मुण्डिस्तथैव हि ॥ ८५॥

वेष्टितं [क: -त] मातृकायान्तु शेषं सर्वेषु पूर्ववत्।

अनुकुलेमनुकुलेस्या [क: -लंस्या] छेषं तु पूर्ववद् यथा [क: पूर्व च यथा] ॥ ८६॥

त्रितत्त्वं नवकं [क: तवकं] चैव चतुष्कं पञ्चकं तथा ।

योगीषट्कं तथैवेह योगिसप्तकमेव [क: योनिसप्तहलोन्तकमेव] च ॥ ८७ ॥

मातृणां नवकं चैव एते योगा प्रकीर्तिता ।

भेदं चैव प्रवक्ष्यामि एतेषाञ्च शृणुष्व मे ॥ ८८ ॥

पूर्वासने महादेवि नवकं [क: -क] भेदयेत् [क: * दयेत्] पुनः ।

विद्यायास्तु नसन्देहो यथा तत् मे निवोधतः ॥ ८९ ॥

प्रणवं [क: -व] भेदयेत् पूर्वं केवलं वरवर्णिनि [क: वल-] ।

वक्त्रनेत्राङ्गभेदेन [क: वक्त-] विद्यां [क: विद्या] दत्वा [क: नन्दल्पा] तथासने ॥ ९० ॥

क् १५६ब्) मूर्तिजापोन्नसन्देह [क: मूर्तिरूपोन्नसदेह]
एकवीरादिके विधौ [क: विधो] ।

त्रितत्त्वयागभिन्नेषु [क: -भिन्नषु] सर्वेष्वेव हि दापयेत् ॥ ९१ ॥

चतुष्कादिषु यागेषु नात्र कार्य विचारणात् ।

प्रणवभेदं [क: -भेद] ततः कृत्वा पूर्वसूत्रेण चोदितम् ॥ ९२
॥

भैरवेन विहीनस्यात् सद्यादीन्तस्य दापयेत् ।

दन्तपक्त्यस्तथैवेह आस्यामालां तथैव च ॥ ९३ ॥

निरस्तैस्तुस्तथा चैव लान्तमूर्धिततस्तथा? ।

मातृका [क: -काः] यावृतं चैव पूर्ववन्नात्र संशयः ॥ ९४

॥

पद्मपत्रेषु चाङ्गानि विन्यसेत् साधकोत्तमः ।

विद्याङ्गानि पुरा दत्वा प्रणवायानि विन्यसेत् ॥ ९५ ॥

अस्त्राणि [क: अस्त्रादिणी] दिक्षु विन्यस्य पूर्वोक्तानि षडेव हि ।

भैरवीहंसरूपास्तु [क: -रूपोस्तु] वामपार्श्वे तथैव च [क:
हि] ॥ ९६ ॥

वक्त्रनेत्राङ्गसंयुक्ता सद्यादिभिः समन्विता ।

दन्तपक्त्यस्मम्माश्यैश्च [क: दन्तुपक्त्यस्मम्मास्यैव]
लान्तमातृक संयुतम् ॥ ९७ ॥

नित्यनैमित्तिके काम्ये अयमेव विधिस्मृतः।

महायागे मयाप्रोक्तां स्मशाने? [क: श्मशाने] परिवेष्टिता?

॥ ९८ ॥

ख्१२०अ) एकवीरविधिप्रोक्तः [क: -प्रोक्ता] प्रणवस्य न संशयः।

अङ्गन्यासं करन्यासं पूर्वको? नात्रसंशयः ॥ ९९॥

आसनं पूर्ववत् कृत्वा अङ्गुष्ठे [क: -ष्ट] प्रणवं न्यसेत्।

यथा यागे तथा त्रापि दन्तपक्या विवर्जितम् ॥ १०० ॥

निरस्कवर्जितं [क: निरष्ट-] चैव लान्ताद्यैश्च वर्जितम्।

सद्यादि संयुतं कार्यं [क: कार्य] अंगुष्ठे [क: -ष्ट]

प्रणवं प्रिये ॥ १०१ ॥

भैरवी च तथैवेहं [क: -ह] मम [क: त्वाम] पार्श्वे तु विन्यसेत्

।

हृदयं [क: -य] मध्यमायान्तु अनेनैव विवर्जितम् ॥ १०२ ॥

शिरस्त्वेनामिकायान्तु तर्जन्यायां शिखा स्मृता ।

वर्मकनिष्टिकायान्तु? अङ्गुष्टाधश्च [क: -ल्याधष्ट] लोचनम्

॥ १०३ ॥

उभयोर्हस्तमन्त्रन्तु [क: -योहस्तमन्त्रस्तु] न्यस्तव्यं

मन्त्रवादिना [क: -नाः] ।

उच्चारेण तथैकेन उभयोरपिकारयेत् ॥ १०४ ॥

भैरवाङ्गानि सहितं नात्र कार्य [क: -कार्या] विचारणात् ।

करण्यासस्समाख्यातमङ्गन्यासं [क: -करन्यासस्सामा-]

शृणुष्व मे ॥ १०५ ॥

शक्तिन्यासं पुरा कृत्वा दासनानि प्रकल्पयेत्।

क् १५७अ) पञ्चवारां न्यसेत् पद्मामवधूतां [क: -

पश्चाद्कामव-] न संशयः ॥ १०६ ॥

गुह्य तु भृगुगान्यस्य? हृदये च चतुर्गुणाम् [क: -णा]।

ललाटे च [क: नास्ति] तथा वायुराकाशं [क: -स] चूलिकोपरि [क:

चूलिका-] ॥ १०७ ॥

वक्त्रनेत्राङ्ग देशेषु शक्तिमेकगुणं न्यसेत्।

पूर्वमेव ततो [क: तत्] कुर्यात् प्रतिष्टादि प्रकल्पेयेत् ॥ १०८ ॥

वामा चैवामकराद्यै? तु रौद्री दक्षिणकर्णयोः ।

वामस्कंध तथा जेष्टा काल्या वै दक्षिणेस्तथा ॥ १०९ ॥

वलविकरणी वामकुक्षौ [क: वामे-] नात्र कार्य [क: -कार्या] विचारणात् ।

कलविकरणी दक्षे वामजानौ तथा पुनः ॥ ११० ॥

विन्यसेत् साधकोभिज्ववल [क: -ज्ञवल] प्रमथनी ततः ।

दमनी सर्वभूतानां दक्षाजानौ तु विन्यसेत् ॥ १११ ॥

पादादारभ्यसिखायां सर्वाङ्गेषु मनोन्मनी [क: मनात्मनी] ।

विद्याशक्तिं न्यसेद्भूय दक्षिणामन्त्रविक्रमः ॥ ११२ ॥

पद्मामारभ्य गुह्यन्ता गुह्यकण्ठन्तु वामकम् ।

कण्ठदेशशिखां [क: -खा] यावत् मध्यमा विन्यसेद्बुधः ॥
११३ ॥

अनेनैव विभागेन वीज * * *? [क: त्रितात्वं वि] ततो [क: नास्ति] न्यसेत्
[क: न्यसेत्ततः] ।

अनेनैव विभागेन त्रितत्त्व विन्यसेत् ततः ॥ ११४ ॥ [क: नासि]

प्रणवम्वक्त्रदेशे [क: वक्त्र-] तु नेत्रदेशेषु [क: नेत्रा-] चैव हि ।

अङ्गस्थानेषु सर्वेषु आसनत्वेन सुप्रिये ॥ ११५ ॥

बीजशक्तित्रयं न्यस्य स्थानेश्वेतेषु [क: -तषु] चैव हि ।

वक्रस्थानेषु वक्रानि नेत्रानि तथैव हि ॥ ११६ ॥

ख् १२०ब्) अङ्गस्थानेषु [क: अगस्थानेषु] चाङ्गानि [क: -वि] विन्येसेन्
नात्र संशयः ।

सद्यादीनां [क: -ना] ततो दद्या दन्तपक्त्यस्तथैव [क: -पक्तास्-]
च ॥ ११७ ॥

निरस्कान्तु [क: निलस्कान्तु] ततो मालां लान्तामातृकया सह ।

भैरव्यामन्त्रमुच्चार्य सवाङ्गे विन्यसेद् वुधः ॥ ११८ ॥

वक्रनेत्राण्यतो दद्याद् अङ्गानि च यथाक्रमम् ।

एते न्यासस्समाख्यात एकवीरादिके विधौ ॥ ११९ ॥ (?)

भैरव्याश्चन संदेहो वीरयोश्चन संशयः । (?)

स्वमन्त्रेषु? यथान्यासं नात्र कार्यविचारणात्? ॥ १२० ॥

त्रितत्त्वन्यास योगेपि? नवके पञ्चके तथा ।

चतुष्केप्यथवाषट्के कर्तव्योयं [क: -व्यायं] विधिः परः [क: पर] ॥ १२१ ॥

ट्ःईष् आग़ (१२०ब्) ख़ः ईष् ऊण्ळ्आ-

सप्तके अष्टके चैव मातृणा वरवर्णिनि । (?)

क् १५७ब्) नवके मातृकाशान्तु पूर्वन्यासं प्रकल्पयेत् ॥ १२२ ॥ (?)

पद्ममालां ततो न्यस्या त्रितत्त्वेपि वरानने । (?)

अन्यष्वेव हि योगेषु । नवकादिषु सुप्रिये ॥ १२३ ॥ (?)

पद्मेषु देवता न्यासः सर्वकृत्वा विचक्षु च ।

वक्त्रनेत्राङ्गकादीनि भैरवीयानि विन्यसेत् ॥ १२४ ॥

सद्यादीनि ततो दद्या दन्त पत्त्यस्यमालका ।

लान्तामातृकया युक्ता भैरव्या यां ततो न्यसेत् ॥ १२५ ॥

वक्त्रनेत्राङ्गकाणिस्या सर्वस्थानेषु नान्यथा ।

एकवीर विधिप्रोक्ता प्रणवस्य तपोधनम् ॥ १२६ ॥

हंसाख्ययां प्रवक्ष्यामि भैरव्या शृणुसांप्रतम् ।

आसने पूर्वसूत्रोक्ते विद्यामूर्ति ततो न्यसेत् ॥ १२७ ॥

हंसाख्यं विन्यसेत् तत्र वक्त्रनेत्राङ्ग संयुतम् ।

सद्यादिसहितं चैव दन्तपत्त्या समन्वितम् ॥ १२८ ॥

निरस्क तु तथैवेह सान्तमातृकसंयुतम्।

भैरवं वामपार्श्वे तु द्विविधं चैव विन्यसेत् ॥ १२९॥

विद्याङ्गानि ततो दद्याद् भोगस्थानेषु पूर्ववत्।

भैरव्या या ततोङ्गानि भैरवस्य च दापयेत् ॥ १३० ॥

अस्त्रपर्यन्तमित्युक्ता भैरव्या नात्र संशयः।

करन्यास तथैवेह हस्तयोरुभयोरपि ॥ १३१ ॥

अङ्गुष्टौ तु विशेपात्र वामपार्श्वे तु भैरवम्।

शरीरेपि तथैवेह भेनवस्य न चान्यथा ॥ १३२ ॥

स्वमन्त्रेणाथकर्तव्यो विसेषा नात्र संशयः ।

भैरवि यानिवक्त्रानि नेत्राङ्गानि तु सव्रते ॥ १३३ ॥

पश्चात् प्रदापयद् देहे विशेषकथितो मया ।

भैरव्याया समाख्यातो [क: -ता] रक्ताया शृणु साम्प्रतम् ॥
१३४ ॥

ख् १२१अ) आसने पूर्वमेवोक्ते विद्यामूर्त्तिं [क: -मूर्ति] ततो न्यसेत्
।

रक्ताबीजं ततो न्यस्य देहे [क: देह] शक्त्यापि कल्पितम् ॥ १३५ ॥

प्रतिष्टादिविभागेषु [क: प्रतिष्टां दिनिभागेषु]
वक्तनेत्राङ्गकेष्वपि ।

क् १५८अ) स्थानेषु शक्तिपूर्वाणि आसनादि तथैव हि ॥ १३६ ॥

वक्त्रनेत्राङ्गसंयुक्ताः [क: वक्त्र-] सद्यादिभिर्विवर्जिताः [क: -ता] ।

दन्तपत्त्यस्यमालायां लान्तं [क: नान्तं] मातृकवर्जितः ॥ १३७ ॥

भैरवं वामपार्श्वे तु रक्ताया विन्यसेत् ततः ।

वक्त्रनेत्राङ्ग संयुक्तां [क: -क्ता] सद्यादिपरिवर्जितः ॥ १३८ ॥

पूर्वक्रमेण विन्यस्य उपमर्जनसंज्ञकः [क: -कम्] ।

विद्यायाश्चाङ्गकानिस्यु भैरव्याङ्गान्तकानि [क: -ङ्गातकारि] तु ॥ १३९ ॥

अङ्गानि विन्यसेत् मन्त्रि रक्ताया नात्र संशयः।

भोगस्थानेषु देवेशि पद्मपत्रेषु [क: पद्मपद्मेषु] विन्यसेत् ॥ १४० ॥

करन्यासं तथैवेह [क: -वह] देहन्यासं तथैव च।

भैरवी यानि वक्त्राणि नेत्राङ्गानि तु सुव्रते ॥ १४१ ॥

पश्चा तु विन्यसेत् मन्त्री [क: मन्त्रि] विशेषो [क: -षा] नात्र संशयः।

यथा यागे [क: याग] तथा देहे भोगस्थानेषु विन्यसेत् ॥ १४२ ॥

वहिरङ्गानि विन्यस्य भोगस्थानेषु मन्त्रवित्।

गछंतिष्टं [क: गछतिष्टं] स्वयं जाग्रं यागे वा

मथनेपि वा ॥ १४३ ॥

अङ्गषट्का वृतो [क: कृता] मन्त्री सर्वकर्माणि कारयेत् ।

स एव परिकरस्तस्य अङ्गषट्कं व्यवस्थितम् ॥ १४४ ॥

अस्त्रषट्कं तथा चैव रक्षार्थसाधकस्य तु ।

रक्ताया यागमार्गेण देव्याः सर्वा प्रभेदयेत् [क: प्रभदयत्]
॥ १४५ ॥

दूत्याश्चैव [क: हृत्पार्श्वेवन] संदेहः केवलात्रिमुखा
स्मृताः [क: स्मृता] ।

भैरवं [क: -व] वामपार्श्वे तु दूतीश्चैव तु विन्यसेत् ॥ १४६ ॥

किंकरत्वेन देवेशि चतुर्वक्त्रं न संशयः ।

एकवीरविधानेन नवकं भेदितं मयाः [क: मया] ॥ १४७ ॥

दशयागा भवन्त्येते [क: -पि] नान्या [क: नान्य] नानातिरिक्तका [क: थानातिरिक्तया] ।

सप्तकं [क: -क] भेदयिष्यामि तं शृणुष्वसमाहिता ॥ १४८ ॥

पूर्वासने न्यसेद्वीरं विद्यामूर्ति व्यवस्थितम् ।

पूर्वोक्तन्तु नसंदेहो वीरशक्त्या समन्वितम् [क: -त] ॥ १४९ ॥

वक्त्रनत्रांङ्गसंयुक्तं सद्यादिभिः [क: -भि] समन्वितम् ।

दन्तपङ्क्त्यस्य [क: दन्तपक्त्याम्य] मालायां लान्तं मातृक संयुतम् [क: संयतः] ॥ १५० ॥

भोगस्थानेषु चाङ्गानि विन्यसेत् पूर्ववत् क्रमात्।

विद्याङ्गानि तथा चैव वीराङ्गानि तु विन्यसेत् ॥ १५१ ॥

क् १५८ब्) वीरशक्त्यास्तथाङ्गानि एकवीरादिके विधौ।

ख् १२१ब्) करन्यासे [क: -सं] तथा चैव अङ्गन्यासस्तु [क: -ङ्ग] पूर्ववत् ॥ १५२ ॥

कर्त्तव्याः [क: -व्या] साधकेन्द्रेण योगिनीनामपिस्तथा।

योगिन्याभेदयेत् [क: -यत्] मन्त्री स्ववक्त्रेण [क: -श] तु संयुतम् ॥ १५३ ॥

वीरेण सहिता योज्या [क: याज्या] वामपार्श्वानुवर्तिना।

चितुर्वक्त्रेन चान्यन [क: चान्येन] सद्यादौ वर्जितेन तु ॥ १५४ ॥

पूर्वासने महादेवि प्रति प्रति नियोजिता ।

विद्यामूर्तौ स्वमन्त्रैश्च भोगाङ्गैः [क: -ङ्गै] परिवारिताम् ॥
१५५ ॥

पूर्वनैव विधानेन एकवीरादिके विधौ ।

संख्यायाः सप्तके भिन्ने सप्तयागा न संशयः ॥ १५६ ॥

मातृभेदं प्रवक्ष्यामि पूर्वसूत्रेण [क: पूर्वसूत्रे *]
चोदितम् ।

प्रणवं भेदयेत् पूर्वं भैरवेण [क: -न] न संशयः ॥ १५७
॥

वीरशक्त्या समोपेता [क: सृमोपेता] विद्यामूर्तौ व्यवस्थितः [क:

-ताः] ।

पूर्वासने तथा चैव भोगाङ्गैः [कः भोगाङ्गै] परिपारितः

[कः -हारितः] ॥ १५८ ॥

करण्यासं [कः करध्यासम्] समाख्यातां [कः यसा-]

अङ्गन्यासं तथैव च ।

एकवीरविधानेन [कः रक्तवीर-] सर्वमातृस्तु भेदयेत् [कः भेदयत्]

॥ १५९ ॥

पूर्वासने न संदेहो विद्यामूर्तौ व्यवस्थिताः [कः -ता] ।

चतुर्वक्त्रेण [कः -न] वीरेण वामपार्श्वानुवर्तिना ॥ १६० ॥

एकैका तु प्रकर्त्तव्या भोगाङ्गैः [कः भोगाङ्गै] परिवारिता ।

त्रिविधे नात्रसंदेहोः प्रति प्रति सुलोचने [कः -नः] ॥ १६१ ॥

नवयागा भवेद्येते [कः भन्त्यत्] मातृभेदे च संसुताः [कः -ता] ।

पञ्चत्रिंसत् समाख्याता एते योगासिता मया ॥ १६२ ॥
नित्य नैमित्तिके [कः -त्य *] काम्ये ग्रहवेताल साधने ।

सद्यागवेसने चैव यन्त्रकर्मे तथैव च ॥ १६३ ॥

महायागविधाने च [कः न] स्मसाने [कः श्मशाने] * *
भिर्वृताः [कः नष्टभिवृंताः] ।

न वै [कः चै] रावरणै [कः नाचरणै] वक्ष कर्त्तव्या साधके न तु ॥ १६४ ॥

क्रमेषु च समाख्याताः शुभेषु चाशुभेषु च ।

अनुलोमविलोमैस्तु व्यस्त [क: नास्ति] समस्त ये स्थिताः [क: -ता वच]

॥ १६५ ॥

अजयुग्मविभागेन [क: महायागविधानेन] ज्ञात्वा [क: नास्ति]

कुर्वित [क: नास्ति] साधकः [क: नास्ति] ।

[क: व्यस्तसमस्तये स्थिता ।

अङ्गयुग्मविभागेन ज्ञात्वा कुर्वातसाधकः ।]

नित्य न्यासं [क: न्यास] पुरा कृत्वा कर्मन्यासन्तु कारयेत् ॥ १६६

॥

क् १५९अ) सर्वष्वेवहि यागेषु एष एव विधिः स्मृतः ।

पूर्वमेवाविधाने तु बीजमन्त्रस्तु विन्यसेत् ॥ १६७ ॥

न्यासयागे हृदिश्चैव [क: हृदेश्चैव] वक्रनेत्राङ्ग वर्जितम् ।

भोगाङ्गा सहिताश्चैव एकवीरविधोक्रमे [क: -विधौक्रम:] ॥
१६८ ॥

नवकादिषु यागेषु भोगाङ्गानि च दापयेते ।

पञ्चषष्ठिसमाख्याता त्रिविधेपि हि साधके ॥ १६९ ॥

ख् १२२अ) सर्वकर्मेषु देवेशि नित्यनैमित्तिकेषु च ।

यागद्वय [क: -द्वये] मथाप्यत्र दृश्यते सुर [क: सर] पूजिते ॥
१७० ॥

प्रणवकुट कृतो यागो भैरवी सोमहायमे ।

योगिनीवीर [क: योगि * वीर] यागश्च एकवीरादिके विधौ ॥ १७१ ॥

एतद् याग द्वयन्नित्यं [क: स्वयन्नित्यं] भ्रूश्यते नात्र
संशयः ।

योगिनीनान्तु सामान्योः [क: -न्या] सर्वकार्येषु नान्यथा ॥ १७२ ॥

त्रिषष्ठे वर्गिता [क: वसिता] यागाः [क: यागा] सामान्यसाधक
त्रये [क: त्रयः] ।

योगिनीनां तथैवेह एवं वै भैरवो [क: -वा] ब्रवीत् ॥ १७३ ॥

पञ्चषष्ठि समाख्याता त्रिविधस्य वरानने ।

योगिनीनां च सामान्या अस्मिन्तन्त्रे न संशयः ॥ १७४ ॥

असाधारणविधिं [क: -विधि] वक्ष्यतालं [क: -तांलं]
मिश्रकयो [क: -या] शृणु ।

पूर्वासने तथा चैव पद्मादिपरिकल्पिते ॥ १७५ ॥

मूर्तिरूपं [क: -प] न्यसेद्विद्यामासनत्वन [क: -मासनेलेन]
पुष्करे ।

एकवीरविधिं यागा हंसाख्ये नसमन्विता ॥ १७६ ॥

वक्त्रनेत्राङ्गसंयुक्तां भैरव्या सह विन्यसेत् ।

कर्णिकायां नसंदेहः पूर्वसूत्रेण चोदितम् ॥ १७७ ॥

बोगांगानि ततो दद्यात् पद्मपत्रेषु मन्त्रवित् ।

विद्याङ्गानि ततो मन्त्रा [क: मन्त्रो] प्रणवाङ्गानि चोपरि ॥ १७८ ॥

भैरवी यानि चाङ्गानि तेषामुपरिदापयेत् ।

भैरव्यायास्ततोऽङ्गानि तेषामुपरि विन्यसेत् ॥ १७९ ॥

हंसाख्या यास्ततो दद्यात् परमायाः [क: -या] परिकीर्तिताः [क: -ता] ।

पञ्चप्रकारभिन्नानां भोगाङ्गानां अयं विधिः ॥ १८० ॥

अस्त्राणि वाह्यतो दद्यात् पूर्वसुत्रेण चोदितः [क: वादितम्] ।

क् १५९ब्] करन्यासादिकं [क: -क] कृत्वा ततो यागं प्रकल्पयेत् ॥ १८१ ॥

करशुद्धिं ततः कृत्वा अङ्गुष्ठे [क: अगुष्टं] पूर्वमासनम्
।

भैरवन्तु [क: -स्तु] ततो न्यस्य वक्त्रनेत्राङ्गसंयुतम् ॥ १८२ ॥

भैरवीयं [क: -य] ततो दद्यात् पूर्वसूत्रेण [क: पूर्वा-]
चोदितम्।

वामपार्श्वेन संदेहस्ततो वक्त्रानि विन्यसेत् ॥ १८३॥

तर्जन्यां [क: -न्या] पूर्ववक्त्रन्तु मध्यमायान्तु दक्षिणम् [क:
-ण]।

पश्चिमं [क: पश्चिम] त्वनामिकायान्तु कनिष्टाचोत्तरं न्यसेत्
॥ १८४॥

पञ्चमाङ्गुष्टकाधस्ता हृदये मङ्गुष्ठके [क: मस्तके]
तथा।

तर्जन्यान्तु शिरन्यस्य मध्यमायां शिखास्तथा ॥ १८५॥

ख् १२२ब्) कवचन्नामिकायान्तु कनिष्टायांस्तथास्त्रकम्।

अङ्गुष्ठे तु तथा नेत्रं करन्यासे [कः -स] त्वयं [कः त्वय]
क्रमात् ॥ १८६ ॥

दक्षिणापि तथा हस्ते [कः हस्ता] एकमेवन्तु विन्यसेत्।

शरीरपूर्वविधिना वक्ताङ्गानि [कः वक्ताङ्गागानि] नियोजयेत् ॥
१८७ ॥

सेषन्तु [कः शेषन्तु] पूर्ववत् सर्वम् अङ्गन्यासो न संशयः।

प्रणवायानि वक्रानि नेत्रांङ्गानि तथैव च ॥ १८८ ॥

भैरवाङ्गा ततो दद्याद् [कः दद्या] भैरव्यांगानि चैव हि।

परयास्तु [कः -न्तु] ततोङ्गानि वक्रनेत्राणि चैव हि ॥ १८९ ॥

शेषन्तु पूर्ववत् सर्वं [क: सर्व] लान्तान्तं नात्र संशयः।

वहिरङ्गानि विन्यस्य आत्मनः पूर्वमेव हि ॥ १९० ॥

एकवीरविधानेन भैरवस्य वरानने [क: चराचरे]।

मूलयागो मयाप्रोक्तः [क: -प्रोक्त] अंगपञ्चककिर्तितः [क: -ता]
॥ १९१ ॥

अधुना संप्रप्रवक्ष्यामि [क: संप्रप्रव-]
द्विकैकविधिमुत्तमम्।

आसने पूर्वमेवोक्ते विद्यामूर्तिन्यसेत् [क: -से] ततः [क: तत] ॥ १९२ ॥

भैरवी प्रणवञ्चैव एकीकृत्वा तु विन्यसेत्।

शक्तिन्यासं ततो कुर्याद् वक्त्रदेशेषु चैव हिः [क: हि] ॥ १९३ ॥

वक्राङ्गानां च देशेषु विन्यसेत् साधकोत्तमः ।

प्रतिष्ठाद्यास्तथा चैव पृथिव्यादीनि [क: -नी] चैव हिः [क: हि] ॥
१९४ ॥

वामाद्याशक्तयोश्चैव वामदेवोद्भवाकलाः [क: वामदेवौ
भ-] ।

आसनानि तथैवेह वक्रादिषु तथैव हिः [क: हि] ॥ १९५ ॥

भैरव्या प्रणवश्यापि? वक्रयुग्मं? प्रति? प्रति? ।

विन्यसेत् [क: विन्यसत्] पञ्चवक्त्रम् तु ततो नेत्रानि [क: -णि] विन्यसेत् ॥
१९६ ॥

क् १६०अ) युग्मं युग्मं [क: युग्म] तथैवेह भैरवाद्यं

तथैव हिः [कः हि] ।

अङ्गानां [कः -ना] च तथा युग्मं अंगस्थानेषु विन्यसेत् ॥
१९७ ॥

ततो परिन्यसेच्चैव भैरवस्य रया सहः [कः सह] ।

एकीकृतं [कः एकाकृत] नसंदेहो [कः -हौ] तयोरेक [कः -वेक]
कृतानि तुः [कः तु] ॥ १९८ ॥

वक्त्रानेत्राङ्गकानिस्यु विन्यसेत् साधकोत्तमः ।

सजीवं च ततः कुर्या सद्यादि चैव दापयेत् ॥ १९९ ॥

युग्मं युग्मं समुच्चार्य चास्यमन्त्री [कः -मन्त्रि] विधानवित् ।

सेषं [कः शेषं] तु पूर्ववत् सर्वं [कः सर्व] लान्तान्त [कः -

न्तं] नात्र संशयः ॥ २०० ॥

विद्याङ्गानि ततो दद्याद् भोगस्थानेषु वाह्यतः [कः -त] ।

युग्मं [कः युग्म] युग्मं यथा न्यायं [कः न्याय]
प्रणवाङ्गाद् भैरवस्य तु ॥ २०१ ॥

भैरवस्य परं यच्च [कः यस्य] युग्ममेकीकृतं यतः ।

विन्यसेदङ्गभेदेन? उपरिष्टा? यथोदित? ॥ २०२ ॥

ख् १२३अ) अस्त्राणि? पूर्ववद्द्योद्? इक्षुच्चैव यथाक्रमम् ।

द्विकैकविधिना [कः -केक-] यागं [कः योगै] मयाप्रोक्तो [कः -
प्रोक्ता] यथाक्रमः ॥ २०३ ॥

अस्मिन् तत्रेन संदेहो नान्यो [कः नान्या] याग [कः योग] प्रदृश्यते

।

एतद्याग [क: -योग] समासाद्य [क: -ख्याद्य] वध्यते

केनसाधकः [क: कन-] ॥ २०४ ॥

उत्तमः [क: -म] सर्वयागान्तं एवं [क: एव] वै भैरवो ब्रवीत्।

अतः परं प्रवक्ष्यामि द्विकं [क: द्विक] चैव वरानने ॥ २०५ ॥

पूर्वासने महादेवि विद्यामूर्तिस्तु? दापयेत्?।

भैरवी तन्त्र विन्यस्य वक्त्रनेत्राङ्ग संयुतम् ॥ २०६ ॥ (?)

वामपार्श्वे न्यसेत् तस्य कपालीसं महामतिः [क: -मति]।

वक्त्रनेत्राङ्गसंयुक्तं [क: -क्त] आसनादिसमन्वितम् ॥ २०७ ॥

उपरिष्टा न्यसेत् मन्त्री कपालीसस्य सुव्रते।

सद्यादीनि ततो दत्वा दन्तपत्त्या तथैव च ॥ २०८ ॥

सवास्यमाला मालान्तं समन्तामातृका वृतम्।

शिवशक्ति मृतं कुर्याद् अर्घं चैव प्रदापयेत् ॥ २०९ ॥

भैरव्या? परिदेवेशि? परांशक्तिं? [क: -शक्ति] ततो न्यसेत्।

वक्त्रमन्त्राङ्ग संयुक्तां सद्यादिभिसमन्वितम् ॥ २१० ॥ [क:
नास्ति]

दन्तपत्त्यास्य मालायां लान्तं मातृकया सहः। [क: नास्ति]

शिवशक्ति मतं कुर्याद् भोगाङ्गानि ततो न्यसेत्॥ २११ ॥ [क: नास्ति]

विद्याङ्गानि महादेवि भैरव्याङ्गानि चैव हिः [क: हि]।

प्रणवाङ्गं [क: -ङ्ग] ततो दद्याद् [क: दद्या] भैरवाङ्गानि

चैव हिः [क: हि] ॥ २१२ ॥

परमाया ततोङ्गानि उपरिष्टा प्रदापयेत् ।

क् १६०ब्) अस्त्रादिक? ततो? दत्वा दिक्षुश्चैव यथाक्रमम् [क: -क्रम]
॥ २१३ ॥

भोगाङ्गास्तु विवर्जस्या [क: विवजस्या] हृद्यागे पूजयेत् सदाः
[क: सदा] ।

अन्येष्वेपि [क: अन्यष्वेपि] हि द्यागेषु [क: यागेषु]
एकद्विकतृकस्तथाः [क: -था] ॥ २१४ ॥

भोगाङ्गा वर्जिता कार्या हृदियागे न संशयः ।

हृद्यागां तु ततो कृत्वा करन्यासन्तु कारयेत् ॥ २१५ ॥

देव्युवाच

करन्यासादिकं कृत्वा ततो यागं यजेद्बुधः।

विधिरता समाख्याता सर्वयागेषु नान्यथा ॥ २१६ ॥ (?)

त्वया यागा समाख्याता यश्चान्या संप्रकीर्तितः [क: सप्रकीर्तिता]।

प्रकल्पीतः [क: -त] केन कार्येण एतत् माख्या तु मर्हसिः [क: -सि] ॥ २१७ ॥

भैरव उवाच

मात्रात्मनिस् [क: -णि] तथा शक्तौ [क: शक्तो] शिवेपिण्ड तथैव हिः [क: हि]।

शुद्धयः [क: शुद्धयो] पञ्चयो वेत्ति मन्त्रमन्त्री प्रसिद्धयति ॥

२१८ ॥

मन्त्रशुद्धि पुराकृत्वा दात्मशुद्धि तथैव च ।

शिवशक्तिस्तथा शुद्धि ततो? दस्य? कारयेत्? ॥ २१९ ॥

श्वभाव? सुद्धामेतानि [क: शु-] सर्वदा नात्र संशयः ।

ख् १२३ब्) अनादिमलसन्सार [क: -सन्सा *] कर्मवन्धन [क: करर्मवधन] सशयः ॥ २२० ॥

रंजितानि तु चित्तानि [क: चिन्ताणि] जन्तूनाम् [क: -ना] वरवर्णि [क: वरनिता] ।

तेनादौ [क: -दो] साधको नित्यं योगज्ञो [क: या-] ध्यानतत्परः ॥ २२१ ॥

अन्तः करण [क: करश] विन्यासम् [क: क्तिन्यासम्] आदौ देव प्रकल्पयेत्।

हृद्यागं [क: -ग] प्र * मं [क: प्रथमे] कृत्वा [क: कल्पा] मन्त्रशुद्धिस्तथैव च ॥ २२२॥

सिवशक्ति [क: शिवसक्ति] विशुद्धिं च वहिन्यासं [क: -स] तु कारयेत्।

वहिन्यास कृते [क: कृतं] देवि पिण्डसुद्धि मतः परः ॥ २२३॥

पूर्वोक्तमासनम् मन्त्री [क: मन्त्रे] अङ्गुष्टार्धं प्रकल्पयेत्।

यथा यागे [क: याग] तथा चैव पद्मादौ तु प्रकल्पितम् [क: -त] ॥ २२४॥

विद्यामूर्ति ततो दत्वा भैरवी दक्षिणे [क: दक्षिण] न्यसेत्।

अंगुष्टार्द्धे [क: -र्ध] महादेवि वक्त्रनेत्राङ्गसंयुतम् [क: वक्त्र-] ॥ २२५ ॥

वामार्द्धे [क: यामार्ध] विन्यसेत् मन्त्री [क: मन्त्रि] कपालिसं पुरस्थितम् ।

वक्त्रनेत्राङ्ग संयुक्तं पूर्वसूत्रेण चोदितम् ॥ २२६ ॥

तस्योपरि न्यसेद् [क: न्यसेत्] देवं भैरवं हंसविग्रहम् ।

वक्त्रनेत्राङ्गसंयुक्तं [क: -क्त] सद्याद्यन्तं न संशयः ॥ २२७ ॥

भैरव्योपरि [क: -व्या-] विन्यस्य परां शक्तिं महाप्रिये [क: -प्रति] ।

वक्त्रनेत्राङ्गसंयुक्तां विद्यादि परिकल्पितम् [क: -ल्पेतम्] ॥ २२८ ॥

क् १६१अ) शिवशक्तिमतं कृत्वा ततोङ्गानि तु विन्यसेत् ।

अङ्गुलियं यथा न्यायं विद्याङ्गै वर्जितानि तु ॥ २२९ ॥

भैरव्याया न्यासपूर्वं [क: -पूर्वा] कपालिशस्य [क: -सस्य]
चैव हि ।

भैरवस्य ततोङ्गानि परमायास्तथैव च ॥ २३० ॥

अनेनैव विधानेन दक्षिणेपिकरे [क: दक्षि * पिकर] न्यसेत् ।

ततो देह न्यसेत् मन्त्री शक्त्याद्यासन पूर्वकम् ॥ २३१ ॥

दक्षिणार्ध न्यसेद् देवी भैरवी तेज संयुतम् ।

वक्त्रानि विन्यसेत् मन्त्री पूर्वादिपरिकल्पितम् ॥ २३२ ॥

वामकर्णस्य देशे तु पूर्ववक्त्रन्तु विन्यसेत् ।

दक्षिणं वक्त्रदेसे [क: वक्तद्देश] तु पश्चिमं दक्षिणे तथा ॥
२३३ ॥

कर्णदेशे न्यसेत् मन्त्री [क: मन्त्रि] उत्तरं [क: उत्तर] तु ततोद्यते [क:
ततो न्यसेत्] ।

ग्रीवादिकोपरिस्था [क: -ष्टा] तु पञ्चमं मूद्धि्न विन्यसेत् ॥
२३४ ॥

नेत्रानि [क: -णि] विन्यसेत् मन्त्री भैरव्याया मुखे मुखे ।

पूर्वोक्तेषु प्रदेशेषु [क: -शषु] ततोङ्गानि तु विन्यसेत् [क:
स्वन्यसेत्] ॥ २३५ ॥

नाभिनां विन्यसेत् मन्त्री अर्धमर्धकदाचन।

वामार्धंविन्यसेद् देवं [क: देवे] कपालिसं न संशयः ॥ २३६

॥

वक्त्रानि विन्यसेत् तस्य पूर्वोक्तेषु न चान्यथा।

वक्त्रदेशेषु मन्त्रज्ञस्ततो नेत्रानि [क: -णि] विन्यसेत् ॥ २३७ ॥

ततो परिन्यसेद् देव भैरवं [क: -व] मन्त्रविग्रहम्।

क् १२४अ) वक्त्रनेत्राङ्गसंयुक्तं तथैव परिकल्पयेत् ॥ २३८ ॥

सद्यादीनि ततो दद्या प्रतिलोमानुलोकाम्।

दक्षिणार्द्धे [क: -र्ध] परांशक्ति ततो विन्यस्य साधकः ॥ २३९

॥

वक्राङ्गानि ततो दद्या दन्तपक्त्यस्तथैव च ।

निरस्कान्तु [क: निरस्तान्तु] ततो मालां लान्तं मातृकया सहः ॥ २४० ॥

स्वस्थस्फटिकसंकाशं वामादौस [क: -दोस] मृतात्मकम् ।

सूर्यकोटिसमप्रख्या दक्षिणार्धा महाजसम् [क: -स] ॥ २४१ ॥

हृद्यागे तु विभिन्नौ तु वहिस्थौ च विचिन्तयेत् ।

अभिन्नौ तु शरीरस्याद् उभयोङ्गुष्टयोस्तथा [क: उभयाङ्गुष्टयो तथा] ॥ २४२ ॥

क् १६१ब्] वहिरङ्गानि विन्यस्य अनेनैव क्रमेण [क: -न] तु ।

अस्त्राणि पूर्वमुक्तानि द्विकन्यासे तथैव च ॥ २४३ ॥

द्विकयोगः [क: -ग] समाख्यात त्रिकस्य शृणु साम्प्रतम् [क: शाम्-] ।

पूर्वासने तथा चैव अष्टपत्रे [क: अस्त्र-] * * कुशेषये [क: तथा-] ॥ २४४ ॥

त्रिशूलं चोपरिन्यस्य [क: -स्ये] शूलमन्त्रेणमन्त्रवित् ।

त्रिखण्डविन्यसेद् विद्या मूलस्यो [क: -स्था] परिसाधकः ॥ २४५ ॥

मूलस्यदक्षिणे शृङ्गे आद्यखण्डं तु विन्यसेत् ।

द्वितीयं वामके न्यस्य तृतीयं मध्यमे [क: -मं] न्यसेत् ॥ २४६ ॥

मूर्तित्रयं महादेवि विद्या भेद व्यवस्थितम्।

दक्षिणायां न्यसेत् मूर्तौ ज्ञानशक्ति महोदयाम् [क: -दयम्]

॥ २४७ ॥

वक्त्रनेत्राङ्ग संयुक्तां [क: -क्तं] शक्तिन्यासादिपूर्वकम्।

वमशक्तिं [क: -शक्ति] न्यसेत् मन्त्री वामशूलाग्रके तथा ॥ २४८

॥

शक्तिन्यास पुराकृत्वा प्रतिष्टादिविकल्पितम् [क: -वि * ल्पितं]।

वक्त्रनेत्राङ्गदेशेषु [क: -श तु] आसनादि पुरस्सरः [क: -रम्] ॥

२४९॥

वक्त्रनेत्राङ्गकानिस्यु विन्यसेत् [क: -से] साधकोत्तमः।

मध्यमायां न्यसेत् मूर्तौ शक्तिं वै मध्यमां [क: -मा]
ततः ॥ २५० ॥

शक्त्याद्या सनका [क: -को] देवं दत्वा [क: कृत्वा] स्यादीनि [क: -दिनि] दापयेत्।

सद्यादिनि ततो दत्वा दन्तपक्त्याश्च मालिकाम् ॥ २५१ ॥

निरस्कैः कादिवर्णैस्तु [क: कानिवर्णैस्तु] लान्तं मातृकया सह
।

शिवशक्ति मतङ्कृत्वा [क: मत कृत्वा] अर्घन्दत्वा [क: अर्घ-]
यथा यक्रमम् ॥ २५२ ॥

वामाया कल्पयेत् मन्त्री [क: मन्त्रि] सद्यादिश्च ततः पुनः।

दन्तपत्त्यश्च मालायां लान्तान्तश्च विकल्पिताम् [क: -तम्] ॥ २५३
॥

शिवशक्ति [क: शिवे -] मतं कृत्वा अर्घं दत्वा यथाक्रमम् ।

दक्षिणायास्ततः शक्त्यः [क: सक्त्य] सद्यादिकल्पयेद्बुधः ॥
२५४ ॥

लान्तान्तं नात्र संदेहः शिवशक्त्यासमायुतम् ।

अर्घन्दत्वा [क: अर्घ-] यथा न्यायं [क: -सं] पूजयेत्
साधकोत्तमः ॥ २५५ ॥

अनुलोमविलोमेन अर्घधूपादिकं [क: अर्घं-] प्रिये ।

ख् १२४ब्] शक्तित्रयस्य दातव्यं यतोतास्तु समानवाः [क:
सनातवा] ॥ २५६ ॥

न देयं च प्रतिष्टाद्या पृथिव्यादीनि चैव हि ।

शक्तित्रयं त्रिधावस्थं [क: -वस्थ] त्रितत्त्वं च प्रदापयेत् ॥

२५७ ॥

क् १६२अ) शक्तिविन्यासकाले तु देहे देहे [क: देह] न संशयः ।

वक्रस्थानेषु [क: वक्रा-] वै दद्या प्रति प्रति न संशयः ॥

२५८ ॥

नेत्रस्थानेषु वै दद्या च्छक्तौ [क: नास्ति] सक्तौ [क: नास्ति]

यथाक्रमम् [क: नास्ति] ।

[क: प्रति प्रति न संशयः ।

नेत्रस्थानेषु वै दद्या छक्तशक्तौ यथाक्रमम् ।]

पञ्चचत्वारिन्स वै दद्यान् नेत्रस्थानेषु नान्यथा ॥ २५९ ॥

वक्रस्थानेषु वै दद्यात् क्रमात् पञ्चदशेष्वपि ।

शक्तिं च प्रणवं [क: प्रणव] चैव बीजशक्तित्रयं तथा ॥

२६० ॥

त्रितत्त्वं च यथा न्यायं स्थाने ष्वेतेषु दापयेत् ।

दक्षिणायां तथादौ तु वक्रस्थानेषु दापयेत् ॥ २६१ ॥

पञ्चष्ठ [क: -ष्ठं] च न [क: वलं] सन्देहो [क: सदेहो]

नेत्रस्थानेषु चैव हि ।

वामायास्तु [क: -न्तु] ततो देवि वक्रस्थानेषु दापयेत् ॥ २६२ ॥

नेत्रस्थानेषु चैवेह मध्यमायां ततो न्यसेत् ।

अनेन क्रमयोगेन [क: -योग] वक्त्रनेत्रादिदापयेत् [क: -त्रापयेत्] ॥ २६३ ॥

शक्तित्रयस्य देवेशि सद्याद्या पूर्ववक्त्रमात् ।

अङ्गुष्टे तु त्रिधावस्थां [क: -वस्था] मूर्तिं तासाम् विचिन्तयेत् ॥ २६४ ॥

अभिन्नाभिन्न [क: -भिन्ना] रूपां च आसनैस्तु पृथक् पृथक् ।

पद्मासनोपविष्टास्तु चतुर्हस्तां [क: चतुहंस्तान्] प्रति प्रति ॥ २६५ ॥

करैर्वादशभिर्युक्ता [क: कैरैवादशक्तिर्युक्ता] न्यस्तव्या न्यासकाक्षिणैः ।

पंक्त्या [क: पक्त्या] पिण्डस्थिता ज्ञेया एकलाली स्थिते तथा ॥

२६६ ॥

अङ्गानिविन्यसेत् तासाम् एकत्रैव [क: एवत्रैव] नचान्यथा ।

पृथग्भूतेषु देशेषु प्रति प्रति प्रदापयेत् ॥ २६७ ॥

बीजेन दक्षिणायास्तु [क: -न्तु] दापयेत् प्रथमं [क: -म] प्रिये [क: प्रियम्] ।

वामबीजेन [क: काम-] चाङ्गानि [क: सङ्गानि] विन्यसेत् साधकोत्तमः ॥ २६८ ॥

मध्यमायास्त्रबीजेन ततो देयानिमन्त्रिणा ।

त्रिगुणमङ्गषट्कं तु एकलाली [क: * क-] कृते [क: क्यते] तथा ॥ २६९ ॥

शक्तिपिण्डमहामन्त्री करमाख्येषु [क: -स्वेषु] विन्यसेत्? ।

अङ्गानिविन्यसे चैव त्रिगुणानि यथाक्रमम् ॥ २७० ॥

वक्रपूर्वाणि [क: -नि] देवेशि विन्यसेत् पूर्वव क्रमात् ।

वक्रानि त्रिविधान्येवम् अङ्गुलीषु प्रदापयेत् ॥ २७१ ॥

ततश्चाङ्गानि विन्यस्य त्रिविधेन क्रमेण तु ।

क् १६२ब्) अङ्गन्यासं ततः [क: तत] कुर्यात् साधकः सुसमाहितः

॥ २७२ ॥

पादादारभ्य नेत्राङ्गाम् अवधूता न्यसेत् तथा ।

नान्युनानाविकानिस्युः समवीर्यास्तु ता स्मृताः ॥ २७३ ॥ (?)

सकार(?)कुरुते दक्षा वामाशृष्टिं तथैव च ।

ख् १२५अ) मध्यमास्तु स्थितं कुर्यान् नियत्यं [क: नि * त्यं]
कर्मकारिका ॥ २७४ ॥

नदक्षा कुरुते सृष्टि स्थिरीं [क: -री] नैव च कारयेत् ।

संहारं [क: -रेन्] नच शक्नोति कर्तुम्वामा [क: कतुम्वासा]
कदाचनः ॥ २७५ ॥

न च शक्ता स्थितिं कर्तु कदाचिदपि सुव्रते ।

नसृतिं [क: -सृष्टिं] मध्यमाकुर्यान् नापि सन्हाररूपिणी [क: -
णि] ॥ २७६ ॥

स्थिति मात्रं न कुर्वन्ति अन्यकर्मान सक्तिकाः ।

अतोह्यता समाख्याताः? समवीर्य पराक्रमाः [क: -क्रमा] ॥

२७७ ॥

अनुलोमविलोमेन [क: अवलोम-] कल्पयेद् अर्चयत् ततः ।

सिद्धयंति नात्र संदेहो एवं [क: एव] योवेत्ति साधकः ॥ २७८ ॥

अचिरेणैव कालेन सर्वसिद्धि प्रदायिकाः [क: -का] ।

सिवे नाधिष्टितात् सर्वाः सर्वकामफलप्रदाः [क: -दा] ॥ २७९ ॥

शिवन्तु योजयेत् तासामुपरिष्टान्नसन्सयः ।

भोगस्थानेषु चाङ्गानि [क: चाण्डानि] पद्मपत्रेषु योजयेत् ॥
२८० ॥

त्रिखण्डायास्तु विद्यायाः [क: -या] क्रमेनैव [क: -णैव]
विधानवित् ।

दक्षिणायास्तु अङ्गानि विद्यायुक्तानि [क: -मुक्तानि] दापयेत् ॥ २८१
॥

वामया च तथैवेह विद्या युक्तानि चैव हि ।

मध्यमायास्तथैवेह अङ्गविद्यानिदापयेत् ॥ २८२ ॥

दक्षिणायास्ततः शक्ते बीजाङ्गानि प्रदापयेत् ।

वामया व ततो दद्या मध्यमायाम् [क: -यास्] ततः पुनः ॥ २८३
॥

अस्त्राणि दिक्षु चैवेह पूर्ववन् दापयेद्बुधः ।

करन्यासादिकं कृत्वा ततो यागं [क: यामं] प्रकल्पयेत् ॥ २८४
॥

अङ्गुष्टे चासनं [क: चासतं] दत्वा त्रिशूलेन समन्वितम् [क: -त
] ।

त्रिखण्डा तु न्यसेद् विद्या [क: धि मा] तृसृङ्गेन तथैव हि ॥ २८५ ॥

दक्षिणे [क: -णेस्त्रे] तु ततो दद्याद् दक्षिणान्तु तृभागके ।

शक्तिन्यासनकं [क: -क] कुर्या करन्यास विधौ प्रिये ॥ २८६ ॥

पादादिषु समारभ्य शिखान्तां [क: शिखायांन्ता] यावत्
साधकः ।

क् १६३अ) नदेयाश्च प्रतिष्टाद्या लान्तं मूर्ध्निदापयेत् ॥ २८७ ॥

देव्याद्या किङ्कर्यान्ताश्च मातृकायास्तु मण्डले ।

शिवशक्तिमतङ्कृत्वा दक्षिणायास्तथा पुनः ॥ २८८ ॥

दक्षिणान्ता त्रिभागस्यात् कन्धस्योपरिपूर्ववत् [क: कुंधस्यो-] ।

सद्यायाश्च ततो दद्यात् साधकोध्यान तत्परः ॥ २८९ ॥

दक्षिणाया स्वमन्त्रैश्च वक्रोक्तैः पूर्ववत् [क: -व] क्रमात् ।

दन्तपक्त्यानिरस्कान्तु लान्तमातृकयासह ॥ २९० ॥

शिवशक्ति मतं कृत्वा ततोमध्यात् प्रकल्पयेत् ।

ख् १२५ब्) शिवशक्तिविभागेन शिवशक्तिमतन्तथा ॥ २९१ ॥

भोगाङ्गानि ततो दद्या वहिर्भूतानि [क: वहिभूत्वानि]

साधकः ।

आत्मनोरक्षणार्थन्तु यथा यागे तथास्त्विह ॥ २९२ ॥

एतन्यासं प्रकुर्वीत नित्यनैमित्तिके विधौ ।

याम्ये चैव महायागे शमसानैरष्टभिर्वृताः [कः शमशानेरष्टभिर्वृता] ॥ २९३ ॥

साधनं ग्रहवेताल दिव्यामाला प्रदर्शने ।

सद्यावतारणे [कः -वतारश्च] चैव महामन्थानके विधौ ॥ २९४ ॥

सिद्धगर्त्तविधाने तु सिद्धमण्डपिका विधौ ।

यन्त्राणवि तथा चैव ज्ञात्वा कर्म पृथक् पृथक् ॥ २९५ ॥

शुभेषु [कः सुभषु] अनुलोमं [कः -म] स्याद् विपरीतेनुलोमकम्

[क: -क] ।

स्वबीजं पुटितं ज्ञेयं [क: ?] कर्मकाले पृथक् पृथक् ॥ २९६ ॥

नित्यन्यासं पुराकृत्वा कर्मकाले तु साधकः ।

कर्मन्यासं ततः कुर्या वोलोमादनुलोमक? ॥ २९७ ॥

विलोमासा(?)धकाः [क: -का] कुर्याद् यथा यागन्तु तत्छृणु ।

पूर्वासने महादेवि तद्वीज पुटितं तथा ॥ २९८ ॥

वामान्तु मध्यमां [क: -मा] योज्य वामाश्चैव तु दक्षिणे ।

दक्षिणां च तथा मध्ये [क: मध्य] स्वबीजैः पुटितास्तथा ॥

२९९ ॥

वक्त्राणि विपरितानि अङ्गानि च यथाक्रमम् ।

तद्बीज पूटितान्येवं [क: -व] त्रिधावस्थानि विन्यसेत् ॥ ३०० ॥

वायव्यादीनि [क: -दिनि] चाङ्गानि विन्यसेत् पूर्ववद्बुधः? ।

अन्तिमान्यादितो दद्याद्रादिमाद्या [क: तद्याद्रादिमाया] ततो
ददेत् ॥ ३०१ ॥

क् १६३ब्] पृथिव्यादीनि चैवेह [क: चैवह] अयवर्जनियाद्विभिः [क: -
वजानियाद्विभिः] ।

शक्तित्रयं [क: -त्रय] ततो दद्यात् त्रिधावस्थं [क: -वस्के]
यदुद्धृतम् [क: प-] ॥ ३०२ ॥

त्रितत्त्वं च ततोन्यस्य आसनादि प्रदापयेत् [क: -ये] ।

वक्रस्थानेषु सर्वेषु [क: सर्वषु] क्रमात्यं च दशेष्वपि ॥ ३०३

॥

पञ्चचत्वारिसतन्तु नेत्रस्थानेषु [क: -स्थाने *] चैव [क: अचेव] हि ।

अवधूतो वतारेण [क: थतारेण] शक्तिनात्रितयेन? च ॥ ३०४ ॥

त्रितत्त्वेन यथा न्यायम् आसनानि [क: आसानानि] प्रकल्पयेत् ।

त्रिशिखन्तु ततो विद्या शूलमन्त्रेण पूर्ववत् ॥ ३०५ ॥

त्रिखण्डन्तु ततो दद्या त्रिषुस्थानेषु पूर्ववत् ।

दक्षिणे [क: दक्षिणो] तु त्रिभागे तु दक्षिणे च रणान्तिकम् ॥ ३०६ ॥

दक्षिणा विन्यसे [क: -स] छक्ति स्वरूपं चिन्त्युयोगवित् [क: विन्य-] ।

वक्त्रानि [क: वित्तानि] कल्पयेत् तस्य स्कंधदेशे तु आत्मनः [क: आत्मन] ॥ ३०७ ॥

पञ्चवक्त्रविभागेन ततो नेत्राणि विन्यसेत् । (?)

वक्त्रे? वक्त्रे? यथा? न्याय? ध्यानयुक्तो समाहितः ॥ ३०८ ॥

ख् १२६अ) ततो वामे त्रिभागे तु वामशक्तिस्तु विन्यसेत् ।

वक्त्रनेत्रानि [क: -णि] वै दद्याद् [क: दद्या] वामस्कन्धोपरिस्तथा ॥ ३०९ ॥

मध्यमे तु त्रिभागस्य [क: -गेस्य] मध्यमं विन्यसेत् ततः ।

वक्त्रानि विन्यसेत् मन्त्री निजस्यगृह्य पूर्ववत् ॥ ३१० ॥

ते नैव क्रमयोगेन [क: क्र * -] पूर्वादिपरिकल्पितम् ।

नेत्रानि पूर्ववत् [क: -व] न्यस्य यथावद् वक्रपञ्चके ॥ ३११ ॥

अङ्गानि विन्यसे देवि सकलोली कृते तथा ।

दातव्यानि नभिनानि प्रति प्रति कदाचन ॥ ३१२ ॥

दक्षिणायास्तु [क: -न्तु] बीजं स्याद् अङ्गभेदेन भेदितम् ।

विन्यसेद् अङ्गभेदेषु [क: एङ्ग-] साधका निजविग्रहे ॥ ३१३ ॥

तेषां चैवोपरिष्टा तु वामे यागानि [क: यागादि] विन्यसेत् ।

मध्यमायास्ततोङ्गानि [क: -न्ततोङ्-] तेषामुपरिदापयेत् ॥ ३१४ ॥

सद्यादीनि ततो दद्या मध्यमाया निजात्मके [क: -क] ।

दन्तपत्त्यानिरस्कान्तु लान्तं मातृकया धृतम् [क: मतम्] ॥ ३१५

॥

मद्याद्या तु ततो दद्याद् वामयो [क: -या] स्कधकोपरि।

पञ्चवक्त्रानि [क: -वक्त्रानि] भागेन तद्वक्त्र कृत लक्षणम् ॥

३१६ ॥

दन्तपक्त्यानिरस्कां च कपालाली तथैव हि [क: च]।

क् १६४अ) मन्तिमन्तु [क: मन्त्रिमन्तु] ततो दद्याद् आदिमान्य ततः

पुनः ॥ ३१७ ॥

विपरीतेषु सर्वेषु स्वबीजपुटितानि तु।

एवं [क: एव] यागस्तथा [क: -यस्-] न्यासा विपरितेषु कर्मषु ॥ ३१८

॥

असुसिद्धि प्रदाः [क: -दा] प्रोक्ता नात्र कार्यविचारणात् ।

यथोक्ते त्वनुलोमेषु [क: लनु-] शुभबीजपुटीकृतम् [क: -तः] ॥ ३१९ ॥

यजेद् [क: यजद्] यागं [क: -गे] तथा न्यासं [क: न्यास]
विन्यसोपरिकारयेत् [क: विन्यसेसापरि-] ।

पूर्वमेवा [क: -का] विधानेन बीजमात्राणि विन्यसेत् ॥ ३२० ॥

यागे [क: याग] न्यासे हृदिश्चैव यथा भैरवमब्रवीत् ।

विमानगमने चैव [क: चव] वाहनै [क: -ने] खेचरे विधौ [क:
विधो] ॥ ३२१ ॥

बीजमन्त्राणि विन्यस्य व्रजेत् [क: व्रजे] स्थानं यथेप्सितं ।

त्रिकन्तु [क: त्रिकलु] कथितं देवि यागन्यासक्रमेण तु ॥ ३२२ ॥

अस्य भेदम् प्रवक्ष्यामि शृणुष्वेकाग्रमानसा ।

पूर्वासने [क: -न] तथा चैव तृसूलेन [क: तृस्तुलेन] विवर्जिते ॥ ३२३ ॥

विद्यामूर्तिमखण्डास्तु [क: -न्तु] विन्यसेत् साधकोत्तमः ।

दक्षिणाया [क: दक्षिणा *] तथा शक्ते बीजं तत्रोपरिन्यसेत् [क: तत्वो-] ॥ ३२४ ॥

शक्तिन्यासं तथैवेह सर्वस्थानेषु [क: सर्वे-] पूर्ववत् ।

प्रतिष्टाद्या ततो दद्या पृथिव्यादीनि चैव हि ॥ ३२५ ॥

विद्याशक्ति पञ्चे [क: पञ्च] व बीजशक्ति त्रयन्तथा ।

त्रितत्त्वं च ततो दद्यात् साधकः सुसमाहितः [क: सममा-] ॥
३२६ ॥

ख् १२६ब्) वक्त्रनेत्राङ्गदेशेषु तारशक्ति त्रयन्तथा ।

त्रितत्त्वञ्च [क: त्रितत्व च] यथा न्यायं विन्यसेत् साधकोत्तमः ॥
३२७ ॥

वक्त्रनेत्राङ्गसंयुक्तं [क: वक्त-] विन्यसेत् पूर्ववत् क्रमात् ।

सद्यादीलान्तकान्तान्तु सर्वं कृत्वा तथैव हि ॥ ३२८ ॥

भोगाङ्गानि ततो दद्यात् पद्मपत्रेषु पूर्ववत् [क: -वद्] ।

विद्याङ्गानि? न्यसेत्मन्त्रि? तद्बीजा?न्तु [क: -स्तु] न संशयः ॥
३२९ ॥

वामयावामवीजेन मध्यमायास्तथैव च ।

विद्याङ्गानि ददेत् मन्त्री मेषानि तु स्ववीजकैः [क: -केः] ॥ ३३० ॥

याग यागे यथा न्यायं कारयत् साधकोत्तमः ।

अस्त्राणि पूर्ववद् दद्याद् यागत्रितयकस्यपि ॥ ३३१ ॥

याग [क: यागे] त्रितयमाख्यातं [क: -त] त्रिकभेद व्यवस्थिताः [क: -तः] ।

एकवीरविधानन्तु शक्त्या चैव [क: तव] वदाम्यहम् ॥ ३३२ ॥

पूर्वासने तथा चैव विद्यामूर्तिं [क: -मूर्ति] ततो न्यसेत् ।

क् १६४ब्) ततो परिन्यसेद् देवी भैरवी तेजमासृताम् [क: -मृताम्] ॥ ३३३ ॥

शक्तिन्यासादिकं [क: -सांदिकं] सर्वं कर्त्तव्यं पूर्ववत् क्रमात्।

वक्त्रनेत्रानि चाङ्गानि विन्यसेत् यथाक्रमम् ॥ ३३४ ॥

ततोपरि न्यसेत् मन्त्री [क: मन्त्रि] परां शक्ति महाधिपे।

वक्त्रनेत्राङ्गसंयुक्तं सद्यादिभिसमन्वितम् [क: मु-] ॥ ३३५ ॥

दन्तपक्तेश्च मालायो [क: -या] लान्तान्ता [क: * न्तान्ता] पूर्ववत् क्रमात्।

शिवशक्तिमतं कृत्वा भोगाङ्गानि प्रकल्पयेत् ॥ ३३६ ॥

विद्याङ्गानि यजेत् मन्त्री तद्बीजान्तानि पूर्ववत्।

भैरव्याया ततोङ्गानि तेषामुपरिदापयेत् ॥ ३३७ ॥

पर्मायांस्ततो [क: -यान्ततो] दद्या तेषामुपरिपूर्ववत् ।

पूर्वमेव मयाप्रोक्तो [क: -प्रोक्ता] यागोयं वरवर्णिनि ॥ ३३८ ॥

भैरवेण [क: -व्यान] समोपेता अस्त्रशक्तिस्तु [क: अस्त्रा-] केवला ।

करन्यासं तथा देहे पूर्व एव विधिस्मृतः ॥ ३३९ ॥

भैरवेन विहिना तु सेषं [क: शेषं] सर्वन्तु पूर्ववत् ।

शक्तियागो [क: -यागा] मयाख्यात [क: मयाप्रोख्यात्]
एकवीरविधिः परः ॥ ३४० ॥

अधुना संप्रवक्ष्यामि भैरवस्य शृणु प्रिये ।

आसनं पूर्वमेवोक्तं विद्यामूर्तिं तथैव च ॥ ३४१ ॥

ततोपरिन्यसेद् देवं [क: देव] कपालीसं [क: कपालांसं]
महायमे ।

वक्त्रनेत्राङ्गसंयुक्तं भैरवं तस्य चोपरि ॥ ३४२ ॥

तथैव वक्त्रनेत्रादीं संयुक्तं विन्यसेद् वुधः ।

सद्यादीनि [क: -ति] ततो दद्या लान्तान्ता पूर्ववत् क्रमात् ॥ ३४३ ॥

भोगाङ्गानि तथैवेह करन्यासादिकं [क: -न्तामादिकन्] तथा ।

ख् १२७अ) भैरवस्य [क: भैरव्यस्य] समाख्याता यागोयं
केवलस्य तु ॥ ३४४ ॥

देव्या चैव विहिनस्य भैरव्या वरवर्णिनि [क: वरर्णिनि] ।

अतः परं प्रवक्ष्यामि केवलस्य महाप्रभो ॥ ३४५ ॥

अन्य बीजविहिनस्य पदमार्ग स्थितस्य तु ।

पूर्वासने [क: -सेने] तथा चैव विद्यामूर्तिन्तु विन्यसेत् ॥ ३४६ ॥

सेषन्तु [क: शेषन्तु] पूर्ववत् सर्वं करन्यासादिकं प्रिये ।

भोगाङ्गानि तथैवेह बीजयुक्तानि पूर्ववत् ॥ ३४७ ॥

स्मरणाङ्गा ततो दद्याद् अस्त्रपर्यन्तकानि [क: अस्त्रे-] तु ।

केवलस्य महादेवि शिवस्य परमात्मनः [क: -न] ॥ ३४८ ॥

क् १६५अ) भैरवाख्यस्य संप्रोक्तौ यागोयं मुक्तिलक्षणम् ।

एतद् यागत्रयं प्रोक्तं मुमुक्षो [क: -क्षा] साधकस्य तु ॥ ३४९
॥

नान्यः [क: नान्य] कर्माणि वृतस्य योगमार्ग स्थितस्य तु।

इति पिचुमते द्वादशसाहस्त्रके यागनिर्णयः पटलः [क: नास्ति]
पञ्चविंशतिमः [क: -तिः] [क: पटलः] ॥ २५ ॥

षड्विंशतिमः पटलः

अतः कर्मविधिं [क: -विधि] वक्ष्य यथैवानुक्रमेण [क:
यथेवानुक्रमेण] तु।

लक्षणे यागकाले [क: यागे-] च प्रतिकर्मसुयोजिताः ॥ १ ॥

ते प्रसिद्धिकरा बीजा भेदं तेषां निबोध मे।

चण्डाक्षां च महोछुष्मा करालादन्तुरास्तथा ॥ २॥

रक्ता करालिनी चैव भीमवक्रा महाबला।

ज्ञानशक्त्यादिसंयुक्तां वामयान्ते विभूषितम् ॥ ३॥

सविसर्गेन हंसेन अन्तस्थेन कपालकम्।

आदौ [क: आदो] मध्ये तथा चान्ते ज्ञानशक्ति त्रिधास्थिता ॥ ४॥

अष्टनामाक्षराणान्तु [क: -शान्तु] वामाचान्ते व्यवस्थितः।

सविसर्गे त्रिधावस्थं खट्वाङ्गे चान्तसंस्थितम् [क: सस्थितम्]
॥ ५॥

ज्ञानसक्ते [क: -शक्तेस्] तथा जेष्टा संपुटे [क: -ट] विपरीतकम्।

आद्यन्तस्थे [क: अद्यन्तथे] स्थितम् मध्ये अष्टकं मालकं स्मृतम् [क: स्मृत] ॥ ६ ॥

कपालस्यैव कर्त्तव्यं [क: कर्तत्य] आदिमध्यान्त [क: -न्तु] संस्थितम् ।

क्रियाशक्तस्तु [क: -शक्तिस्तु] * * (?) स्यात् [क: बीज-] करकिणि मुदाहृता ॥ ७ ॥

कपालस्यैव मध्यस्था ज्ञानशक्तिपुटिकृता ।

रौद्री तथोत्तरे अर्धमध्यस्थैव तथैव च ॥ ८ ॥

आदिरन्ते [क: -रन्तो] स्थिता सा तु ज्ञानशक्तिश्च केवला ।

भीभस्थमुद्रया [क: भीमछ-] कार्या परा सिद्धिप्रदायिका ॥ ९ ॥

आदौ दूतीचतुष्कन्तु अन्ते देवीचतुष्टयम्।

आदिमध्यान्तसंयुक्तं ह्रीं [कः ह्रां]

शङ्खखड्गमुद्रया [कः शक्त्य –] ॥ १० ॥

ख् १२७ब्) ह्रींशक्ति सविसर्गञ्च विपरीतास्तु दूतयः।

ज्ञानशक्ति ततो देव्या मन्त्रलोमान्त संस्थितम् ॥ ११ ॥

शूलमुद्रा समाख्याता तीव्रकर्मकरी स्मृता।

क् १६५ब्) ज्ञानशक्तिस्तथा वामा वामाया दर्भितास्तु ताः ॥ १२

॥

देवी दूत्यः क्रमेणैव वामान्ते ज्ञानवामकौ।

पासमुद्रा समाख्याता नाराजं [क: -रांज] शृणु

सांप्रतम् ॥ १३ ॥

ज्ञानशक्त्या विदर्भ स्याद् विपरीतं तथाष्टकम्।

ज्ञानशक्त्यादिनन्तेपि रोधितानुक्रमेण तु [क: नास्ति] ॥ १४ ॥

पद्ममुद्रा समाख्याता वै कङ्कश्च [क: कर्तेश्च] निबोध मे

[क: -म]।

ज्ञाशक्तिस्तथा रौद्री रौद्रया वै दर्भितानि तु ॥ १५ ॥

अनुलोमानि बीजानि ह्रीं चान्ये च व्यवस्थिताः [क: -ता]।

ज्ञानशक्ति विदर्भित्वा [क: -त्व] विपरित तथाष्टकम् ॥ १६ ॥

तासां मध्ये [क: मधु] स्थिता रौद्री [क: रौद्रा]

ज्ञानशक्तिपुटीकृता ।

अर्धमर्धस्थितस्याध [क: -थ] तस्यैव तु न संशयः ॥ १७ ॥

संपुटास्ते स्थितानान्तु आदिरन्ते च ह्रीं स्थिता ।

द्विकद्विकै चान्तरीतं ज्ञानशक्त्या तु वज्रके ॥ १८ ॥

ज्ञानशक्तेस्तथा रौद्र्या संपुटे मध्यसंस्थितम् [क: -ता] ।

अष्टकमनुकूलस्य [क: अष्टके-] तोमरो [क: -रा] नात्र संशयः ॥
१९ ॥

प्रणवेनैव ह्रीं [क: नास्ति] शक्त्या दर्भितं [क: दभिष्टं]
चाष्टकं क्रमात् ।

आद्यन्तेपि हि दातव्यौ विजयाख्या प्रकीर्तिता ॥ २० ॥

ह्रीं शक्ति सविसर्गन्तु आदिरन्ते न संस्थितौ।

आभ्यासे च विदर्भ्यस्य अष्टकंस्त्वनुलोमकम् ॥ २१॥

चक्रमुद्रा [कः चक्रे मुद्रां] समाख्याता छेदेने [कः -दने] तु प्रकीर्तिता।

ज्ञानशक्तेस्तथा रौद्र्या संपुष्टे मध्यसंस्थिते ॥ २२॥

स्वाचारास्य [कः स्वाधारस्य] विदर्भस्या शक्तिमुद्रास्तथा स्मृता।

शक्ति संपुटमध्यस्थं स्वकारेणैव दर्भितम् ॥ २३॥

अष्टकंस्त्वनुलोमं [कः -भोमं] स्याद् [कः स्वाद्] दण्डमुद्रा प्रकीर्तिता।

महाबलं तथा रक्ता भीमवक्रं करालिनं ॥ २४ ॥

दन्तुरं चैव चण्डाक्षी करालिछुष्मकन्तथा ।

द्विकं द्विकं यथा न्यायं ह्रींशक्त्या च [कः नास्ति]

विदर्भितम् [कः नास्ति] ॥ २५ ॥

ह्रीं [कः नास्ति] शक्त्या * * ? संयुक्तां [कः घन्त-] वज्रमुद्रा

प्रकीर्तिता ।

ज्ञानशक्त्या तथा रौद्र्या सविसर्गेण दर्भितम् ॥ २६ ॥

अष्टकंस्त्वनुलोमं स्या द्रंष्ट्रमुद्रा [कः दंष्ट्र-]

प्रकीर्तिता ।

क् १६६अ) विलोमादूतयः प्रोक्ता अनुलोमा तु देवताम् ॥ २७ ॥

उभयो संपुटं कृत्वा अन्योन्यान्तरित प्रिये ।

ख् १२८अ) आद्यन्ते ज्ञानशक्तिं तु संपुटस्य [क: -टंस्य] न
संशयः ॥ २८ ॥

शान्तं चतुर्थयुक्तं तु सप्तमस्य द्वितियकम् ।

षोडशस्वरयुक्तेन दर्भितं [क: दभितं] चाष्टकं [क: रा-]
प्रिये ॥ २९ ॥

पिंछकेति समाख्यातं भ्रामते यः प्रकीर्तितम् ।

ह्रींशक्ति संपुटांतस्थं द्वाविन्सेन [क: द्वाद्वि-] विभूषितम्
[क: -त] ॥ ३० ॥

सप्तमेश्वरयुक्तेन सानुशारेण [क: -स्वरेण] अष्टकम् ।

विपरीतं महादेवि मुषलमुद्रा [क: मुखल-] प्रकीर्तिता ॥ ३१ ॥

पञ्चमः [क: -म] स्वरसंस्थेन [क: -सस्थेन] स्वानुस्वारेण [क:
-नेण] तेन वै ।

कोपेन च विदर्भस्यादष्टकं [क: विदर्भस्यादष्ट्कं]
त्वनुलोमकम् ॥ ३२ ॥

वक्रमुद्रा [क: चक्र-] समाख्याता ग्रसने या प्रकीर्तिता ।

ज्ञानशक्त्याविदर्भस्याद् अष्टं त्वनुलोमकम् [क: -लनु-] ॥ ३३ ॥

अङ्कुशं तु विजानीया कर्षणे [क: -शे] यत् प्रकीर्तिता ।

स्मरणे न विदर्भस्याद् [क: विदर्भस्याद्] अनुलोमं
तथाष्टकम् ॥ ३४ ॥

मृत्युंजयमिति प्रोक्तः कालेयत् परिकीर्तिताम् [क: -तः] ।

सविसर्गेण बीजेन कोपेन च विदर्भितम् ॥ ३५ ॥

अष्टकं त्वनुलोमस्या ह्रीं शक्त्या दन्तरोधितम् [क: दन्तु-] ।

योनिमुद्रा समाख्याता साधकानां हिताय वै [क: कै] ॥ ३६ ॥

अष्टकं त्वनुलोमं स्या द्विकं द्विकं विदर्भितम् [क: -त] ।

द्वातृंसकेन बीजेन आयंते [क: -त] संपुटं तथा ॥ ३७ ॥

ह्रींशक्त्या संपुटे चैव लिङ्गमुद्रा प्रकीर्तिताम् ।

देव्यादूतीद्वयं चैव अनुलोमव्यवस्थिता ॥ ३८ ॥

हूंफेफडेति रक्षार्धं ततो दूति द्वयान्तिमम्।

ज्ञानशक्तिस्तथाद्यन्ते अष्टकस्यवरानने ॥ ३९॥

मुद्रेयं समयिनी प्रोक्ता तत्काले दर्शयेद् वुधः।

अष्टकं त्वनुलोंअंस्या [क: -मस्या] ह्रीं शक्त्यान्तनिरोधितम् [क: शक्तिन्ततिग्राधितम्] ॥ ४० ॥

महाशव्दान्तसंयुक्ता वृषमुद्रा प्रकीर्तिता।

संपुटा संपुटी भावे [क: भाव] वज्रशृङ्खलवन्धने [क: -स्वलवधने] ॥ ४१ ॥

क् १६६ब्] तृशूलभेदने चैव पिञ्छकभ्रामणे तथा।

आकर्षणे कुशं चैव क्षोभने मुखलं तथा ॥ ४२॥

ग्रसने वक्रमेवोक्तं वेधने सरयोजितम् [क: म-] ।

काले मृत्युंजयं चैव अङ्गखट्वाङ्गयोजितम् ॥ ४३ ॥

कपाले अर्घपात्रं तु वज्रं वृष्टि [क: वक्रंमुष्टि] प्रमोचने

[क: -न] ।

मुद्राभेदेन कर्मञ्च [क: कर्मे च] अस्त्रयोज्यञ्च वै गिरि ॥ ४४ ॥

देवीनां [क: -ना] योजने मन्त्रा हृदयादितथैव च ।

उच्छुष्मपदयागानि ज्ञात्वा कुर्वीत साधकः ॥ ४५ ॥

विभज्य [क: विभक्ष्य] स्वेच्छया मन्त्री [क: मन्त्रि] विपरीतानि

योजयेत् ।

निग्रहानुग्रहे [क: -च ग्रह] त्वेषु कर्मभावानुभावयोः [क: -
यो] ॥ ४६ ॥

ख् १२८ब्] भेदिता तत्त्व भेदेषु नाडिमार्गेषु योजिताः [क: योजिता] ।

प्रस्यन्दन [क: प्रस्यदेन] प्रयोगार्थं वुध्या सोध्य [क:
साध्य] यथाविधिः ॥ ४७ ॥

अनेन साधयेत् [क: -यत्] क्षिप्रं सदेवासुरमानुषाम् ।

आकृष्याकृष्य भुञ्जित दिव्यकन्या मनोरमाः [क: -मा] ॥ ४८ ॥

अभियुक्तस्वरेत् मन्त्री जपध्यान विदौ सदा ।

निद्वद्मेव सिद्धयेत यथा तत्वानु योजनात् ॥ ४९ ॥

इति पिचुमते द्वादशसाहस्त्रके मुद्रामन्त्रोद्धारः पटलः [क:

नास्ति] षड्विंसतिमः [क: षद्विंशति पटलः] ॥ २६ ॥

सप्तविंशतिमः पटलः

अतः [क: अत] परं प्रवक्ष्यामि योगानां त्रितयं प्रिये ।

सामान्यवीरे शक्तीनां शक्तीनां तृतयस्य च ॥ १ ॥

अन्योन्योपरिसंस्थानं सामान्यवलकारकान ।

नियमो [क: नियमौ] नैव [क: नव] विद्येत् इछादेशेन सुव्रते [क: -तः] ॥ २ ॥

यतसामान्य वीर्यस्तु [क: -न्तु] शृणुष्वेकाग्रमानसा ।

हन्साख्यम् अग्निसस्थं तु चतुर्थश्वर [क: चतुर्थश्चर] योजितम् ॥ ३ ॥

आद्यशक्ति समाख्याता द्वितीया शृणुसांप्रतम्।

तदेव [क: तदैव] केवलं कृत्वा द्वितीयश्चरयोजयेत् ॥ ४ ॥

द्वितीया इति विख्याता तृतीया शृणु साम्प्रतम्।

तदेव केवलं कृत्वा षटश्चरसमन्वितम् ॥ ५ ॥

तृतीयन्तु भवेच्छक्ति बीजभेदेन सुव्रते।

वामदक्षिण मध्यस्था ज्ञातव्या साधकेन तु ॥ ६ ॥

आसां चैव विशेषं [क: विशे * म्] तु सर्वसिद्धिः [क: -सिद्धि] फलप्रदं [क: प्रद]।

क् १६७अ) कुटभेदेन [क: -भन *] वक्ष्यामि तन्मेनिगदतः [क:

तन्मोनिगदितः] शृणु ॥ ७ ॥

प्रासादं कालमारूढं ज्वलनस्योपरिस्थितः [क: -स्थित] ।

माहेन्द्रेस्तु [क: माहन्द्र तु] समारूढं वारुणस्योपरिस्थितम्
॥ ८ ॥

अग्नौ [क: अग्नो] तथा निलस्थौ [क: निरस्कौ] तु संस्थितन्तु
महायमे ।

कुलया [क: कलया] संस्थितं [क: सस्थितं] ज्ञेयं षष्टाया
पुनरेव हि ॥ ९ ॥

चन्द्रार्धशेखरं [क: -शेषंर] कृत्वा विन्दुनोपरिभूषितम् ।

शिखाया दीपमानन्तु कृत्वा वै वरवर्णिनि ॥ १० ॥

दक्षिणायां ततो बीजं तस्योपरिमहामति।

दापयेलान्तकस्यार्थं यथावस्थं न संशयः ॥ ११ ॥

एतकुटं वरन्देवि [कः -दवि] दक्षिणाया प्रकीर्तितम्।

अनेनवक्रमे [कः -म] नाथ वामया [कः वाम *] च समुद्धरेत् ॥ १२ ॥

मध्यमाया तथा चैव भेदोयं संप्रकीर्तितम्।

चतुर्थेन [कः चतुर्थं तु] वियुक्तन्तु कृत्वा कूटं वरानने ॥ १३ ॥

प्रथमन्तु [कः -स्तु] समाख्यात [कः -तन्] तृतीयस्वरसंयुतम् [कः तृतीय-]।

ख् १२९अ) द्वितीयं [क: -य] तु भवे चैव पञ्चमश्वरसंय्तम् ॥
१४ ॥

तृतीयन्तु समाख्यातं तथैकादशसंयुतम् [क: तथे-] ।

चतुर्थन्तु भवे [क: भ *] ह्येतच्चतुर्दशश्वरार्चितम् [क:
ज्यतच्चतुर्द्दशश्वरोर्चितं] ॥ १५ ॥

पञ्चमन्तु समाख्यातं [क: -त] वक्रं वै वरवर्णिनि ।

पूर्वकूटो परिन्यस्तं [क: पनिन्य्स्त] दक्षिणं बीजमादिमम् ॥
१६ ॥

वक्रपञ्चकमेवं स्याद् विभिर्भेदै व्यवस्थिता ।

आदिमेन द्वितीयेन [क: द्विती * न] त्रयोदशमकेन तु ॥ १७ ॥

शवरेण संयुतं न्यस्तं नेत्राणां तृतयं भवेत्।

वक्रे [क: वक्र] वक्रे [क: वक्र] महादेवि दक्षिणा या न

संशयः ॥ १८ ॥

अङ्गस्वरैस्तथा [क: -रै तथा] भिन्नं अङ्गषट्कं प्रकीर्तितम्

[क: -त]।

दक्षिणाया समाख्यातं बीजकूटो परिस्थितम् [क: -त] ॥ १९ ॥

अनेनव तु मार्गेण [क: -न] वामबीजन्तु भेदितम्।

कूटस्यो परिविन्यस्तं वक्राङ्गानि प्रकल्पयेत् ॥ २० ॥

स्वरूपा वस्थितं चैव वामया पूर्वमुद्धृता।

तृगुणं तु कृतं कूटं लोचना तृतयं भवेत् ॥ २१ ॥

मध्यमायास्तथा [क: -यान्तथा] बीजं षष्टश्वरवियोजितम् [क:
-स्वरविवर्जितम्] ।

वक्रस्वरैः [क: -स्वरै] समोपेतां [क: -द्यतां]
कुटस्योपरिसंस्थितम् [क: -सस्थितम्] ॥ २२ ॥

क् १६७ब्) वक्राणि [क: -नि] मध्यमायास्तु [क: -न्तु] कर्त्तव्याणि [क: -
नि] यथाक्रमम् ।

अङ्गस्वरैः [क: -रै] समायुक्तं अङ्गषट्कं विधियते ॥ २३ ॥

वामकूटः [क: -कूटस्] त्रिधाभिन्नं नेत्राण्ये [क: -स्ये] व
प्रकल्पयेत् ।

एतछक्ति त्रयं देवि कूटभेदे व्यवस्थितम् ॥ २४ ॥

वक्त्रनेत्राङ्गसंयुक्तं मविनाभावसंस्थितम् [क: -सस्थिता] ।

उपर्युपरिचान्यान्ये [क: -दान्यान्ये] मेकरूपत्रिधा स्थितम् ॥ २५
॥

यागभेदेन वक्ष्यामि निरपेक्षं [क: -येक्षं] फलः प्रदम् ।

भिन्नं पुञ्जीकृतञ्चैव [क: पुञ्जाकृतं चैव] एकवीर्य
महोदयम् ॥ २६ ॥

यागत्रयं पृथग्भूतं विन्यसेन शृणुष्व मे ।

आसने पूर्वसूत्रोक्ते [क: -क्तै] चक्रखेचरि पूजिते [क: -तो] ॥ २७ ॥

शक्तित्रितयबीजानां [क: -ना] मूलविद्यां यथास्थिताम् ।

मूर्तित्वेन [क: -त्वने] महादेवि च * *? परिविन्यसेत् [क:

अकस्योपरिविन्यसेत्] ॥ २८ ॥

मध्यमा बीजकानान्तु वामबीजान्तकान्तथा ।

दक्षिणा बीजकानां च एवभूतान्तु विन्यसेत् ॥ २९ ॥

मध्यमायास्ततः कुटं तस्योपरिन्यसेद्बुधः ।

वक्रनेत्राङ्गसंयुक्तं नात्र कार्य [कः -कार्या] विचारणात् ॥
३० ॥

तस्योपरिन्यसेच्चैव वामाकूटम्महामति [कः -कूटस्-] ।

वक्रनेत्राङ्गसंयुक्तं दक्षिणायास्तथा पुनः ॥ ३१ ॥

कूटन्त्रविन्यसेद् देवि तत्रोपरिन संशयः ।

ख् १२९ब्) वक्रनेत्राङ्गसंयुक्तं एकवीरविधिक्रमे ॥ ३२ ॥

वक्रक्रमेण चैवेह सद्यादीं दापयेत् ततः ।

शेषन्तु पूर्ववत् सर्वं कर्त्तव्यं [क: कत्तव्यं] भैरवो ब्रवीत्

॥ ३३ ॥

भोगस्थानेषु चाङ्गानि विद्यामार्गेण दापयेत् ।

अङ्गस्वरविभिन्नैस्तु विजैरन्तस्थितैस्तथा [क:

बीजरन्तैस्थितैस्तथा] ॥ ३४ ॥

मध्यमाया ततोङ्गानि वामया च पुनः क्रमात् ।

दक्षिणायास्तथा [क: -यां तथा] चैव कूटभेदे स्थितानि तु ॥

३५ ॥

भोगस्थानेषु देवेसि विन्यसेत् साधकोत्तमः।

अस्त्राणि विन्यसेद् दिक्षु यागे तु दक्षिणात्मके ॥ ३६॥

पूर्वासने तथा चैव विद्यामूर्तिस्तु विन्यसेत्।

दक् ।इणायास्तु बीजेन मध्यमायास्तथैव च ॥ ३७॥

क् १६८अ) वामयाश्च तथा चैव [कः चव] अन्तयुक्ता न संशयः।

दक्षिणायास्तथा कूटं [कः कूट] वक्त्रनेत्राङ्गसंयुतम् ॥

३८॥

विद्यामूर्तौ [कः -तौं] परिन्यस्य मध्यमायाः [कः मध्यमा *]

पुन न्यसेत् [कः -से]।

वक्त्रनेत्राङ्गसंयुक्तं वामयास्तु पुनस्तथा ॥ ३९॥ [कः नास्ति]

वक्त्रनेत्राङ्गसंयुक्तं [क: -क्त] विन्यसेत् [क: विन्यस]
साधकोत्तमः ।

पूर्वकमेण देवेसि [क: -शि] शिवयुक्तान्तु कारयेत् ॥ ४० ॥

भोगस्थानेषु चाङ्गानि विद्यायुक्तानि विन्यसेत् ।

तेषाम् बीजानि विन्यस्य स्वरयुक्तानि पूर्ववत् ॥ ४१ ॥

दक्षिणायास्ततोङ्गानि मध्यमायास्तथैव च ।

वामायाश्च ततोङ्गानि कुटस्थाने [क: -न] प्रकल्पयेत् ॥ ४२ ॥

अस्त्राणि विन्यसेद् दिक्षु पूर्ववत् साधकोत्तमः [क: -म] ।

वामयास्तु समाख्यातो यागोयं [क: -य] वरवर्णिनि [क: च-] ॥ ४३
॥

अधुना संप्रवक्ष्यामि मध्यमाया शृणुष्व मे ।

पूर्वासने तथा चैव विद्यामूर्तिन्तु विन्यसेत् ॥ ४४ ॥

कामबीजान्तसंयुक्तां दक्षिणायास्तथैव च ।

मध्यमायास्तथा चैव वीजे [क: बीजै] नैव समायुताम् [क: -तम्]
॥ ४५ ॥

तस्योपरिन्यसे कूटं वामया साधकोत्तम ।

वक्रनेत्राङ्गसंयुक्तां दक्षिणायान्ततो [क: -या * ते] न्यसेत् ॥
४६ ॥

वक्रनेत्राङ्गसंयुक्तं मध्यमायास्ततः पुनः ।

वक्रनेत्राङ्गसंयुक्तं शिवशक्त्यान्तकं [क: -क] तथा ॥ ४७ ॥

पूर्वक्रमेण चैवेह विन्यसेत् साधकोत्तमः ।

विद्याङ्गानि तथा देवि एभिर्युक्तानि [क: एभियु-] विन्यसेत् ॥ ४८ ॥

स्वराङ्गभेदमार्गेण [क: -मार्गे *?] वामकूटाङ्गकानि च ।

दक्षिणायास्ततोङ्गानि मध्यमायास्तथैव च ॥ ४९ ॥

अस्त्राणि पूर्ववद्दिक्षु विन्यसेत् साधकोत्तमः ।

ख् १३०अ) एतद्योगत्रयं [क: -द्यागत्रय] स्रेष्ठं [क: श्रेष्ठं]

सामान्यफलकारणम् [क: -ण] ॥ ५० ॥

नित्यनैमित्तिके [क: ?] काम्ये [क: काम्य] महापशुविधौ तथा ।

पूजनीयमिदं गोप्यं सर्वसिद्धिः [क: -सिद्धि] प्रदायकम् [क: *
*?यकम्] ॥ ५१ ॥

कर्मचानेन [क: -चातन] कर्त्तव्यं न च दीक्षाविधिः [क:
भ?क्षाविधि] क्रमः ।

इति महाभैरवे [क: पिचुमतद्वादश] ब्रह्मयामले
द्वादशसाहस्त्रके [क: साहस्त्रक] शक्तित्रितययागपटलः [क:
शक्तित्रितययाग] सप्तविंसतिमः [क: सप्तविंसति पटलः] ॥ ॥

अष्टाविंशतिमः पटलः

क् १६८ब्) अतः [क: अत] परं प्रवक्ष्यामि विभागं विमलं
ध्रुवम् ।

उच्छुम्मैकमलाङ्गिर्णम् [क: -कमलाङ्गार्णम्]
उच्छुष्मनावतारितम् [क: -नितम्] ॥ १ ॥

निरपेक्षा समन्दिग्वे महाभैरव पूजितम्।

तस्य यागविभागन्तु मन्त्रोद्धारं तथा शृणु ॥ २॥

स्वरत्रयोदशं चाद्यं [कः नाद्यं] सविन्दुं [कः विन्दु]
परिकीर्तितम्।

द्वितीयं व्यंजन [कः -नं] षष्ठं विन्दुयुक्तं तथैव च ॥ ३
॥

तथा त्रयोदशं चैव स्वरेकादशभूषितम्।

तृतीयञ्च समाख्यातम् आदिमं च ततः पुनः [कः पुन] ॥ ४॥

द्वितीयश्चरसंयुक्तं [कः -श्यरसं-] चतुर्थं परिकीर्तितम्।

एकविंसतिमं [क: -शतिम] चैव द्वितीये स्वरसंयुतम् ॥ ५॥

पञ्चमन्तु समाख्यातम् अष्टविसति [क: -शति] संयुतः।

तृतीयेश्वरसंयुक्तं षष्ठम् अक्षरकं [क: -क] स्मृतम् ॥ ६॥

विंसमं च पुनश्चैव व्यंजनं यत् प्रकीर्तितम्।

तेनैव संयुतं देवि सप्तममक्षरं स्मृतम् ॥ ७॥

द्वितीयेस्वरसंयुक्तं [क: द्वितीय-] द्वात्रिंसद्गरुणालयम्।

अष्टमं तु विजानीयाद् यागेस्मिं विमलाह्वये [क: वि * लाह्वये] ॥
८॥

त्रयत्रिंसस्तु तेनैव संयुक्तं नवमं [क: -म] स्मृतः [क: -
तम्]।

त देव षष्टयारुदं? चतुर्शमः भुषितः ॥ ९॥ [कः नास्ति]

हन्तारार्ध न चाक्रान्तं मन्त्रमते व्यवस्थितम् [कः -ताम्] ।

नुत्पन्तं [कः -न्त] प्रणवाद्यं च विद्यान्तं सर्वसाधकः ॥
१० ॥

एत देवि द्वितीयेन विन्दुयुक्तेन [कः -युष्टेन] सस्थितम् ।

हृदयं च शिरं चैव चतुर्थैस्वरसंयुतम् ॥ ११ ॥

चतुर्दसे [कः -शे] वियुक्तन्तु विद्यान्तन्तु शिखा स्मृताः [कः -ता] ।

द्वादसे [-शो] न तु संभिन्न [कः -न्नं] कवचन्तु ततः स्थितम् ॥
१२ ॥

विन्दुयुक्तं [कः विदु-] तु नेत्रस्यादस्त्रं षोडशसंयुतम् ।

अ इ उ ए उ [कः व] युक्तस्योद्विद्यान्तं वक्रपञ्चकम् ॥ १३ ॥

षष्टस्वरसमारूढं कलाविन्दुविभूषितं [कः करावि *
भूषितम्] ।

एत [कः एतद्] देव सिवं विद्धि विद्याहीनं परः प्रभुः ॥ १४ ॥

बीजं सर्वेषु मन्त्रेषु जीवं सर्वेषु संस्थितम् ।

नामेन [कः नानेन] रहिता सिद्धि न कदाचिरूदाहृता ॥ १५ ॥

ख् १३०ब्) सप्तविशस्थितन्तन्तु चतुर्थस्वर संयुतम् ।

विंदुयुक्तं भवेछक्ति दक्षिणा सिद्धिदायिकाः ॥ १६ ॥

एतदेव [कः एतद्त्र] द्वितीयेन संयुक्ते [कः सयुक्त] केवलं [कः -ल]

विदुः ।

क् १६९अ) शृष्टिरूपो महावीर्या शक्तिर्वामा [क: शक्ति-]

परास्मृता ॥ १७ ॥

शिवमेवविजानी हि मध्यमा शक्ति चोत्तमा [क: -मः] ।

ओड्डुयुक्तं वियुक्तं च तत्त्व तृतयमुत्तमम् ॥ १८ ॥

पूर्वासने [क: -सन] महादेवि भैरवं मन्त्रविग्रहम् ।

वक्रनेत्राङ्गसंयुक्तं [क: -क्त] भोगाङ्गै [क: भा-]

परिवारितम् ॥ १९ ॥

कर्णिकायां न्यसेत् मन्त्री सर्वसिद्धि प्रदायिकाम् [क: -कम्] ।

एकवीरं रु रुं देवं साधकानां हिताय वै [क: व] ॥ २० ॥

समासान् [क: -साल्] कथितं ह्येतद् [क: ज्यतंद्] विद्याङ्गन्तु
व्यवस्थितम् [क: -ताम्] ।

पूर्वोक्ते गन्धपुष्पैश्च [क: गधपुष्पश्चे] चैलाद्यैः [क: -
द्येः] परिपूजयेत् ॥ २१ ॥

अतोन्यं संप्रवक्ष्यामि मन्त्राणां निग्रहं परम् ।

क्रीडाक्रमञ्च योगीनां तंत्रसंरक्षण [क: -सांरक्षण]
परम् ॥ २२ ॥

स्मसानाङ्गार [क: श्मशानाङ्गार] चूर्णे न कनकस्य रसेन
[क: रशन] तु ।

विषकोकिल वशाशृक् [क: -शृक] प्रतिमालेख्ययन्नतः [क: -त] ॥ २३ ॥

हृदयेनाममालिख्य त्रिकोषास्त्रेणदर्भितम्।

स्मसानकुंभकाराभ्यां [क: श्मशान -] नद्यो [क: नद्या]
भयतटे [क: -त *] स्थिताम् ॥ २४ ॥

गोगजेन्द्रविषाणाभ्यां [क: -विषाशाभ्या] राजद्वार
पदेष्वपि।

मृदां गृह्य प्रयत्नेन अस्थिचूर्णे न संयुताम् [क: -ता] ॥ २५ ॥

रक्ताक्तया कृतिः [क: कृति] क्रव्यात् [क: क्रव्या]
१९१अ ख्) पृष्टिमेढ्रे च मातृन्तु क्रमेण विन्येसेद् वुधः ।

वक्त्रनेत्रादि चाङ्गानि भैरवी यानि विन्यसेत् ॥ १३ ॥

ते ष्वेव [क: ष्वव] हि प्रदेशेषु भैरव्यादीनि विन्यसेत् [क: -न्येसेत्] ।

२४०अ क्) शिवीकरणमाद्यादिं शक्तिं दत्वा विधानवित् ॥ १४ ॥

पद्ममालोत्थितानान्तु [क: -लास्थितानान्तु] विन्यसेद् भूतदक्षिणे
।

अङ्गुष्टे भैरवं न्यस्य तर्जन्यादिषु देवताः ॥ १५ ॥

अन्तराल स्थिता दूत्यो [कः दूत्या] दक्षिणेप्येवमेव [कः -सेतु] तु [कः भु] ।

शिखा ललाटे कण्ठे च नाभिजानोस्तु देवताः [कः -ता] ॥ १६ ॥

वाहुहस्ते [कः -स्त] स्थिता दूत्यो [कः दूत्या] वामदक्षिणयोरपि ।

पूर्वक्रमेण योगिन्यो वामदक्षिण संस्थिताः ॥ १७ ॥

कर्णे [कः कर्ण] स्कंधेस्तथा कक्षे कुक्षिवामचतुष्टयम् ।

दक्षिणे प्येवमेवन्तु शिरसि [कः -सी] वीरन्तु विन्येसेत् ॥ १८ ॥

पद्ममाला स्थितां सर्वा न्यासभूतिं [कः -भूति] प्रदापयेत् ।

शिखाललाटे वक्त्रे च कण्ठे ह्यस्था [कः हृत्था] च [कः नास्ति]
देवताः [कः -ता] ॥ १९ ॥

नाभिगुह्ये [कः -गुह्य] तथा जानौ पादयोदूतयः [कः -प]
स्थिताः [कः -ता] ।

पादजानौ कटिकुक्षिं कक्षस्कन्धञ्च [कः कक-] योगिनी ॥ २० ॥

कर्णदेशे स्थितो वीर दक्षिणे तु तथैव [कः -क] च ।

कर्णग्रीवाथास्तथास्कन्धः [कः -वास्तथास्कंधः]
कक्षकुक्षिकटिस्तथा [कः कुक्षकुक्षि-] ॥ २१ ॥

जानुपादे [कः -पाद] स्थिताः सर्वा मातरो वीरसंयुताः ।

सर्वाङ्गि [कः सर्वाङ्ग] परमाशक्ति हृदये [कः द्वय] भैरवं

न्यसेत् ॥ २२॥

कण्ठे वक्त्रे ललाटे च [क: नास्ति] शिखाग्रान्ताश्च देवताः [क: -ता]।

नाभि गुह्यं तथा जानु पादयो दूतयः [क: दूतःय] स्थितम् ॥ २३॥

पादजानुं कटिकुक्षि कक्षस्कंध [क: -धे] च वर्णके।

वीरस्तथा द्वितीयोपि मातरः पूर्ववत् [क: पूर्वव]स्थिताम् ॥ २४॥

दीक्षाकाले तु विन्यस्य करन्यासादि पूर्ववत्।

ग्रन्थिशक्तिं तु सूत्रेण पद्ममालासनं गणम् ॥ २५॥

पदन्यासेन [क: -प्रद-] कर्त्तव्यं [क: -व्ये] सान्तिके

न्यासमुत्तमम् ।

करन्यासं तथा कृत्वा देव्यादूत्यान्तको गणः ॥ २६ ॥

अंगुष्ठे देव देव्यस्तु तर्जोन्यादिषु दूतयः ।

दक्षिणे तत्र विन्यस्य मस्तोदूतिगण सहः ॥ २७ ॥

शिखा ललाटे कण्ठे च नाभिजानौस्तु देवताः [कः -ता] ।

वक्त्रे हृद्गुह्यपादौ [कः हृङ्गुष्टपादौ] च दूतयः
संव्यवस्थिताः ॥ २८ ॥

वामदक्षिणपार्श्वे तु योगिन्यो [कः -न्या] संव्यवस्थितौ ।

२४०ब् क्) मातरस्तु [कः -रंस्तु] मया प्रोक्ता वामदक्षिण वाहुके
॥ २९ ॥

वीरौ शिरे तु विन्यस्य देव देव्यन्तरेन्तथा ।

पद्ममाला स्थितां [क: स्थितं] सर्वं विशेषोस्याङ्गसंयुतम्

॥ ३० ॥

देवतादिगणं न्यस्य यागभूमौ व्यवस्थितम् ।

इति ब्रह्मयामले न्यासपटलः चत्वारिन्सतिमः [क:

द्विचत्वारिंशतिसः] ॥ ४२ ॥

त्रिचत्वारिंशतिमः पटलः

१९१ब् ख्) अतः परं प्रवक्ष्यामि करसंस्कारसोधनम् ।

मुद्राणां लक्षणं चं [क: नवकं] चैव

सर्वकामार्थसाधनम् ॥ १ ॥

पूर्वादिशक्तिविन्यासं वक्त्रनेत्रांगसंयुतम् ।

शिवमद्यादि सम्पन्नां लक्षयेत् मन्त्रवित् सदा ॥ २ ॥

शिवशक्ति समोपेतां भैरव्या सहभैरवम् ।

तर्जन्यान्तु [क: -स्तु] न्यसेद् रक्ता करालाल्या [क: वरात्मा]
मध्यमासु च ॥ ३ ॥

अनामां चैव चण्डाक्षी महोच्छुष्मा कनिष्टके ।

दुत्या च दक्षिणे हस्ते अङ्गुष्टे वीरमाश्रृतः ॥ ४ ॥

स्वशक्त्या सहिताश्चैव [क: -ताश्चैव] योगिन्यः [क: -न्या]
पार्श्वतः [क: -ताः] स्थिताः [क: नास्ति] ।

दक्षहस्ततले वीरं पतितो मातरस्थिताः ॥ ५॥

पदन्यासं तथा कुर्यात् मुद्रावन्धस्तु [क: -वधस्तु] कारयेत्।

पूर्वकपालिनी वध्वा [क: वधा] दक्षिणस्य करस्य तु ॥ ६॥

उत्तानन्तु करं कृत्वा करसाखा चोर्द्धगा स्थिताः।

अङ्गुष्टं प्रसृतं किंचित् मुद्रा ह्येषा [क: ज्येषा] कपालिनी ॥ ७
॥

वामन्तु ऊर्द्धतो हस्तं तर्ज्जनी चोर्द्धसंस्थिताः।

सेषामुष्ट्या तु संयुक्ताः खट्वाङ्गस्यन [क: -स्यान]
संशयः ॥ ८॥

उभयोः संपुटं [क: -टः] कृत्वा वामदक्षिणहस्तयो।

आमूर्द्धिन जानुनी यावत् [कः यावरात्] मालां चैव
शिवोद्भवाम् ॥ ९॥

प्रसार्यञ्च ततो जिह्वा [कः जिह्वां] दन्तां चैव प्रदर्शयेत्।

निम्नाक्षा वदनं कृत्वा [कः चैव] अट्टहासं मुहुर्मुहुः ॥
१० ॥

एषा करंकिनी नाम देवीनां चैव मातरा [कः -राः]।

उभयोर्वेणिका [कः -चणिका] कृत्वा अङ्गुष्टौ तु विनिसृतौ [कः -तौः]
॥ ११ ॥

निम्नाक्षीणि ततो कृत्वा अठासं [कः अट्टहासं] तथैव च।

विकृतास्यं सजिह्वा तु भीभत्सा भैरवस्य वै ॥ १२ ॥

दूतीनां [क: -ना] संप्रवक्ष्यामि [क: शं-] यथा मुद्रा
व्यवस्थिताः।

२४१अ क्) दक्षिणं चोर्द्धगं [क: चा-] हस्तं
अङ्गुल्यास्त्रीणिचोर्द्धगाः [क: -णिचा-] ॥ १३॥

अपरस्परसंश्लिष्टाः [क: -संलिष्टाः] खड्गमुद्रा
प्रकीर्तिताः।

अंगुष्टाग्रं प्रदेशिन्या चूम्वितं [क: -रं] वा [क: चा]
परस्परम् ॥ १४॥

उभयोः [क: -यो] संकलां? कृत्वा पाशमुद्रा प्रकीर्तिताः।

दक्षिणेन तु कर्त्तव्यं खट्वाङ्गतिर्यवाहुकम् ॥ १५॥

नाराजं चेति विज्ञेयं [क: विज्ञपं] दूतीमुद्रा प्रकीर्तिताः।

कपालद्वयकं कृत्वा वामदक्षिणहस्तयोः ॥ १६ ॥

अङ्गुल्याश्चैव कुर्व्वीत [क: कुर्वात्] पद्ममुद्रा प्रकीर्तिता।

वैकङ्क [क: -क्रकं] चैव नाराजं तोमरो वज्रमे शृणु ॥ १७ ॥

सुलोकैरौकरौ कृत्वा कुर्यारौचा वलोकितौ [क: वलोङ्कितौ]।

अन्योन्यांगुल्यसंक्लिष्टौ वज्रमुद्रा प्रकीर्तिताः [क: -ता] ॥ १८ ॥

१९२अ ख्] तोमरं चैव भीभत्सां विजयं च शृणुष्वमे।

उत्तानौ [क: उक्तानौ] तु करौ कृत्वा वरदाकार संस्थितौ [क: स-]

॥ १९ ॥

उत्फुल्लनयनौ [क: -नयतौ] कृत्वा किंचिदुल्लासतौ करौ [क: कृतौ] ।

हृष्टं च वदनं कृत्वा वितयमुद्रा प्रकीर्तिताः ॥ २० ॥

योगिनीनां समाख्याता मातराणां शृणुष्वमे ।

शूलं पद्मं [क: पद्म] तथा कृत्वा उत्तानौधोमुखौ [क:
उतौनौधोमुखौ] करौ ॥ २१ ॥

प्रशृतां गुलिकौ भ्राम्य अन्योन्यतल सङ्गतौ [क: मुङ्गतौ] ।

चक्रमुद्रा समाख्याता शक्ति [क: शक्तिं] चैव निवोधमे [क: -
से] ॥ २२ ॥

गुल्फकुर्प्परचाङ्गुल्यां संक्लिष्टौ चोभयौ करौ ।

मध्यमौ प्रशृतौ कुव्जौ [क: कृक्षौ] चुम्वनाग्रौ [क: -श्रौ] तु

शक्तिका ॥ २३ ॥

तदेव वसुसंक्लिष्टौ तथैव च करौ स्थितौ ।

दण्डमुद्रा समाख्याता वज्रदंष्ट्रा च सांप्रतम् ॥ २४ ॥

वामकुर्परमुत्पाद्यं अंगुल्यौमुष्टि [क: * गुल्योमुष्टि]
संस्थिताः ।

कनिष्टां प्रशृतां वक्रां [क: चक्रां] शृत्कन्यान्तु
निवेशयेत् ॥ २५ ॥

रौद्रौ तु तारकौ [क: तारद्रौ] कृत्वा विशृताख्यन्तु [क: -ख्यान्तु]
कारयेत् ।

कपालं चेति विख्यातं मातराणां न संशयः [क: -
संशंयः] ॥ २६ ॥

एभिमुद्रैः समालध्वो विद्याबीजित देहधृक् ।

कुरुते कर्मरूपाणि [क: -लि] स्वेच्छया [क: -छ्या] मन्त्रविग्रहः
[क: -हाः] ॥ २७ ॥

प्रशृतोत्तानके [क: प्रशृतौतानके] वामे कनिष्ठाधकृता
स्थिता ।

दक्षिणा प्रशृताश्चैव स्त्रिंसोंगुल्यस्ततो [क: स्त्रिस्त्रोङ्गुल्यस्ततो]
परि ॥ २८ ॥

२४१ब् क्) एषामुद्रा समाख्याता ग्रासवक्रं च मे शृणु ।

विशृतं च मुखं कृत्वा दन्ता [क: दन्तां] चैव प्रदर्शयेत् ॥
२९ ॥

ग्रसने [क: -सेन] वक्रमित्युक्तं शरमुद्रा शृणुष्वमे ।

उत्तानौ [क: उत्तरौ] तु करौ कृत्वा दक्षिणौ कर्णमानता ॥ ३० ॥

वामं ततो च्छृतं [क: छृत] कृत्वा अग्रे चैव प्रसारयेत् ।

तर्जन्यांगुष्टकौ चैव श्लिष्टाग्रौ कौण्डली कृतौ ॥ ३१ ॥

उभयोहस्तयोङ्गुल्या प्रसृताश्च [क: -ताञ्च] क्रमेण तु [क: क्रमे शृणु] ।

सुरमुद्रा समाख्याता शृंखलं शृणु सांप्रतम् ॥ ३२ ॥

तौ एव च तथा कृत्वा अन्योन्यं शृङ्खलेद् [क: शृख-] वुधः ।

शृंखला [क: -लो] तु समाख्याता मृत्युंजयविधिं [क: -विधि] शृणु ॥ ३३ ॥

क्षीरोदस्य समाख्याता या मुद्रा वरवर्णिनि ।

मृत्युञ्जयी [क: मृत्युंजयि] समाख्याता वृषभस्य तु सुव्रते ॥ ३४ ॥

प्रशृतौत्तानकौ वामे कनिष्टाध कृता [क: कता] स्थिता ।

दक्षिणा प्रशृताच्चैव [क: -श्चैव] त्रिस्त्रोङ्गुल्यस्तथो परि ॥ ३५ ॥

अंकुषः [क: -श] पिञ्च्छकश्चैव मुद्रासंकलवक्रका [क: -म] ।

ग्रसने च [क: व] तथा वक्रं सरमुद्रास्तथैव च ॥ ३६ ॥

मृत्युञ्जयविधिश्चैव योनिलिङ्गं तथैव च ।

समयमुद्रा तथा चैव शृङ्खला [क: शृ-] च तथा परा ॥ ३७ ॥

कर्ममुद्रा समाख्याता कर्मकाले [क: -मे] नियोजयेत् [क:
निजोजयेत्] ।

१९२ब् ख्) खट्वांगदक्षिणे हस्ते वामहस्ततले स्थितम् ॥ ३८ ॥

मुष्टिं [क: -ष्टं] वध्वाथवाम् [क: च धाथवाम्] अस्य
तर्जनीं [क: -नी] कुशरूपिणी ।

तिशृभिर्द्दक्षिणास्यापि [क: तिश्चभिर्द्दक्षिणास्योपि] अंगुष्टे न
च वेष्टयेत् [क: के-] ॥ ३९ ॥

मुद्रांकुशस्य वद्धे च वामस्यैव कपालिका ।

दक्षिणेन तु हस्तेन मुष्टिं [क: मुष्टि] वध्वा [क: वधा]
महासति ॥ ४० ॥

मस्तकोपरि संभ्राम्य [क: -स्य] पिंच्छकं [क: पिछकं]
भ्रमने [क: त्रमने] स्थितम्।

दक्षिणे न तु हस्तेन मुष्टिं वध्वा [क: वधा] तथोर्धगम् [क: -
मम्] ॥ ४१ ॥

मुषलमुद्रा [क: मुखर-] समाख्याता तथा वक्रस्य [क:
वेक्रस्य] मे शृणु।

वक्रमुद्रा समुच्चार्य वक्रे वक्रं ततोच्चरेत् [क: -न्यसेत्] ॥ ४२ ॥

वक्रमुद्रा समाख्याता नात्र कार्य विचारणात्।

कनिष्टानामिकोभौ तु अंगुष्टौ परिसंस्थितौ ॥ ४३ ॥

१४२अ क्) संश्लिष्टा च तथा तास्तु योनिमुद्रा प्रकीर्तिता।

दक्षिणं वामहस्तस्य अंगुष्टं मुष्टिमध्यमम् ॥ ४४ ॥

प्रशृतं वामकं कृत्वा दक्षिणेन तु नामकी ।

मुष्टिं [क: मुष्टि] मुष्ट्या तु संवेष्ट्य लिङ्गमुद्राः
प्रकीर्तिताः ॥ ४५ ॥

ग्रथितौ वेणिकाकारौ कनिष्टानामिकौ भयौ ।

उत्तानौ तु सुवृताग्रौ मध्यमौ पृष्टसंसृतौ ॥ ४६ ॥

ताभ्यामेव तु तर्ज्जन्यौ [क: -न्यो] अग्राग्रपरि चुंवितौ ।

समयमुद्रा समाख्याता समयकाले [क: -याकाले] तु वन्धयेत्
॥ ४७ ॥

चत्वारस्तु समाख्याताः साधकानां हिताय [क: -यै] वैः।

इति ब्रह्मयामले मुद्रापटलः स्त्रिचत्वारिंशतिमः ॥ ४३ ॥

चतुर्चत्वारिंशतिमः पटलः

अतः ऊर्द्धं समासेन क्रीडाकर्मन्निवोधमे [क: -धोधये]।

यं [क: सं] स्थितं सर्वसत्वानां सापानुग्रहकारिणाः [क:
सो-] ॥ १॥

हृद्देशे कमलं ध्यात्वा व्योमपंकज संयुतम्।

विन्दुमध्ये न्यसेत् मानं विश्वदेहमयं शुभम् ॥ २॥

शक्तिभिः किरणोपेतं ताराष्टकविभूषितम्।

तं ध्यायेत् परमं रूपं विन्दुलीनं शिवात्मकम् ॥ ३॥

नवस्त्रोत्रवहे मार्गे नाडिभिः परिचोदयेत् [क: -वादयेत्]।

नाड्यान्तरे महादेवि अमनस्के [क: -नेस्क] नयोजयेत् [क: नि-] ॥ ४॥

साधनं पूर्ववत् कृत्वा निलीमन्दु [क: निसीसेन्दु] क्रमे यदि।

तं दृष्ट्वा योमदेशे तु कलादशे तु निर्मिते? [क: निर्मले] ॥ ५॥

अनुभूतं तथात्मानं दृष्ट्वा नाडी मुखेहुतम्।

चोदयीत उदानेन स्वतत्त्वं यावत् पूरयेत् ॥ ६॥

निर्गतस्य [क: निर्ग * स्य] हि यो देवि सूर्यायुत समप्रभम्।

सिध्यते नात्रसन्देहो भैरवस्य वचो यथा ॥ ७॥

अन्तरीक्षे तथा भूमौ पातालेषु च देहिषु [क: दैहिमे] ।

१९३अ ख्) अन्यमन्येषु रूपेषु विचरेन्नात्र [क: विचरेत् नात्रं]

संशयः [क: सशयः] ॥ ८ ॥

इति पिचुमते क्रीडाकर्म पटलश्चतुश्चत्वारिंसतिमः [क: पटलः

श्चतुश्- -सः] ॥ ४४ ॥

पञ्चचत्वारिंशतिमः पटलः

????????????

देव्युवाच

साधकस्तु स्त्रिधा प्रोक्तः कथं मे ब्रूहि लक्षणम् ।

२४२ब् क्) कीदृसा तस्य वेष्टा वै तस्य कीदृशलक्षणम् ॥ १ ॥

आचारस्तु [कः आवारस्तु] समावक्ष्य सिद्धिं चैव त्रिधा स्थिता।

भोजनं किदृशं तस्य त्रिविधस्यापि सन्मतम् [कः सन्मते] ॥ २॥

अधमामध्यमा चैव उत्तमा च कथं भवेत्।

एतदा चक्ष्व [कः चक्षु] देवेश साधकानां हिताय वै ॥ ३॥

भैरव उवाच

साधु साधु महाभागे साधकानां तु लक्षणम्।

कथयामि समासेन सिद्धिश्चैव त्रिधा स्थिता ॥ ४॥

शुद्धा [कः शुद्धो] शुद्धोथमिस्त्रंश्च साधकास्तु तृधा स्थिता।

तेषां सिद्धिर्यथा देवि तत् प्रवक्ष्यामि तत्त्वतः ॥ ५॥

दीक्षाया जपहोमैश्च शुद्धकायोन्य [क: -कान्योन्य] जन्मनि ।

समयभ्रष्टो न सिद्धयेत पुनजन्ममवाप्नुयात् ॥ ६ ॥

शुधाशुद्ध [क: -शुद्धे] इतिख्यात असुद्धं [क: अशुद्धं]
प्रोच्यतेऽधुना ।

अन्यजन्मनि नप्राप्तः समयोऽपि वरानने ॥ ७ ॥

जातः [क: जात] शक्तिनिपातस्तु [क: -स्क] ईहजन्मशिवेच्छया ।

स-अशुद्धमितिख्यातो [क: -अशुद्धो-] दीक्षासंस्कारसोधितः [क: -कः]
॥ ८ ॥

सिध्यते ह्यविचारेण [क: ज्य-] निजमार्गे ष्ववस्थितः [क: स्व्यवस्थितः] ।

अन्यजन्मनि संप्राप्तं दीक्षामात्रं वरानने ॥ ९॥

किञ्चिज्जापं समाप्नोति पुनजन्मं [क: पुनर्जन्म] समिश्रकम्।

शुद्धस्तु तालकः प्रोक्तंश्चरुभोजी त्व शुद्धकः ॥ १० ॥

शुद्धा शुद्धो भवेत् मित्रं [क: मित्रं] साधकस्तु न संश्याः।

लक्षणं कथितं सम्यक् त्रिविधस्यापि सुव्रते ॥ ११ ॥

विधिश्च प्रोच्यते तस्य त्रिविधस्यापि साधके।

अधिकारो भवे ह्येत [क: ज्येत] द्विविधं साधकस्य तु ॥ १२ ॥

त्रिविधस्यापि वै देवि स्नानपूर्वम् [क: -पूर्व] वदाम्यहम्।

अस्त्रेण शोधयित्वा तु मृदां गृह्यसुचि [क: गृह्यमुरिचि] स्थितः ॥ १३ ॥

तुषके मास्थिवक्ष्येत [क: माभ्यवक्ष्येत] कृमिकीटविवर्ज्जिताः [क: कृमीकृट- -ता] ।

कर्प्पराङ्गारवक्ष्यन्तु [क: -वक्ष्य तु] खत्वामन्त्री शुभौ भुवि ॥ १४ ॥

क्षालयित्वा तुतं [क: -त] स्थाप्य प्रदेशं मृतिकाततः ।

भागद्वयं तथास्त्रेण प्रोक्षयित्वाथ कारयेत् ॥ १५ ॥

अपरामृतिकां गृह्य [क: गृ *] कटिपादां च क्षालयेत् ।

२४३अ क्) अस्त्रजप्तं तु वै कृत्वा भागमेकं तु साधकः ॥ १६ ॥

शरीरञ्जुष्ठयित्वा तु जलम्चैवाभिमन्त्रयेत् [क: जलंञ्स्चैवा-] ।

मन्त्रयित्वा तु तां [क: ता] सर्वां मलस्नानं समाचरेत् ॥ १७ ॥

आचम्य [क: -म्ये] च शिखां वध्वा [क: वधा] न्यासं कृत्वा स्वकीयकम् ।

१९३ब् ख्) द्वितीयं भागसंगृह्य दक्षहस्त [क: -हस्ते] स्थितं ततः ॥ १८ ॥

त्रिभागभाजितं कृत्वा एकमस्त्रेणक्षालयेत् [क: मन्त्रेण-] ।

द्वितीयं स्मरणे नैव विद्या जप्तं तृतीयकम् ॥ १९ ॥

सर्वयागेन तां मन्त्रा साङ्गोपाङ्गानि [क: साङ्गा-] विन्यसेत् ।

सप्तरूपाणि चोच्चार्य [क: चा-] सर्वेषां मन्त्रगणं स्मृतम् ॥ २० ॥

अस्त्र जप्तं ततो गृह्य दिक्षुम्चैव [क: दिक्षुश्चैव] दसां वपि ।

उच्चाटनाथ विघ्नानां क्षिपेदस्त्रेण मन्त्रवित्॥ २१॥

नाराचास्त्रे प्रयोगेन अस्त्रध्यायी [क: -ध्यात्वा] समाहितः।

विघ्नानां दिग्विदित्तथानां खस्थानां? च न संशयः ॥ २२॥

जलस्थानेषु मन्त्रज्ञ उच्चाटं संप्रयोजयेत् [क: -प्रोयोजयेत्]।

शिव जप्त्वां ततो गृह्य शिवतीर्थं प्रकल्पयेत् ॥ २३॥

विद्याजप्तं ततो गृह्य शरीरं गुण्ठयेत् तया।

गुण्ठयित्वा ततोत्मानं तीर्थेषु दण्डवत् प्लवेत् [क: प्रवेदेत्] ॥ २४॥

उद्धृष्ययित्वां [क: उघृष्।य-] अंगानि ततः स्नानं समाचरेत्।

श्निग्धेन [क: श्निञ्चेन] प्रथमं अर्घः [क: मद्यः] सुगन्धोद् [क: सुगंधाद्] वर्त्तनै तथा ॥ २५॥

क्वचित्सदाम् [क: कविद्सेहां] विवर्जन्तु तु सुगन्धामलकैस्तथा।

चक्रवर्त्यो [क: -वर्त्त्यौ] प्रचारेण स्नानं कृत्वा तु साधकः ॥ २६॥

कंकतादिभि [क: -टादिभि] संकट्य शिखां वध्वा [क: वधा] तथा च मेत्।

न्यासं कृत्वा यथा न्यायं शक्तिं तत्र विचिन्तयेत् ॥ २७॥

परतत्त्वक्रमेणैव विन्दुक्षोभ्यर्थं तत्त्ववित्।

अमृतीभूतसंचिन्त्य तीर्थं वै स्मरणेन तु ॥ २८॥

मन्त्रचाष्टशतं यावत् ततो यागं प्रकल्पयेत्।

तीर्थे वा कलसे वापि संखे हस्ते पुटेऽपि वा ॥ २९॥

ते नाभिषिंचयेत् मानं यागमन्त्रानुदीरयेत्।

दशवारां तु देवाय यागोनां तु सकृत् सकृत् ॥ ३०॥

देवीभ्योऽथ सकृत् वै कयोगिणी [क: -यागिनी] मातृणामपि [क: -मामपि]।

२४३ब् क्) वहिरस्त्राणि सञ्चिञ्त्य स्वयागाम्वा यथोदिताम् ॥ ३१॥

देवीनां प्रथमं दत्वा सुगंधं मूध्नि चोच्चरेत्।

आरम्य [क: आरंम्य] च शिखां वध्वा [क: वधा] न्यासं कृत्वा यथाक्रमम् ॥ ३२॥

सन्मार्जनन् [क: -न] ततः कुर्यात् साधको यागमन्दिरे ।

तर्पनं तु ततः कृत्वा सर्वयागन्तु [क: -गन] दीरयेत् ॥ ३३ ॥

हृस्थं [क: हृत्थं] कृत्वा महाभागे विद्यायामपकर्षणम् ।

सुगंधपुष्पसंपूर्णम् अन्यैर्वाथ जलेन वा ॥ ३४ ॥

सूर्यविम्वे तु संचिंत्य यागे अर्घं [क: अर्घ्यं] प्रदापयेत् ।

विद्या या [क: यां] तु ततोर्घं तु नित्यकर्म निवेदयेत् ॥ ३५ ॥

सूर्यविम्वागतं यागं हृस्थं कृत्वा तु मन्त्रवित् ।

व्रह्मसंध्यान् [क: -संध्या] न वै [क: कै] कुर्यत् पितृणां च

जलांजलिम् [क: जला-] ॥ ३६ ॥

१९४अ ख्) प्रथमे तु ततो मन्त्री भैर्वी तु समाचरेत्।

अथवा तर्पणं कृत्वा अर्घं दत्वा यथाक्रमम् ॥ ३७ ॥

सूर्यस्याभिमुखो भूत्वा सप्तरूपानि [कः -णि] चोच्चरेत्।

तर्पणं तु जपं चैव भैरवाय हृदिस्ततः ॥ ३८ ॥

गुरुणां च पितृणां च तृप्त्यर्थं विनिवेशयेत्।

एवं [कः एव] स्नानं सदा कुर्याद् अभिषेकं च नित्यशः ॥ ३९ ॥

नित्याभिषेकयुक्तस्तु मन्त्रैर्विघ्नैन्नवाध्यते [कः मन्त्रै-]।

दिक्षुरस्त्राणि विन्यस्य [कः -सेत्] दिग्वंधं च यथाक्रमम् [कः -क्रम]

॥ ४० ॥

अस्त्रामोक्षं ततः कृत्वा देवागारं मुखो व्रजेत् ।

प्रज्वलन्तं महावीर्यं [कः -वीर्य्य] पुरतो विघ्नानिचाटयेत् [कः - चाटने] ॥ ४१ ॥

ध्यायमानं नीजास्त्रं [कः निजास्तं] तु कवचेनावगुण्ठिताम् [कः - नम्] ।

पुरभेदं ततः कुर्याद् वुं?कारेणैव साधकः ॥ ४२ ॥ [कः नास्ति]

पुष्पं क्षिप्त्वा तु दिग्वन्धं कवचेनावगुण्ठनम् । [कः नास्ति]

नंदिश्चैव महाकालं सरिद्वयं वृषस्तथा ॥ ४३ ॥

द्वारदेशे तु संपूज्य ततः ईशां व्रजेदिसिम् [कः -दिसिः] ।

विघ्नसंपूजयेत् [कः विघ्नेसंपूज्य-] तत्र क्षेत्रपालं [कः क्षत्र-] तथैव च ॥ ४४ ॥

श्मसानानि [क: -शानानि] तु संपूज्य कुलविद्या च पूजयेत्।

योगिन्य [क: -न्या] पूतनान्याश्च वीरेशाश्च यथाक्रमम् ॥ ४५॥

शिवाहूतिं तु संपूज्य विडाली कौशिकीस्तथा।

रुद्रां चैव यथा न्यायं पूजयित्वा तु साधकः ॥ ४६॥

ततोनुचिन्तयित्वा [क: -रुविन्तयित्वा] तु [क: नास्ति]
भास्करस्थानमाश्रिताम्।

गुरुपक्ति महाप्रोक्तो [क: -प्रान्झो] भावयुक्तेन चेतसा ॥ ४७॥

२४४अ क्) पुष्पाणि तु विनिक्षिप्य लब्धानुज्ञा तु साधकः।

दिक्षुरस्त्राणि विन्यस्य [क: विन्यसे] कुर्याद् भूमिप्ररिग्रहम् ॥ ४८॥

प्राकारमचलं कृत्वा कवचेनावगुण्ठनम्।

प्रणवासनं तु कृत्वा तु दर्भपिण्डं न सन्सयः [क: संशयः] ॥
४९॥

दक्षिणाभिमुखो [क: दक्षिणामुखो] भूत्वा मौनसंकल्पयेत् ततः
।

ध्यानं न्यासं शिवे [क: शिव] कृत्वा शिवादिकलशान्विताम् [क: -तम्]
॥ ५० ॥

यागं कृत्वाग्निकार्यं च कल्पोक्तं [क: कल्पोक्त] जपमाचरेत्।

संख्या गृह्य ततो मन्त्री आसनादिपरिद्युतम् ॥ ५१ ॥

यथा शक्त्यं तु मन्त्रज्ञो आह्नीकद्वयमाचरेत्।

मौनं तु साधकः कुर्यात् कल्पोक्तं तत्र निश्चयात् ॥ ५२ ॥

उत्तरसाधकं [कः -उत्तरस्यधकं] मुक्त्वा [कः मुद्रा] प्रमादेनापि
[कः प्रसा-] सुव्रते ।

नपस्येन्नाधिकारी [कः ना-] तु समयज्ञास्तथैव च ॥ ५३ ॥

पूर्वसेवाविधाने [कः -निधाने] तु प्रयत्नेन विधिस्थिता ।

गुरु श्रुत्वा विनिष्क्रम्ये [कः -म्य] दृष्ट्वा पूज्य यथाक्रमम् ॥ ५४ ॥

मौनभङ्गमपि कृत्वा प्रायश्चित्तं समाचरेत् ।

पुनः संख्या समापूर्य भैरवाय निवेदयेत् ॥ ५५ ॥

पुष्पमुद्रां ततो वध्वा [कः वधा] निराचारपदे स्थितः ।

१९४ब् ख्) तत्त्वध्यायी जपं कूर्याद् [क: कुर्या] भैरवी कृत मानसम्
॥ ५६ ॥

सर्वयागावलोकी च कुम्भकस्थेषु [क: कुभ-] पीडया ।

एवं द्विराह्निकं [क: द्वितीयह्निके] कुर्यात् स्नानपूर्वं तु
संख्यया ॥ ५७ ॥

तित्रृतीयसेवनं स्वल्पं कृत भोजनमाचरेत् ।

एकान्ते विजने [क: -मे] देशे देवीनां [क: -ना] दृष्टिगोचरे ॥ ५८ ॥

दक्षिणाभिमुखो भूत्वा पत्राकीर्णे [क: -कीर्ण] महीतले ।

शालिभक्तां च स्यामाकं [क: सामाकं] षृष्टिकोदनमेव च ॥ ५९
॥

पृपङ्गुञ्च यवान्यं च गोधूमान्नं तथैव च।

एतात्मालिन्तु [क: -लि तु] भक्ष्याणि [क: -मि] सेषाणिभुवनभक्षयेत् ॥ ६०

॥

तिलान्नं [क: निलान्नं] नैव भुञ्जीत श्लेष्मं कृत्वा ज्वरो [क: ज्वलो] भवेत्।

ग्राह्यथरक्तशौल्याथ [क: -शाल्याथ] गुण्डीरकास्तथैव च ॥ ६१ ॥

हस्तिलडुकमेवं [क: -डकमेवं] च नीवारा प्रसाधिकापि वा। (?)

भक्तान्येतानि [क: भक्षान्येतानि] वर्जा [क: वार्जा] या शेषानि [क: -णि] तु समाचरत् ॥ ६२ ॥

तिलकेनापि यत्नेन वर्जितानि हि नित्यशः।

२४४ब् क्) अस्मिन् तन्त्रे [क: तस्त्रे] न संदेहस्तालकेपि [क: -तोलकेपि] हि सुप्रिये

॥ ६३ ॥

गाव्यं छागं तु माहिष्य क्षीरं सर्प्पिस्तथैव च ।

भक्षणीयं विधिस्थेन [क: विस्थिस्थेन] शेषानि तु विवर्ज्जयेत् ॥ ६४ ॥

श्रीफलं कंचलं जम्वुं [क: जम्बू] लकुचं फनसं तथा ।

अम्बु अम्वलिकाश्चैव वदनं करमर्द्दकम् ॥ ६५ ॥

खर्जुरं [क: खर्जरं] च पि दालिञ्च [क: यालं च] फरुस शालमेव च ।

हिसरं द्विविधं [क: द्विधिधं] भक्ष्यं [क: भक्षं]

शृङ्गाटोडुम्वरं तथा ॥ ६६ ॥

वटं च करवीरं च पिप्पलं लवली [क: -ती] फलम् ।

दाडिमामलकं चैव कुष्माण्डं विर्भटं तथा ॥ ६७ ॥

त्रपुषं वालकं चैव सेम्विकर्क्कतिकास्तथा ।

घोषेण्डकारवेल्लं [क: घोषण्ड-] च कर्कोटं [क: कर्कोट] च
पटोलका ॥ ६८ ॥

वृताकं च वृषोलं च चेटं साकुरमेव च ।

वृहती फलपद्माक्षा मारुतं चैव भक्षयेत् [क: * क्षयेत्] ॥ ६९ ॥

हरीतकी फलं भक्ष्या इ * दं [क: इन्तुदं] चाक्षमेव च ।

फलान्येतानि भक्षाणि सम्विजानि च मे शृणु ॥ ७० ॥

सर्वा सेम्विफला भक्षा सुवराकस्तथैव च ।

राजमाषफला चैव कला च फलमेव च ॥ ७१ ॥

मुङ्गश्चैव? दृकीश्चैव भक्षयीत न संशयः ।

शृताश्चैव मताश्चैव साधकैराधने स्थितैः ॥ ७२ ॥

सालूकंनदेन [क: -कनदेन] संचक्रे [क: -चके] यूक्तर्कुटिकस्तथा ।

कसेरु द्विविधं भक्ष्या वार्ताकं षृष्तिकां तथा ॥ ७३ ॥

व्यालकानि [क: आलुकानि] तु सर्वाणि ससिद्धं आद्रकं तथा ।

द्विविधं [क: द्विपिधं] कवकं चैव मूलकञ्चम्यहंवकम् [क:

सूलक-] ॥ ७४ ॥

मिश्रुश्चैव [क: मिश्रुञ्चैव] पलण्डञ्च [क: पलशुञ्च]
कदलीकन्दस्थैव च ।

खर्ज्जुरञ्च [क: खड्गरं च] तथा कन्द कडेवं [क: कडंव]
कोकिलाक्षकम् ॥ ७५ ॥

१९५अ खू) मौषलीरिषिमूलं च पिष्टकं च महायमे ।

एतानि कन्दजातीनि भक्ष्यान्यन्यानि [क: -तानि] वर्जयेत् ॥ ७६ ॥

चान्तिकामर्षपञ्चैव [क: चान्तिकसर्ष-] राजिकाकरटं तथा ।

जीवकोमारषम्चैव लवनकोमारटिकास्तथा ॥ ७७ ॥

कुठेरं चैव नीडी च चुचुहकन्दकन्तथा [क: -न्कन्तथा] ।

श्रीमालि अरलिकं [क: -णिकं] चैव तांदूलीयं कुवेजकम् ॥ ७८ ॥

कालमाकं तदुलं च विल्वं वै [क: चै] द्रोणपुष्पिका ।

२४५अ क्) क्षेत्रवस्तुकमित्युक्तं [क: क्षत्र-] दृक्कवस्त्रकमेव च ॥ ७९ ॥

वरुणं कोटिकासाकं मौलानी [क: सौलानी] नालकास्तथा ।

निम्वं चैवक्षरं [क: चैवत् कृवं] चैव नाडकं वेत्रमेव च ॥
८० ॥

वंसजं कलिलं चैव आभीरकिंशुकं तथा ।

काराकंका [क: -काका] च माचीर [क: मानी च] अपामार्गपुनर्णवा
॥ ८१ ॥

फेलंजकं करंजं च सोमाटं झर्झरूवकम् [क:
झझुझषकम्] ।

मारीचकं पलं जंवू आद्रकं मोद्रकं तथा ॥ ८२ ॥

पथ्या सुन्दरकं चैव भिलाटं [क: हिलाटं] चोरकं तथा ।

सा कान्येतानि भक्षाणि पूर्वमेवा विधिः क्रमेत् ॥ ८३ ॥

स्थिरीकरणानि [क: स्थिति -] पथ्यानि ज्ञात्वा युञ्जीत साधकः ।

खदिरपुष्पञ्च वच्छासमगास्तिकाञ्च [क: वक्ष्द्रा-] नारकम् ॥ ८४ ॥

सल्वलं [क: सत्वलं] सणपुष्पं [क: स श -] च कुटजं
नागकेशरम् [क: -कसरम्] ।

एरण्डं च जयन्ती च [क: व] पुष्पान्येतानि भक्षयेत् ॥ ८५ ॥

सखायेनोपवीतानि [क: सस्वाये-] संस्कृता संस्कृतानि तु।

स्वयं वा श्रावयित्वा तु [क: नास्ति] चरुमार्गेण साधकः ॥ ८६ ॥

सुस्निग्धं [क: सुस्निग्वं] लघुपुष्पं च अदशीभक्षयेत् [क: -यत्] पृये।

अदशी [क: -ली] चा प्रमादी च विधिनेनेन [क: -ननेन] साधकः ॥ ८७ ॥

त्रिस्त्रायी नित्य युक्तस्तु कल्पोक्तन्तु समाचरेत्।

नवलक्षाणि वै [क: चै] कुर्याद् विद्या यागे तु साधकः ॥ ८८ ॥

स्व यागे वा यदुक्तं स्याद् यागपूर्वं [क: -पूर्व] समर्पयेत्।

हृत्पङ्कजे [क: हृत्पकेडो] स्थितस्यैव भैरवस्य न संशयः ॥ ८९॥

हस्ते [क: हस्त] समर्पयित्वा तु प्रणिपत्य विज्ञापयेत्।

सिद्धिकाले तु देवेशे अर्घलीयो जपो ममः ॥ ९० ॥ [क: नास्ति]

एवं समर्पयित्वा तु अग्निकार्यं समारभेत्। [क: नास्ति]

अस्त्रेणप्रोक्षयित्वा तु उल्लेखन विकीरणम् ॥ ९१ ॥ [क: नास्ति]

पुनः प्रलेपनं कृत्वा गोमयेन विशेषतः। [क: नास्ति]

दर्भं गुह्य ततो रेखां दक्षिणाभिमुखा नयेत् ॥ ९२ ॥ [क: नास्ति]

द्वितीयात् पश्चिमा पूर्वं [क: पूर्व] चतुःपथ विधिः क्रमः।

पूर्वमुख्यन्ततः स्त्रीणि एका रेखा तु दक्षिणे ॥ ९३ ॥

अस्त्रमुच्चार्य वै कुर्याद् वक्रं [क: वतुं?] वै कुण्डमध्यतः।

१९५ब् ख्) कुशास्तरणकं कृत्वा दक्षिणा दिशि माश्रितः ॥ ९४ ॥

पूर्वाग्रा दक्षिणाग्रं च विष्टरा तु तथैव हि ।

ब्राह्मणं दक्षिणे पूज्यः [क: पूज्य] विष्णुरोत्तरतो [क: -योत्ततो]
न्यसेत् ॥ ९५ ॥

रूद्रन्तु पूर्वदिग्भागे शिवं वै पश्चिमे न्यसेत् ।

इन्द्रं [क: इद्रं] पूर्वेण विन्यस्य अग्नेयं [क: अग्नयं] अग्निमेव च
॥ ९६ ॥

२४५ब् क्) दक्षिणे तु यमं न्यस्य नैऋत्यां [क: नैऋत्या] निरितिस्तथा ।

वारुणे वरुणं न्यस्य वायव्यं वायुरेव च ॥ ९७ ॥

मोमं सौम्य न्यसेत् मन्त्री ईशानेमीशगोचरे ।

ईशाने ब्राह्मणं न्यस्य ऊर्द्धभागा विलंविनम् ॥ ९८ ॥

विष्णुं च नैऋते भागे अधोभागा वलम्विनम् ।

अस्त्राणि विन्यसे दिक्षु दक्षिणादि विधानवित् ॥ ९९ ॥

माहेन्द्रं तन्तुमन्त्रज्ञ ऊद्ध्वार्धश्चैव चै क्रमात् [क: क्रनात्] ।

अङ्गानि विन्यसेत् मन्त्री वहिकुण्डस्य रक्षणे ॥ १०० ॥

मेखलान्तु ततः पूज्य शक्ति त्रितयविक्रमात् [क: त्रितन्य-] ।

पूर्वादिशिमासृत्य यावदीशान [क: -कीशान] गोचरम् [क: -रेत्] ॥ १०१ ॥

पदयागैः [क: -गे] पदैश्चैव पूज्यते देवि नान्यथा [क: न्य-] ।

अग्निन्तु प्रोक्षयित्वा तु अस्त्रमन्त्रेण साधकः ॥ १०२ ॥

अवगुण्ठकवचे नैव त्रिधा भ्राम्य समुङ्गिरेत् ।

प्रणवं [क: प्रणव] मन्त्रं ततो क्षिप्त्वा [क: जिप्ता] स्पृस्य तोयं
समीरकैः [क: -के] ॥ १०३ ॥

शक्तिन्तन्त्र [क: शक्तितन्तु] ततो ध्यात्वा शिवाद्यवनि गोचरम् [क: -रे] ।

दक्षिणा नयनातीतं तेजः [क: तेज] संचिन्त्य [क: संचित्य] पूजयेत् ॥
१०४ ॥

प्रणवपूर्वेण रेफेण नुत्यन्ते चैव साधकः ।

योन्यां वै वासनं कृत्वा आज्य पात्रस्य प्लावनी ॥ १०५ ॥

ऊद्धासनन्ततोस्त्रेण निरायघ्नन्तु [क: -यणन्त] मेव च ।

योन्यान्तु भोजनं कृत्वा यागं ततोपरि [क: तत्रो-] न्यसेत् ॥ १०६ ॥

अस्त्रान्तं [क: -कं] नात्रसंदेहः श्रुसुवौमाज्यतापयेत् ।

प्रोक्षयित्वा पुनः स्ताप्य [क: स्ता *] प्रोक्ष्यचार्च्य [क: प्रोक्ष्यर्च्य] नविद्यया [क: नविन्यसेत्] ॥ १०७ ॥

जाप्य मन्त्रेण मन्त्रज्ञो निजयागस्य चार्चने ।

शक्तितन्त्र [क: -तन्तु] ततो ध्यात्वा कुण्डमध्ये [क: -मध्य] तु साधकः ॥ १०८ ॥

भैरवं तत्र विन्यस्य स्वमन्त्रेणैव [क: स्वतत्रे णैव] पूजयेत् [क: विन्यसेत्] ।

गंधमाल्यं तथा धूपं दत्वा चैवाहुतिं [क: -हुति] हुनेत् [क:

न्येसेत्] ॥ १०९ ॥

पुनरघ्र्यादिकं [क: पुनरर्घा-] कृत्वा रक्षा मन्त्रेण पूजयेत् ।

पुनः अर्घादिकं कृत्वा तथैव चाहुतिं हुनेत् ॥ ११० ॥

कराला चैव चण्डाक्षी महोच्छुष्मान्तथैव [क: महा-] च ।

पूजयित्वाहुतिं [क: -हुति] दद्या पञ्चकस्य न संशयः ॥ १११ ॥

२४६अ क्) अग्निसंस्कारकं कर्म सर्वयागेषु नित्यसः ।

आग्नेस्तु हृदये [क: -य] सर्वं आसनादि पुरः सरम् ॥ ११२ ॥

यागं संपूज्य मन्त्रज्ञ अर्घं दत्वा यथाक्रमम् ।

१९६अ ख्) मुद्रांश्चैव [क: मुद्राश्चैव] ततो वध्वा [क: वधा] प्रति

प्रति वरानने ॥ ११३ ॥

आज्य पात्रे तु दर्भेण द्विभागं परिकल्पयेत्।

साधनन्तु ततः कृत्वा नाडीसंधानमाश्रृतः ॥ ११४ ॥

दक्षिणा दक्षिणं नेत्रं वामोवामस्तु लोचनम्।
[क: ऊद्ध्वा ऊद्ध्वक्रमेणैव तृतोधा भैरव लोचनम्।]

आहुतिन्तु ततो दद्याद् दक्षभागोथ वामकाः ॥ ११५ ॥

मध्यमा च क्रमेणैव [क: क्रमेण *] ध्यानयुक्तो समाहितः।

आग्नेये त्वथ सौम्यायां ताभ्यां चैव यथाक्रमम् ॥ ११६ ॥

प्रणवेण महाप्राज्ञः स्वाहाकारान्त संयुतः।

नाडीसन्धानकं [क: -संध्यानकं] कृत्वा ततः पञ्चाहुतिं

हुनेत् ॥ ११७ ॥

विद्याया नात्रसंदेहो मण्डलस्ये तु तर्पणे ।

भैरवाय ततमेकां विद्यामुच्चार्य दापयेत् ॥ ११८ ॥

प्रणवेन तथैवेह भैरवाय ततो हुनेत् ।

सर्वेषां चैव दातव्या एकैका नात्रसंशयः ॥ ११९ ॥

लोकपालादि चास्त्राणां कुलविद्याश्च[क: -विद्याञ्च] मृत्युजित [क: -जित्]
।

भाग्यारोहणमन्त्रस्य मूलमन्त्रेण भैरवे ॥ १२० ॥

पूर्णाहुतिं ततो दद्यात् समपादोर्ध संस्थितः ।

तत्त्वैककरणो कृत्वा ह्यस्थानिस्थस्य [क: ह्-] मन्त्रवित् ॥ १२१ ॥

मण्डलस्य तु मन्त्रज्ञः शिवकुंभस्थितस्य तु ।

समरसादि [क: -मादि] प्रयोगेन [क: प्रयागेन] साधकः सुसमाहितः ॥ १२२ ॥

शिवाद्यवनिपर्यन्तं शक्तितन्तु विचिन्त्यथः ।

पूर्णाहुतिं ततो दद्यात् मुद्राश्चैव [क: -श्चव] प्रदापयेत् ॥ १२३ ॥

निराचारपदो [क: वि-] भूत्वा पदस्थाने निधापयेत् ।

ज्वालाम् परीक्षयेत् मन्त्री लक्षणज्ञसमाहितः ॥ १२४ ॥

व्यक्तिरेक [क: व्यतिरके] विधौ तासां सूक्ष्म दृष्टिस्तथैव च ।

स्निग्ध [क: स्निग्व] प्रदक्षिणोवर्तः [क: -णावर्तः]

कांचनाभास्तथैव च ॥ १२५ ॥

जातिहिङ्गुलक प्रख्य श्निग्धस्वेतश्च [क: श्निग्वस्वेतश्च] यो भवेत् ।

२४६ब् क्) हरिताल प्रभाश्चैव गंभीरस्वर [क: -सर] संयुतः ॥ १२६ ॥

संहता [क: सहता] स्फुटिता नैव ज्वालास्वेतास्य [क: ज्वालाखेतास्सु]

भा स्मृताः ।

मधुगन्धाः [क: -गधा] सुगन्धाश्च [क: सुगधा च] ज्वलास्वेतास्तु

[क: श्वेतास्तु] सोभना ॥ १२७ ॥

पृथक् पृथक् फलं तासां तं शृणुष्व समाहिताः ।

स्निग्ध प्रदक्षिणावर्ता मुक्तिदा सा प्रकीर्तिता ॥ १२८ ॥

भुक्ति कामस्तुतां दृष्ट्वा प्रायश्चित्तं समाचरेत् ।

होमस्याष्टसहस्रंस्याज्जपस्यैवायुतं तथा ॥ १२९ ॥

कृत्वा शुद्धिमवाप्नोति भुक्ति कामो न संशयः ।

सुवर्णाभा [कः सुवर्णा *] भवेद् या तु भुक्तिदा सा प्रकीर्तिताः ॥
१३० ॥

जातिहिङ्गुलकप्रख्या सवसिद्धि प्रदा स्मृताः ।

स्निग्धा शिता च जाला च क्षुद्रसिद्धिः प्रदायकाः [कः -पयेत्] ॥ १३१ ॥

हरितालप्रभा या तु सामान्यो भुक्तिदा स्मृता ।

१९६ब् ख्) धूम्रवर्णा स धूम्रा च राजावर्तनिभास्तथा ॥ १३२ ॥

शुकपिंछनिभाश्चैव स्फुटिता विस्फुलिङ्गका [क: -रिङ्गका] ।

अग्निं वा भूक्षवर्णाश्च वामावर्ता त्व सोभनाः [क: -ना] ॥ १३३ ॥

दुर्गन्धाश्चोग्र [क: -श्चाग्र] गन्धाश्च [क: गधाञ्च] विपरीत [क:
पिवरीत] फल प्रदा ।

व्याधिस्तु कुरुते धूम्रा स धूम्राश्च तथैव च ॥ १३४ ॥

राजावर्तनिभायाति शस्त्रपातं करोति स ।

शुकपिंछनिभा या तु स्फुटिता [क: स्फटिता] चैव या भवेत् ॥ १३५ ॥

मारणं साधकस्यैव कुरुते नात्र संशयः ।

सस्फुलिङ्गो भवेद् यान्तु [क: यास्तु] सिद्धिहानि प्रदायिका ॥ १३६ ॥

प्रायश्चित्तं वदाम्यामां साधकानां हिताय वै [कः वैः] ।

व्याधिं जनयते या तु मन्त्रं मृत्युंजयं जपेत् ॥ १३७ ॥

तस्य लक्षार्द्ध [कः लक्षा च] मे वोक्तं कृत्वास्त्रय [कः -श्रयै] मवाप्नुयात् ।

सन्त्रपात प्रदा या [कः पा] तु विंसत् साहस्त्रकं भवेत् ॥ १३८ ॥

मृत्युंजयस्य मन्त्रस्य रम्यकल्पोक्तमेव हि ।

सिद्धिहानि [कः सिद्ध-] प्रदा या [कः पा] तु दशसाहस्त्रकं भवेत् ॥ १३९ ॥

शुभापि विपरीता च उत्तमा सिद्धिमिछता ।

कल्पोक्तं साधकः कुर्यात् नात्र कार्यविचारणात् ॥ १४० ॥

भुक्तेच्छोक्षुद्रता [क: -छाछुद्रता] या तु लक्षार्द्धन्तु [क: लक्षाद्धन्तु] समाचरेत्।

२४७अ क्) काम्ययागे समारव्धो [क: -लव्धा] विवरीत [क: विपरीत] फल प्रदा ॥ १४१ ॥

तस्मिन्न वैग्रहेतव्यं [क: -हस्तव्यं] कल्पोक्तं नात्र संशयः।

प्रायश्चित्तम् अपि कुर्यात् [क: कुर्या] तस्मिन्नेव न संशयः ॥ १४२ ॥

अन्ययागं समारभ्य पुनः काम्यं समारभेत्।

उपविश्य ततो मन्त्री मुद्रास्सर्वाः प्रदापयेत् ॥ १४३ ॥

अर्वनन्तु ततः कुर्यात् पुनर्गन्धादिकं [क: पुर्नग-] क्रमात्।

भैरवादि ततः कृत्वादेकैकादाचरेत् [कः दकैका-] पुनः ॥ १४४ ॥

आहुति कुलविद्यान्ता पुनः पूर्णाहुतिं हुनेत्।

तेनैव क्रमयोगेन मुद्रां वध्वा [कः वधा] तथार्चयेत् [कः -न] ॥ १४५ ॥

अर्घायित्वा ततो गछे देवीनामग्रतः पुनः।

अर्घन्दत्वा तु विज्ञाप्य अभिघारी कृतानि तु [कः तुः] ॥ १४६ ॥

यथा विभवलव्धानि नैवेद्यानि प्रकल्पयेत्।

वैषेषिकं ततो दद्या हीसित्मात्रन्तु भैरवे ॥ १४७ ॥

न लाभेन व हुं [कः हूं] दद्याद् आत्मार्थे साधकेन तु।

नत्यजं नापिदेयं स्याद् अनलेपिन चक्षिपेत् ॥ १४८ ॥

शुद्धयर्थं प्रासयेत् मन्त्री यागान्तेत्व विसर्जिते [कः -तेः]।

अर्घपात्रोदकं प्राप्यमभिशेकं च दापयेत् ॥ १४९ ॥

निष्क्रम्या च मनं कुर्यान् न्यासं कृत्वा पुनर्विशेत्।

१९७अ ख्) नैवेद्यानि [कः नैव योनि] ततो दत्वा कालाचिन्त्याश्च [कः कालोचिन्त्याश्च] वासकाम् ॥ १५० ॥

कलसेपि शिवस्याथ अस्त्रवर्द्धनिकान्यपि।

अग्न्यागारे ततो दत्वाद् अर्घन्दत्वा यथाक्रमम् ॥ १५१ ॥

देवं [कः देव] विज्ञाप्यतो मन्त्री अग्निकार्यं समारभेत्।

संखा [क: संख्या] गृह्य तु तत्रैव देवीनामग्रतः स्थितः ॥ १५२ ॥

मन्त्रस्य तर्पणं कृत्वा यथा शक्त्या तु साधकः ।

अक्षसूत्रं ततो गृह्य मन्त्रं चैव समर्पितम् ॥ १५३ ॥

परिकृत्वा तु होतव्यं न हुतं न विलंवितम् ।

गुग्गुलं [क: गुर्गुलु] पायसंवापि तिलां वा घृतमिश्रिकाम् [क: घत-] ॥ १५४ ॥

शाल्यं शष्टिकहोमम् [क: -कं होमं] वा कल्पोक्तं [क: -क्त] यदुदाहृतम् ।

दशान्सेन तु होतव्यं जपं वै शाधकेन तु ॥ १५५ ॥

अग्निं [क: अग्नि] विसर्जयेत् मन्त्री न चापि चिरमापयेत् [क: -मोपयेत्] ।

२४७ब् क्) प्रामादाद् विरमेयद्वा पुनः संस्कार को विधिः ॥ १५६ ॥

अलिप्ते [कः -के] कुण्डमध्ये तु पुनः संस्कार [कः स-] कारयेत्।

अग्निज्वाल्यं [कः -ल्यें] ततः कुर्याद् अग्निसंस्कार को विधिः ॥ १५७ ॥

एवं संख्याहुतिं कृत्वा भैरवाय समर्पयेत्।

यागपूर्णन्तु कल्पोक्तं भैरवां गुह्य तद्भुतम् ॥ १५८ ॥

निराचारपदे भूत्वा अवधूत तनु स्थितः।

भैरवस्य करेर्पित्त हृद्योमन्तु [कः हृद्योमन्त्र] स्थितस्य तु ॥ १५९ ॥

ते नैव क्रमयोगेन चरेद् विद्या व्रतानि तु।

तृस्नायी [क: तृष्णायी] नक्तभोजित्वं गुरुभक्ता दृढव्रतः ॥ १६० ॥

ब्रह्मचर्य रतो नित्यं जपध्यानपरायणम्।

अग्निकार्य रतो [क: रता] नित्यं समयाचारपालकः ॥ १६१ ॥

पूर्वाह्निकं ततः कृत्वा अटनं तु समारभेत् [क: -येत्]।

मध्याह्निकं तु कर्त्तव्यं तृतीयसेवनंस्तथा [क: -
येसेवनंस्तथा] ॥ १६२ ॥

अग्निकार्यं [क: अग्निं-] तथा चैव रात्रौ चैव यथोदितम्।

भुक्त्वा चैवाप्यनं कूर्याद् अर्द्धरात्रे पुनः भ्रमेत् ॥ १६३ ॥

एवं प्रतिदिनं [क: -न] कुर्यात् कुलविद्यात् समूद्गिरम् [क: -तम्]।

योगिन्यः [क: योगिन्य] पूतनाद्याश्च नमस्कृत्वा पुनः पुनः ॥ १६४ ॥

चत्वरेमेक वृक्षे च स्मशाने वाल्मिके [क: वात्मिके] तथा ।

कुलविद्या समुच्चार्य पुष्पाणि तु विनिक्षिपेत् ॥ १६५ ॥

एतेष्वेव हि स्थानेषु योगिन्या पूतनादयः ।

नमस्कृत्वा [क: नमः स्कृत्वा] व्रजेत् मन्त्री उलूकं पिङ्गलास्तथा ॥ १६६ ॥

शव्दं श्रुत्वा नमस्कार्यो अन्याश्च [क: अन्योश्च] निशिचारिणाम् ।

एवमाहु व्रतानिस्यु? आचारं पश्यते यदा ॥ १६७ ॥

समयज्ञस्तथा तन्त्र गुरु चैव विधि स्थितः [क: ष्ठितः] ।

आत्मानं गोपयेत् तेषां एकान्ते [क: मेकान्ते] दर्शयेत् ततः ॥ १६८ ॥

अन्यथा कुरुते मोहात् प्रायश्चित्तं समाचरेत्।

विद्याव्रतानि संचार्य षट्मासात् साधकोत्तमः ॥ १६९ ॥

मासं मासं चरेद् वापि पूर्वसूत्रेण चोदिताम्।

१९७ब् ख्) चीर्णविद्या व्रतः सिद्धे अन्यथा चैव नश्यति ॥ १७० ॥

समयज्ञो [क: -ज्ञा] योगिभक्तश्च उद्युक्ताः साहसान्वितः।

२४८अ क्) निलंज्जोति घृणं चैव गुरुभक्तो जितेन्द्रियः ॥ १७१ ॥

दिग्वन्धं [क: दिग्वधं] पूर्वतः कृत्वा भूपरिग्रहमेव च।

अस्त्र मोक्षं ततः कृत्वा ततो मन्त्री व्रतं चरेत् ॥ १७२ ॥

नित्यव्रतां महावीरो रात्रौ पर्यटनं [क: पर्यन्तं न] तथा ।

रक्ता वाप्यथवा कृष्णा कौशेयं वामया चरेत् ॥ १७३ ॥

सुगन्धगन्धलिप्ताङ्गः [क: सुगन्ध * * लिप्ताङ्ग]
पुष्पस्त्रग्दामभूषितः ।

पञ्चमुद्राव्रती वीरो गुप्तमुद्राथवा भवेत् ॥ १७४ ॥

खट्वाङ्गं [क: खड्गाङ्गं] धारयेत् मन्त्री सप्रमाणं
सशूलकम् ।

प्रादेशं वाथवा कुर्या धनुना राज संयुतम् ॥ १७५ ॥

खड्ग खेटकधारी [क: खड्गे -] च चरेद् विद्या व्रतं शुभम् ।

असिद्धोपि महाप्राज्ञो सिद्धोपि हि चरेद्बुधः ॥ १७६ ॥

कृत तक्षः कृत न्यासस्तत्त्व युक्तः [कः सुकु] समाहितः।

पूर्वोक्तेषु प्रदशेषु मौनन्तु कल्पयेद् व्रतम् [कः व्रतः] ॥ १७७ ॥

ब्रह्मचारी जितक्रोधो निर्भयो हृष्टमानसः।

पूर्वोक्तेषु प्रदेशेषु समाधिकारयेद्बुधः ॥ १७८ ॥

योगिन्यः [कः -न्या] पूतनाद्याश्च नमस्कृत्वा पुनः पुनः।

होमयुक्तो महामन्त्री डमरूकं वादयेत् [कः वाडयेत्] क्वचित् ॥ १७९
॥

कृत्वा चाष्टशतं [कः -शत] जप्त्वा भैरवे य [कः प] निवेदयेत्।

शुलविद्याष्टशतं [क: -मूशतं] जप्त्वां नित्यकर्मानिवेदयेत् ॥
१८० ॥

योगिन्यां प्रीणनार्थन्तु [क: प्रीश-] नमस्कृत्वा पुनः पुनः ।

दर्शयेतास्तु [क: -येस्तास्तु] मन्त्रष्टा नित्य युक्तेति साधके ॥ १८१ ॥

आत्मानं दर्शयेद् देवी नभेतव्यं कदाचनः ।

भक्षन्ति साधकं नित्यं पुत्रवन्नात्र संशयः ॥ १८२ ॥

नित्य युक्ता भैरवे नैव साधक्स्य हिताय [क: -ये] वै ।

एवमेलकमापन्नो [क: -न्ना] आदिष्टं वै [क: भ] वरानने [क: -ना] ॥
१८३ ॥

तालमार्ग तदा कुर्याद् यदा शुद्धस्तु [क: -न्तु] साधकः ।

गुर्वादेशेन वा कुर्याद् [क: कुर्या] योगिभिश्च समर्पितः ॥ १८४ ॥

यदा तस्य भवेद्दूती [क: भवे-] साधकस्य मनोहरा ।

तदा तालकमार्गन्तु शुद्धकाय समारभेत् ॥ १८५ ॥

गुरुमादेशसम्प्राप्तो [क: भरु-] सोभनालक्षणान्विता [क:
सोभरालन्तणान्वितः] ।

जितासना [क: -न्त] महासत्वातन्त्र [क: महासधातन्त्रं]
सद्भावभाविता [क: सद्भाविता] ॥ १८६ ॥

२४८ब् क्) गुरुदेव [क: -वता] पति [क: यति] भक्त्यर्क्षुत् [क: भक्त्याकुत्]
पिपासा जितस्त्रमा [क: -सा] ।

अद्वैतवासिता नित्यं निर्विकल्पा ह्यलोलुपा ॥ १८७ ॥

समाधिज्ञाथ योगज्ञा ज्ञान ज्ञासंशृतव्रता ।

तामवाप्त महाप्राज्ञोः कल्पोक्तन्तु समाचरेत् ॥ १८८ ॥

१९८अ खू) त्रिस्कालस्नान निरत एवं मन्त्रा सुचिन्तकः ।

कृतन्यासो विधानज्ञो देवागारं [कः देव-] व्रजेत्ततः ॥ १८९ ॥

प्रतिहारौ तु संपूज्य सरिद्वयवृषन्तथा ।

विघ्नेशं क्षेत्रपालं च स्मसानानि [कः स्यसानाति] तथैव च ॥ १९०
॥

कुलविद्या तु संपूज्य योगिन्य पूतनादयः ।

वीरां चैव ततः पूज्य शिवमार्जारिमेव च ॥ १९१ ॥

उलूकं च तथा पूज्य पिङ्गलामन्त्रविक्रमात्।

रुद्रं चैव यथा न्यायं गुरुपङ्क्ति [क: -पक्ति] ततोर्चयेत् ॥ १९२॥

अस्त्राणि विन्यसेदिक्षरग्नि प्राकारमेव च।

कवचं तु ततो दत्वा प्रणवासनमाचरेत् ॥ १९३॥

दक्षिणाभिमुखो भूत्वा उपविश्य यथाक्रमम्।

यागं [क: याग] कृत्वा यथा न्यायं [क: न्याय] कलसादि समन्वितः
॥ १९४॥

अग्न्यागारं ततो गन्धा [क: गधा] पूजयित्वा यथाक्रमम्।

संस्कारं [क: स-] चालने कृत्वा एकतत्त्व विधिक्रमात् ॥ १९५॥

पूर्णाहुतिविधानेन ततो देव्याग्रतः स्थितः।

उपविष्टो महामन्त्री मुद्रा पञ्चकभूषितः ॥ १९६ ॥

मुक्तकेसोथ [क: -साथ] दिग्वासो [क: यिग्यासो] वनभस्मावधूलितः [क: वर-]।

अग्रतः शक्तिमारोप्य [क: -माणप] ऊर्ध्वरूपान् दिगाम्वरम् [क: दिशाम्-] ॥ १९७ ॥

मुद्रापञ्चकसंयुक्तं मुक्तकेशी दृढव्रताम्।

पीठन्तु मार्चयेत् तस्या [क: तस्मा] अस्त्रोदकसमन्विताः [क: -ताम्] ॥ १९८

॥

विलेपयित्वा गन्धैस्तु [क: गन्ध्रैस्तु] आसनं तत्र कल्पयेत्।

यागं पूर्वविधानेन अशेषन्तत्र विन्यसेत् ॥ १९९॥

भूम्यान् तथासनं कृत्वा स्वल्पप्रस्तरणान्तिकम्।

उपविस्यापयेत् तत्र चुम्वनाद्या च गृहनम् ॥ २००॥

कृत्वा क्षोभं समारभ्य पवित्रं गृह्य साधकः।

प्रासयित्वा तु तौ हृष्टौ यागद्रव्यानि प्रोक्षयेत् ॥ २०१॥

२४९अ क्) अर्चनं हि ततः कृत्वा नैवेद्यानि तु दापयेत्।

अग्नेश्च यजनं कृत्वा अग्निकार्यं समारभेत् [क: -चरेत्] ॥ २०२॥

होमं कृत्वा यथोदिष्टं देवीनां विनिवेदयेत्।

विज्ञाप्य निघमं कुर्या [क: कुर्यात्] जप [क: तय] संख्या विधिं
प्रति ॥ २०३ ॥

शक्त्याश [क: -द्य] नात्र तस्थित्वा लिंगं तत्र [क: तत्रे] विनिक्षिपेत् [क: -
प्येत्] ।

अक्षसूत्रं ततो [क: तत्रो] गृह्य कल्पोक्तन्तु समाचरेत् ॥ २०४ ॥

संख्यायादाह्निकं [क: संख्यया-] कृत्वाल्लक्षमेकं
जपेद्बुधः ।

दूतीमुक्तान्य चान्यत्र मौनभङ्गं समाचरेत् ॥ २०५ ॥

नक्तभोजन [क: -भोजेन] मापन्ना लघ्वाहारोजितक्रमौः [क: -
परमौः] ।

एवमाहुर्जपं [क: -प] कुर्यात् तालमार्ग विधिः [क: विधि] क्रमात् ॥ २०६ ॥

यागपूर्वं समर्प्पीत [क: समर्प्यात] भैरवाय वरानने ।

जपं समर्प्ययित्वा तु [क: नास्ति] ततो होमं समाचरेत् ॥ २०७ ॥

१९८ब् ख्) गोमान्सस्यायुतं [क: -त] कुर्यात् सुरयामिश्रितस्य च ।

क्रोष्टुकस्य तथैवेह [क: तथवेह] छागस्यपिसितस्य च ॥ २०८ ॥

पूर्वोक्तानां पशूनाम् वा मान्सैर्होमानि [क: मान्सै-] कारयेत् ।

पारावतस्य मांसेन करिमान्सेन [क: कनिष्टामार्गेन] चैव हि ॥ २०९ ॥

खरमानुष [क: खख-] कुर्मोक्त? स्वशृग्नालहयादिषु [क:

स्वशृंगोल-] ।

तनुभिश्च वराहश्च इत्येषां फल्गुणैस्तथा [क: फल्गुणै-] ॥ २१० ॥

सद्योक्ता होमयेत् [क: हानयेत्] मन्त्री षर्पिषा वाध्व [क: वास] भावतः ।

महापशुं तथा चैव होतव्यं सिद्धिकांक्षया [क: -कातया] ॥ २११ ॥

दशसाहस्त्रकं कुर्या यथा लाभं महापशुम् ।

समर्पयित्वा देवाय ततः कर्मसमारभेत् [क: कम-] ॥ २१२ ॥

तालमार्गे तु वै सस्तं नित्य सामिपभोजनम् ।

च्छागं [क: मार्ग] वाराहमाहिष्य हरिणं [क: हरिण] ससकन्तथा

[क: शशकन्तथा] ॥ २१३ ॥

मायुरं लाचकां चैव तित्तिरासकपिञ्जलाः ।

वार्ताकां कुल्लकां चैव वर्गोटिकांकमेजकाः [क: -
काकमजकाम्] ॥ २१४ ॥

क्रोञ्चञ्च [क: क्रोचं च] सारसं [क: -स] चैव पारावतकपोतकम् [क:
-पातकम्] ।

आटी च मधुकं [क: -क] चैव सटालं चैव सिद्धिकाम् ॥ २१५ ॥

वनकुर्कुटकाद् चैवे [क: वचै] जलकुर्कुटकान्तथा ।

कोकं [क: काकं] चैव तथा भक्ष्या कछपं [क: कछप]
मेडकं तथा ॥ २१६ ॥

२४९ब् क्) यव खण्डारतीलीटी [क: तीलोम] मल्यकमीसकन्तथा ।

गडरञ्च [क: गदरचं] तथा भक्ष्या पूतिके सन्नलीकरम् [क: -करामˌ] ॥ २१७ ॥

आरण्यकविरालञ्च [क: -कविरालं च] मेषं चावन संभवम्

पेचकं [क: नास्ति] चटकं [क: नास्ति] भक्षं शुकं वै शारिका तथा ।

कडम्वकर्णटामञ्च [क: कडं कर्णटास च] दुदकं तार कुर्कुटम् [क: -टˌ] ॥ २१८ ॥

सर्वमन् [क: -सन्ˌ] सगतं भक्ष्या तालकस्य न संशयः ।

नमान्सेन [क: नमोन्सन] विनाभोज्यं [क: -भाज्यं] तालकेन कदाचनः [क: -नˌ] ॥ २१९ ॥

नियमस्थो विशेषेण कर्त्तव्यं [कः कर्तृव्यं] पिसितासनम्।

दशसाहस्रकं जाप्य सलाभे पिसितस्य च ॥ २२० ॥

आमिषं नैव सर्वस्या संभवेन् साधकस्य तु।

स्वल्पमप्यामिषं भुक्षा [कः भुक्त्वा] मेषाहारास्तु [कः -न्तु]
मस्नुते [कः -स्नुते] ॥ २२१ ॥

तालकेन महादेवि भोक्तव्यं मामिषं सदा।

निरामिषस्तु भुंजानो [कः -ना] जपस्याष्टशतं हुनेत् ॥ २२२ ॥

स्वामिषं यन्तु नैवेद्यं [कः नैवेद्य] स्वल्पं [कः स्वयं] शक्त्या
प्रदापयेत्।

साधारणं ततो देयं स्थित्यार्थ साधकेन तु ॥ २२३ ॥

स्वकीयमात्मनः सर्वं [क: सर्व] स्थित्यार्थं [क: स्थित्वार्थ]
भक्षयेद् वुधः ।

कदाचित्स्या वहुं दत्तं भक्षितुं [क: भक्षिं तु] नैव शक्त्यते ॥
२२४ ॥

स्थापयित्वा पुनर्भक्ष्यत् सक्त्या [क: साक्या] नैव प्रदापयेत् ।

कल्पोक्तेन विना देवि तालके विधि संस्थितः [क: -ते] ॥ २२५ ॥

गुरुगृहेक शुद्धस्तु [क: शुद्धस्त] नैवेद्यं भषयेत् [क: -यत्] सहा ।

१९९अ क्) एकत्रैव महाप्राज्ञो विकल्पान्नैव [क: विकल्पो नेव] कारयेत् ॥
२२६ ॥

विकल्पे तु कृते [क: कृत] देवि प्रायश्चित्तं समाचरेत् ।

आदावे वन वै दद्यात् प्रवेशं कस्यचित् प्रिये ॥ २२७ ॥

प्रिविष्टेन सहैकत्वं भक्षितव्यन् न संशयः ।

स्वांशिकन्तु न दातव्यं पुत्राणां भातृणास्तथा ॥ २२८ ॥

स्वकीयं भक्षयित्वा [क: -यिक्ष्या] तु सामान्यं भक्षयेस्तथा ।

यदा न तृप्यते तेन दोषस्तत्र प्रजायते ॥ २२९ ॥

प्रलाभेन तु नैवेद्यं स्थापयेत् [क: -यत्] साधकोत्तमः [क: -येत्तमः] ।

लडुकादीनि [क: लन्तकादीनि] भक्षानि [क: भक्ष्यानि] नित्यर्थन्तु दिने दिने ॥ २३० ॥

वुभुक्षितः [कः -क्तितः] कदाचित् स्याद् [कः स्यात्] गर्त्तवकुण्डाथवापि [कः तर्तकुण्डाथवापि] वा ।

नैवेद्या गृहभक्षास्य न दोषस्तत्र विद्यते [कः विन्यसेत्] ॥ २३१ ॥

२५०अ क्) नियमेन विना देवि पूर्वाहाराणि [कः -वि] भक्षयेत् ।

तत्रापि [कः तत्रादैपि] यान्य भक्षानि भक्षितव्यानि कानिचित् ॥ २३२ ॥

माषां चरणकं चैव चर्मरंनारङ्गजम्विरम् [कः च
मधुर्यलान्तथैव च] ।

मातुलङ्गं च वकुलं नपुनं च तथैव हि ॥ २३३ ॥ [कः नास्ति]

कफलं हिंसलं चैव द्विविधान्यपि भक्षयेत् । [कः नास्ति]

आकोटमारकं चैव गद्गरुं तेन्दुकं तथा ॥ २३४ ॥ [कः नास्ति]

पेंडारी द्विविधं चैव तेन्दुकं मर्कटस्य तु । [क: नास्ति]

कपित्थं करहाटञ्च खादिरसाखमेव च ॥ २३५ ॥ [क: नास्ति]

मालाकंटो इका चैव सूरणं कन्दमेव च ।

गोस्वोदुम्वरिका चैव ताण्डीरं पीलुकन्तथा ॥ २३६ ॥

गोल्फा चैव गुदं [क: गुद] चैव विभीतकहरीतकी ।

द्राक्षाञ्चैव [क: द्राक्षा चैव] नारिकेरञ्च [क: -फेरं च]

पद्मानांहिषमेव [क: -पमेव] च ॥ २३७ ॥

माक्षीकमधुकं [क: माङ्गीकमधुरं मधुरं चैव] चैव

मधुर्येलान्तथैव [क: मधुर्य-] च ।

एतानि देव्य शुद्धं स्याद् भक्षयानि न संशयः ॥ २३८ ॥

तालकस्य तु भक्षाणि [कः भक्तातः] नात्र कार्य [कः नास्ति] विचारणात्
[कः नास्ति]।

मात्मानियान्य भक्षाणि होतव्यानि विधि स्थिते ॥ २३९॥ [कः नास्ति]

आदेशेन विना तानि तानका नैव भक्षयेत्। [कः नास्ति]

आसवादीनि मद्यानि नवयोनि तथैव च ॥ ३४०॥ [कः नास्ति]

अभक्षभक्षणे चैव अपेयापि च ते तथा। [कः नास्ति]

प्रायश्चित्तं [कः नास्ति] ततः [कः नास्ति] कुर्या नान्यथा सिद्धि
भाग्भवत् ॥ २४१॥

एकान्ते गुह्यदेशे तु एकस्मिं भोजनन्तयोः।

अन्यथा कुरुते य द्वादशसाहस्त्रकं जपेत् ॥ २४२॥

समर्पयित्वा कल्पोक्तं ततः कर्मसमारभेत्।

अधमा मध्यमा चैव उत्तमा सिधिमिछता ॥ २४३ ॥

पूर्वोक्तेन विधानेन देवागारं समाविसेत्।

दिग्वासो [क: दिग्यासा] मुक्तकेशश्च कृत न्यासो न संशयः ॥ २४४ ॥

प्रणवासनोपविष्टौ [क: प्रशवा-] च हृद्यागादि [क: यांगादि] पुरः सरम्।

दक्षिणाभिमुखो [क: -णोभिमुखो] भूत्वा अल्पप्रस्तरणं न्यसेत् ॥ २४५ ॥

१९९ब् ख्) तत्रासनन्तु मन्त्रज्ञो मन्त्रैः कृत्वा यथाक्रमम्।

तत्रासनं महादेवि शक्तिम् [क: शक्ति] वै सम् विसापयेत् [क: मापयेत्] ॥ २४६ ॥

अस्त्रोदकेन सन्माज्य पीठं वै साधकोत्तमः।

स्वयागं तत्र विन्यस्य आसनादि पुरस्सरम् ॥ २४७ ॥

चुंवना लिंगनं कृत्वा पीठस्यापि वरानने।

लिंगं प्रवेशयित्वा तु आसनादि पुरः [कः पुनः] सरम् ॥ २४८ ॥

सर्वगतं [कः सर्वाग] ततो योज्य पुष्पगन्धादिभिस्तथा।

क्षोभयित्वा ततः शक्तिं द्रव्यं गृह्य तदुद्भवम् ॥ २४९ ॥

प्रासयित्वा ततो द्रव्यं अर्घ्ययित्वा ततोर्पयेत्।

द्रव्यपूतोदकं मन्त्री ततो द्रव्याणि प्रोक्षयेत् ॥ २५० ॥

२५०ब् क्) कृत्वा मण्डलकं देवि चन्दनादिसुरामयः [कः वंदनादि- -

शवम्] ।

गोमयेन [क: गोमयर] विमिश्रेण [क: विमिश्रश] रजो [क: रतो] वा पूर्वपातिते ॥ २५१ ॥

शिवकुंभं यथा न्यायं सुरा पूर्णंविमिश्रितम् [क: -विमितम्] ।

द्रव्यपूतेन वा पूर्णम् उदकेन तथा प्रिये ॥ २५२ ॥

अस्त्रवर्द्धनिका पूर्वं यजेद् वै साधकोत्तमः [क: -मम्] ।

पद्मयागं पुनः कृत्वा यथा विधिः पुरस्सरम् ॥ २५३ ॥

अग्न्यागारं [क: अग्न्यांगारं] व्रजेत् मन्त्री तर्पणादिकमाचरेत् ।

एकतत्त्वविधानेन तर्पणं [क: तर्पण] त्व तु तर्पणम् ॥ २५४ ॥

कृत्वा मुद्रा ततो वध्वा [क: वधा] अर्घ्यं [क: अर्घं] दत्वा
यथाक्रमम् ।

देवी नामग्रतः स्थित्वा [क: स्थित्या] अर्घन्दत्वा [क: अर्घ-] महाधिपे
॥ २५५ ॥

मुद्रां वध्वा [क: वधा] विधानज्ञो [क: ज्ञा] नैवेद्यानि
प्रदापयेत् ।

घारिकै धूरिकैश्चैव पूपकाघृत पूरकैः ॥ २५६ ॥

लडुकासोकवर्त्तिभ्यां [क: लंडूकामोक-] भक्षैः
कन्दुकृतैस्तथा ।

मान्सैस्सुगन्धिभिश्चान्यैः [क: मान्सैत्सुगंधि-]
पक्षामयैर्यथा [क: पक्षायैर्यथा] भवेत् ॥ २५७ ॥

मुद्रा वंधं ततः कृत्वा हृद्यागादि पुरः सरम्।

निवेदयीत देवाय कल्पोक्ताय प्रसिद्धये ॥ २५८ ॥

अर्घन्दत्वा तु मन्त्रज्ञः सिद्धकल्पोक्त कस्य च।

प्रणिपातन्ततः कृत्वा संख्या गृह्य यथेप्सया ॥ २५९ ॥

लव्धानुज्ञा ततो मन्त्री अक्षसूत्रञ्च [क: अक्षसूच] चालयेत्।

मन्त्रज्ञ [क: नन्त्रज्ञ] चालयित्वा [क: वा-] तु हृस्थं कृत्वा ततो व्रजेत्
॥ २६० ॥

तथै तत् संस्थितायास्तु शक्तिपीठस्य चाग्रतः।

अचालिते तथा न्यासे [क: न्यास] अर्घन्दत्वा तु साधकः ॥ २६१ ॥

चुम्वनालिंगनं कृत्वा लिङ्गन्तत्र प्रवेशयेत्।

तत्र क्रमेण संसोध्य हृद्यामं साधकोत्तमः [क: -म] ॥ २६२ ॥

ससमाधिप्रयोगेन ततो हृस्थन्तु कारयेत्।

विन्दुमध्यगतं मन्त्री यागाद्यैस्तु विकल्पितम् ॥ २६३ ॥

सर्वयागावलोकी च भैरवार्पितमानसः।

२००अ ख्) एवमाहुर्जपं [क: -हुजपं] कुर्याद् याव शक्ति समाहितः ॥ २६४ ॥

पूर्वाह्निकं क्रमेणैव नक्तभोजी तथैव हि।

२५१अ क्) त्रिस्नायी [क: त्रिस्मायी] नित्ययुक्तस्तु [क: -युक्त तु] कल्पोक्तानि

समाचरेत् ॥ २६५॥

यागपूर्वं [क: पूर्व] समप्पीत [क: समर्यात] भैरवाय न
संशयः।

अग्निकार्यन् ततः कृत्वा कल्पोक्तं पूर्व चोदितम् ॥ २६६॥

एवं कृते [क: कृतन्] तु मन्त्रज्ञो योगिन्यः पश्यते ध्रुवम्।

सिद्धियागं ततः कृत्वा इछासिद्धिमवाप्नुयात् ॥ २६७॥

अणिमादि गुणोपेतं खेचरत्वन् न संशयः।

प्राप्तोत्यमविनासन्तु [क: प्राप्तात्येमविनामन्तु] पदन्देवि [क: प *
देवि] न संशयः ॥ २६८॥

मध्यमा इछतो यद्व [क: यद्ध] देवागारं तु पूर्ववत्।

कृतन्यासौ प्रविष्टौ तु योगपट्टोत्तरीयकौ [क: योगपदोत्तरीयकौ] ॥ २६९ ॥

दक्षिणाभिमुखो भूत्वा तथैव प्रणवासने [क: -न] ।

हृद्यागादि कृत न्यास इदं कर्मसमारभेत् ॥ २७० ॥

ऊर्ध्वरूपान् तथा शक्तिं कृत्वा वै पीठलेषयेत् [क: -लपयेत्] ।

स्वयागे पूर्वसूत्रोक्तं न्यासं तत्रै प्रकल्पयेत् ॥ २७१ ॥

पूर्वाशृते [क: पूर्वोंशृते] तथा कृत्वा आसनं साधकोत्तमः [क: -म] ।

शक्तिस्तत्र निवेसी च दर्शायित्वा [क: दर्शायित्वा] यथाक्रमम् ॥ २७२ ॥

मण्डले तु ततो यागङ्कलसादिविकल्पितम्।

अग्न्यागारं ततो गन्धा [कः गधा] तर्पणादिकमाचरेत् ॥ २७३॥

नैवेद्यानि ततो दद्या होमं चैव यथेप्सया।

मुद्रां वध्वा [कः वधा] ततोर्घन्तु दत्वा आगत साधकः ॥ २७४॥

अर्घं दत्वा तु देवीनां मुद्रां वध्वा [कः वधा] यथाक्रमम्।

निवेदयेत् ततो यागं कल्पसिद्धयर्थं काक्षिणाम् ॥ २७५॥

संख्या गृह्य ततो मन्त्री अक्षसूत्रं तथैव च।

शक्तिपीठे ततोर्घन्तु दत्वा कृत्वा तु चुम्वनम् ॥ २७६॥

लिंगं तत्र क्षिपेत् मन्त्री मनाक्षालन [कः मनोक्षालन] मारभेत्।

शक्तिना चालयेत् [क: चालये] स्थानाद्यागहोमविधावपि ॥ २७७ ॥

तत्र प्रविष्टलिंगं तु कल्पोक्त विधिमाचरेत् ।

अप्रवासि तथा मन्त्री अदसीनक्तभोजकः ॥ २७८ ॥

कल्पोक्तं पूर्ववत् कृत्वा यागं मन्त्री समारभेत् [क: समाचरेत्] ।

पूर्वोक्तविधिना देवि देवागारं वरानने ॥ २७९ ॥

हृद्यागादि तथा न्यासं कृत्वा तेन न संशयः ।

२५१ब् क्) ऊर्द्धरूपं ततः कृत्वा न्यासपीठे प्रकल्पेयत् ॥ २८० ॥

अस्त्रिते चासनं कृत्वा ततो तावत्रोसापयेत् [क: -लिसापयेत्] ।

न चालपीत तां शक्ति तस्मात् प्रस्तरणाम्वुधः ॥ २८१ ॥

एकाकी याग निर्वत्यं सकलादिविकल्पितम् ।

तर्पणाद्याथ नैवेद्यं दत्वा होमं यथेप्सया ॥ २८२ ॥

कृत्वा यागं निवेद्याथ इषिचालनमारभेत् ।

२००ब् ख्) उत्थाय देवं विज्ञाप्य [क: -प्या] कल्पोक्तन्तु समर्पयेत् ॥ २८३ ॥

त दिने नैव यदा कुर्यात् कल्पोक्तं होमकर्मणि ।

संख्या गृह्य [क: गृह्यं] ततो मन्त्री ईषिच्चालनकन्तथा [क: इषि-] ॥ २८४ ॥

कल्पोक्तं कारयेत् मन्त्री होमन्तु पूर्वमेव हि ।

अनेनैवविधानेन यागपूर्वं समारभेत्॥ २८५॥

समर्पयीत्वा तद्वामं ततोकाग्रहमाचरेत् ।

त्रिश्नायी [क: त्रिस्नायी] साधकोनित्यमाह्निके [क: -निखमाह्निके]
क्षोभमारभेत्॥ २८६॥

शतमष्टसहस्रं वा सहस्रार्धमथापि [क: -यथापि] वा ।

सतद्वयं [क: शत-] वा मन्त्रज्ञो आह्निके जपमाचरेत्॥ २८७॥

नित्य नैमित्तिकं कृत्वा आह्निको आह्निकं वुधः ।

अवग्रहे जपं कार्यं शिध्यते शक्ति संयुतः॥ २८८॥

होमं चैवाथकर्त्तव्यं साधकेन यदृछया ।

नित्यनैमित्तिकं कृत्वा होमस्यापि अयं विधिः ॥ २८९ ॥

कल्पोक्तं तु जपं मन्त्री यागेस्मिं [कः यागेस्मि] तु समर्पयेत् ।

ततो होमस्य सामग्री कल्पोक्तस्य [कः कल्पाक्तस्य] तु भावयेत् ॥ २९० ॥

यागमन्यं [कः -मन्वं] तत् [कः तता] कृत्वा ते नैव [कः नव] विधिना युधः ।

शाक्त्यादि वालनं कृत्वा ततो होमं समर्पयेत् ॥ २९१ ॥

अवग्रहेन वर्तेत्त नित्यनैमित्तिकस्तथा [कः नित्यं नैमित्तिका तथा] ।

यागं कुर्याथ कामस्य सदा नित्यव्रतं चरेत् ॥ २९२ ॥

अनेनविधिना [कः अनेनै विधिना] देवि योगिन्यः [कः न्य] पश्यते ध्रुवम्

।

आदिष्टस्ताभ्यतः कुर्यात् सिद्धि यागन्तु साधकः ॥ २९३ ॥

तं कृत्वा सिद्धयते मन्त्री सम्प्रदायं च विन्दति ।

२५२अ क्) खेचरत्वं भवेत् तस्य वीरा [कः वीना] भवति सास्वतः ॥ २९४ ॥

योगिनी हृदयेल्लिनः समयी वर्तते यदा ।

क्षुद्रसिद्धिं [कः -सिद्धि] यदा कुर्याद् [कः कुर्या] भोगार्थी [कः भागार्था] साधकोत्तमः ॥ २९५ ॥

अयं विधिस्तदा कुर्यात् कथयामि न संशयः ।

पूर्वोक्तेन [कः -क्तन] विधानेन श्नात्वा [कः श्रात्वा] देव गृहं

ययुः ॥ २९६ ॥

कृत न्यासः [क: न्यास] प्रविस्याथ गुर्वादीम्पूज्यतः [क: -त] क्रमात् ।

क्षोभन्तु प्रथमं [क: प्रथम] कृत्वा आशनन्यासवर्ज्जितम् [क: आसन-] ॥ २९७ ॥

द्रव्यं गृह्य ततः प्रास्य तिलकं कारयेद् वुद्धः [क: वधः] ।

हृद्यागं पूर्ववत् [क: -व] न्यासं कृत्वा वै यागमाचरेत्॥ २९८ ॥

शिवकुम्भादिविधिना [क: -कुभादि-] तर्पनादि निवेदने ।

होमं चैव यथा शक्त्या ततो यागं [क: यामं] निवेशयेत्॥ २९९॥

अर्घन्दत्वा [क: अर्घदत्वा] तु कल्पोक्तं देवं विज्ञाप्य साधकः ।

संख्या गृह्य जपं [क: जप] कुर्यात् पृथक् भूतं न संशयः ॥
३०० ॥

प्रथमं क्षोभयित्वा तु पुनः शक्तिन्नक्षोभयेत् ।

पृथग्भूत्या [क: पृथक् -] जपं [क: जप] कुर्या भोगार्थी नात्र
संशयः ॥ ३०१ ॥

अनेनैव विधानेन यागं कृत्वा समार्पयेत् [क: समर्पयेत्] ।

२०१अ ख्) कल्पोक्तं [क: -क्त] नात्रसंदेहस्ततो होम समर्पयेत् ॥ ३०२ ॥

अनेन क्रमयोगेन राज्यसौभाग्यमेव च ।

अर्थांश्च [क: अर्थाश्च] विविधाश्चैव [क: विविधा चैव] मन्त्री
सर्वान वाप्नुयात् ॥ ३०३ ॥

भोगार्थसाधको मुत्का च ग्रहं सिद्धिकांक्षिणम् [क: -
काक्षिणां] ।

सिद्धिहेतु ततो गृह्य ततः सिद्धि मवाप्नुयात् ॥ ३०४ ॥

वश्याकर्षणपिण्डाङ्कं [क: -पिण्डाकं] निजसैन्यस्य रक्षणम्
[क: लक्षणम्] ।

यदा कुर्या तदा मन्त्री विधानमिदमाचरेत् ॥ ३०५ ॥

स्नानं पूर्वोक्ततन्न्यासा देवागारं ततो विशेत् ।

गुर्वाद्यर्च्चनकं कृत्वा दिग्वासा साधकोत्तमः ॥ ३०६ ॥

दक्षिणाभिमुखो भूत्वा स्थाप्य शक्तिन् ततोर्द्धकम् ।

२५२ब् क्) पीठन्यासं तथा कृत्वा पुष्पाद्यादीनिदापयेत् ॥ ३०७ ॥

अस्तृतवासनं दत्वा शक्तिं वै संविसापयेत् ।

नासनाच्चालये छक्तिं यावद् यागन्तु पूर्वकम्॥ ३०८ ॥

कलसादिसमोपेतं तर्पणान्तं [क: तर्पनांतं] न संशयः ।

यागं [क: याग] कृत्वा तु तन् देवि साधकेन तु मण्डले ॥ ३०९ ॥

देवि विज्ञाप्यतां [क: -ता] मन्त्री [क: मन्त्रीं] ततो क्षोभं
समारभेत् ।

प्रासयित्वा तु तन् द्रव्यं स्पष्ट्वा यागं पुनर्यजेत्॥ ३१० ॥

नवेद्यानि [क: नवैद्यानि] ततो दद्या अग्नि कार्य समारभेत् ।

नासनाच्चालये छक्तिमग्निकार्यं [क: -कार्य] यथेप्सया ॥ ३११ ॥

कृत्वा देवाय संकल्प्या [क: संकल्पा] यागं चैव वरानने ।

संख्या गृह्याक्षसूत्रस्य शक्तिं गंधा ततोर्च्चयत् ॥ ३१२ ॥

पीठे प्रवेशयेल्लिगं निषिचालनमारभेत् ।

अनेन क्रमयोगेन [क: -यागेन] संक्षागृह्य ततोह्विके ॥ ३१३ ॥

कल्पोक्तं पूरयित्वा तु यागं पूर्वसमर्पयेत् ।

ईषिच्चालनकं कृत्वा अग्निकार्यं यथोदितम् [क: यथा-] ॥ ३१४ ॥

कृत्वा देवस्य वार्घात यागपूर्वन् न संशयः ।

ह्रीं शक्ति संपुटं मन्त्रं नुत्यन्तं [क: नुत्पक्तं] प्रणवादिकम्

॥ ३१५ ॥

जपेत् स्वाहान्तसंयुक्तं अग्निकार्यन्न संशयः [क: अग्निकार्य-] ।

पूर्वमेव विधिं [क: विधि] कृत्वा ततः कर्मसमारभेत्॥ ३१६॥

समर्पयित्वा कल्पोक्तं [क: कल्पोक्त] वस्यार्थसंप्रयोजयेत् ।

स्वयाग न्यासमास्थाय मन्त्रन्यासं यथोदितम्॥ ३१७॥

देहे कृत्वा वहिन्यासं वहिन्यासं ततो यागं वहिर्यजेत् [क: वहियजेत्]
।

स्वबीजपुटितं [क: -त] मन्त्री यन्त्रोक्तं नात्र संशयः॥ ३१८॥

वस्याकर्षणपिण्डाङ्के शक्तिक्षोभन्तु पूर्ववत् ।

यागपूर्वन्तु यन्त्राणां लिख्या कृति पुटादिकाः [क: -की]॥ ३१९॥

अथवा कृतयः कृत्वा स्वयन्त्रादितमृतिका ।

मूध्नितो वहवः स्थाप्य दत्वा त्वं [कः त्व] धर्मरीरिकम्॥ ३२० ॥

२५३अ क्) [कः पीठे न्यासं तथा कृत्वा पुष्पाद्यादीनिदापयेत् ।

अस्तृतवासनं दत्वा शक्तिं वै सम्विसापयेत्।

नासनाच्चलये छक्तिं यावद्यागन्तु पूर्वकम्।

कलसादि समोपेतं तर्पनान्तं न संशयः।

यागं कृत्वा तु तन् देवि साधकेन तु मण्डले।

देवि विज्ञाप्यतां मन्त्री ततो क्षोभं समारभेत्।

प्रासयित्वा तु तन् द्रव्यं स्पृष्ट्वा यागं पुनयजेत्।

नैवेद्यानि ततो दद्या अग्निकार्य समारभेत्।

नाशनाच्चालये छक्तिमग्निकार्य यथेप्सया।

कृत्वा देवाय संकल्प्या यागं चैव चरानने।

संख्या गृह्याक्षसूत्रस्य शक्तिं गंधा ततोर्च्चयेत्।

पीठे प्रवेशयेल्लिंगं निषिचालन मारभेत्।

अनेन क्रमयोगेन संक्षा गृह्य ततोह्विके।

कल्पोक्तं पूरयित्वा तु यागं पूर्वसमर्पयेत्।

ईषिचालनकं कृत्वा अग्निकार्यं यथोदितम्।

कृत्वा देवस्य वार्घीत यागपूर्वन्न संशयः।

ह्रीं शक्ति संपुटं मन्त्रं नुत्पन्तं प्रणवादितम्।

देहे कृत्वा वहिन्यासं ततो यागं वहिर्यजेत्।

स्वबीजं पूटितं मन्त्री यन्त्रोक्तं नात्रसंशयः।

वस्याकर्षणपिण्डाङ्के शक्तिक्षोभन् तु पूर्ववत्।

यागपूर्वन्तु यन्त्राणां लिख्या कृति पुटादिकाम्।

अथवा कृतयः कृत्वा स्वयन्त्रादित मृतिका।

मूद्धिर्नतो वहवः स्थाप्य दत्वात्वं धर्मरीरिकम्।]

यन्त्र यागन्ततः कृत्वा लेखं तत्रैव [क: तन्त्रैव] लेखयेत् [क: -यत्] ।

स्वयन्त्रोक्तङ्कृतिं गृह्य विधानं तत्र कारयेत्॥ ३२१॥

२०१ब् ख्) सिद्धयन्त्रे ततो देवि हृद्यलेख्य समुद्धरेत् ।

ततश्चान्य सुमन्त्रेषु उपयोगन्तु [क: -यागन्तु] कारयेत्॥ ३२२॥

वश्याकर्षणपिण्डाङ्के निजसैन्यस्य [क: -सैन्य *] रक्षणे ।

२५३ब् क्) यागं कृत्वा सहस्रस्य यन्त्रोक्तत्रिजपस्य तु॥ ३२३॥

निवेदयीत [क: -ते] देवाय यन्त्रास्यैव प्रसिद्धये ।

होमस्याष्टसहस्रं तु स्वयन्त्रोकुस्य कारयेत्॥ ३२४॥

द्रव्यस्यामिश्रृतं फल्गुं यथा लाभं न संशयः ।

निवेदयित्वा ततो होमंस्ततो यन्त्राणि कारयेत्॥ ३२५॥

यागं चैव महाप्राज्ञः सिध्यते नात्र संशयः ।

पूर्वक्रमेण वैविष्य [क: चै-] स्वयागोक्तं समाचरेत्॥ ३२६॥

हृद्यागञ्च तथा न्यासं [क: न्या *] सदा चैव विधानवित् ।

तत्रोपरि वहिन्र्यासं [क: वहिन्यासं] लकारपुटितन्तथा॥ ३२७॥

हृद्वर्जितं न्यसेत् [क: न्यसत्] मन्त्री कर्मकल्पोक्त सिद्धयो ।

स्वयागे [क: -योगे] नैव कर्त्तव्यं स्तम्भनं सुभयोरपि [क:
सुद्धयोरपि]॥ ३२८॥

ऊर्द्धशक्तिस्तत कृत्वा पीठं सन्माज्य चैव हि ।

न्यासं कृत्वा यथा न्यायं असनं परिकल्पयेत्॥ ३२९॥

भुम्यान्तत्रोपविस्याशु पुनर्न्यासं [कः पुन-] तथैव च ।

पीठं [कः पीठ] कृत्वा तु पुष्पैश्च ततो विन्यस्य ते [कः त] वुधः ॥ ३३० ॥

लिङ्गं [कः लिंग] प्रवेशयित्वा तु ईषिचालनमारभेत् [कः इषिचालनमाचरेत्] ।

उपविष्टा तु तां शक्तिं कृत्वा चैवात्मनोवुधः ॥ ३३१ ॥

अधोमुखी ततः कृत्वा पशुवत् साधकोत्तमः ।

लिङ्गं प्रवेशयित्वा तु ततो क्षोभं समारभेत् ॥ ३३२ ॥

प्रासयित्वा तु तं [कः त] द्रव्यं अर्घपात्रं तु पूजयेत् ।

कलसादि तथा यागं लकारपुटितं यजेत् ॥ ३३३ ॥

अग्न्यागारे [कः -गार] तथा कृत्वा नैवेद्यादि प्रकल्पयेत् ।

पुनस्ते नैव विधिना संख्या गृह्य तु साधकः ॥ ३३४ ॥

पृथग्भूतं जपं कुर्याल्लकारपुटितं तथा ।

नुत्पन्तं प्रणवाद्यं च नक्तभोजी न संशयः ॥ ३३५ ॥

यागपूर्वं समर्पीतहोमं [कः समर्यातहोमं] चैव यथोदितम्
[कः यथा-] ।

स्तम्भयन्त्राणि सर्वाणि सिध्यते नात्र संशयः ॥ ३३६ ॥

अनेनैव विधानेन यागं कृत्वा यथोदितम् ।

२५४अ क्) होमस्याष्टसहस्रंस्याज्जपस्य च निवेदयेत्॥ ३३७॥

ततो यन्त्राणि सिध्यन्ते स्तम्भना शनिस्तम्भनम् [कः शक्ति स्तम्भनम्] ।

परसैन्य [कः -सन्यै] तथा दर्शे जलस्यै च न संशयः॥ ३३८॥

पूर्वोक्तविधिना स्नातो प्रविशेद् देव वेश्मनि ।

स्वयागमार्गमास्थाय शक्तिचोर्द्धाग्र [कः -वोर्धोग्र] संस्थिताम्॥ ३३९॥

कृत्वा न्यासे तु पीठे तु सरेफेन [कः -फन] निलेन तु ।

२०२अ ख्) सविसर्गेन पुटितं स्वयागं तत्र विन्यसेत्॥ ३४०॥

त्रासयित्वा तु तं शक्तिमुपविश्वापयेत् [कः शक्तिं-] ततः ।

आसना वामपार्श्वे तु वहिन्यासं स्वदेहकम्॥ ३४१॥

ते [क: त] नैव पुटितं सर्वं सहदूत्या न संशयः ।

भूम्यान् तथासनं कृत्वा पुटितं संविमापयेत्॥ ३४२॥

शक्तिक्षोभ्यं [क: -भं] ततोत्थाय द्रव्यं प्रास्यन [क: -नं]
संशयः ।

अर्घपात्रादिकं [क: -क] सर्वं यागं कृत्वा चरेत् पुटम्॥ ३४३॥

ते नैवक्रमयोगेन [क: -क्र * यागेन] तत् पुटं जपमारभेत् ।

होमं चैव न संदेहः सन्मिश्रे ततः फाल्गुवम्॥ ३४४॥

स्वकुण्डं चैव कर्त्तव्यं नात्र कार्यविचारणात् ।

समर्पयेत देवाय जपहोमं च साधकः ॥ ३४५ ॥

समर्पिते तु कल्पोक्ते विधिश्चापं प्रयोजयेत् [क: -याजयेत्] ।

अनेनैव विधानेन यन्त्रयागं यजेद्बुधः ॥ ३४६ ॥


सिद्धविद्याधरीभिस्तु यक्षगन्धर्व योषिभिः [ग: योपिभिः?] ॥

५६ ॥

क्रीडतेष्वथमंत्रज्ञो मानुषीष्वथ काकथा ।

वल्लभः सर्वसत्वानां देवासुरमहोरगाः [ग: -गाम्] ॥ ५७ ॥

षड्भागहारी मंत्रज्ञ [ग: -ज्ञः] सुभगः प्रियदर्शनः।

कामदेव स्वयं साक्षासापानुग्रह [ग: साक्षा *?-]

कृद्भवेत्॥ ५८॥

इति पिचुमते अञ्जनयोगे षट्षष्ठिमः पटलः

भैरव उवाच

अतः परं प्रवक्ष्यामि गर्ता भैरवमुत्तमम्।

महोदधिगुणोपेतं शक्तियागैक तत्परे॥ १॥

चरुमार्गरतन्देवि न चान्येयां प्रकीर्तितम्।

विधानमंत्र संयुक्तं देवि नामसमन्वितम्॥ २॥

प्रवक्ष्यामि यथावस्थं तमेकाग्रमना [ग: -नाः] शृणु ।

चोल्लासोल्ला तथा रंभा महामुख्या चतुर्थिका ॥ ३ ॥

पञ्चमं भैरवं मध्ये महोदधि गुणान्वितम् ।

मतित्वे आर्तिना शित्वे भोगमोक्ष प्रसाधने ॥ ४ ॥

२६६ब् ख्) गर्तायागमिदन्देवि यत् सुरैरपिदुर्लभः [ग: -भम्] ।

अस्यमंत्रस्य यद्वीर्यमतुलं परिकीर्तितम् ॥ ५ ॥

यागं शक्तिगतं याज्यमुच्छुष्म पदसंभवम् ।

साधकेन महेशानि सर्वज्ञानार्थ संयुतः [ग: -तम्] ॥ ६ ॥

न च हीनतनुश्चात्र यागे कर्मारुहो [ग: कर्मारुहो?] भवेत् ।

योग्यश्च सर्वलक्षज्ञो निराचार कृतास्पदः ॥ ७ ॥

वेधघट्टविधानज्ञ शक्तिक्षोभविदः सदाः [ग: सदा] ।

सर्वज्ञान क्रिया चारी स्वगुणालङ्कृतः शुभः ॥ ८ ॥

कृमिक्लेदादि [ग: कृमिक्लेदादि?] सूत्रज्ञ स्त्रिषष्टि
कुसुमाष्पदः [ग: कुसुमारपदः] ।

सारङ्गचक्र सञ्चारी प्रक्रियाजानवित्तमः ॥ ९ ॥

लक्षमार्गविधानज्ञो गर्तायागं [ग: गर्भा-] समारभेत् ।

निष्प्रपञ्चक [ग: निष्प्रपञ्चैक] भूयिष्टोलज्जा?हीनो [ग: *
ष्ठोलज्जाहीनो?] विमत्सरी ॥ १० ॥

विनीतो निपुनोद्धारोयोगमेतत् [ग: निपुणो-] समाचरेत् ।

कमलाख्यश्च रक्ता च ततोधोस्या ककारकम् ॥ ११ ॥

पञ्चमाद्यधयोगेन [ग: -द्य?ध-] अधोस्यैरोचनाक्षरम् ।

वायुबीजं ततोन्यस्य भद्रयुक्तं खशेखरम् ॥ १२ ॥

२६९ब् ग्] खन्नादशक्तिपर्यन्तं शिवं वै सप्तमंत्रकम् ।

अक्षरन्तु महादेवि गतार्भैरव पिण्डकः [ग: -कम्] ॥ १३ ॥

एतत् ते परमन् देवि भैरवं परिकीर्तितः [ग: -तम्] ।

महामृतसमुत्थाने सिद्धिरत्नगुणोज्ज्वलम् ॥ १४ ॥

गर्तासाधन सिद्धौ तु नोक्तं सम्यग्मया [ग: सम्यङ्मया]

क्वचित्।

तवाद्य कथितन्देवि सरहस्यं महात्मने ॥ १२ ॥

आदिवर्गा तु यत्षष्ठं खयुतं श्वेतवर्णकम्।

दीर्घह्रवाङ्गवक्त्रैस्तु चोल्लायालक्षणं स्मृतम्॥ १३ ॥

पूर्वतोनादि संपातः स्वोदयेन विलक्षितम्।

संक्षोभ्य पूजयेद् देवि शुक्रवाहा [ग: -ह्य] महासिता ॥ १४ ॥

आद्याद्ये बिन्दुयुक्तन्तु मोल्लादक्षे सुरक्तिका।

सा चेश्वरे पदे देवि संस्थारक्तावहा शुभा ॥ १५ ॥

स्वनाडिका समूहेन संप्लुतासोदयात्मिका ।

पश्चिमे मेदगा पीतवर्णा [ग: -वर्णाद्] देवी तु सिद्धिदा ॥ १६ ॥

रंभा स्वोदयविन्यस्ता [ग: -स्ताः] स्ववक्राङ्ग समन्विता [ग: -ताः] ।

तथा च वज्रवर्णस्था रंभा चैवेक्षविंशगा ॥ १७ ॥

वक्रनेत्राङ्ग विन्यस्ता महामुख्याति कृष्णिका ।

उत्तरेमेदहारी तस्वनाडयोदयपूजि?ता [ग: -तां] ॥ १८ ॥

पिण्डमन्त्र महादेवि स्नेहयुक्तन्तु भैरवम् ।

ंस् ख: पगे नो । २६७ अन्द् २६८ इस् मिस्सिन्ग्

सर्वं नाड्योदयाधारं सर्वामृतमयंशिवम्॥ १९॥

पञ्चामृतमये तस्मिन्गर्ते सर्वज्ञसिद्धिदे।

यजं देवं महारौद्रं महाप्रेत कृतासनम्॥ २०॥

शिवं सदा सिवेशानं विष्णुब्रह्माण संथया।

चोल्लामोल्ला महामुक्या रंभाध्व तनुसंस्थया॥ २१॥

यागे पूर्वादि विन्यस्ता यष्टव्यास्तु वरानने।

महामुख्या वसानास्तु देव्यो भैरव पञ्चमाः॥ २२॥

एवं वामाध्व भागास्तु यो विजानाति तत्त्वतः।

स सिध्यति न सन्देहो अभाग्योपि हि साधकः॥ २३॥

मण्डले च क्रियायुक्ता मुद्रामंत्रसमन्विता ।

साधकाय ददत्येतावाचा सिद्धादिसिद्धयः ॥ २४ ॥

पञ्चदेवत संयुक्तं देवि चैव तन्चराचरम् ।

अमृतोमृतरूपस्तु चिदचित्वेपि भैरवि ॥ २५ ॥

एतज्ज्ञानस्य सद्भावं नदेयं यस्य कस्यचित् ।

योगिनी वीरभक्तस्य तत्क्रियाचार वर्तिनः ॥ २६ ॥

साधकस्या प्रमत्तस्य यागकर्ममतोच्यते ।

शुभे स्थाने मनोद्येत भूगृहेथगृहेथवा ॥ २७ ॥

कौलिको कु?विधानेन शक्तिपीठं विशोधयेत्।

उभयोर्भूत विन्यासं स्वाङ्गुष्ठादि समन्वितम्॥ २८॥

२७०अ गु) भैरवादि ततो न्यासं महामुक्यान्त योजितम्।

अङ्गन्यासं कनिष्ठानि नेत्रमंत्रं तलद्वये॥ २९॥

न्यस्त्वा ततः प्रकुर्वीत प्राणायामं विशुद्धये।

प्रत्यानीतेन्द्रिये भूत्वा ध्यात्वा धर्मिंविलक्षयेत्॥ ३०॥

प्राणयोगात् समीकृत्यः प्रशुद्धयनिलरेचनम्।

कृत्वा पूर्वं निरुश्धीतसितरक्तं द्विधा स्मृतम्॥ ३१॥

अशुद्ध रेचनं कृष्णं वरावर्णमथापिवा।

ततोग्निदीपनं कृत्वाप्लुतान्ते युगवद्यथा ॥ ३२ ॥

निर्दग्ध तन्मलाशेषं भस्मीभूतं विरेचयेत् ।

सिरीय पुष्पसङ्काशं षड्विन्दुक परिष्कृतम् ॥ ३३ ॥

ध्यात्वा नीत्वार्द्ध रन्ध्रान्तं स चैतन्यं महानिलम् ।

लयङ्कृत्वा परेतत्त्वे पञ्चामृतमयेशिवे ॥ ३४ ॥

समाधि विनियुकात्मा सृजतेस्मा मृतामृता ।

शक्ति तस्थं स्वचैतन्यं पञ्चामृत समन्वितम् ॥ ३५ ॥

विमलं रुचिराद्यन्तु मुर्तिङ्कृत्वा नवात्मना ।

कलावयव संपुर्णा सर्वाध्व कृत रूपिणी ॥ ३६ ॥

विद्यादेहं ततो रुद्रे गर्भाभैरव पूर्वकम् ।

सवाह्याभ्यन्तरं कुर्योच्छिरोवक्त्रे हृदेत्रिके ॥ ३७ ॥

पदान्तं स्वाङ्गवक्त्रान्तं हृदाद्यैश्च समालभेत् ।

अन्तः करणकेन्परपरवासनं हृद्गुहाश्वये ॥ ३८ ॥

असिताङ्गादि यत्प्रोक्तं प्रेतमूर्ति समन्वितम् ।

विद्यादेहं तथा कृत्वा समावाह्य परं विभुम् ॥ ३९ ॥

अशेषाध्व मयेगर्भे व्यापकं प्रभुव्ययम् ।

सर्वदिस्थं महातेजं स्मृत्वाङ्गानि विकल्पयेत् ॥ ४० ॥

कृत्वैवन्तु ततो वाह्यादिग्वन्धानन्तरं पुनः ।

अर्घपात्रं न्यसेस्यन्तं तदासन विवर्जितं ॥ ४१ ॥

शक्रि केवलमाधारं चलं पात्रं स्थिरं शिवम् ।

सप्रोक्ष्यास्त्रेण तत् यानं क्षेत्रमात्र विरेचितम् ॥ ४२ ॥

शक्तिमूर्तिगतं दासं दृत्वाक्षोभं समाचरेत् ।

सारङ्ग चक्रयोगेन नवग्रन्थिगतं प्रिये ॥ ४३ ॥

सप्तामृतन्तु विक्षोभाज्जयाद्यं वीरवन्दिते ।

मनोन्मनी समारभ्य ज्ञानशक्ती च सप्तमी ॥ ४४ ॥

ससित्थक तथा हिङ्गु रक्तमांस त्वचा तथ्य।

मेद स्नेहेन सर्वत्र परोत्थेन तु भावितम्॥ ४५॥

खकाल गतियोगेन कराल्यान्तेन वर्जितम्।

च्युतंश्चिवात् प्रधानाव्जां? न्यग्रे संव्यवस्थितम्॥ ४६॥

संपूर्याख्यं विधा वैवं तत्संवमं विनिक्षिपेत्।

लिङ्गभेदानुसाररथं लोलीभूतं समाहरेत्॥ ४७॥

२७०ब् ग्) अर्घपात्रे विनिक्षिप्य गर्भे पूजा समारभेत्।

समुद्धृत्य तथा द्यञ्च शक्त्याधारयजेन्मुरवम्॥ ४८॥

आद्यमध्ये यजेद् देवं मध्याङ्कुरगतं प्रभुम्।

मह्येदधि गुणाधारं वीजवत्यां व्यवस्थितम्॥ ४९॥

वामपार्श्वे न्यसेज्वो?ल्लामोल्ला चाधोद्वयान्तरे।

रंभा तु दक्षिणे पार्श्वे दूर्ध्वस्थां महामुखी॥ ५०॥

वक्त्रनेत्राङ्ग विन्यस्ता स्ववर्णकृतरूपिका।

यजेत् पुष्पैस्तथा वर्णैरथवा श्वेतवर्णकैः॥ ५१॥

रक्तैर्वा साधनार्थाय तद्वर्णैस्ताः प्रपूजयेत्।

धूपं दीपं सनैवेद्यं पानासव सफल्गुषैः॥ ५२॥

सन्तर्प देवता मंत्री भैरवेश समन्विता।

स्वलिङ्गेपि तथा ध्यात्वा मध्यञ्छिद्रगतंशिवम्॥ ५३॥

वामाधो दक्षमूर्ध्वस्था देव्यो जीवकृतास्यदा।

सन्निवेश्य यजित्वा तु शक्तिगर्ते निवेशयेत्॥ ५४॥

त्रिषष्टिभेदनं कृत्वास्तुवं सर्वत्र संस्थितम्।

परामृतं स्मरित्वा तु जपयोगं समाचरेत्॥ ५५॥

एवं यागं सदाकालं गर्तायान्तु यजेन्मनि।

सिद्धयतेनात्र सन्देहः परमार्गगतात्मवान्॥ ५६॥

होमं चात्र प्रकुर्वीत तद्द्रव्य कृतमङ्गलम्।

मुद्रावन्धञ्च कर्तव्यं योनिमुद्रा पुरः सरम्॥ ५७॥

उत्तान वामहस्ते तु कन्यसोर्द्धमुखी कृता।

त्रयस्तु संवृता कुर्यात् प्रसृतास्तु वरानने ॥ ५८ ॥

अधः स्थिता तु दक्षस्य कन्यसी तु त्रयस्तथा।

वामानान्तु परिन्यस्ता समङ्गुष्ठौरधोमुखौ ॥ ५९ ॥

कन्या सा मध्यरन्ध्रे तु योनिमुद्रां प्रदर्शयेत्।

पञ्चानामपि देवेशि कथिता त्वमृतात्मिका ॥ ६० ॥

खट्वाङ्गञ्च कपालञ्च भैरवस्य प्रयोजयेत्।

देवीनां सुरभी पद्ममाला चापि कपालकम् ॥ ६१ ॥

दत्वार्घं परयाधृत्या सर्वकल्याण संपदः।

प्राप्नुयात् साधको देवि जगत् परिमन् महात्मने ॥ ६२ ॥

तेजस्वीवल संपन्नो न क्वचित् प्रविहन्यते।

इडयान्तर्गतं ध्यायेच्छान्तिपुष्टि प्रवर्तकम् ॥ ६३ ॥

वश्याकर्षणं सौम्यं सुषुम्णा चाभिचारुके।

विद्वेषोच्चाटनानाञ्च पङ्गलस्थेन साधयेत् ॥ ६४ ॥

एक एव परस्तेजस्त्रि स्वभावो वरानने।

यथा सर्व तथासोपि स्थानयोगाद्वरानने ॥ ६५ ॥

जपेयोगे च सुश्रोणि यथा भीष्टं तथाश्रयम्।

कृत्वा समभ्यसेच्चक्रं गर्ता भैरवजं प्रिये ॥ ६६ ॥

अथवास्थण्डिले कृत्वाशक्ति स्याद् दक्षिणा शिराः ।

२७१अ गृ) पूर्ववत् कृतन्यासस्तु साधको वीरसाधने ॥ ६७ ॥

शक्तिगर्ते क्षिपेल्लिङ्गं ततः पूजां समारभेत् ।

गतिरा रातियोगेन शक्तिविक्षोभ तत्परः ॥ ६८ ॥

दिव्यपुष्पाधि वासाश्च तद्द्रव्यकृतमानसाः ।

तन्मलेन विशिद्धश्च देवीनाश्च विलेपनम् ॥ ६९ ॥

होमभक्षे च माल्ये च धूपे चैव विशेषतः ।

तद्द्रव्य कृतसंभारः शक्तियोगैक तत्परः ॥ ७० ॥

होमार्चन विधौ कुर्यात् क्ष्मापलेन समन्वितम् ।

जलमग वलयुक्तं महातैलसमन्वितम् ॥ ७१ ॥

होमं भक्षवलिन्देवि कर्तव्यं विश्रितात्मना ।

एवं विधानयुक्तस्य सिद्धिराशु प्रवर्तते ॥ ७२ ॥

क्ष्मापलंसेक संयुक्तं अङ्गद्वय समन्वितम् ।

क्रव्यादविट् समायुक्तं गुग्गुलेन समन्वितम् ॥ ७३ ॥

धूपयेत् प्रतिमातेन आत्मानं मंत्र विग्रहम् ।

तत्क्षणात् सर्वसत्वेभ्यो वशीकरणमुत्तमाम् ॥ ७४ ॥

तेजवीजं समादाय साध्यस्य पद पांसुकम्।

महापलेन संयुक्तं रोचनाया समायुतम्॥ ७५॥

पञ्चाङ्गमलसंयुक्तं देवीनामग्रतः स्थितः।

कर्तव्यं साधकेन्द्रेण वामाचारेण साधुना॥ ७६॥

सर्वावस्थेन चेतेन गतायाग कृतेन तु।

दापयेद् भक्षणं श्रेष्ठंमाल्यलेपञ्च चोत्तमम्॥ ७७॥

आत्मवीजं समादाय साध्यस्य पदपांसुकम्।

महापल समायुक्तं रोचनाया समन्वितम्॥ ७८॥

तत्क्षणाद्वशमायाति गर्ताभैरव योजनात्।

क्षमापलं हिङ्गुसंयुक्तं आदिकापलमेव च॥ ७९॥

शिशिरेण समायुक्तं गुग्गुलेन समन्वितम्।

आत्मशुक्र समायुक्तं धूपं सान्निध्य कारकम्॥ ८०॥

धूपयेत् प्रतिमानेन आत्मानं मंत्रविग्रहम्।

तस्य सिध्यन्ति वै देव्यस्तुन्वन्ति च मरुद्गणा॥ ८१॥

किं पुनर्मानुषास्तस्य ई हितार्थं प्रदायकाः।

राजिकाल वनञ्चैव आत्मशुक्रं तथैव च॥ ८२॥

साध्य धूलि समायुक्तं निशिहोमन्तु कारयेत्।

साध्यन्तु मनसि कृत्वा होमयेत् साधकोत्तमः ॥ ८३ ॥

सो वश्यं वशमायाति योपिहन्तु समुद्यतः ।

निर्वाणभस्मनातेन गुग्गुलेन समन्वितम् ॥ ८४ ॥

आत्मशुक्र समायुक्तं मधुना च समीकृतम् ।

यस्य तं दापयेन् मंत्री तत्क्षणाद्वशकारकम् ॥ ८५ ॥

भावा विनिर्मुक्तः करणाद्वारसंयमः ।

२७१ब् ग्) सर्वावस्थ कृतात्मानः सोमाङ्गतनुभावितः ॥ ८६ ॥

निष्प्रपञ्चैक चित्तस्तु सर्वलक्षण वर्जितः ।

गुणत्रय विनिर्मुक्तः सिद्धिराश्च प्रवर्तते ॥ ८७ ॥

पञ्चपञ्चव निर्मुक्तः पञ्चकारण वर्जितः ।

आत्मशुन्य पदावस्थः शरीरे वीरवन्दिते ॥ ८८ ॥

अन्तमध्यादिव्योमात्मा शून्योकानि इहोच्यते ।

नाडी पञ्चाशशाम्येन नवग्रन्थिगतेन च ॥ ८९ ॥

सिवेक्ष?व्योम भावेन आत्माशुन्यं विलक्षयेत् ।

कुक्कुटस्य पलंगृह्य साध्यस्य पदपांसुकम् ॥ ९० ॥

श्मशान भस्मसंयुक्तं सारस्यण्ड? समायुतम् ।

काकपक्ष विषाक्तस्तु धूपं विद्वेषकारणम् ॥ ९१ ॥

होमकर्मञ्च ते नैव अर्धरात्रे तु कारयेत्।

स्वमंत्राश्रय संयुक्तं मुद्राभावसमन्वितम्॥ ९२॥

लक्षणे?च्चाटयेत् साध्य पन्त्र पत्रमनुस्मरेत्।

आत्मशून्यमनः शून्यं कण्ठशून्यं तृतीयकम्॥ ९३॥

ंस् ख् मिस्सिन्ग् उम्नो हेरे

२६९अ ख्) नादशुन्यात्मकं कृत्वाकोनमुच्यति [ग: -मुच्येत]
बन्धनात्।

प्राकृतेन्द्रिय शून्यस्तु आत्मशून्यं सदैकता॥ ९४॥

मत्तेन्द्रिय समानत्वं ध्यानधारणसंयुतम्।

नवाह्ये वृत्तिमावर्ते एवन्तच्छुन्य उच्यते ॥ ९५ ॥

मनोनिवर्तनं ध्यातः शक्तौलयं यदागतम् ।

तत्त्व धर्म विशून्यचातेजो [ग: -न्तान्तेजो] वै कल्पताङ्गतम् ॥ ९६ ॥

कण्ठशून्यन्तु यत्प्राणं नाडीसुखसमागमम् ।

नाड्यन्ते तेन संख्यातं गमागमविवर्जितम् ॥ ९७ ॥

स्फोटा प्रभृति नादोत्थं यद्रूपं प्रतिभाषते ।

सन्त्यज्यतं विभागस्थं अविभक्तेलयं गतम् ॥ ९८ ॥

यदा तदा तु तन्नादं शून्यं लोकेप्रतीयते ।

नाडी नादगतस्त्वात्मा प्राकृतं गृह्य चेतनम् ॥ ९९ ॥

शक्तिस्थाना [ग: -नं] निराभाषं शून्यं कृत्वा विमुच्यते ।

तत् पञ्चगं शिवशून्यं [ग: शिवं-] स्मृत [ग: -तं] निर्वाण
दापयेत् ॥ १०० ॥

एवं लक्षविभागेन प्रयोगेन च सुव्रते ।

युक्तो प्रसिद्धिमायाति गर्तायागो वरानने ॥ १०१ ॥

प्राप्तेस्मिन्निति मंतव्यं प्रसन्ना?त्मे गभस्तयः ।

इति पिचुमते गर्तायागे सप्तषष्टिमः पटलः ॥

भैरव उवाच

अथात [ग: -तः] संप्रवक्ष्यामि सर्वसिद्धिप्रवर्तकम्।

येन युक्त [ग: युक्तः] महामंत्री [ग: मदा?-] वि *?रेतमहीतले

[ग: विच?रेत-] ॥ १ ॥

सर्वलक्षणसंयुक्तं स्मरणन्तु निबोधमे।

आदिमादिमनादिञ्च मध्यमध्यम मध्यमम्॥ २ ॥

अन्तमन्तमनन्तञ्च ज्ञात्वा मुच्यति बन्धनात्।

लक्षणं संप्रवक्ष्यामि शृणुष्ववरलोचने ॥ ३ ॥

२७२अ ग्) नीलसूत्र पुमान्वायुस्तंभ युक्तमध [ग: -धः]

क्रमात्।

ऊर्ध्वोर्ध्व चन्द्रविन्दुञ्च नादशक्तिशिवं पुनः ॥ ४ ॥

सर्वाध्वस्थ महादेवि समरणं परिकीर्तितम् ।

नवतत्त्वात्मक [ग: -कं] देवि वक्राङ्ग कृतलक्षणम् ॥ ५ ॥

एकवीरं महोच्छुष्मं सर्वयोगिप्रपूजितम् ।

आदि प्रकृति रूद्दिष्टा यकार [ग: -रं] परिकीर्तितम् ॥ ६ ॥

अनन्तावधि पर्यन्ता व्याप्तिस्तस्य प्रकीर्तिता ।

मादिः पुरुषमुद्दिष्टं अस्योर्ध्वन्तु वरानने ॥ ७ ॥

यकाराक्षरजं [ग: -रजंन्] देवि रागावेषा कृतास्पदाम् ।

अनादिनिधनन् देविमकाराक्षर संज्ञितम् ॥ ८ ॥

आत्मव्योम त्रिधाह्येतत् [ग: त्रिधोह्येतेत्?] कथितं वीरवन्दिते ।

मध्यं कालसितिप्रोक्तं नीलसूत्राक्षरालयम् ॥ ९ ॥

मध्यमे [ग: मध्यमञ्] च तथा माया अर्द्धचन्द्रस्थिता [ग:
-ताः] प्रिये ।

२६९ब् ख्) बिन्दुश्च मंध्यमं [ग: मध्यमं] प्रोक्तं
विद्यातत्त्व कृतादरम् ॥ १० ॥

एतत् तन्मध्यमं व्योमं त्रितत्त्व परिलक्षितम् ।

अन्तं चेश्वर [ख: चेश्वर?] तत्त्वन्तु ऋज्वाकाराति भास्वरम् ॥
११ ॥

नादतत्व विजानियाच्छक्तित्रय वपुष्मतम् ।

मन्त्रसंज्ञा [ग: मत्त-] स्थितं शक्तिनादोर्ध्व भुजगाकृति

[ग: -कृतिः] ॥ १२ ॥

तस्योर्ध्वन्तु मनं तस्या [ग: तस्याः] शक्त्यातीतं

मनोन्मनम् ।

तस्यनामं न विद्येत विज्ञेयं निष्कलं शिवम् ॥ १३ ॥

बिन्दुनादात्मकं ह्येतत् स्मरणं स्मरणात्मकः [ग: -कम्] ।

आलयं शक्ति सिद्धीनां देवी योगिनिमातराः [ग: -राम्] ॥ १४ ॥

नवतत्वेश्वरन्देवं सकलं निष्कलन्तथा ।

सर्वसिद्धिकरं ह्येतत् [ख: ह्ये *?] सर्वैश्वर्य प्रवर्तकम् ॥ १५ ॥

सर्ववाग्मय [ग: -वाङ्मय] देहस्थं सर्वविद्या

गुणाश्रयम्।

अद्वैतगुणभूयिष्ठं सर्वतत्वालयं शिवम्॥ १६॥

प्रक्रियाज्ञान संपन्नं निर्वाणपदभूषितम्।

प्रकृतिश्च ध्वजश्चैव पुमांचैवात्म [ग: पुमांश्चै-]

संभवम्। १७॥

हंसार्द्धचन्द्रबिन्दुन्तु विद्यातत्वं वरानने।

नादशक्ति समायुक्तं स्मरणन्तु शिवात्मकम्॥ १८॥

प्रकृतिस्तदधस्तान्तु [ग: प्रकृतिः-] ऊकारस्थादि योजितम्।

ध्वजात्म पद्मचन्द्रश्च विन्दुनादवलान्तिकम्॥ १९॥

तत्व त्यागविभागेन उच्चारं स्मरणात्मकम्।

शिवशक्तिस्तथा नादविन्दु चन्द्रमहाक्षरम्॥ २०॥

पुमाङ्कारतथा [गः -रस्तथा] रुद्रभोगोच्चारं कलामयम्।

ग्रन्थि तत्व कलाव्योमभागा कालोदयान्वितम्॥ २१॥

कथितं संप्रयोगन्तु [गः -गस्तु] भैरवं भूतिभोगदम्।

एवन्तु स्मरणं प्रोक्तमेतत् तु परमाक्षरम्॥ २२॥

२७२ब् ग्] वामदेवमयं साक्षा [गः साक्षाद्] वामाचार [गः -रः] प्रकीर्तितम्।

सर्वावस्थ गतस्याथ निर्लज्जी कृतविग्रहः॥ २३॥

सर्वसिद्धिमवाप्नोति स्मरण स्मरणादपि ।

ध्यानलक्षाक्षरैर्युक्तं मूर्तित्वे तु नवात्मकम् ॥ २४ ॥

न्यस्त्वा सर्वाङ्गतोदेवि ततोङ्गानिप्रकल्पयेत् ।

हृदयं [गः -ये] हृदयं न्यस्यशिरं शिरसिविन्यसेत् ॥ २५ ॥

शिखायान्तु शिखं न्यस्त्वा कवचं सर्वमात्रकम् ।

नेत्रं नेत्रगतं न्यस्य अस्त्रं हस्तद्वयेन्यसेत् ॥ २६ ॥

मुद्रामण्डल मन्त्रैस्तु नवात्मी कृतविग्रहम् ।

चिन्तयेद् भैरवं रूपं शिखा संभिन्नमूर्ध्वकम् ॥ २७ ॥

चतुर्वक्त्रन्तु देवेशं दंष्ट्रोत्कट भयानकः [ग: -कम्] ।

अष्टहस्तं महारौद्रं महाप्रेतकृतासनम्॥ २८ ॥

नावारूढं महाप्रेतं तत्रारूढन्तु भैरवम् ।

२७०अ ख्] एवं विन्यस्य देहे तु ततोर्चन समारभेत्॥ २९॥

मंत्रैराकृष्य पूज्यतः [ग: पूज्येत] मदिरा शृगुपहारकैः

[ग: सृगु-] ।

एवं यष्ट्वा विधानज्ञ [ग: -ज्ञः] स्वयमुत्पाद्य द्रव्यकैः

॥ ३० ॥

शक्तिक्षोभं पुराकृत्वायोगं [ग: - यागं] कृत्वा तु पुर्ववत्

।

रजस्वलाया रक्तेन गुग्गुलेन समीकृतम्॥ ३१॥

महापलेन तैलेन स्वशुक्रेनैव [ग: -णैव] संयुतम्।

धूपं दद्यात् तु देवस्य देवीनान्तु विशेषतः॥ ३२॥

देव्युवाच

उग्रधूपं समाख्यातं [ग: -ख्यतं] कुत्सितञ्च प्रभो
ममः [ग: मम]।

त्यक्त्वा पवित्रकं द्रव्यं लोकसिद्धं मखात्मकम् [ग:
मख्यत्मकम्]॥ ३३॥

त्रैयाचाराश्च देवेश सर्वागम प्रसंशिताः [ग:
प्रशांसिताः]।

दृष्ट्वा विलोमकर्मञ्च भ्रमोमे मनसोमहान्॥ ३४॥

मद्भूमा मोहितालोकः शास्त्राचारान्यथा स्थिताः।

किन्तेफलं श्वरस्त्रेठजगद्व्यामोहने [गः सुरश्रेठ-] कृते॥

३५॥

विशलं [खः ?] प्राकृतेयस्तु मार्गेविदोक्त लक्षणे।

तत्पवित्रं कथं प्रोक्तं मंत्रमार्गे महेश्वर॥ ३६॥

होमद्रव्यञ्च देवेश विरुद्धं परिकीर्तितम्।

कष्टमेतत् [गः -तन्] महादेव कथंप्रोक्तं जुगुप्सितम्॥ ३७॥

अहमुद्विग्न चित्तान्तु [गः चित्तास्तु] देवासुरनमस्कृतम्।

किं पुनर्मानुषाद्यन्तु [ग: -द्यस्तु] देवगन्धर्व किन्नराः [ग:
-रान्] ॥ ३८ ॥

त्रैयाचार समायुक्तातद्भावे [ग: -युक्तास्तद्भावे]
नानुरञ्जिता [ग: वानुरञ्जिताः] ।

कथयामि महादेव लोकानुग्रहकारणात् ॥ ३९ ॥

शुधाशुद्ध विवेकेन मतिर्मे भ्रामितामहाम् [ग: -तोमहान्] ।

द्रव्य तत्व विभागन्तु प्रसादाद् वक्तुमर्हसि ॥ ४० ॥

भैरव उवाच

साधु साधु महेशानि कथयामि महातपे ।

दृष्ट्वा तु विफलं सर्वं नैव सिध्यन्ति देवता [ग: -ताः] ॥ ४१

॥

२७३अ ग] द्वैतभावाभियुक्तानां अध्वानेन यतः फलम्।

न च सिद्धिफलन्तेषां जस्वाकोटिशतैरपि ॥ ४२ ॥

एतदर्थं महादेवै [ग: -देव] अद्वैतन्ते [ग: स?द्वै-] प्रभाषितम्
।

न च द्वैताभियुक्तानां त्रैयाचारे समंफलम्॥ ४३ ॥

न च मोहोमया देवि कृत्वा देतत्? [ग: चैतत्] प्रभाषितम्।

अनुग्रह निमित्तन्तु [ग: -त्तस्तु] यत्प्रोक्तं द्रव्यलक्षणम्॥ ४४ ॥

तत्वोत्पन्नं यतो [ग: यतो?] देवि पवित्रन्तु ततः स्मृतम्।

देव्युवाच

विफलं वेदमार्गन्तु [ग: -स्तु] त्वयोक्तं तत्कथं विभोः [ग:
विभो] ॥ ४५ ॥

समत्वे चैव द्रव्याणां प्राकृतन्तु कथोत्तरम् ।

मन्त्रानुष्ठान [ग: मन्त्रय-] योगञ्च समं पृष्टं यतः
पुराः [ग: प्रभो] ॥ ४६ ॥

वर्णोद्भवा शिलामंत्रा समन्ताद्यत् फलं वुभौ ।

नभवे [ग: -वेद्] वा कथन्देव [ग: -देव?] प्रसादाद् वक्तुमर्हसि
॥ ४७ ॥

भैरव उवाच

२७०ब् ख्) ज्ञानं रूपक्रियामूलं [ग: तु प्रक्रियामूलं]

तत्व धर्म व्यवस्थया ।

सर्वतत्वगतं ज्ञानं ज्ञेयं व्यक्तिकरं प्रिये ॥ ४८ ॥

नवाचैतन तत्वानां स्वतोवृत्ति प्रवर्तनम् ।

शिवाधिष्ठित तद्भृत्ता अनुदेह व्यवस्थिता ॥ ४९ ॥

विभापत्ति [ग: विभावन्ति] महाभागे शरीरे कथिता यथा ।

तस्थं शक्तिगणं रुद्रा [ग: रुद्राः] शिवानिन्दित शक्तयः ॥

५० ॥

सन्निधाना शरीरस्था तजष्टं [ग: तज्जुष्टं] च सुमुत्तमम्

[ग: सुमुत्त * म्] ।

ज्ञानशक्ति मयं देवि त्रिषष्टिसख [ग: -मस्य] साधितम्॥ ५१॥

अष्टत्रिंश मुतत्वोत्थं [ग: मु?तत्वोत्थं] कलाकाल
समन्वितम्।

पवित्रं परमं देवि यतोज्ञानात्मकं प्रिये॥ ५२॥

समत्वै [ग: -त्वैः] सर्वतत्वस्थं परसिद्धिकरन्ततः।

सेषं [ग: शेषं] जडभवेद् देवि क्षुद्रद्रव्यमचेतनम्॥ ५३॥

विभिन्न वासनावस्थं द्वैतभावं न सिद्धिदम्।

विविक्त वासनाया तु साधितं जडमप्यलम्॥ ५४॥

तत् पवित्रं महादेवि यस्तु तत् समतत्वगम्।

ज्ञानमुक्तं समत्वेन न तु द्रव्यं वरानने ॥ ५५ ॥

एवं मन्त्रगतं ज्ञानं तत्पवित्रं च मुत्तमम् ।

वेदमार्गेण यस्यास्ति समत्वेन तु दूषितम् ॥ ५६ ॥

न च तत्व विहीनानां भवेतात्वी विवेचनात् ।

तद्विना न फलं तात्वं तेन नाममता [ग: तः?समता] प्रिये

॥ ५७ ॥

फलंस्याद्वैत युक्तानां तेनाद्वैतप्रकाषितम् [ग: -सितम्] ।

प्रकृतन्तु यतो ज्ञानं विकल्पेव कुलं प्रिये ॥ ५८ ॥

दृष्टैक शरणं देवि न तु तत्व विवोधकम् ।

दृष्टेपि यदि सर्वात्मा शुद्धिर्दृष्टा तदा प्रिये ॥ ५९ ॥

दृष्टिद्रव्य शुचित्यन्तु न च युक्त्या तु तद्भवेत् ।

लोमलोहित मांसन्तु मज्जास्थि शशिमेव च ॥ ६० ॥

२७३ब् ग्) शरीरे दृश्यते देवि तत्सुचित्वं [ग: तच्छुचित्वं] कथं
भवेत् ।

विण्मूत्रशुक्ररक्तस्थं वशासिक्तंपि [ग: वसासिक्तं वि]
वर्द्धितम् ॥ ६१ ॥

अन्तस्थोष्ट [ग: अन्तःस्थोष्ट] तथा पूर्ण तत्पवित्र [ग: -त्रं]
कथं भवेत् ।

विप्रकृष्टस्तु सदाहार [ग: -रः] स्त्रमोगन्ध [ग: स्त्रजोगन्ध]
विलेपनम् [ग: विलेपितम्] ॥ ६२ ॥

पञ्चगव्यादि संपूत अशुचित्वं क्षणाद् व्रजेत्।

संपर्का शुचिद्रव्याणां वर्णानां स्थानयोजनात्॥ ६३॥

शुचित्वं दृष्टिरूपाणां नेष्टं स्यादूतिकादिकाम् [ग:
स्याद् दूति-]।

तस्माच्छुद्धि समाख्याता वासनैका तु तत्वगा॥ ६४॥

तनुतत्व विहीनानां वुद्धिर्भवति निर्मला।

भावामलत्वमाख्यातं वुद्धिजं तत्व दर्शनात्॥ ६५॥

अन्यथा शुद्धभावानां न शौचं सिद्धिवादिनाम्।

मृत्तिकाणां सहस्त्रेण गङ्गाद्यं भोभिघृष्यताम्॥ ६६॥

दृष्टभावामशुद्धि [ग: द्रष्ट- -शुद्धिः] स्यादृष्टा [ग:
स्याद् दृष्टा] पुंसां कदाचन ।

२७१अ खृ] प्राणायामजयो ध्यानं होमाद्यास्तु क्रियाहि या ॥
६७ ॥

तत्वा दृतात्व संपुर्णा न शुद्धा तु वरानने ।

जडयोगाद् विकल्पोयो [ग: -येस्] तत्व हिनस्तु सुव्रते ॥ ६८ ॥

सो हि बन्धकरप्रोक्ता सिद्धिमुक्तेन्न [ग: -क्तेन] कारणम् ।

कारणं भोगभागानां मति क्लेषा [ग: क्लेश] क्रियावताम् ॥
६९ ॥

न मोक्षकारणं दृष्टं मन्त्र सामान्यभाविना ।

वर्णरूप समानत्वेन समाः शिवसर्वराः [ग: -संवराः] ॥

७० ॥

यतोवाच्याधिकत्वेन [ग: च्यांधि-] दृष्टा तेजोत्तमः प्रिये ।

निष्कलङ्क क्रियाधार ज्ञानशक्त्यार्चि षान्विताः ॥ ७१ ॥

महत्फला [ग: -ल] मणिर्यद्वन्नाश्मतुल्यो वरानने ।

द्रव्यावधि विभेदेन स्वर्गदेव गतेन च ॥ ७२ ॥

विनाध्व ज्ञानयोगेन तेन ते निष्फला [ग: -लाः] स्मृताः ।

नैव सिध्यन्ति देवेशि यथात्वा [ग: -न्धा?] पथवर्जिताः ॥ ७३ ॥

विनाध्वानं तथा मत्रा [ग: मन्त्रा] प्रक्रियान्तद् ववैदिकाः

।

चिच्छक्तिः [ख: चि *?क्ति] संविहीनान्तु पृथग्वाच्यत्व सङ्गताः

॥ ७४ ॥

अन्यो वाच्याभिधानोन्य अन्य द्रव्यात्मसङ्ग्रहः ।

एवन्तु विफला दृष्टा नैव सिद्धयन्ति देवता [ग: -ता] ॥ ७५ ॥

द्वैतमार्ग विकल्पेन युक्तानत्वेन भोगिनः ।

परायन्ता महादेवि मायामल वशीकृता [ग: -ताः] ॥ ७६ ॥

यतो मायात्मका सृष्टिदेव [ग: सृष्टिर्-] यक्षश्वरेश्वराम् ।

तेन धत्वा प्रसीदन्ति कूटलग्नामृगा इव ॥ ७७ ॥

दद्दशुः केवलं भोगनिष्या वहरितं तथा ।

तत् साधनाया यत् कर्म तद्भावास्तु प्रपेदिरे ॥ ७८ ॥

बन्धनं दुःखपातञ्च न पश्यन्ति विमोहिताः ।

द्वैतत् [गः द्वैत] वासनया पृष्टासत्वैक कृतमानसः ॥ ७९ ॥

एवं विवत्वयं देवि द्वैतभावं सुदुःखदम् ।

मिथ्याशुद्ध विवेकेनमोहनं प्रक्रियात्मकम् ॥ ८० ॥

देव्युवाच

द्वैतभावं त्वयाप्येत तत्सिद्धान्ते प्रकीर्तितम् ।

मिश्रकञ्च तथान्यस्या [गः -न्यस्य] भोगमोक्षस्य कारणम् ॥

८१ ॥

२७४अ गु॰ भैरव उवाच

द्वैतमार्गस्तु यत् प्रोक्तो मिश्रोवा तत्व योजनात्।

प्रक्रियाज्ञान शुद्धानां कथं सिद्धिर्नजायते ॥ ८२ ॥

क्रिया वसुसमूहस्य सङ्ग्रा [गः सङ्ग्राः] किन्तु वरानने।

चिरकालात् प्रसिद्धिः श्याद् वै तेनापि प्रजायते ॥ ८३ ॥

समावधि न तेनोक्तं यतो ज्ञानाधिकन्तु तम् [गु॰ तत्]।

अद्वैत फलदन् तन्त [गः तत्र] मन्त्र तन्मयतात्मकम् ॥ ८४ ॥

मोक्षोसि चैक भावेन कथितं षण्मुखार्चिते।

२७१ब् ख्] द्वैतज्ञान विहीनत्वाद् वोधरूपो वरानने ॥ ८५ ॥

न च सिद्धिर्भवन्याशु यद्यपि व्रतपीडितः ।

देव्युवाच

यदाद्वैते भवेमोक्षो [गः भवेन्-] भोगो वा तत्व दर्शनात् ॥ ८६
॥

तत्किमर्थं विमिश्रन्तु द्वैतं वा मिश्रितं प्रभो ।

भैरव उवाच

सर्वानुग्राहकोयेन शंभुरुक्तोत्र शासने ॥ ८७ ॥

प्राकृता प्राकृता चैव शक्तिपाता [गः -तात्] तु या दृशम् ।

सत्वादि गुणवृत्तस्थां तादृक् शास्त्रप्रयोजनम्॥ ८८॥

द्वैतेपि चोक्तमद्वैतं तथामिश्रं वरानने।

तत्फलं तेन संयुक्तं [ग: स-] तथा तस्य प्रजायते॥ ८९॥

नान्यथा सकलानुनां स्वह्बावासौ विमोक्षकः [ग: -का]।

तेनानन्त प्रकाराणि शास्त्रात् पुन्सांनुरूपतः [ग: पुंसा-]॥
९०॥

कृत्वानुग्रह कृत्प्रोक्ता [ग: -क्तं] सर्वज्ञत्वात् प्रभुत्वतः।

एवमेतत् [ग: -तन्] महातन्त्रमद्वैतं सर्वसिद्धिदम्॥ ९१॥

व्यापकं सर्वमार्गस्थं द्रष्टव्यं जलचन्द्रवत्।

ज्ञानोत्पन्नमशेषस्य देवताधिष्ठि तस्य तु ॥ ९२ ॥

द्रव्यस्य शुद्धभावित्वं नान्यथा तद्विना भवेत् ।

एवं ज्ञात्वा पराद्वैत संस्थयात् सचराचरम् ॥ ९३ ॥

साधको निलवद्यत्व [ग: -त्वं] क्रीतान्नपि न लिप्यते ।

अशुचित्वेन देवेशि यथार्क पद्मवोधने ॥ ९४ ॥

सर्व [ग: सर्वं] तत्व कृतात्मा वै सप्रपञ्च कृतास्पदा ।

नटवत् पश्यमात्मानं सर्वभक्षः कृतान्तवत् ॥ ९५ ॥

खरवे हृयस्वतो युक्त [ग: युक्तं] कामभिक्तृत्व लक्षणः [ग:
-णम्] ।

संशक्तोपि न कामीस्या [ग: -स्याद्] यथा भानोदिधीतयः ॥ ९६

॥

शापानुग्रह कर्तासौ सर्वेश्वर्य [ग: सर्वैश्वर्य] प्रवर्तकः

।

भुक्ता तु विपुलान्भोगां एतद् वै तस्य लक्षणम् ॥ ९७ ॥

शुद्धाशुद्धे तथा मार्गे मिश्रामिश्रे च तत् समः ।

भुक्तिमुक्ति क्रियाज्ञानं शुद्धाशुद्धस्य लक्षणम् ॥ ९८ ॥

ब्रह्मयामलमित्युक्तं एतद् देव्यामतन्तथा ।

शुद्धाशुद्धविभागेन ज्ञानमुक्तं वरानने ॥ ९९ ॥

मंत्रशक्ति विवेकेन परविद्यामयेन च ।

२७४ब् ग्] शुद्धाशुद्ध विभागस्थं [ग: विभागेन] मिश्रकं

यामलं स्मृतम् ॥ १०० ॥

एतदेव महाज्ञानं अद्वैतं यामलं महत् ।

यो हि जानाति तत्वेन अक्लेशेनैव सिद्धयति ॥ १०१ ॥

ग्रामधर्म रतोनित्यं सोमाशक्त कृयास्पदः [ग:

कृयास्?पदः] ।

नित्यं मदेन चोन्मत्त [ग: -त्तः] सर्वावस्थः [ख: ?]

क्रियात्मना ॥ १०२ ॥

होमकर्म रतश्चापि भक्षाभक्षविकल्पकः ।

सिद्धयते नात्र सन्देहो भाग्यहीनोपि यो नरः ॥ १०३ ॥

भगिन्या मातराभार्या [ग: -भार्याः] पुत्राचैव [ग: -श्चैव]
समन्वितः ।

२७२अ खु) सर्वकर्म समर्थोसौ त्यक्तलज्जः समानधी [ग: -धीः]
॥ १०४ ॥

वर्णसंकर सङ्कीर्ण [ग: -र्णे] एकत्र चरुभोजकः ।

भावाभावैश्च शून्यत्वं [ग: -त्वं?] धर्माधर्म
विवर्जितः ॥ १०५ ॥

अशुद्धे [ग अशुद्धेः] शुद्धचित्तस्तु वह्निवह्नैकभावकः ।

क्षीरेक्षीर सुभावित्वं घृते चैव घृतैकता ॥ १०६ ॥

एवं भावात्मकं यस्व तस्य सिद्धयन्ति देवता [ग: -ताः] ।

सर्वप्राणि समोह्यात्मा स्थूलसूक्ष्म विकल्पकः ॥ १०७ ॥

सिद्धयते [ख: ?] नात्र सन्देहो भाग्यहीनोपि यो नरः ।

एकवीर विधानेन यष्ट्वा देवन्तु भैरवः [ग: -वम्] ॥ १०८ ॥

जपहोमन्तु कुर्वीत साधकोवीरधीः सदा ।

क्ष्मापलंसेक संयुक्तं अलिनासह योजितम् ॥ १०९ ॥

भावितं दन्तकाष्ठन्तु निराचारेण होमयेत् ।

दिव्यगन्धर्व कन्यास्तु तत्क्षणाद् वसमानयेत् [ग: वश-] ॥ ११०

॥

क्षमापलंसेक संयुक्तं सरमापल संयुतम्।

तद्धृते नात्मनाशुक्रे गुग्गुलेन विमिश्रितम्॥ १११॥

मातङ्ग चैलस ।युक्तं धूपं सर्वार्थ साधकम्।

क्षमापलं मगमांसञ् वुकसापलमेव च॥ ११२॥

सरमापलसंयुक्तम् अलिनासह योजितः [ग: -तम्]।

निशिचारेण होतव्यं सर्वकामार्थ साधनम्॥ ११३॥

दन्तधावनमादाय भ्रमरं मधुमेव च।

घृतेन सहसंयुक्तं रात्रौ होमं समाचरेत्॥ ११४॥

राजावश [ग: -शं] समायाति आत्मनेन धनेन च।

यावदायुं न सन्देहो भवते वसवर्तिनः [ग: वश-] ॥ ११५ ॥

मगात्पलं [ग: मगांत्पलं] समादाय गुग्गुलेन
समन्वितम् ।

घृतेन सहसंयुक्तं साध्यधूलि समायुतम् ॥ ११६ ॥

होमयेद् यस्य नाम्ना तु साधको ध्यानतत्परः ।

तत्क्षणाद् वसमायाति [ग: वश-] शक्रोपि हि वरानने ॥ ११७ ॥

कुसुंभं नागपुष्पञ्च तथा च मगमांसकं ।

आत्मने [ग: -नः] शशिसंयुक्तं महातैलेन बोधितम् ॥ ११८ ॥

२७५अ ग्) होमं कृत्वा तु देवीनां वल्लभत्वं व्रजत्य [ग:

व्रजत्यं] सौ [ग: सा] ।

कुर्कुटस्य [ग: कुक्कुटस्य] पलंगृह्य आत्मशुक्रं तथैव च ॥
११९ ॥

अलिना सहसंयुक्तं निशिचारेण होमयेत् ।

सर्वेषामेव सत्वानां मध्ये स्वामी भवेद् भृषम् [ग:
भृशम्] ॥ १२० ॥

राजिकाल वनञ्चैव मार्जारस्य च विष्टकम् ।

मातङ्गचैल संयुक्तं रासभ [ग: -भं] मुत्रमेव च ॥ १२१
॥

कुर्कुटस्य [ग: कुक्कुटस्य] तथा विष्टं कटुतैलेकतः कृतम् ।

मार्जारमांस संयुक्तं निशिचारेण होमयेत्॥ १२२॥

२७२ब् ख्) तत्क्षणाच्चाटयेच्छत्रुं अपिशक्रसमोपि [ख: अपि *?क्र-] यः।

निग्रहस्तस्य जायेत उन्मत्तो व्याधिपीडितः॥ १२३॥

भ्रमते यावदान्तु [ग: या * *?स्तु] यदिकर्मन्नमुञ्चति।

यत्र यत्र स्थितोचापि योजनानां शतैरपि॥ १२४॥

भ्रमते काकवत् पृथ्वी सत्यं साध्यो न चान्यथा।

दन्तधावनमादाय गोकीटरुधिरन्तथा॥ १२५॥

मगमांसेन संयुक्तं आत्मशुक्रेण भावितम्।

महातैलेन संयुक्तं चैलेन सहयोजितम्॥ १२६॥

साध्यधूलि समायुक्तं होमयेद् देवताग्रतः।

क्षोभं कृत्वा मारभ्य [गः तदारभ्य] तद्व्व्य
कृतसाधनः॥ १२७॥

प्रोक्षणेभ्युक्षणे [गः प्रोक्षणाभ्युक्षणे] चैव पूजां
कृत्वा विचक्षणः।

होमं तत्र प्रकुर्वीत मातङ्गाग्नौ निशि स्थितम्॥ १२८॥

आगच्छे च्छरवेगेन आगतस्तु [गः -न्तु] वशीभवेत्।

भक्षयित्वा ततो [गः ततः] कुष्ठं विष्टान्तन्तु विनिर्गतम्॥
१२९॥

आत्मशुक्र समायुक्तं कारयेत् साधकोत्तमः ।

पञ्चाङ्गमलसंयुक्तं सरमार्जार फल्गुषम् ॥ १३० ॥

देवीनामग्रतो भूत्वा होमं कृत्वा तु साधकः ।

मंत्रेणाष्टशतं जप्त्वा यस्य दद्या तु साधकः ॥ १३१ ॥

मनेप्सि तेषु सर्वेषु सर्वत्र वसकारकः [ग: वश-] ।

वशीकरण [ख: -कर *] मेतन्तु भैरवेन [ग: -ण] प्रभाषितम् ॥

१३२ ॥

इति पिचुमते औषधिपर्याये अष्टषष्टिमः पटलः ॥

देव्युवाच

यामलन्तु कथंदेव ज्ञातुमिच्छामि तत्वतः ।

कथयस्व महादेव प्रसादा सूक्ष्मगोचर ॥ १ ॥

भैरव उवाच

साधु साधु महाभागे सर्वज्ञानार्थभाजने ।

कथयामि न सन्देहो [गः -हः] शृणुष्वायतलोचने ॥ २ ॥

ब्रह्मयामल तंत्रेदं ब्रह्मभङ्ग्या विनिशृतम् [गः
विनिःसृतम्] ।

सद्यान्तादि विभागेन सृष्टिमार्गेण संयुतम् ॥ ३ ॥

कथयामि महाभागे सत्यं सत्यं यथा स्थितम् ।

लक्षणं संप्रवक्ष्यामि येन सिद्धयन्ति साधकाः ॥ ४ ॥

प्रस्तारं पूर्वकं कृत्वा तन्त्र मन्त्रा [ग: मन्त्रान्]
समुद्धरेत् ।

२७५ब् ग्] वामनाडी वहन्तेन कृता ध्यात्म विवेचनात् ॥ ५ ॥

शिवक्षोभान् महादेवि तन्त्रमन्त्रान् समुद्धरेत् ।

सोमाशक्तः क्रियासक्त [ग: -शक्तः] शक्ति [ग: शक्तिः] शक्तो
व्यवस्थितः ॥ ६ ॥

मन्त्रपञ्चकमुद्धृत्य [ख: मत्र-] सिध्यते नात्र शंशयः
[ग: सं-] ।

शषमध्यस्थितं ग्राह्यं आ ऊ मध्येनभूषितम् ॥ ७ ॥

थकाराध [ग: यकाराधः] स्थिते नैव अधस्था संप्रयोजयेत्

।

प्रथमं लक्षणं [ग: * *?णं] प्रोक्तं द्वितीयं शृणु

सांप्रतम्॥ ८॥

२७३अ ख्] घं?ट मध्यस्थितं ग्राह्यं

इयमध्याधसंस्थितम् [ख: * *?मध्याध-]।

अन्तं मध्येन चाक्रान्तं आ ऊ मध्येन चर्चितम्॥ ९॥

एष एव भवेत् साक्षाभैरवं [ग: साक्षाद्-] यामलं मतम्।

द्वितीयमुद्धृतं मन्त्रं तृतीयं शृणु सांप्रतम्॥ १०॥

न च मध्यन्तु सुश्रोणि केवलं परिकीर्तितम्।

ऋ च मध्यन्ततो योज्यं चतुर्थं बीजमुत्तमम्॥ ११॥

द्वितीय श्वरसंयुक्तमेतन्तु [ग: स्वर-] परमाक्षरम्।

च ऋ मध्ये तु संगृह्य केवलं मंत्रभूषणम्॥ १२॥

पञ्चमन् [ख: ?] तत्समाख्यातं [ख: *?स-] अक्षरन्तु
धरात्मकम्।

क्षतमध्यमतो ग्राह्यं साधस्थे नाधभूषितम्॥ १३॥

षष्ठमेतत् [ग: -तन्] महादेवि सप्तमं शृणु सांप्रतम्।

न च मध्यन्ततो ग्राह्य [ग: ग्राह्यं] अधस्तान्मघ
मध्यगम्॥ १४॥

भवते सप्तमं ह्येतत् [ग: ह्येतद्] अष्टमन्तु [ग: अ * *?न्तु] अतः

परम्।

स फ मध्यमतोबीजं वरमध्येन योजितम्॥ १५॥

भवते अष्टमं बीजं प्रणवाद्यं नवाक्षरम्।

भैरवं देव देवेशं सदेशानं समुद्धृतम्॥ १६॥

प्रणवं चोर्ध्ववक्रन्तु हूंकारेण [गः हुं-] तु पुर्वकम्।

ह्रौं बीज [गः बीजं] दक्षिणं वक्रं कार्यश्चोत्तर

संस्थितम्॥ १७॥

शुद्धस्फटिक संकाशं कुङ्कुमाभाषिन्तथा।

शङ्खाभं रोचनाकान्तं क्रमसोवक्र [गः क्रमशो-]

पञ्चकम्॥ १८॥

विशुद्ध कुन्दवज्ज्ञेयं हृदयन्त्वादिमेव तु।

आधूम्रन्तु द्वितीयेन शिरन्देवस्य कीर्तितम्॥ १९॥

शिखाक्षरङ्ककारेण कवचन्तु पकारकम्।

तडिद्वलय सङ्कासं [ग: -शं] पिङ्गवर्णन्तु पिङ्गलम्॥ २०॥

लोचनं वेन्द्रवीजेन ध्यातव्यन्तु शितारुणम् [ग: सिता-]।

महास्त्रधृक् क्रमेत्येवं हूंफडन्तं [ख:
ह्?ज?फडान्तं] वरानने॥ २१॥

प्रणवं सर्वमंत्राणां मुखभूतनियोजयेत्।

स्ववक्राङ्ग समायुक्तं भैरवेशन्तु पञ्चमम्॥ २२॥

तद्यामले महाशक्ति [ग: -शक्तिः] शृणुदेवि महातपे ।

शषमध्यमतो ग्राह्यं ऋषमध्याध [ग: -धः] संस्थितम्

॥ २३ ॥

ह ऋ मध्याध [ग: -धः] संयुक्तं करमध्याध [ग: -धः]

संस्थितम् ।

२७६अ गृ) एढ मध्येन चाक्रान्तं आ ऊ मध्येन चर्चितम्॥ २४ ॥

एषाशक्तिः समाख्याता सदेशानी परा [ग: पराः] प्रिये ।

स्वरभेदेन वक्राङ्गा [ग: -ङ्गाः] कर्तव्या सिद्धिमिच्छता ॥

२५ ॥

शक्ति शक्तिमतो ज्ञेया अविनाभाव संस्थिता [ग: -ताः] ।

यामलत्वेन द्रष्टव्या आधाराधेय योगतः ॥ २६ ॥

आधारं कुत्ववज्ञेयं [ग: कुद्मवन्ज्ज्ञेयं] चित्रवत्
करणान्वितम् ।

आधाराधेय संवन्धे स्थितोसौ परमेश्वर [ग: -रः] ॥ २७ ॥

एष एव शिवः साक्षा [ग: साक्षात्] स्थितोसौ यामलेश्वरः ।

यामलेन तु मार्गेण पूज्यो ध्येयो महात्मने ॥ २८ ॥

२७३ब् ख्) यणमध्यमतो ग्राह्यं आ ऊ मध्येन चर्चितम् ।

प्रथमं बीजमेवोक्तं रक्तायाः सिद्धिमुक्तिदम् ॥ २९ ॥

तठ मध्यमतो ग्राह्यं इट मध्येनभूषितम् ।

द्वितीयन्तु स्मृतं बीजं देव्या [ग: देव्याः] सिद्धिप्रदायिकम्॥
३० ॥

प्रणवादि नमस्कारं नामगोत्रसमन्वितम्।

वंक्राङ्गनेत्र [ग: वक्राङ्ग-] योगेन स्वरभेदे द्विरक्षरम्
॥ ३१ ॥

रक्ता या लक्षणं प्रोक्तं वीरस्य तु अतः शृणु।

उगमध्यं सविन्दुन्तु ऋधमध्यं इटान्वितम्॥ ३२ ॥

शफान्तन्तु वकारोर्ध्व [ग: इका-] युक्तं वापि समुद्धरेत्।

शषमध्यः [ग: -मध्य] इटान्तेन स्वरेणान्तन्तु भैरवम्॥
३३ ॥

चतुरक्षरन्तु देवेशि प्रणवाद्यं नमोन्तकम्।

जंकारादि चतुष्केण [ग: -णु] वक्राणां [ख: वक्रा *?]

परिकीर्तितम्॥ ३४॥

समस्तेन ह्यदानेन जाति युक्तेन भैरवि।

अङ्गानि देहनिष्पत्तौ सर्वसिद्धि कराणि तु॥ ३५॥

न च मध्यमतो ग्राह्यं अं औमध्येन चाहतः [ग: -तम्]।

क ग मध्यं महेशानि ते नैव तु नियोजयेत्॥ ३६॥

प्रणवादि तथा मंत्र नमोन्तन्तु करालया।

स्वरयोगाङ्गवक्राणि द्यक्षराणि विनिर्मिमे॥ ३७॥

रक्तवर्णा तु सा देवी श्वेतवर्णा त्वनु स्मरेत्।

याज्या तु शोभने [ख: ?] पद्मे दक्षिणे तु गणांविके॥ ३८॥

मघान्तं घदमध्यञ्च ऐलमध्यं तृतीयकम्।

ऐषमध्यसमायुक्तं घदमध्यन्तु केवलम्॥ ३९॥

चतुरक्षरसमायुक्तं नरवीरन्तु भैरवम्।

नकाराद्यास्य योगेन समस्ताङ्ग गतेन तु॥ ४०॥

यष्टव्यं दक्षिणे पद्मे करालाया [ग: -याः] समन्वितः [ग: -तम्]।

व ऋमध्यमतो ग्राह्यं एडमध्येनभूषितम्॥ ४१॥

मघमध्यन्तथा देवि द्वितीयं वीजमुत्तमम्।

चण्डाक्षी कथिता देवी सुपीता पश्चिमे स्थिता॥ ४२॥

प्रणवादि नमश्चान्ता [गः नमश्चान्तास्] तथा वक्राङ्ग
संयुता।

ज ऊर्ध्वन्तु परंवीजं प्रथमं समुदाहृतम्॥ ४३॥

पणमध्यमतो ग्राह्यं लीलमद्याधसंयुतम्।

२७६ब् ग्] छपमध्याध [गः इप-] संयुक्तं इटमध्येन
चाहतम्॥ ४४॥

द्वितीयं कथितं वीजं सहमध्यां [गः -मध्यं]
सुरीयुतम्।

सषमध्यं तदन्ते स्या इटमध्येन [ग: -मध्ये *] समन्वितम्

॥ ४५ ॥

उञ्च्छे मोहेति वक्राणि समस्तेन हृदादिकान्।

ऋषमध्यमतो ग्राह्यं ऐलमध्यादि योजितम्॥ ४६ ॥

औ अं मध्योर्ध्व संयुक्तमक्षरं प्रथमं स्मृतम्।

२७४अ ख्) शषमध्यं तथा युक्ते मंत्रमेतद् भवादिकम्॥

४७ ॥

नमस्कारा वसानन्तु तथाङ्ग स्वरवक्रकम्।

महोच्छुष्मा गुणं देवि त्रिदशैरपि वन्दितम्॥ ४८ ॥

कृष्णेन्दी वरवर्णाभा सर्वगाः सर्वसंपदाः।

ऋषमध्यमतो ग्राह्यं ज-ऊर्ध्वेन समन्वितम्॥ ४९॥

तथा कुर्यादकार्यं तु भूषितं [गः
कुर्याद्धकारान्ताद्भूषितं] वीरवन्दिते।

शषमध्यं तथा देवि बीजन्तु त्रिविधं मतम्॥ ५०॥

रवमध्यमतो ग्राह्यं [खः *?ह्यं] वपमध्याधयोजितम्
[गः इप-]।

फटमध्येन [गः इट-] चाक्रान्तं अक्षरन्तु चतुर्थकम्॥ ५१॥

सुकारादीनि वक्त्राणि [गः -णि] अङ्गासा मस्तिकाक्षराम्।

एवं वीरश्चतुर्थन्तु सुमुह्य प्रेतियामलम्॥ ५२॥

एवं प्रत्येतिमाख्यातं ब्रह्मयामलसंवरम्।

जपलक्षणकर्मञ्च पञ्चव्योमविभागिकम्॥ ५३॥

मुद्रामण्डल योगेन पूजयेत् परमेश्वरम्।

रूपलक्षाक्षरोपेतं ब्रह्मयामलमुत्तमम्॥ ५४॥

पूर्ववत् क्रमयोगेन होमं णि द्रव्येनसंयुतम् [गः द्रव्येण-
]।

सिद्धिदं साधकेन्द्राणां देवि नास्त्यत्रसंशयः॥ ५५॥

नाडीसञ्चार योगेन स्वस्थानस्थेन चतसा।

पञ्चलक्षविभागेन तथा तु फलकाङ्क्षया॥ ५६॥

कर्मलक्षविभागेन यन्त्रमन्त्रपदान्वितम्।

तथा वर्णा युधोपेतं पञ्चकं परिकीर्तितम्॥ ५७॥

शिवं शान्तंमजं [ग: शान्तमजं] विश्वं कारणं
विभुरव्ययम्।

मरीच्यादि चतुष्केण [ग: -णु] ज्ञाताख्याया [ग:
ज्ञानाख्यायां] तु पञ्चमम्॥ ५८॥

प्रत्येकं कृत्यभेदेन अभिन्नमपि चर्यते।

तदिच्छाक्षोभ्य नादाख्यं क्रियाविन्दुविबोधिभिः॥ ५९॥

पञ्चभिस्तु स्थितं देवि पञ्चधा तु वरानने।

क्षुत्वे शाव्दविभागेन संवित्या दर्शनेन च ॥ ६० ॥

आह्लादस्थिर भावैश्च पञ्चशक्तिगतं प्रिये ।

प्रत्येकञ्च समूहेन कलावस्थन्तु पञ्चधा ॥ ६१ ॥

शान्त्यातीतश्च शान्तिश्च विद्याचापि प्रतिष्ठिका ।

निवृत्ति संस्थितन्देवि तथा देवं महेश्वरम् ॥ ६२ ॥

ऐशास्य हृत्कटिं वादव्रह्मभेदाद् [ग:
पादंव्रह्मभेदाद्] विसर्पितम् ।

ईशानी पूरनी [ग: -णी] दाद्रीवाम [ग: हाद्री-] मूर्तश्च [ग:
मूर्तिश्च] पञ्चमी ॥ ६३ ॥

जंभमोहन [ग: जंभे-] पूर्वन्तु नरवीरं सुमुह्यत् [ग:

सुमुहुस्] तथा ।

२७७अ ग्] उच्छ्रेमोहे शिवाद्यन्तु पञ्चकं परिकीर्तितम् ॥ ६४ ॥

पराशक्तिस्तथा रक्ताकराला चण्डिका तथा ।

महोच्छुष्मा तु देवेशि शिवशक्ति विवेचनी ॥ ६५ ॥

२७४ब् ख्] मायाबिन्दुस्तथा भूतां शिवशक्तिसमन्विताम् ।

सा चलं सार्णवं लोकान्सकलानन्तरं प्रिये ॥ ६६ ॥

ब्रह्मं पञ्चविभागस्थं न पञ्चरहितं क्वचित् ।

कामवाण्ण [ग: -वाण] जयाद्याश्च देव्यस्तुंवुरु पूर्वका ॥

६७ ॥

नन्दादितिथयः [ग: -पयः] पञ्चशिवाशक्त्यत्मका [ग:
पञ्चशिवशक्त्यात्म-] प्रिये ।

वृहत्वाद् वृंहकत्वाच्च शिवशक्तैवु [ग: शिवशर्क्त?वु]
भावपि ॥ ६८ ॥

जगत्यस्मिन् सुगीतौ तु ब्रह्मयामलसंज्ञया [ख: ?] ।

या [ख: ?] व्याप्ति प्रकटान्देवि सामान्येपि शिवागमे ॥ ६९ ॥

शैव प्रोक्ता तु देवेशि नामसंज्ञामतस्य तु ।

देव्युवाच

कथन्देव यजेद् यागे सकलीकरणन्तथा ॥ ७० ॥

अन्तःकरणविन्यासं कथं कामान्धकान्तक ।

भैरव उवाच [ख: ?]

शृणु देवि महाभागे उच्छुष्म पदसंभवम्॥ ७१ ॥ [ख: ?]

व्यासान्तः करणं यागं करसंस्कारपूर्वकम्। [ख: ?]

संशोध्य चास्त्रराजेन करौ स्वायंभुवेन तु॥ ७२॥ [ख: ?]

दिग्वन्धपूर्वकन्देवि शिवासन गतः सुधीः।

कारये तु ततो न्यस्य शक्ति [ग: शक्तिर्] या पररूपिणी॥ ७३॥

आधारत्वेन द्रष्टव्या विश्वस्वास्य [ख: ?] महातपे।

अङ्गुष्ठयोस्तु [ग: -योश्च] सव्यानि [ग: सव्यादि] न्यस्य
शक्तिशिवं प्रिये॥ ७४॥

वामसव्य प्रयोगेन [ग: -ण] त्रतो [ग: ततो] मंत्रास्तु योजयेत्।

वामतर्जनिका रक्ता जंभेमोहेति दक्षिणे ॥ ७५ ॥

मध्यमा तु कराला तु नरवीरं तथा न्यसेत् । [खः ?]

सुमुहुः प्रेतथा दक्षेवामे चण्डादनामिका ॥ ७६ ॥

कन्यसा तु महोच्छुष्मा उच्छे माहेश्वरे [गः मो-] तरे ।

विन्यस्या [गः -स्य] स्वाङ्ग संयुक्ता मुद्रामण्डलयोजिता ॥ ७७
॥

अपरत्वादि संयुक्ता परोत्वेन्ता वरानने ।

कृत्वा समधियोगस्तु अनाधारान्तकं विदुः ॥ ७८ ॥

पूरकादि [खः पूर * *?] प्रयोगेन [गः -ण] शिवान्तन्तु नियोजयेत् ।

करणाधार निर्मुक्तं आधारावस्थितं स्मरेत् ॥ ७९ ॥ [खः ?]

मूर्तिं सर्वाध्वगा दत्वा शिवाशैवार्थदायिका। [ख: ?]

शिवादि यामले नैव कलारूपं विनिर्मिमे ॥ ८० ॥ [ख: ?]

अनादानाद रूपन्तु [ग: -स्तु] शुद्धशान्तनिरञ्जनम्।

पञ्चमूर्ध्वात्मकं देवि यामलं शिवशक्तिगम् ॥ ८१ ॥

चतुर्वक्त्र क्रमश्चैव रक्ता जंभे नियोजयेत्।

हृद्ग्रीवा वाहुशिखरे पक्षयोस्तु तथा पुनः ॥ ८२ ॥

पृष्ठोरशि विधानज्ञः कराला वीरयोजिताः।

गुदलिङ्ग [ख: ?] स्फिचा वूरु * * * * युगे तथा ॥ ८३ ॥

२७५अ ख्) २७७ब् ग्) कटिमुष्टा तथा जान्वीकटिपार्श्वे च नासिके।

[ख: ?]

उच्छ्रेमोहेति संयुक्ता महोच्छुष्मात्मदेहगा ॥ ८४ ॥

पादजङ्घे तथा नासामूर्तौ हस्तयुगे तथा ।

चण्डाक्षी सुमुहु [गः -हुः] प्रेणयुक्ता सर्वत्र विन्यसेत् ॥ ८५ ॥

आत्मदेहोर्ध्वतो विद्यादेहं तस्योर्ध्वतो भवेत् ।

आधार शक्ति [गः शक्तिः] सर्वत्र मूर्तौ कृत्वा ततः पुनः ॥ ८६
॥

सदेशानाश्रये मध्ये भैरवं परिकल्पयेत् ।

वक्राङ्गनेत्र [खः ?] संयुक्तं [खः ?] मुद्रामण्डलयोजितम्
॥ ८७ ॥

तद्वाम भागतो देवि व्यापिनी ब्रह्मरूपिणी ।

वक्रदेशे न्यसेद् देवि दक्षिणे जंभने प्रभुम्॥ ८८॥

तद्वामत [गः -तः] स्थिता रक्ता कण्ठार्द्धं यावसर्पिता।

वामांसकोरभागार्द्धे कराला तु शुभान्यसेत्॥ ८९॥

तद्वीरं दक्षिणार्धा सा प्रभृतिस्तु सदान्यसेत्।

वामकुक्षिकटिश्चोरु युक्ता न्यस्य महात्मने॥ ९०॥

चण्डाक्षी चण्डनिर्घोषा वक्रनेत्राङ्गमण्डला।

तद्दक्षिण सुकाराद्यं वीरं विन्यस्य मंत्रवित्॥ ९१॥

स्वाङ्गवक्र समायुक्तं ततोन्यञ्जानुपादयोः।

वामदक्षिण विन्यस्य उच्छुष्माच्छ्रेणसंयुता ॥ ९२ ॥

वामदक्षिणयोगेन विन्यसेद् ब्रह्मयामलम् ।

विद्यादेहन्तु देवेशि ईशानाङ्गसमन्वितम् ॥ ९३ ॥

शिवदेहेन वर्णन्तु [गः -स्तु] अनादादिक्रमेण तु ।

व्यापकं चाङ्गषट्केन युक्तं योज्यनिरञ्जनम् ॥ ९४ ॥

दिशाबन्धं ततः कृत्वा स्थानेस्त्रेण महात्मने ।

अन्तःकरणकं कुर्यात् सर्वासननिवेशितम् ॥ ९५ ॥

अनन्तादि शिवान्तन्तु तस्योर्ध्वं मूर्तिकल्पना ।

यथा देहे तथात्रैव अग्नौ चैव प्रपूजयेत् ॥ ९६ ॥

तस्मिन् तद्धदिदेशे तु नाभौ रक्तं तु पावके ।

ध्यानं बिन्दौ प्रकुर्वीत शक्तौवेतोनिवर्तनम् ॥ ९७ ॥

अमनस्के तथास्मिन् तुलयोर्ध्वे निष्कले पदे ।

ध्याये [ग: -येद्] भावनतं यावत् समत्वं लक्षगोचरे ॥ ९८ ॥

समावुद्धिर्यदा देवि सर्वतत्वेषु संस्थिता । [ख: ?]

तन्मयत्व विशिष्टा [ख: वि *?ष्ता] तु सासमाधिरिहोच्यते ॥ ९९ ॥

कृते तस्मिन् स्मरेज्योस्ना [ग: -रेज्ज्योस्ना] सर्वादिक्कामितात्मिका ।

तया प्रोद्भाषितं सर्वन्द्रष्ट जातमनुस्मरेत् ॥ १०० ॥

द्वौ [ग: द्वा] अर्घपात्र [ग: वर्घ्य-] सुसंपूर्णे न्यस्य

मन्त्राविचेष्टये [ग: मत्रा-] ।

कृता मृतेन संप्रोक्ष्य पुष्पाद्यामृत सिद्धयेत् [ग: -ये] ॥ १०१
॥

न्यसेद्रणेश्वरं पूर्व सर्वसिद्धादिशावला । [ख: ?]

गुरुपङ्क्ति स्वकी पञ्चगुरु मित्रसखायिनम् ॥ १०२ ॥ [ख: ?]

२७५ब् ख्) संपूज्यकमनो [ग: संपूज्यै-] भूत्वा
निवेश्याधारजञ्चला ।

अनन्तक्षेत्र तद्यागक्षीरोदधिवतौ तथा ॥ १०३ ॥

२७८अ ग्) पङ्कजं शक्तयः प्रेतं त्रिवलं प्रेतकं पुनः ।

मूर्तिश्चात्म तनुं विद्या देहं वापि शिवं पुनः ॥ १०४ ॥

प्राक्ष्यद्मनादितः [ग: प्रास्पद्मनादितः] कृत्वा न्यसेद्

देव्यः सभैरवा [ग: -वाः] ।

भोगाङ्गानि न्यसित्वा [ख: ?] तु अस्त्रंतानि वरानने ॥ १०५ ॥

गन्धपुष्पादिभिश्चार्घ्यै वलिभिश्चरुभिस्तथा ।

पुजयित्वा [ख: ?] ततो [ख: ?] मुद्रा [ख: ?] वज्राख्या पश्चिमे

न्यसेत् ॥ १०६ ॥

पद्ममुद्रोत्तरे दद्या [ग: दद्याद्] दक्षिणे शूलसंज्ञिता ।

कपालिनी स्मृता मध्ये पूर्वे या वक्रसंज्ञिता ॥ १०७ ॥

कपालखट्वाङ्गधरा [ग: -राः] सर्वे देव्यस्सवासनाः [ग:

देव्यःशवा-] ।

भैरवश्च समाख्याता मन्त्रा [ग: मन्त्राः] पूर्वोक्त

रूपकाः ॥ १०८ ॥

अग्निकार्यविधानञ्च पूर्वव [ग: -वद्] द्रव्ययोजितम् ।

कर्तव्यं न्याससंयुक्तं यथा प्रोक्तं मयानघे ॥ १०९ ॥

योऽभिजानाति तत्वेन [ख: ?] ब्रह्मभङ्ग्यानि [ख: ?] योजनम्

[ख: ?] ।

स सिद्धयति न सन्देहो ज्ञात्वा पिचुमतं पुरा ॥ ११० ॥

देव्युवाच

पिचु संज्ञा महादेव तन्त्रस्यास्य कथं भवेत् ।

किंवापि कारमित्युक्तं चुकारं वा महेश्वर ॥ १११ ॥

उभयोर्योगयोगेन कथयस्व समस्तकम्।

भैरव उवाच

शृनु देवि प्रवक्ष्यामि पिचु प्रमार्थमुत्तमम् [गः प्रश्चार्थ-]

॥ ११२ ॥

प्रत्यक्षरविभागेन यथावस्थं वरानने।

यथात शक्तियोगेन यस्मात् सर्वञ्चराचरम्॥ ११३ ॥

पिकारस्थं शिवं विन्द्याद् व्यापकं विभुरव्ययम्।

चुंवनं चूषणं योगं सर्वगं शिवयोजितम्॥ ११४ ॥

सा [खः ?] शक्तिः [खः ?] कुरुते यस्याच्छिव योगाद् वरानने।

पिचुसंज्ञा वला शंभुयुक्ता [ग: शंभुर्-] प्रोक्ता

वरानने ॥ ११५ ॥

उभयोर्भोगयोगाच्च क्षोभोयः परमार्थतः ।

पिचुवद् वीज वज्ज्ञेयं महाद्रव्यञ्च पार्वति ॥ ११६ ॥ [ख: ?]

शिवशक्ति न चान्यं हि सर्वत्रापि च दृश्यते । [ख: ?]

व्यापित्वमप्रमेयत्वे पिचु संज्ञा पराद्वये ॥ ११७ ॥

पिचु रक्तं तथा वुद्धिध्यानयोगं [ग: वुद्धिर्-] शिवात्मकम्

।

पिचुशक्ति शिवाभ्यान्तु नान्तरं वरवर्णिनि ॥ ११८ ॥

योगत्वा सर्वबोधाच्च सर्वसत्व विवेचनात् ।

नित्ययुक्तं पिचुज्ञानं सार्वज्ञैकोपमा [ख: सार्व *

*?पमा] स्थितम्॥ ११९॥

अमृतं मृत्युनासन्तु सर्वद्रव्यं पिचूद्भववम्।

पिचुज्ञानस्वभावन्तु [ग: -स्तु] उच्छुष्मं सततोदितम्॥ १२०॥

पिकारो लिङ्गसंस्थानं रकारः [ग: चु-] शुक्रश्रोणितम् [ग: -

शोणितम्]।

२७६अ ख्] पिचुरक्षर संयोगा शुद्धाशुद्ध [ग: च्छुद्धा-]

विलक्षणम्॥ १२१॥

अन्तःकरणके वाह्ये सैका शक्तिः शिवान्विताम्।

जगद्व्याप्त्याद् वृहत्वन्तु तस्थाप्यादिश्च [ग: तत्स्था-] तृक्षनम्

[ग: वृंहणम्] ॥ १२२ ॥

अब्रवीहिद्विभावित्वं अद्वैते तत् प्रकीर्तिताः [ग: -तम्] ।

एवं पिचुमयी संज्ञा सर्वगात्मनि संस्थिता ॥ १२३ ॥

२७८ब् ग्] तद्युक्तात्मा महादेवि लिङ्गयोनि मयस्थितः [ग: मयः-
] ।

शक्ति [ग: शक्तिः] शक्तिमयं सर्वं वाङ्मयं सचराचरम् ॥
१२४ ॥

क्रियाज्ञान विभागेन प्रतिप्राणिषु दृश्यते ।

हंसाक्षर विभागेन भावातीता तु गोचरम् ॥ १२५ ॥

पिचुसंज्ञा महादेवि सर्वगा परिकीर्तिता ।

ब्रह्मयामल तन्त्रे तु समासात् परिकीर्तितम्॥ १२६॥

इति पिचुमते पिचुभेद [गः -दे] एकूनसप्ततिमः [गः एकोन-] पटलः

॥

भैरव उवाच

अतः परं प्रवक्ष्यामि शक्तीनां कल्पसंग्रहम्।

येत [गः येन] सिद्धिर्भवत्याशु साधके संसितव्रते॥ १॥

आराधनं स्वकल्पोक्तमेकैका या [गः याः] पृथक् पृथक्।

वक्त्राङ्गनेत्रयोगेन न्यासेन तु यथाविधिः॥ २॥

पूर्वन्तु देहलीयागं लक्षजापं सदामुनि।

सर्वलक्षणहीनापि युक्तो वा सर्वपातकैः ॥ ३ ॥

नवयागविधानेन पुरस्चरणसंयुतम् [गः पुरश्-] ।

सिद्धयते नात्र सन्देहो भैरवस्य वचोयथा ॥ ४ ॥

गुरुवक्र क्रमायातं [गः -यांतं] पूर्वसेवादिकं प्रिये ।

कृत्वा तु तद्व्रतोपेतं चरुमार्गादियोजनात् ॥ ५ ॥

लभते स्वेहितं सर्वन्देवि नास्त्यत्र संशयः ।

देहलीलङ्घना योग कल्पकोटिशतेष्वपि ॥ ६ ॥

न च सिद्धिं भवेत् तस्य जपहोमार्चसंयुतम् ।

ततः सेवाक्रमायातं स्वांसभेदसमन्वितम्॥ ७ ॥

साधनं कथितं देव्या [गः देव्याः] फलेष्ठ प्रतिपादितम्।

अतोऽर्थन्तु महादेवि देहलीयागपूर्वकम्॥ ८ ॥

कर्तव्यं साधनं देवि जपहोमसमन्वितामू [गः -तम्]।

एतदर्थं समाख्यातं समयं समयार्थिना॥ ९॥

अनेन क्रमयोगेन भाग्यहीनोऽपि सिद्धयति।

देहलीपूर्वसूत्रोक्तं उत्तरे संव्यवस्थिता॥ १०॥

मुद्राखट्वाङ्गसंयुक्ताः कपालकरसंयुतः [गः -ता]।

अनेन विधिना मंत्री लक्षाणां नवकञ्जपेत्॥ ११॥

जपान्ते च तथा होमं क्ष्मापलं अलिसंयुतम्।

पूर्ववद् द्रव्य संस्कारे प्रोक्षणाभ्युक्षणांभसा [ग: -
क्ष्यणांभसा] ॥ १२ ॥

ततस्तु जायते सिद्धिः संप्रदायञ्च विन्दति।

२७६ब् ख्] अशेषकुलसामान्यः खेचराणां पतिर्भवेत्॥ १३ ॥

अन्यथा विधिहीनस्तु न सिद्धि [ग: सिद्धिः] फलभाग्भवेत्।

तन्त्राचारविनिर्मुक्तो विद्याक्रम विवजनात् [ग: विवर्-] ॥ १४ ॥

संप्रदाय विगुप्तात्मा निन्दितः खेचरी कुले।

तस्मात्वेव्येण [ग: -च्चेष्येण] विधिना देहल्यादिरनुक्रमात्॥ १५

॥

कृत्वार्घन्तु प्रदातव्यं मन्त्रस्येष्टं प्रसिद्धयेत्।

इति ब्रह्मयाम्ले शक्तियागकल्पसप्ततिमः [ग: -यागंकल्पः-]
पटलः ॥

भैरव उवाच

अथातः संप्रवक्ष्यामि च्छोमकानां यथाविधिः [ग: -
विधि]।

२७९अ ग्) रूपलक्षणकर्मञ्च कुलाचार [ग: -रं] विचेष्टितम्॥ १
॥

यथा विज्ञायते वीरो योगिनी वा कुलोद्भवा।

सिद्धासिद्ध विभागस्तु समञ्चोत्तरसाधकैः ॥ २ ॥

यागचर्या विशेषस्थैस्तन्मे [खः ?] निगदतः शृणु ।

ना पुमांस्त्रीणि कारेण भूश्मशानं कृडाकिनी ॥ ३ ॥

भ्रूलामा रौद्रिकाघ्नं च खिंस्यान् [गः खिंस्यान्]
मातृकुलोद्भवा ।

अकारत्रितयेनेव [गः नैव] शिवानां कुलजः [गः कुलजा] स्मृतम्
॥ ४ ॥

देवि डामरिका प्रोक्ता हिश्चण्डाव्या वरानने ।

सामृतं व्रूश्चवामाख्यं हेतिमांसं वरानने ॥ ५ ॥

यो भार्या भगिनी येन मकारोत्पत्तिरुच्यते ।

लिकारेण स्मृतं भक्षं वकारात् पानकं प्रिये ॥ ६ ॥

हिसप्या भाजनं केनगेन वाच्यन्तु भोजनम् ।

हकारेण बिजानीयां सुरतार्थे प्रभाषणम् ॥ ७ ॥

रक्तं वसा तथा शुक्रं शेषवर्णैः क्रमेण तु ।

क्षकारेणाडितं प्रोक्तं जकारेण विवर्जितम् ॥ ८ ॥

पकारा हृदयं प्रोक्तं वासनं सुखिसङ्गमे ।

नकारेण तु नैवेद्यं पुष्पदानन्तु संज्ञया ॥ ९ ॥

याचनन्तु दकारेण [ख: ?] थकारेण प्रतिष्ठनम् ।

कपालं तु टमित्युक्तं ठस्फरो वै वरानने ॥ १० ॥

सस्त्रिकोडाक्षरणव [ग: -रेणैव] फेतिपातादि वन्दनम् ।

मुद्रालङ्करणं नेनचेन प्रोक्तन्तु चुंबनम् ॥ ११ ॥

विरुद्धकरणं सेन ऋकारेण [ग: झे-] तु कर्षणम् ।

पञ्चनन्तु डकारेण घेतिघातनमादिशेत् ॥ १२ ॥

व्योमवीरासि संज्ञानां यथा कालं क्षकारकम् ।

कुलषोडश कस्योक्ता [ग: -क्ताः] स्वराद्या क्रमकल्पिता [ग: -
ताः] ॥ १३ ॥

वीरेशभैरवानान्तु हंसज्ञ [ग: -ज्ञः] स्वासपूर्वकम् [ग:
श्वा-] ।

एवञ्चैकाक्षराः संज्ञाः प्रोक्ताया संख्यया [गः
संख्याया] युता ॥ १४ ॥

२७७अ खु) स्वांस देवाक्षवर्णादि विभागेन सुविस्तरा ।

देव्युवाच

ज्ञातावर्णात्मिका संज्ञा तथान्या [गः तथाज्ञा] या
शुभा विभो ॥ १५ ॥

वद तत्वेन देवेश शरीरावयवात्मिका ।

भैरव उवाच

शृणु देवि महाभागे संज्ञाया देहसंभवा ॥ १६ ॥

वीरयोगी कुलानान्तु ई हितार्थ प्रदायिका ।

शिरसं [ग: शिरःसं] स्पर्शने नोक्ता वन्दनं प्रतिवन्दनम् ॥
१७ ॥

शिखसं [ग: शिखासं] स्पर्शने नैव ललाटेन तु स्वांगतम्
[ग: स्वागतम्] ।

सुस्वागतं रपाङ्गस्य [ग: अपाङ्गस्य] स्पर्शनात् संप्रतीयते
॥ १९ ॥

तस्मा [ग: तस्माद्] देशादिहायात पृच्छितो हिन्तुवा [ख: ?]
स्पृशम् ।

दक्षोत्तर [ग: -रः] सवाह्यन्तु स्पर्शाद्विशं [ग: -षं]
तदात्मकम् ॥ २० ॥

नासाग्रा [गः -ग्रान्] प्राग्भवं देशं पश्चाद्वेषं
कृकाटिका ।

स्पृशं सन्दर्शयेन्मुद्रा प्रतिवार्ता विधायिनः ॥ २१ ॥

गन्तव्यं स्वोष्टसं स्पर्शा [गः -र्शात्] कृते तद्विसि [गः तद्दिशि]
वीक्षणात् ।

कृतं भवति सुश्रोणि प्रतिमुद्रा विधानकम् ॥ २२ ॥

क्षीणोस्व भुजसं स्पंर्शा [गः स्पर्शा] दुर्वोस्पर्शा तु
विश्रमेत् ।

२७९ब् ग्] उपविश्य जानुसंस्पर्शा [गः चानुसं स्पर्शात्] स्फिचे
नैव करोम्यहम् ॥ २३ ॥

न करोति तदाया या स्पृष्टा जङ्घानुभाषितम् ।

कर्म सष्कुलिकाङ्गुल्याश्च [ग: शष्- -श्च] तन्त्रे [ग: तन्ते]
मातृमण्डलम्॥ २४॥

तत्पार्श्वस्पर्शनात् सिद्धं स्फुटामेलापकां श्रयम्।

न चे वामं [ग: वामो] चयेन्मुष्टिं गगनस्त्वा ह्यसङ्गमे॥
२५॥

हृदयन्तु स्पृशेद् या तु वामहस्तेन भाविता।

भगिनी सा विनिर्दिष्टा साधकानां फलप्रदा॥ २६॥

वामहस्तनाग्र [ग: वामहस्ता * ग्र] संस्पर्शात् [ग: -स्पर्शान्]
मातृमध्ये तु नायिका।

गरुडस्य तु संस्पर्शात् काकिनीति विनिर्दिशेत्॥ २७॥

तिर्यक् चक्षुस्व दृष्ट्या तु रुद्रडाकिनि लक्षणम्।

स्वांसदेश करेणैव डामरित्वन्तु मादिशेत् [ग: आदिशेत्] ॥ २८ ॥

कृकाटि काकरेणैव दक्षिणेन वरानने।

कुलन्तु साधका चार्या डाप्यात्मानन्तु सा कथेत्॥ २९॥

नासाग्र दृष्टिरोधेन ऊर्ध्वग्वासेन सा शिवा।

समस्तदेहभङ्गेन स्वहस्त भ्रमणेन च ॥ ३० ॥

मिश्राणां लक्षणन्देवि स्वरूप [ग: -पं] कथने स्मृतम्।

मांसं कपोलहस्तेन जिह्वा [ग: जिह्वां] दृष्ट्या तु

मत्स्यकाः [ग: -काम्] ॥ ३१ ॥

दशनाङ्गुलि योगेन भक्ष्यंभोज्यन्तु चेहितम्।

नासा सपर्श न योगेन भक्षं [ग: भक्ष्यं] भोज्यन्तु
चेहितम्॥ ३२॥

नासा स्पर्श न योगेन गत्वा प्रोक्ता तु मुद्रया।

वाम सृक्किनिका [ग: -णिका] जिह्वाभवेद् वामा मृतन्तु तम्॥ ३३
॥

२७७ब् ख्) दक्षिणा शृक्विनी [ग: सृक्किणी] योगाद् विज्ञेयं
दक्षिणामृतम्।

वसाहस्त तला सपशांत् [ग: सपर्शान्] मज्जां कूर्पर
दर्शनात्॥ ३५॥

जठरे तु कृते हस्ते दक्षे पुत्रत्वमादिशेत्।

वामे तु दुहिताप्रोक्तापिता मूर्ध्नि निरीक्षयेत्॥ ३६॥

माता तु कथिता सा तु वामकुक्षि प्रदर्शनात्।

सङ्गृहीतं स्मृतं नाभौ पृष्ठे क्षिप्तन्तु लक्षयेत्॥ ३७॥

भार्यानितंव हस्तेन वामेन पतिदक्षिणे।

दूतोपाद स्पृशं सिद्धः [गः सिद्धं] मित्रो वामभुजं
स्पृसेत् [गः स्पृशेत्]॥ ३८॥

प्रकुञ्चकग्रहनैव [गः -णैव] कुलटा भाविनादिसेत् [गः
भावनादिशेत्]।

गुप्तं कक्षाकरेणोक्तां न गुप्तं दिगलोकनात्॥ ३९॥

सिद्धं वामाक्षिसंकोच्चा लुप्ताचारन्तु दक्षिणात्।

साधिकार पदेवामे पूर्वोक्षिप्तं तथोत्तरम्॥ ४०॥

दक्षिणे तु विजानीया [ग: -यान्] मेलकं वामके करे।

एवं योगेशि वीराणां सन्मतोत्तरसाधकम्॥ ४१॥

मुद्रालापं समाख्यातं यदनन्तर विस्तरात्।

अन्योन्य सन्मतं [ग: संन्मतं] कृत्वा वाह्यालापाथवा

प्रिये॥ ४२॥

स्वमुद्रालापयोगाद् वागोपयेद् वामसासनः [ग: -शासनम्]।

देव्युवाच

चर्यायोग क्रियायोगाच्छिवेच्छा साधकस्य तु ॥ ४३ ॥

यदा दृष्टि वसंयाता योगिन्यो मर्त्यसङ्गता ।

२८०अ गृ) कथं ज्ञेया स्वरूपेण रूपं तासां तथा वदः

[गः वद] ॥ ४४ ॥

भैरव उवाच

अतः परं प्रवक्ष्यामि योगिनीनान्तु लक्षणम् ।

येन विज्ञात मात्रेण त्रैलोक्यं वशगं भवेत् ॥ ४५ ॥

विज्ञायते सुदूरेपि क्षेत्रमार्गे विशेषतः ।

भूतले चैव वर्तन्ते शिवेच्छा स्वाधिकारिका ॥ ४६ ॥

चर्यायुक्तस्य देवेशि दृष्तिरायान्ति गोचरम्।

तस्माज्ञेयन्तु [गः तस्माज्ज्ञे-] वीरेण योगेशीनान्तु लक्षणम्॥

४७॥

तिस्त्रोरेखा ललाटे तु ऊर्ध्वसी मन्तगासृता।

गौरी चंपकगन्धी च ब्रह्मचर्यरता सदा॥ ४८॥

वेद घोष प्रिया नित्यं अक्षोभ्या सत्यवादिनी।

दण्डङ्कमण्डलुश्चैव [गः दण्डक-] अजिनं योगपट्टकम्॥

४९॥

सुची दर्भोपवीतन्तु पद्मञ्च लिखितं गृहे।

लक्षितव्या प्रयत्नेन ब्रह्मण्यं सा वरानने ॥ ५० ॥

तदर्शनन्तु [ग: तद् दर्श-] वीरेण खेचरत्व जिगीषया ।

ब्रह्माणी कुलजा देवी स्वांस सिद्धिप्रदायिका ॥ ५१ ॥

गण्डयो [ग: -योः] कूपके यस्या [ग: यस्याः]
कुण्डलाग्रास्त्रकेसिनी ।

प्रोत्तुङ्गनासिका सा तु पाण्डुगौरी सुलोचना ॥ ५२ ॥

२७८अ ख्) त्रिशूलं सुललाटेषु ललाटादिषु भूषिणी ।

त्रिकालज्ञान संपन्ना सूलञ्च [ग: शूलञ्च] लिखिते गृहे ॥
५३ ॥

वृषं कपालमथवा अन्यं वा यद्वरायुधम् ।

दशनैश्चाति ज्योत्स्नाभैब्रह्मचर्य [ग: ज्योत्स्नाभैर्-]

परायणा ॥ ५४ ॥

शिवारावण संयुक्ता शिवलिङ्गि निवत्सला ।

अष्टम्यां स चतुर्दश्यां [ग: -श्या] मुपवासरतो भवेत् ॥ ५५

॥

ईदृशीं प्रमदां दृष्ट्वा साधकोवीर साधनी ।

लक्षयेत् स्वांस संयुक्ता माहेश्वर्या कुलोद्भवा ॥ ५६ ॥

षण्मासाराध्य मानान्तु योगमोक्षफलप्रदा ।

कृशाङ्गी रक्तगौरा च हरि [ग: हरित्] पिङ्गललोचना ॥ ५७ ॥

सुवर्चा दीर्घ संग्रीवा रोमगा [ग: रोमसा] वर्वरोरुहा ।

बालक्रीडारता नित्यं हसते गायते मुहुः ॥ ५८ ॥

धावते वल्गते चैव अकस्माच्च प्रकुप्यते ।

दण्डहस्तो भवेन्नित्यं शक्तिञ्च लिखिते गृहे ॥ ५९ ॥

कौमारी कुलसंभूता लक्षयेत् साधकोत्तमः ।

आराधयेद् विधानेन भूतले सिद्धिकाङ्क्षया ॥ ६० ॥

यत् किञ्चित् प्रार्थितं भोगं साधकस्य ददाति सा ।

छत्राकारं शिरोयस्या [ग: यस्याः] दृश्यते लक्षणान्विताः ॥

६१ ॥

कृष्णेन्दी वरवर्णाभा शूलास्य दशना तु या ।

वामनाचार चेष्टा च चर्या तस्याः स्वरूपकम् ॥ ६२ ॥

चक्रमुद्रा लिखेत् सा तु दृष्टिचैवार्थ [ग: दृष्टिश्चै-] वर्तिनी ।

शङ्खमुद्रा गदा चैव स्वगृहे लिखते सदा ॥ ६३ ॥

२८०ब् ग्) सा तेन लक्षयेद् विद्वांचर्या [ग: विद्वांश्चर्या]
शीलेन चेतसा ।

मायारूपधरा कन्यावैष्णवी चर्यशीलिनी ॥ ६४ ॥

सेवनात् स्वकुलानान्तु सिद्धिदा [ग: -दां] साधकेश्वराम् ।

लंवोष्ठी च विशालाक्षी पिङ्गलाग्राग्र केशिनी ॥ ६५ ॥

चित्रकर्म प्रिया नित्यं नृत्यगन्धर्व पेशलाम्।

मांसा सव प्रिया नित्यं लोलुपा सर्वसात्विका ॥ ६६ ॥

स्वगृहे दंष्ट्रमुद्रा [ग: -मुध्रु?] तु दण्डशृङ्खलमेव
वा।

लिखते [ग: लिख्यते] च तहा घाणं कोणं वाथ
श्मशानकम्॥ ६७ ॥

पद्मं वा कर्परञ्चैव उभेपक्षे तु पर्वणी [ग: -णि]।

द्वादशी तु विजानीया तस्या सा वरवर्णिनि ॥ ६८ ॥

वाराही वैष्णवी चैव एक पर्वरता [ग: -ताः] सदा।

ज्ञातव्या साधकेन्द्रेण मंत्रा विष्टेन चेतसा ॥ ६९ ॥

ईदृशं लक्षणं दृष्ट्वा प्रतिमुद्रानुसारिणा ।

मासैका सिद्धिदा देवि चर्या युक्तस्य मंत्रिणः ॥ ७० ॥

श्यामवे [ग: -वै] गन्धिनी चैव दीर्घग्रीवाङ्गुली तथा [ख: ?] ।

२७८ब् ख्) दशना चातिकान्ताभा नयने चातिवर्तुले ॥ ७१ ॥

रक्तवस्त्र प्रियानित्यं स्कन्धवस्त्रावलंविनी [ग: -नि] ।

गन्धपुष्प प्रियानित्यं धनाख्या च प्रजायते ॥ ७२ ॥

हसते रमते चैव योगयोगानुसारतः । [ख: ?]

वज्रमुद्रालिखेत् सा तु गृहे तु स्वयमेव हि ॥ ७३ ॥

सूर्य पिञ्च्छपटञ्चैव लिखेतेन्यं महायुधम्।

इन्द्राणी [ख: ?] कुलजायाता एतद् भवति लक्षणम्॥ ७४॥

षण्मासाराधने नैव सिद्धादास्यन्ति मेलकम्।

विचर [ग: विचरेद्] अखिलं लोकां [ग: -ल्लोकान्] सवाश्चर्य [ग: सर्वाश्चर्य] प्रवर्तकः॥ ७५॥

शुष्काङ्गी भग्ननासा च कोटराक्षी च दंष्ट्रिणी।

पिङ्गलाग्राग्रकेशी च ऊर्ध्वदृष्टिश्च भीषणा॥ ७६॥

मृते रणे कथानित्यं ब्रह्मचर्यरता [ग: -रताः] सदा।

श्मशानेक [ग: -नैक] कथानित्यं सधकानां कथा रता॥

स्वगृहे लिखते देवि कपालं पट्टिशं तथा ॥ ७७ ॥

मद्यमांस प्रिया नित्यं सा ज्ञेया मातृनायिका ।

प्रतिमुद्रा विधानज्ञ [गः -ज्ञे] साधके ध्यान तत्परे ॥ ७८ ॥

मेलकं संप्रदायञ्च वरञ्च ददते सादा ।

सप्तैता मातराः ख्याता यामले सिद्धिदायिका ॥ ७९ ॥

विमिश्रलक्षणं देवि एतद्रूपविमिश्रिता ।

सिद्धासिद्ध विभागास्तु तदिच्छाया तु साधकः ॥ ८० ॥

वेत्ति लक्षणतो देवि वोधा लिङ्गविवेचना ।

तन्त्रस्य सारभूतन्तु सिद्धिद्वारं वरानने ॥ ८१ ॥

कथितं साधकेन्द्राणां प्रत्यक्षकरणं सदा ।

इति पिचुमते च्छोमाधिकारो नाम एकसप्ततिमः [ग: नामैक-]
पटलः ॥

२८१अ ग्] भैरव उवाच

अथातः संप्रवक्ष्यामि कूटभेदस्य लक्षणम् ।

मंत्राक्षरपदेर्युक्ता [ग: -पदैर्युक्ता]
दिव्यमानुष्यसाधनः ॥ १ ॥

न्यासयोग समोपेतं साध्यात् [ग: साध्या] साध्यसमन्वितम् ।

अग्निकार्यञ्च ते नैव रूपकालोदयस्थितम् ॥ २ ॥

यंत्र संपुटयोगे [ग: योगें] च योजनीयं यथा क्रमात्।

सिध्यते चा प्रयत्नेन ज्ञात्वा कर्म पृथक् पृथक् ॥ ३ ॥

अविभाग विभागैस्तु क्रीयाकालांस योजनैः।

तत्र मंत्राः प्रवर्तन्ते यथा कामा यथोदिताः ॥ ४ ॥

आदिमादि अनादिञ्च [ग: मनादिश्च]
मध्यमध्यममध्यमम्।

अन्तमन्तमनन्तञ्च ज्ञात्वा मुच्यति वर्चनात् [ग: बन्धनात्] ॥
५ ॥

तत्ववर्ण कलानादरूप कालोदयान्वितम्।

२७९अ ख्] अहोरात्र विधानस्थ क्रमाद् भिन्नं विलक्षयेत्॥ ६ ॥

कथितः संप्रयोगस्तु नादीशानो मयानघे ।

उत्पत्ति स्थितिसंहारं ज्ञात्वा कृत्वा प्रसिध्यति ॥ ७ ॥

देव्युवाच

वर्णतत्व कलाकालं स्वरूपञ्च महेश्वर ।

उत्पत्ति स्थितिसंहारमहोरात्रं कथं वद ॥ ८ ॥

भैरव उवाच

आदि प्रकृतिरुदिष्टा व्योम्नोदेवि विभागगा ।

चतुर्विंशकलोपेता ब्रह्मोङ्कारपदानुगा ॥ ९ ॥

पुन्तत्वमादिभूतन्तु [गः पुंस्तत्वमा-]

विष्णोङ्कारसमन्वितम्।

रुद्रोङ्कार विभागस्थन्नैयतं तत्वलक्षणम्॥ १०॥

एवं व्योमे त्रिधावस्थं अक्षरत्रयवाचकम्।

अनादि आदिपूर्वन्तु यथावत् प्रविचार्यते॥ ११॥

सर्वतत्वसमूहस्य भोगयोग्येन वृत्तिना।

गुणभाषा भवेनैव या स्थिता तु स्वरूपकम्॥ १२॥

प्रवृत्ति कर्मभागानां मोक्षहेतौ पशोन्यथा।

लाभक्षयो त्रिवर्गस्य विनादेहं महेश्वरि॥ १३॥

आदिते [ग: आदिस्ते] नैव सा देवि स्वस्थत्वात् प्रकृतीति सा ।

शिवात्माशक्तियोगेन विकारोपि तदिच्छया ॥ १४ ॥

बीजपिण्डे वुदेवेशि [ग: व-] आदिरूपानुसन्ततौ ।

मलमाया तथा कालाकर्म बन्धमनादिगम् ॥ १५ ॥

मनादिसौम्य [ग: -साम्य] वृत्तेन पुरुषस्थं वरानने ।

मनन्तेन तु सौ देविमादिस्यात् मलकर्मणम् ॥ १६ ॥

नियमो यो विभागेन कालकर्ममलात्मनाम् ।

सेवोसौ [ग: सैवो-] देवि विश्वस्थो मनादिरिति गीयते ॥ १७ ॥

सर्वावयवभावस्थमन्तव्योमं [ग: -मन्तर्व्योमं]

शिवाशिवः [ग: -शिवम्] ।

भोगभोक्तृत्व नियमे [ग: नियमै] स्त्रितत्वोक्त्वा [ग: स्त्रितत्वौक्त्वा]
तु भावयेत् ॥ १८ ॥

अधोमार्ग स्थिरत्वेन ऊकारः [ग: -र] प्रकृती गतः ।

चापल्यो वायु युक्तात्मा यकारस्तु वरानने ॥ १९ ॥

२८१ब् ग्] संग्रहत्व स्वरूपेण कुलारूपेण [ग: कुल-] नैयतम् ।

वकाराक्षरगं तत्वं कथितं तव सुव्रते ॥ २० ॥

अष्टाष्टा तु कलोपेतं प्रणवत्रयसंयुतः [ग: -तम्] ।

अन्तव्योमेति [ग: अन्तर्-] विख्यातं विलोमाच्चादिरुच्यते ॥ २१ ॥

सिद्धि ऋद्धिद्युतिलक्ष्मी [ग: -द्युतिर्लक्ष्मी] मेधाकान्ति [ग: -न्तिः] स्वधा स्थिति [ग: स्थितिः]।

रजोरक्षारती पाल्याका मातृष्णामतीक्षया ॥ २२ ॥

तमो मोहाक्षया निद्रामृत्युर्माया भयाजारा।

सात्विकासु विरिञ्चिस्था राजसोपेन्द्रजाः प्रिये ॥ २३ ॥

२७९ब् ख्] तामसा रुद्रसंभूता कलाव्योम्नि व्यवस्थिता [ग: - ताः]।

त्रिगुणं प्राकृतं रूपं रक्तवर्णं नरात्मजम् ॥ २४ ॥

कृष्णं नियतिरूपन्तु तथा कालो विचार्यते।

पृथ [ग: पृथक्] कालविभागेन यो सोस्या चेतनोऽव्ययी ॥ २५ ॥

क्रियारूपे महादेवि सकाल मृतयात्मकः [ग: स्त्रि-]।

अविभक्ता तु प्रकृती विभागोस्या विकारकः॥ २६॥

नरस्यापि तथा भावा रागवेश प्रकासिता।

नियमः सर्ववस्तूनां पृथगे कत्वताङ्गतः॥ २७॥

रूपमेतत् तथा रुद्रेः [ग: रुद्रैः] शक्तिभिस्तु विलक्षयेत्।

अविभागविभागैस्तु क्रियाकालं प्रसाधितम्॥ २८॥

पथगथ [ग: -गर्थ] विभागस्थं प्रकृत्या कृत्यताङ्गतम्।

आदिमादि मनादिश्च तृतीयं परिकीर्तितम्॥ २९॥

मध्य मध्यमशाव्दश्च मध्यगश्च [ग: -मश्च]

निबोधमे ।

कालतत्वं तथा माया विद्यातत्वं तृतीयकम् ॥ ३० ॥

स्वगुणाख्य विभागन्तु नादीशाने व्यवस्थितम् ।

तत्व भूत तथा भाव [ग: भावं] सृष्टिसंहारसंस्थिताम्

॥ ३१ ॥

न हि कालं विना यस्मात् सर्वत्रैव विभाव्यते ।

सर्वत्र समवृत्तित्वात् [ग: -त्वान्] मध्यसंज्ञा वरानने ॥ ३२ ॥

ऊर्ध्वविन्दोर्ध्व देहाख्य शाम्यस्य द्वितीयैकवत् [ग:

द्वितयैकवत्] ।

मध्यमं चोच्यते माया जगद्योनित्व कारणात् ॥ ३३ ॥

सैवं [ग: शैवं] कृत्य न मायाख्य तत्वहीनं विवृश्चते ।

न च पुंबन्धनं देहमुभाभ्यां मध्यमात्वता ॥ ३४ ॥

तत् स्वभावा स्मृता मायामलादीनां विवेचनी ।

शिवानाञ्चा शिवानाञ्च अवस्थानं त्रिधास्थिता ॥ ३५ ॥

विकारसाम्य संपाक कालयोगाद् विलख्यते [ग: विलक्षते] ।

द्वितयस्यापि विश्लेषं कृत्वा सङ्गाद् विबोधिका ॥ ३६ ॥

मध्याधमां गतिन्दद्या [ग: -द्यात्] तद्गत्वाच्च [ग:

तद्गतत्वाच्च] मध्यगा ।

विद्याधिमोक्षभोगेच्छा वासितानान्तु मध्यगा ॥ ३७ ॥

दृढकर्मार्थ संस्थेन क्रियाभावेन [ग: -नु] पार्थिवम् [ख: ?] ।

रूपं संसृत्य भावेनभाति कालोलवर्णकम् ॥ ३८ ॥

२८२अ ग्) बिन्दुप्रसूति धर्मित्वं विशेषं योनिरूपकम् ।

मकाराख्या श्रयामायाद् विधाव्योम विवक्षया ॥ ३९ ॥

विद्याकथं स्वभावन्तु समाश्रित्य विभाषते ।

प्रणवत्रय मत्रापि मध्यव्योम्नि वरानने ॥ ४० ॥

संहार व्यापकाख्यन्तु शव्दाख्यञ्चापि सुव्रते ।

संहारव्यापकाख्यन्तु शाव्दाख्यञ्चापि सुव्रते ॥ ४१ ॥

अडमोर्ध्वन्तु यो बिन्दुत्रितयं चैकतां नयेत् [ख: ?] ।

सःआरीशस्तु [ख: * * *?सस्तु] सौ देवि कालात्मा प्रणव [ग: -वः] स्मृतः ॥ ४२ ॥

२८०अ ख्) बिन्दोर्ध्व चन्द्रयोगेन क्रियाव्याप्ति विबोधितम् ।

व्यापकं रूपमेतद्धि प्रणवस्य वरानने ॥ ४३ ॥

भित्वा शिखवयोर्द्धस्थ [ग: शिखे-] वृत्यानादो रिजत्वता [ग: ऋजुत्वता] ।

प्राप्तोसौ शाव्दरूपस्तु प्रणवः परिकीर्तितः ॥ ४४ ॥

संहार वासना मायाव्याप्तिका कर्मरूपिका ।

त्रिविधाणून्निबन्धेत तत्वरूपेण लक्षते ॥ ४५ ॥

तुटिलवनिमेषा च कलाकाष्टा मुहूर्तगा ।

दिवारात्री च विज्ञेया संहारीच्छामता प्रिये ॥ ४६ ॥

बन्धनी मोहनी मूर्छा विस्मृती चाप्यनी स्वरा ।

अचेता चा [गः च] क्रियायोगा कलाष्यै परिकीर्तिता ॥ ४७ ॥

सर्ववर्ण सुरक्तेन पक्ष्मलेन विवेचनी ।

विभाति चानु वृन्दानां व्योमरूपा महेश्वरी ॥ ४८ ॥

वर्णत्रयकलाकाल तत्वधर्मसमन्वितम् ।

मध्यमध्यम सव्देन [ग: शव्देन] मध्यशंखं [ग:
मध्यगं सं] प्रकीर्तितम्॥ ४९॥

अन्तमन्तमनन्तञ्च विविधं चोच्यते धुना।

यतोनन्त समस्तस्य तत्वभूतात्मकस्य तु॥ ५०॥

जगतोनन्त वृर्त्तित्वात् [ग: वृत्तित्वात्] प्रभुत्वा स्थिति शृष्टिगः [ग:
सृष्टिगः]।

संहारेच्छा विभागेन भवे [ग: भवेत्] सो रेफरूपधृक्॥ ५१
॥

पचोङ्कार [ग: -रः] स एवोक्ता निधनाग्न्या [ग: -ग्न्यो]
महेश्वरः।

अष्टत्रिंश कलात्मावै पञ्चनादात्मको विदुः॥ ५२॥

अनादोनाद रूपस्तु शुद्धः शान्तोनिरञ्जनः ।

अ उकारात्मकाराच्च [ग: उकारान्म-] अर्धचन्द्र [ग: -चन्द्रः]

सबिन्दुकाः [ग: -कः] ॥ ५४ ॥

पञ्चभिश्चैव तत्वोर्ध्वन्नादो योस्यान्महात्मनः ।

पञ्चोङ्कारेति विख्यातः सकलस्तु महात्मने ॥ ५५ ॥

सर्वस्यास्य महत्वेन निष्कलत्वेन च प्रिये ।

सदाशिवस्तु देवेशो मन्तरूप विवक्षया ॥ ५६ ॥

व्यापित्वमप्रमेयत्वं प्रतिपुंसि व्यवस्थितम् ।

अष्टाष्टक विभागस्थं ऋक्षादि कृतविग्रहम् ॥ ५७ ॥

नदत्तं सर्वदेहस्थं हंसाक्षर विधिस्थितम्।

कुण्डल्यादि विभागेन तत्वाष्टकपरिच्छदम्॥ ५८॥

कुण्डलीशश्च ब्रह्मेसो [ग: -शो] विद्याव्याप्ति कलेश्वरः।

निरोधीशस्तथा भोक्ताभोग्य तत्वाश्रयेष्टमः॥ ५९॥

२८२ब् ग्] मातरः शक्तयो देव्यः कलातत्वाश्च रश्मयः।

गभस्तयः [ग: गभस्तयस्] तथा ऋक्षायाव [ग: -वत्]
सादाशिवेगताः॥ ६०॥

वामाज्येष्ठा तथा रौद्री काली कलबला तथा।

मथनी दमनी चैव शक्तयोऽष्टौ महेशगाः॥ ६१॥

वामादि वीरसंघेन [ग: -सघेन] विद्येशं तत्वमर्थिता ।

सर्वत्र गतिरूपेण महातत्वेन सुव्रते ॥ ६२ ॥

२८०ब् ख्] अन्तानन्तविभागेन तेन मंत्रः सदाशिवः ।

एतत् सर्वंनन्त [ग: सर्वानन्त] येन शक्तिज्ञानोर्मि सृष्टिभिः ॥

६३ ॥

शक्त्यन्तः प्रणवस्तेन स चोक्तः सर्वदेश्वरः ।

परतस्तु सदा व्याप्ति अर्धचन्द्रादिमात्रया ॥ ६४ ॥

बिन्दुनाद शशक्त्यन्ता शिवस्तत्र महेश्वरि ।

षडध्वरूप भावेन अनन्तेनाति सर्पिणा ॥ ६५ ॥

सर्वत्रालेपकत्वेन सर्वकामार्थ वृतिना ।

अरूपरूपभावेन वर्णावर्ण विवक्षया ॥ ६६ ॥

नाडीसु [ग: -षु] शिरबोधाख्य कालरूपकलात्मना ।

जगत्यस्मिन् महादेवि अनन्तत्वमवारितम् ॥ ६७ ॥

न चान्तौस्या क्षयात्मावे [ग: -वै] नैवं स्या [ग: स्याद्]
ध्रुवदर्शनात् [ग: भु?-] ।

दृष्टस्तु परमेशानि तेनानन्तः शिवोव्ययः ॥ ६८ ॥

सर्वोङ्कार विनिर्मुक्तः सर्वमंत्रान्त संस्थितः ।

शक्तिसाधन संसिद्धो वायुच्चारविवर्जितः ॥ ६९ ॥

निःप्रपञ्च [ग: निष्प्रपञ्च] प्रपञ्चात्मा मंत्ररूपेण

चात्मकः ।

ईश्वरी विरजा धामाकान्तिमत्ता सदोदिता ॥ ७० ॥

बोधाविन्दुमती चैव प्रह्वी चेश्वर शक्तयः ।

यापिनी [ग: व्यापिनी] व्योमरूपा च अनाथानाश्रिता तथा ॥ ७१ ॥

जया [ग: जयां] च विजया नन्दाभद्रा तत्वे सदाशिवे ।

निराभाषा [ग: -सा] निरालंवा निष्प्रपञ्चा [ख:

निःप्रष्प्रपञ्चा] निरञ्जनाः ॥ ७२ ॥

मरीची ज्वालिनी चैव अमृता स्थिरिणीति च ।

शिवतत्वेतिमन्तव्या [ग: -व्यास्] तारादिभिरभिष्टुताः ॥ ७३ ॥

ऊकार प्रकृतौ देवि अधोव्योमोध निर्वृतिः ।

यकारे तु भवा [ग: भवाः] सर्ववस्था [ग: सर्वेवस्था] ते
रसरोधनम् ॥ ७४ ॥

संवित्तिजननं काले स्थितं तत्पार्थिवाक्षरे ।

शून्याक्षरे विमोहन्तु विवेकोत्र कसात्मके ॥ ७५ ॥

प्रभु वृत्तितथा [ग: वृत्तिस्-] व्याप्ति समत्वं चार्द्धख [ग: -
खे] सदा ।

एवं सर्व [ग: सर्वं] जगात्मा वै योक्तोनादेश्वरेश्वरः ॥ ७६
॥

तद्रूपां तु स्थिता शक्तिः शक्ति [ग: शक्तिः] शक्तिमतः स्थितः ।

अनाद्यनिधनो देवो मायातीतो निरञ्जनः ॥ ७७ ॥

येन व्याप्तमिदं सर्वगाब्रह्म [ग: सर्वमा-] भुवनान्तिकम् ।

न च तेन विनासिद्धिरिहलोके परत्र च ॥ ७९ ॥

नव तत्वेश्वरं विन्द्याद् भैरवं ब्रह्मयामले ।

२८३अ ग्) शक्तिमात्रमरूपं तत्स्वगुणैः प्रतिभाशते [ग: -सते]

॥ ८० ॥

नामं तत्र न विद्येत यं ज्ञात्वानावशीदते [ग: -सीदते] ।

पुनः संसार भोगेषु न चापिविनिवर्तते ॥ ८१ ॥

तस्मात् सर्वप्रयत्नेन शक्ति शक्तिमतं विभुम्।

ज्ञातव्यं कूटभेदेन सर्वभूतेष्व वस्थितम्॥ ८२॥

२८१अ ख्) कूटस्थं सर्वभूतस्थं नवशक्तिपरिच्छदम्।

शान्तिपुष्टि वशाकथं निग्रहानुग्रहन्तथा॥ ८३॥

विद्वेषोच्चाटनासञ्च [ग: -शञ्च] ज्ञात्वामुच्यति बन्धनात्।

कूटस्थं सर्वभूतस्थं पशुग्रहणलक्षणम्॥ ८४॥

एवं ज्ञात्वा महादेवि लीलया सिद्धिभाग् भवेत्।

सांप्रतं कथयिष्यामि विग्रहाक्रान्त साधनम्॥ ८५॥

वर्णतत्व कलाकाल [ग: -लम्] अंशकञ्च क्रियात्मकम्।

वेधघण्ट निरोधञ्च ज्ञात्वा सर्वं समाचरेत्॥ ८६॥

प्रथमं वेधनं प्रोक्तं द्वितीयं घट्टनं स्मृतम्।

निरोधन्तु तृतीयं स्यात् प्रवेशन्तु चतुर्थकम्॥ ८७॥

आदौ वै बिन्दुलक्षेत समस्तावयवात्मकम्।

आकृष्टे वायुनातत्वं स चेतं मंत्रसंयुतं॥ ८८॥

परनाडीश राकारं धनुनाडी [ग: धनुर्-] त्रयात्मकम्।

नाभ्यक्षविधिमोक्षेन [ग: नाभ्यव्जचिद्धि?मोक्षेण] शक्ति
चिच्छिवयोजितम्॥ ८९॥

ऋज्वाकारन्तु तत् कृत्वा तेजोद्याग्रेषु वर्चसम्।

करत्रय विभागेन निश्चलन्तु विलक्षयेत्॥ ९० ॥

द्रव्यसिद्धौ तथा योगे परत्वे च यथा क्रमम्।

नासबिन्दौ तथारन्ध्रे सरक्तं प्रथमाश्रये ॥ ९१ ॥

विन्दावापिङ्ग ज्योत्स्नाग्निं स्फटिकाभं पराह्वये।

समस्तांग समायुक्तं साध्यान्तस्थं विलक्षितम्॥ ९२ ॥

पूर्वायाम प्रपन्नात्मा दविवेगान्विनिक्षिपेत् [ग: -निःक्षिपेत्]।

हूंकाराक्षर संयोगात् सफडित्येव विमोचयेत्॥ ९३ ॥

तत्स्थान वेधयोगोयं प्रथस्तुवरानने।

सुसिद्धस्तु विभागेन तंत्रेस्मिन्ब्रह्मयाम्ले ॥ ९४ ॥

आत्मानस्तुर्यगं ह्येतत् प्रथमं साध्यगं प्रिये ।

प्रवेशनं द्वितीयन्तु साध्येन्मनि तथादिमम् ॥ ९५ ॥

द्वितीयं रोधनात्मस्थं साध्यस्येतच्चतुर्थकम् ।

घट्टनन्तु तृतीयं वै साध्यात्मनि महात्मने ॥ ९६ ॥

प्रवेशयेत् सगं [गः मगं] वायुं प्रतिनाडिषु पूरणम् ।

निःशेषानिलयोगेन कर्तव्यन्तु विरोधनम् ॥ ९७ ॥

घट्टनन्तु ततः पश्चात् कर्तव्यं स्रोत सां क्रमात् ।

द्वारैकमोक्षमार्गेण वेदनं पूर्वमाचरेत् ॥ ९८ ॥

प्रवेशनादि चाख्यातं साध्यस्य च चतुष्टयम्।

२८३ब् ग्) साध्यस्य वेधनं कृत्वा प्रवेशन्तु समारभेत्॥ ९९॥

सुसूक्ष्मानीन्द्रियाद्यानि [ग: -णीन्द्रियाद्यानि] वायुनाडी
वलाशिवम्।

चेता प्रवाहयोगेन हूंकाराद्येन पूर्ववत्॥ १००॥

पशुबीज युते नैव निराचारान्त वासनात्।

शक्तिमार्गते नैव प्रेंक्षयोगेन [ग: प्रेंक्षो-] संविशेत्॥ १०१
॥

२८१ब् ख्) प्रविष्टो घाट्टयेर्णेन नाडीमार्गात् समन्ततः।

कुंभकेन प्रयोगेन वायुपूर्णं [ग: -पूर्ण] सहुङ्कृतम्॥

१०२॥

वज्रवर्णंविभागेन [ख: * *?वर्ण-] चतुरस्त्रेण पार्थिवम् [ख:

?]।

स्वरूपान्तु ततो ध्यात्वाघटितं तं विनिर्दिशेत्॥ १०३॥

प्रतिद्रव्य विभागन्तु [ग: -स्तु] स्वस्थं स्याद् धारणात्मना।

वृत्तेन योज्यसंरोध्य ततो ग्रहणमाचरेत्॥ १०४॥

कपाख्य [ग: कथाख्य] देहसंयोगाधरा [ग: -योगाद्धरा]

व्योमात्मरोधिता।

ग्रहणन्तु समाख्यातं समुदाये यथा तथा॥ १०५॥

वर्णाश्च स्वविभागेन साधनस्था पुरोदिता ।

तत्वं शैवन्तु सर्वस्थं स्वविभागेन लक्षयेत् [ख: ?] ॥ १०६ ॥

प्रक्रियाभोग योगेन ध्यानेनैव तदात्मना ।

यान्येवन्तु वरारोहे तत्व योगाद् वरानने ॥ १०७ ॥

यादृशं कर्मसंवेद्य नाडीयोगात्मता नयेत् ।

यत्र संवित्तिभावेन सा कलापरिकीर्तिता ॥ १०८ ॥

प्रवेश घट्टनोरोधे [ख: घट्ट * * *?] वेधयोगे पृथक्

पृथक् ।

विभक्तावयवः कालो [ग: काले] अंशकश्चाधुनोच्यते ॥ १०९ ॥

मित्रारिसमवत् कर्मधारणाभिर्विनिर्दिशेत् ।

यदं शकन्तुतं ज्ञात्वा तथा मन्त्रान् प्रयोजयेत् ॥ ११० ॥

क्रिया तथा विधाभावाकर्तव्या सिद्धिमिच्छता ।

हकार वेधने प्रोक्तं हूं लकारन्तु घट्टने ॥ १११ ॥

क्षकारेण निरोधं [ग: निरोधे] स्यात् पिण्डतत्वं प्रवेशयेत् ।

ग्रहणं शक्तिमंत्रेण पशुदेहे [ख: ?] तु [ख: ?] साधकः

[ख: ?] ॥ ११२ ॥

ऊर्ध्वन्तु करणं कृत्वा प्रवेशं निर्गमन्तथा ।

त्वच मज्जास्थि शुक्राश्चमेद पूयवहास्ततहा ॥ ११३ ॥

जित्वानाड्यः क्रमाद्देवि वायुचेता समायुता ।

आकृष्याकृष्य भुञ्जीत दिव्यकन्यामनोरमा ॥ ११४ ॥

अशेष कर्मसिद्धयौ [ग: -सिद्धयै] च प्रयोगमिदमाचरेत् ।

देव्युवाच

किमर्थं कारणं प्रोक्तं किं वा करणलक्षणम् ॥ ११५ ॥

त्वजामज्जास्थिमेदा [ग: त्वचामज्जास्थिमेदाश्] च

पूयनाड्यः कथं स्मृताः ।

शुक्रनाड्यः कथन्देव जयन्तासान्तु [ग: जपन्ना-] कीदृशम् ॥

११६ ॥

पर्याय नामयोगेन व्यस्तकर्माणि योजयेत् ।

संशयन्तु महादेव भ्रामितोहन् त्वयाप्रभो ॥ ११७ ॥

केनकार्येण देवेश जगद् व्यामोहनं कृतम् ।

२८४अ गु) उक्तं सत्यं यथावाक्यं मिथ्यावाक्यं च किं
कृतम् ॥ ११८ ॥

भैरव उवाच

सत्वहीना नराये तु गुरुनिन्दा तथाधमाः ।

२८२अ खु) शक्तिहीनस्तु देवेशे समयाचार लघकाः [गः
लङ्घकाः] ॥ ११९ ॥

तेनगुप्तमिदं ज्ञानं गूढ [गः गूढं]
सद्भावलक्षणम् ।

कृतरक्षार्थमे वै तद्भैरवेण महात्मना ॥ १२० ॥

व्यस्तकर्मनियोगेन योगज्ञानेन भैरवि ।

प्रोक्तं पर्यायभेदेन अभाग्यानां महात्मने ॥ १२१ ॥

अत एव समाख्यातं दुर्बोध्यं ब्रह्मयामलम् ।

सर्वज्ञस्य मुखोत्कीर्णं गुप्तवीर्यव्रतं स्थितम् ॥ १२२ ॥

ज्ञातुं न शक्यते देवि दुराचारैस्तु साधकैः ।

ते नैतेन प्रसिध्यन्ति जप्त्वाकोटिशतैरपि ॥ १२३ ॥

क्रियासंस्कार विरहं विशून्यं साधकाधमाम् ।

विभेदं समयानाञ्च कृतवन्तोनराधमाः ॥ १२४ ॥

तेन गुप्तमिदं देवि तंत्रं सर्वज्ञसत्फलम् ।

चोदनाया परेशस्य चोदितानां प्रसिद्धिदम् ॥ १२५ ॥

करणं शृणु देवेशि [गः देविशि] निर्विकल्पेन भैरवि ।

वहिरध्यात्मिकञ्चैव सर्वव्याप्तिकरं परम् ॥ १२६ ॥

कृत्वा पर्यङ्क बन्धन्तु वामसव्य व्यवस्थया ।

तदावकाशगञ्चाधो करयुग्ममधोमुखम् ॥ १२७ ॥

सुस्थितं विसृतोरस्कसमदृष्टि [गः -दृष्टिः] शिरोधरम् ।

समवक्ष [गः -वस्य?] कटिश्चैव समकुक्षिष्ट संयुतम् ॥ १२८ ॥

वाह्यमेतत् समाख्यातं करणं योगसिद्धये ।

अथाध्यात्म विभागन्तु करणस्यास्य सुव्रते ॥ १२९ ॥

अशुद्धानिल शुद्धस्य पूरकादितदुच्यते ।

मृणालनाल तद्वायुं जलयोगेन कर्षितम् ॥ १३० ॥

मात्रार्कमान योगेन त्रिगुणं यावचोत्तमम् ।

निरोध्यताव [ग: -वत्] संधार्यधारणा ध्यानयोजनात् ॥ १३१
॥

प्रत्यानीतेन्द्रियो मंत्री संलक्ष्य हृदिमण्डले ।

उदयादित्य संकाशं मण्डलं दीप्ततेजसम् ॥ १३२ ॥

तन्मध्ये विग्रहं ध्याये [ग: -येत्] सर्वगं विश्वरूपिणम्।

त्वचादि नाडिवर्गन्तु जित्वासम्यग् विरेचयेत्॥ १३३॥

धृतं तेन प्रमाणेन तन्मात्रं साधकोत्तमः।

नाभ्यव्जकन्दंतोचार्य [ग: -कन्दतोच्चार्य] कृत्वास्फोटं

ऋजुं पुनः॥ १३४॥

संप्राप्तं हृदयाकाशे श्वास योगावली कृतम्।

तन्मण्डलान्तगं भूत्वानतं याव [ग: यावद्] गलान्तिगम्॥

१३५॥

ऋक्षरूपन्तु त [ग: तं] ध्यात्वा घट्टिका तालु विभेदितम्।

मृणालतन्तु मार्गेण ध्वन्यन्ते निष्कलीगतम्॥ १३६॥

शिवसामान्यता पन्नं वायुचेता शिवाध्वरम्।

२८४ब् ग्] शक्तियुक्तं तथ [गः तथा] धृत्वा प्रयोगमिदमाचरेत्॥ १३७॥

विरेचितं विशेषेण निवातं शरणालयम्।

२८२ब् ख्] स्थिरदीपशिखाकारं कणोर्ध्वं समाररेत्॥ १३८॥

निपीडनन्तु [गः निपीतुनस्तु] सूर्यस्य रुद्रस्या कर्षणोर्ध्वतः।

मध्यवेधस्तु चन्द्रस्य विष्णोर्वाम विवर्तनम्॥ १३९॥

संभिन्द्यं लोलयाविन्दुं ससमीरणभिः कृतम्।

कृत्वा नियोजयेज्जिह्वा घण्कास्व भ्रोर्द्धगामिनीम्॥ १४० ॥

शक्तितेज विनिक्षिप्तं [ग: विनिः-] मनोभावविवर्जितम्।

निष्कलान्तर्गतं कृत्वा करणञ्चोर्ध्व मूलिकम्॥ १४१ ॥

कृत्वैवं संप्रवक्ष्यामि प्रवेशस्य रविग्रहे।

वायुशक्ति शिवो ह्यात्मा स्थूलसूक्ष्म स्वकाध्वरम्॥ १४२ ॥

ऊर्ध्व जिह्वाग्रसंयुक्तं करणं साध्ययोजितम्।

मध्यध्यानगतं देवि निवातशरणालयम्॥ १४३ ॥

स्थिरविन्दुशिखाकार [ग: -रं] मनोनादान्तविन्दुकम्।

वेधस्थानलयं कृत्वा तस्मिन् साध्येकसङ्गमम्॥ १४४ ॥

पूरकुंभां ततो नादं ध्यात्वा नाडीगतं प्रभुम्।

तत्रस्थं निश्चलं कुर्या [ग: कुर्याद्] यत् तत्साध्यपद [ग: -
पदे] स्थितम्॥ १४५॥

द्वयोरेकत्र तन्तु स्याद् यथाव्जं प्रेङ्खयामुखम्।

हेला हिष्कान्त योगेन वेधान्ते प्रविशेत्तनुम्॥ १४६॥

पूर्वोक्ते नवमार्गेण [ग: नैव-] मृतजीवशरीरके।

अन्ये वा कर्मयोगस्थै [ग: योगस्थैर्] निष्कले वा पदे शुभे॥
१४७॥

काष्ठपाषाण योगेषु नदीपर्वत पूरणे।

मारणाकर्षणे श्रेष्ठं विद्वेषोच्चाटने तथा ॥ १४८ ॥

वश्याकर्षण योगेषु क्षुद्रकर्मेषु काकथा ।

नाडयस्तु महादेवि त्वचाद्या शृणु सांप्रतम् ॥ १४९ ॥

संवित्तिर्यावतीयत्तु [ग: -यत्र?] प्रेष्खलन्ती [ग: प्रेङ्खलन्ती]
विभाविता ।

ग्रन्थ्यादि स्पर्श संवित्यानाडयस्ता [ग: संवित्त्या-]
स्वरसंज्ञिता ॥ १५० ॥

संवित्तिश्च यथा तासां प्रवक्ष्यामि सुलोचने ।

प्रभ्राम्य स्फोटिका [ग: छोटिका] दद्या [ग: दद्यात्] कराग्रं
जानुमण्डले ॥ १५१ ॥

मांत्रा सा ताभिरर्काभिः प्राणायामोधमः प्रिये ।

द्विगुणो मध्यमोन्तिष्ठन्त्रिगुणः [गः -मोन्तिष्ठ स्त्रिगुणः]
परिकीर्तितः ॥ १५२ ॥

त्रिभिरेभिर संमूढेर्द्धारणा [गः संमूढैर्द्धा-] तु
स्मृता धमाः ।

द्विधा त्रिधा स्मृता मध्या उत्तमातु वरानने ॥ १५३ ॥

योगस्तहा तु विज्ञेया धारणाभिर्यथा तथा ।

अधमोहि तथा मध्यो [गः मध्ये] उत्तमः [गः उत्तमस्]
त्रिगुणोत्तरात् ॥ १५४ ॥

एषकाल विभागस्तु जपयोगस्य शोभने ।

समभ्यस्योद्यमारभय योगकालन्तु मुत्तमम्॥ १५५॥

प्राणंजिते यथा मात्रा मात्रा संवर्धतेजयात्।

२८५अ ग्) जितेशं प्राणजित् प्रोक्तोनादात्मत्वं ततोभ्यसेत्॥ १५६॥

शिवशक्ति तथात्मा च प्रत्यानीतेन्द्रियानि [ग: -णि] च।

तन्मयत्वं यदा यान्ति प्राणात्मा शोच्यते स्फुटम्॥ १५७॥

२८३अ ख्) प्राणः कालात्म पूर्वाश्च यदा कर्ण्यन्ति संविदा।

प्राणात्मा कालमेवासौ जितेतस्मिन्विजायते॥ १५८॥

यंत्र स्थिते प्रदेशे तु प्राणचैतन्य मण्डलम्।

तस्थस्थापन वृत्तेन प्राणकालेश्वरस्तु सः॥ १५९॥

नादीश्वरस्य संवित्ति पञ्चधापि प्रजायते ।

यथापिपीलिका देहे भ्रमन्ति स्पर्शवेदनम् ॥ १६० ॥

प्रतिलक्ष तथा कुर्यात्वङ्नाड्यावन्ति चेतनः ।

तस्थैकत्व स्वरूपेण धृतिर्यत्र प्रजायते ॥ १६१ ॥

कंठिन्यमेक [ग: काठिन्य-] वृत्तित्वा [ग: -त्वात्] सास्थिनाडी विलक्षयेत् ।

निमग्नोनान्य संवित्तितन्मज्जति [ग: संवित्तिस्-] सुभाविता ॥ १६२ ॥

जायते मज्जनाडीस्यान् मज्जना चेतनस्य तु ।

यद्वीजफल तद्भावि शून्याया [ग: शून्यया] लक्षसंविदम्

॥ १६३ ॥

करोति शुक्रनाडी सा एकलक्ष नियोजिता ।

तद्गतस्यात्म वृत्तेन समानत्वममेदता ॥ १६४ ॥

मेदनाडीति सा ज्ञेया प्रतिलक्षा श्रयस्य तु ।

पञ्चानामपि चैकत्वे त्यागे पूर्यस्वकं वलः [ग: वलम्] ॥ १६५ ॥

गमनं कुरुते न्यत्र पूयनाडीति सा स्मृता ।

प्रतिलक्षविधानेन देहे देहे व्यवस्थिता ॥ १६६ ॥

जया [ग: जपः] संवित्तिकालान्ते प्रत्येकन्तु प्रजायते ।

जितः सुगतिमां चेतां स्वेच्छाकारी च जायते ॥ १६७ ॥

एता [गः एताः] सर्वगतादेहे व्योमत्रय पदात्मिके ।

संशोध्य योजयेत् स्वेच्छेकर्मण्ये वा पराजितः ॥ १६८ ॥

नाडीवायु जपाद्योगी सर्वत्रैवा निवारितम् ।

फलंप्राप्नोति चा [गः च] क्लेषा तस्य वा तत्र संभवम् ॥ १६९
॥

अणिमत्व महत्वञ्च लघुत्वञ्च प्रजायते ।

प्राणायामं जितस्यापि वशित्वं यत्र कामता ॥ १७० ॥

धारणानां जपाद्योगी प्राकाम्यं प्राप्य सिद्धयति ।

रूपस्य परिवर्तञ्च नानाकर्म प्रसाधिना ॥ १७१ ॥

वर्णभवि सुखानाञ्च प्राप्तिर्ध्यान जपाद्भवेत् ।

यत्रयत्र स्थितं लक्ष [ग: लक्षं] तन्मयत्व जयात् प्रिये ॥ १७२ ॥

तदी शित्व वशित्वञ्च योगिने संप्रजायते ।

समाधि जपवृत्या [ग: -वृत्त्या] च सर्वकामा वसायिता ॥ १७३ ॥

समं यस्मात् तु सर्वत्र चेतोफलमिहैरितम् ।

योगकालाच्च योगीन्द्रो समभ्य स्थात्व शेषकम् ॥ १७४ ॥

व्याप्य तिष्ठेत वा त्यक्त्वा व्रजेत् तत्व त्वमात्मनः ।

एवं संक्षेपतो नाड्यः प्रोक्तायोग समायुताः ॥ १७५ ॥

२८५ब् ग्) करणादि [ग: ?] विभागेन वेध घट्ट प्रवेशनम्।

२८३ब् ख्) निरोधश्च महादेवि नियोगश्चाधुना शृणु॥ १७६॥

ऊकारं पादयो वामा प्रकृतिस्था [ग: -स्थाः] समातरः।

शक्तयः पुरुषं [ग: पुरुष] जेष्काय काराक्षर जङ्घयोः

[ख: जघयोः] ॥ १७७॥

वकार नियती रौद्री देवी युक्ता तु जानुगा।

कलाकालं लकारश्च काली चोरुयुगे न्यसेत्॥ १७८॥

मकारश्च तथा माया तत्वाख्या विकिराकला।

कटिदेशे न्यसे तन्तु उपरिष्टान्तु रश्मयः॥ १७९॥

विद्या क्षकार वलदानाभ्यव्जे तु निवेशयेत्।

हृस्थश्वर [गः हृत्स्थेश्वरः] सरेफन्तु मथनी च गभस्तयः

॥ १८० ॥

न्यसेद् वक्रे सदानाथं ऋक्षादि कृतविग्रहम्।

दमनी सर्वभूतानां परतस्तु शिवं न्यसेत्॥ १८१ ॥

मनोन्मनी तु ताराद्या अघोरपुर संश्रया।

नव क्षेत्रा तथा यागादूती देव्यस्तदीश्वराः॥ १८२ ॥

न्यस्त्वा सदेव देवेशे सकृत् सृष्ट्या वरानने।

भोगेच्छुनां यतो न्यासं सृष्ट्यास्त्रैष्ट न संह्यतौ॥ १८३ ॥

मुक्तामोक्षं [ग: मुक्तामोक्षं] वरारोहे
फलोभयमथोभयोः ।

कालाग्न्यादि समारभ्य प्रतिधर्म विवक्षया ॥ १८४ ॥

हेयोया [ग: हेयोप्य?] देय वृत्या [ग: वृत्त्या] तु विलिमाद्यो
गमभ्यसेत् ।

तत्वोच्चारान्तथा [ग: -रांस्] विन्दु [ग: विन्दुं] नादविन्दुं ततो
वला ॥ १८५ ॥

तद्विन्दुं निष्कलं शान्तं परं परमनामयम् ।

निष्कलङ्ककलातीतं निःप्रञ्च [ग: निष्प्रञ्चं] परंशिवम्
॥ १८६ ॥

ताल्वोष्ठपुटयोगेन उचारं सकलात्मकम् ।

तद्विरामै [ग: -मैः] स्मृतो विन्दुस्तस्मान् नादात्मतां व्रजेत् ॥ १८७ ॥

तद्विरामे पुनर्विन्दुः [ग: -न्दुं] ध्वनिस्तस्माद् विजृंभते ।

तद्विरामा तु चिन्मात्रा स तु विन्दुस्तु भैरवि ॥ १८८ ॥

प्रवृत्तिर्ज्ञान जातस्माच्छिवान्ता या मनोविना ।

संवित्तिनिष्कला साहि शैवी सर्वार्थदायिका ॥ १८९ ॥

अध्वान्ते च जपस्यायं विभागस्तु शिवार्थदः ।

पूरकं सर्वभूतस्थं खेचरत्व [ग: खेचरस्त्व] जिगीषिणाम् ॥ १९० ॥

अध्वान्ता हृतचेतेन [ख: -चैत *] प्रति तत्वगतं पदा।

समादिष्टं [ग: -दिष्टं] जपेनेदं भूतिदं

मंत्रवादिनाम्॥ १९१॥

जपसंख्या विधानज्ञस्तुट्यादिभिविलक्षितम् [ग: -

भिर्विलक्षितम्]।

कुंभकं सर्वभावस्थं जपं पुष्टिविवर्धनम्॥ १९२॥

शिवेगतं समानीतं मूलविन्दौ यथास्थितम्।

ऊर्ध्वाधगति निर्मुक्तं तं स्थाने कुंभकन्तु तम्॥ १९३॥

रेचकेन जपेन्मंत्री प्रवेश [ग: -शे] निर्गमात्मकम्।

विन्दुस्थं सर्वभूतस्थं क्रियाकाल गुणात्मक [ग: -कं] ॥

१९४ ॥

२८४अ खू रेचके ह्यधमा सिद्धिर्मर्त्यलोकादि साधिका ।

निग्रहानुग्रहश्चैव कर्म तत्र प्रसिद्धयति ॥ १९५ ॥

२८६अ गू पूरके मध्यमा सिद्धिः कुंभके चोत्तमा तथा ।

सशव्द जपयोगेन क्रूरकर्म प्रसाधने ॥ १९६ ॥

चतुर्विधं जपाख्यातं कालज्ञस्य यशस्विनि ।

एतज्जप विहीनास्तु कालयोगे विवर्जिता [ग: -ताः] ॥ १९७ ॥

नतु सिद्धयन्ति देवेशि प्रयत्नेनापि साधकाः ।

अपिवर्षसहस्रन्तु भ्रमन्ते ज्ञानमोहिताः ॥ १९८ ॥

पञ्चमं गुण भूपिष्ठं हंसच्छायात्मकं जपम् ।

जाग्रत् स्वप्न सुषुप्तञ्च भुञ्जानोमैथुने रतः ॥ १९९ ॥

पूर्वेव तु समाख्यातो लक्षणे हंसगो यथा ।

सदाकालं नियुक्तात्मा तस्थो तस्थो हि सिद्धयति ॥ २०० ॥

कुंभकोत्तम सिद्धयर्थं जपः प्रोक्तो हि सर्वदा ।

कूटस्थं सर्वगं भावं सर्वाध्वान्तर्गतं तहा ॥ २०१ ॥

परापरविभागस्थं रेचकादि विकल्पितम् ।

जपं योगं [ग: योग] समोपेतं पश्चाद् विविधि साधकः ॥

२०२ ॥

पशुयागात् परासिद्धि रधमा मध्यमोत्तमा ।

सा च कूटगता विद्धियोनि [गः विद्धिर्-] भूतं कलात्मकम् ॥

२०३ ॥

एवं ज्ञात्वा तु मंत्रज्ञो रसास्वादन तत्परः ।

वियोगोक्षय योगेषु कालाख्यं त्रितयं त्रिभिः ॥ २०४ ॥

तीव्र प्रेरण सौम्येन दक्ष मध्येतरेण च ।

प्रतिग्रन्ति नियोगेन हंसच्छायात्मकेन च ॥ २०५ ॥

कालस्तु कथितो देवि त्रिविधं त्रिगतीभवाम् ।

पदं सर्वगतं ह्येतद् भैरवस्य महात्मने ॥ २०६ ॥

कलापञ्चक संयुक्तं जपयोग विधौ स्थितम् ।

एवानेन पशुं चक्रे क्रीडाकर्म यथा शुखम् [गः सुखम्] ॥
२०७ ॥

पिचुतंत्रे समुद्दिष्टं यामले ब्रह्मयामले ।

भैरवाख्यषु [गः भैरवाख्येषु] तंत्रेषु प्रयोगं गोपितं
मया ॥ २०८ ॥

सम्याचार हीनानां आज्ञाभङ्गगतान्तथा ।

नदेयं दुष्टवुद्धीनां पुत्रस्यापि नदापयेत् ॥ २०९ ॥

न च स्नेहानुलोभेन न च द्रव्येन तृष्णया ।

वामाचारस्य मंत्रज्ञ अद्वेत कृतभाविनः ॥ २१० ॥

अनन्य देवता सङ्गे ह्यविकल्पे ह्यलोलुपे ।

नारीचर्य समुत्थाने मंत्रमुद्रावगूहके ॥ २११ ॥

त्रिविधेपि त्रिधावारे [ग: -वा?रे] दातव्यन्तु वरानने ।

नादीयुक्तो भवेद् यो हि चरुभुक् सौ [ग: शौ] चरात्मवान् ॥ २१२ ॥

चर्यायुक्तस्तु तालात्मा मंत्रमुद्रावगूहकः [ख: मंत्र *

*?] ।

२८४ब् ख्) आराधकस्तु देवेशो सर्वैः सर्वात्मक स्मृतः ॥ २१३ ॥

तदा तस्य प्रदत्तेत् [ग: प्रदत्ते] तु सिद्धिर्भवति साश्वती [ग: शा-]

।

अन्यथा यो ददेत् [ग: ददेन्] मोहाम्रियते [ग: मोहान्-] ह्यचिरेण तु

॥ २१४ ॥

न च सीद्धिर्भवेत् तस्य ईहते मृगतृष्णिका।

इति पिचुमते द्वासप्ततिमः पटलः ॥

२८६ब् ग्] भैरव उवाच

अतः परं प्रवक्ष्यामि कलाकलन संख्यया।

येन सिद्धिर्भवत्यासु [ग: -शु] साधकेव्द [ख: साधके *?]

सुपोषिते [ख: ?] ॥ १ ॥

ब्रह्मभङ्ग्या न्यसेत् [ग: न्यसेन्] मंत्री साधकः

सिद्धिसाधने ।

अनादानाद रूपा तु शुद्धा शान्ता तथापरा ॥ २ ॥

निरञ्जनेति देवेशे कला वै शंप्रकीर्तिता ।

समस्त कूटयोगेन वक्राङ्गसहितेन च ॥ ३ ॥

मध्यपूर्वन्तथा दक्ष अप्योत्तर गनान्तगा [ग: गणान्तगा] ।

शिवोत्सङ्गा तु पूर्वादि वर्णरूप समन्विता ॥ ४ ॥

सुरूपिण्या महाभागा रूपसान्तान्त योजिताः ।

भैरवस्य वलापञ्च [ग: कला-] अष्टत्रिंशकलात्मनः ॥ ५ ॥

मूध्नपञ्चक [ग: मूर्ध्न-] योगस्था मूर्ध्नादिदिसि [ग: -

दिशि] संस्थिताः [ग: -ता] ।

शिवान्त [ग: शिवान्तः] संस्थिता योज्या कर्णिकांवुज योजिताः

॥ ६ ॥

कूटस्थं सर्वमित्युक्तं न च शक्ति गुणान्वितम् ।

ॐ ह्क्ष्म्ल्व्र्यू-औं [ग: ह्स्क्ष्म्ल्व्र्यू-औं] शान्तायै नमः ॥

ॐ ह्क्ष्म्ल्व्र्यू-औं [ग: ह्स्क्ष्म्ल्व्र्यू-औं] शुद्धायै नमः ॥

ॐ ह्क्ष्म्ल्व्र्यू-औं [ग: ह्स्क्ष्म्ल्व्र्यू-औं] नादरूपायै नमः ॥

ॐ ह्क्ष्म्ल्व्र्यू-औं [ग: ह्स्क्ष्म्ल्व्र्यू-औं] अनादाये [ग: -यै] नमः ॥

ॐ ह्क्ष्म्ल्व्र्यू-औं [ग: ह्स्क्ष्म्ल्व्र्यू-औं] निरञ्जनायै नमः ॥

पञ्चैता [ग: -ताः] कूटनाथस्य कलाकलनसंख्यया [ख: -
न * *?या] ।

स देशानपदावस्था कथितान्याश्च विद्यया ॥ ७ ॥

द्यक्षरा चक्रपूर्वास्तु स्वरूपेशास्तु मध्यगा ॥ ८ ॥

भैरवन् देवदेवेशं पञ्चमन्त्रशरीरिणम् ।

शान्तास्पर्शा जया योगा रक्ता रूपा कलावरा ॥ ९ ॥

चण्डेशव्दा गतेशेन देवा मध्यस्थ योजिता ।

वक्राङ्गयोग योगेन पूर्वादि चतुरांवुजे ॥ १० ॥

पूर्वे चतुर्दले योज्या कलाशान्तादि का प्रिये [ख: ?] ।

ॐ चण्डे वक्रभैरवाय नमः ॥

ॐ चण्डे रक्तायै नमः ॥

ॐ चण्डे स्पशायै नमः ॥

ॐ चण्डे जयायै नमः ॥

ॐ चण्डे योगायै नमः ॥

वक्राङ्गनेन्त्र विन्यासं स्वर वर्णनियोजनात् ॥ ११ ॥

रक्तानन्तु समाख्यातं कलानान्तु चतुष्टयम् ।

भैरवस्य शरीरे तु पूर्वादि वदनात्मकम् ॥१२ ॥

ज्वालानला तथा रौद्रा अजाज्वालीनलोद्भवा ।

हुता वहाकार्त [खः वहा * त्त] वीर्याघोर भैरवसंयुता ॥

१३ ॥

२८५अ खृ] कराला या कलाष्टौ तु दक्षिणेष्ट दलांवुजे ।

वक्रनेत्र समायुक्ता पञ्चाङ्गा स्वार्ण भेदिता ॥ १४ ॥

ॐ काँ पाँ अघोराशाय [गः अघोरीशाय] नमः ॥

ॐ काँ पाँ करालायै नमः ॥

ॐ काँ पाँ ज्वालायै नमः ॥

ॐ काँ पाँ अनलायै नमः ॥

ॐ काँ पाँ रौद्रायै नमः ॥

ॐ काँ पाँ अजायै नमः ॥

ॐ काँ पाँ ज्वालिन्यै नमः ॥

ॐ काँ पाँ अनलोद्भवायै नमः ॥

२८७अ गृ ॐ काँ पाँ हुतवहायै [ख: हुतव *?यै] नमः ॥

ॐ काँ पाँ कार्तवीरायै नमः ॥

एताः श्रीरगाः शंभो हृदाद्यैरष्टभिस्थिता ॥ १५ ॥

नामगोत्र समायुक्ता पूज्याराध्य विपश्चितैः ।

तथाप्ये संस्थिता [ग: -ताः] पूज्या [ग: पूज्याः] कलाष्टौ

सद्यभैरवाः ॥ १६ ॥

युक्ता [ग: युक्ताः] स्वार्णविभागेन वक्त्रनेत्राङ्ग संयुताः

।

ऐद्री [ग: ऐन्द्री] च स्थिरिणी चैवस्था वराचाचला तथा ॥ १७ ॥

कठिना भद्रपीठा च स्थिरा वसुमती तथा [ग: ?] ।

ॐ स्वां हां सद्यभैरवाय नमः ॥

ॐ स्वां हां चण्डाज्यै [ग: चण्डाक्ष्यै] नमः ॥

ॐ स्वां हां ऐन्द्र्यै नमः [ख: न *?] ॥

ॐ स्वां हां स्थिरिण्यै नमः ॥

ॐ स्वां हां स्थावरायै नमः ॥

ॐ स्वां हां अचलायै नमः ॥

ॐ स्वां हां भद्रपीठायै नमः ॥

ॐ स्वां हां स्थिरायै नमः ॥

ॐ स्वां हां वसुवत्यै नमः ॥

तथोत्तरे न्यसेद् देव्य [ग: देव्या] उच्छुष्मा [ग: ऊच्छुष्मा] या
विभेदिता ।

आपा आप्सुवती [ग: अप्सु-] चैव अंवुदीनी रदी तथा ॥ १८ ॥

द्रविडी [ग: -णी] द्राविडी [ग: -णी] चैव शंखिनी शशिनी तथा ।

वैष्णवी सौमिनी चैव क्लेदिनी च प्रवाहिनी [ग: -णी] ॥ १९ ॥

वेगवती [ख: -व *] समाख्याता [ख: * माख्याता]

कलात्र्योदश संख्यया ।

वाम भैरवसंयुक्ता पद्मे त्र्योदश कच्छदे ॥ २० ॥

ॐ लिं निं वाम भैरवाय नमः ॥

ॐ लिं निं महोच्छुष्मायै नमः ॥

ॐ लिं निं आपायै नमः ॥

ॐ लिं निं अप्सुवत्यै नमः ॥

ॐ लिं निं अंवुद्यै नमः ॥

ॐ लिं निं नीरद्यै नमः ॥

ॐ लिं निं द्रवडी [ग: द्रविण्यै] नमः ॥

ॐ लिं निं द्राविन्यै [ग: -ण्यै] नमः ॥

ॐ लिं निं शंखिन्ये [ग: -न्यै] नमः ॥

ॐ लिं निं शशिन्यै नमः ॥

ॐ लिं निं वैष्णयै नमः ॥

ॐ लिं निं सौमिन्यै नमः ॥

ॐ लिं निं क्लेदिन्यै नमः ॥

ॐ लिं निं प्रवाहन्यै [ग: -ण्यै] नमः ॥

ॐ लिं निं वेगवत्ये [ग: -त्यै] नमः ॥

एवमेतास्तु यष्टव्या वक्रनेत्राङ्ग संयुताः ।

महोच्छुष्माकला देवि गुह्याङ्गेषु च विन्यसेत् ॥ २१ ॥

चण्डाख्या च तथा देवि सद्याङ्गेषु व्यवस्थिता [ग: -ताः] ।

भुक्तिमुक्तिकरा ह्येताः पशुसाधन सिद्धिदाः ॥ २२ ॥

दूतिभिर्योगिभिश्चैव मातृरस्ता वसानिका ।

२८५ब् ख् क्षेत्रयां [ग: -या] गनवोपेताः पालारुद्रास्तु

संयुताः ॥ २३ ॥

अष्टत्रिंशकला देवि पञ्चब्रह्म समन्विता ।

पूजयेत् परमेशानं यावदस्त्रा वसानिकम्॥ २४॥

प्रयत्नेन तु यष्टव्यं साध्येचात्मनि विग्रहे।

लक्षलक्षण संयुक्ता ध्यानलक्षाक्षरै स्थिता॥ २५॥

स्वपान संस्थिता राध्यास्व यागेनैव पूजिताः।

अष्टत्रिंशकलोपेता वर्णसंख्या वसानिका॥ २६॥

पञ्चब्रह्म कलोपेता इज्याध्येया प्रयत्नतः।

२८७ब् ग्] सर्वाधव [गः ?] सक्तिसंयुक्ता पृथग्भेदेऽपि योजयेत्॥
२७॥

कलाभेदैकयागेन एकवीरेण वा यजेत्।

समस्तकलयोगेन एका वा देवता प्रिये ॥ २८ ॥

पञ्चभैरवसंयुक्तं देवता पञ्चकं स्फुटम् ।

नवात्मैक विभिन्नं वा मातृकाक्षरजन्तथा ॥ २९ ॥

भेदं कृत्वा यजेद् यागं भैरवत्व प्रसिद्धये ।

सर्वभेदसमायुक्तं कथितं ब्रह्मयामले ॥ ३० ॥

लक्षे पादाधिके देवि नवतत्वेश्वरेश्वरं ।

अत्र संक्षेपतः सर्वं सूत्र युज्या [गः युक्त्या?] प्रकीर्तितम् ॥ ३१ ॥

यस्तु पूजयते नित्यं ज्ञात्वा सम्यग् विधानतः ।

तस्य सिद्ध्यन्ति वै देव्य अचिरात् साधकस्य तु ॥ ३२ ॥

गुह्यमेतत् [ग: -मेतन्] महाभागे कूटभेदं शिवात्मकम् ।

प्रख्यापितं विशेषेण शुभ तत्वकलाध्वरम् ॥ ३३ ॥

सर्वसन्देहजन्देवि किमन्यत् [ख: किम *?] परिपृच्छसि [ख: *?रि-] ।

इति ब्रह्मयामले त्रिसप्ततिमः पटलः ॥

देव्युवाच

योगो यः परमेशस्य सूचितस्तु त्वयाध्वरे ।

न च तस्य मया ज्ञातं विधानं मंत्रसंयुतः [ग: -तम्]

॥ १ ॥

रूपकं योगिनीभिस्तु सहितं सिद्धिकारणम् ॥

कथं वा नायकत्वेन प्रोक्तं विघ्नेश्वरं विभुः [ग:
विभुम्] ॥ २ ॥

साधनञ्च यथावस्थं निर्विघ्नकरणं तथा ।

यथा साधितमात्रेण [ख: *?धित-] भवते तद्भूवी [ग:
तद्भू?वी] हि मे ॥ ३ ॥

भैरव उवाच

अतः परं प्रवक्ष्यामि हैरम्भं [ग: हेरंवं] भैरवं
परम् ।

येन सिद्धिर्भवत्याशु यष्टेन तु विशेषतः ॥ ४ ॥

शिवतत्वन्तु यान्नम स्वरूपं शिवकारणः [ग: -णम्] ।

नाशिवत्वस्य तद्देवि निमित्तं परिकल्प्यते ॥ ५ ॥

शिवत्व व्यक्तये चैतद् यथा स्यान्नायकीतनुम् ।

समाश्रित्य प्रजायेत तथा वै [ख: ?] *?वदाम्यहम् ॥ ६ ॥

२८६अ ख्) एक एव विभुत्वेन माया तत्वा श्रितात्मवान् ।

मलेच्छा तु प्रभावाच्च तत्व बन्धनिरोधनात् ॥ ७ ॥

स्वभावा नायकत्वेन पुंसां स्वेनैव तेजसा ।

भाति तद्वत् सुरूपित्वमुपचारात्मकं विभोः ॥ ८ ॥

प्राप्तभोगान [ग: -गानु] संहानाङ्किञ्चिस्यात् [ग: -स्यान्]

मलसंयुतम्।

न प्राप्तो [ग: प्राप्तः] प्रोच्यते विघ्नं यावत् स्यात् तत्क्षयो [ग: तत्कृषो] भवेत्॥ ९॥

तपसादि जपाद्धोमात् संयमा नियमा तथा।

योग [ख: *?ग] ज्ञानाथ वाह्ये वा विघ्ननासो भवेत् सदा॥ १०॥

उपायोपधिरूपो [ग: -योपाधिरूपो] वा नायकत्वेन कथ्यते।

मोहकत्वतनुं माया निरोधो मलकारणम्॥ ११॥

आश्रयं सर्वतत्वाच्च रूपभेदो [ग: -दः] शिवस्य तु।

दर्पणस्थं यथा विंवंस्वकं दृश्ये [ग: दृश्येद्] यथा

कृतिम्॥ १२॥

तथैव विघ्न संपृक्तैस्तद्रूपं नायकं द्वसौ [ग: दृशौ]।

एकार रूपकाशी नमा मन्त्रेण गति [ग: गतिः] क्रिया॥ १३॥

२८८अ ग्] दृष्टोरञ्जन वृत्तौ च रेफ * * र्मामलादिभिः [ग:
र्ममला-]।

सन्तापे च विमोहे च अंवशाव्दस्तु सुव्रते॥ १४॥

मायात्मक स्वरूपेण गीतोस्यादध्व वेदिभिः।

भैरवत्व [ग: -त्वं] सुघोरत्वं पुंसां संमूढ
चेतसाः [ग: -साम्]॥ १५॥

तदेव विपरीतं स्या [ग: स्याद्] दीप्तं क्षीणासयं [ग:

क्षीणाक्ष?यं] प्रिये ।

हेरम्भ [ग: हेरंव] भैरवन्देवं भैरवं भूतिभोगदं

॥ १६ ॥

विघ्नानामीश्वरं ह्येतत् तेन विघ्नेश्वरं मतम् ।

लक्षणं संप्रवक्ष्यामि सर्वसिद्धिप्रदायकम् ॥ १७ ॥

आदिमन्तु [ख: * दि-] द्वितीयस्य तृतीयं यत्प्रकीर्तितः [ग: -तम्] ।

व्योमासनं महावीजं सृष्टियुक्तं महात्मने ॥ १८ ॥

कतृतीयं सरुद्रन्तु द्विसप्तमस्य रान्वितम् ।

विन्दुयुक्तं स्मृतं मध्ये आदिमन्तु तृतीयकम् ॥ १९ ॥

तथा स्वरूप विन्यस्तां नामयुक्तं प्रयोजयेत् ।

चतुर्थन्तु विभक्तिस्थं देवं हेरंभ [ग: -व] भैरवम् ॥ २० ॥

दशाक्षर स्मृतं ह्येवं प्रणवे [ग: प्रणवै]
नैकादशाक्षरम् [ग: * कादशा-] ।

षडयोगिनिवृतं [ख: षडयोगिनि * *?] देविस्वयं विघ्नेश्वरं
विभुः [ग: विभुम्] ॥ २१ ॥

विघ्नेश्वर [ग: -रः] स्वयं साक्षा [ग: साक्षाद्] यष्ट्वा
विघ्नैर्नवाध्यते ।

रूपकं संप्रवक्ष्यामि गणेन्द्रस्य गणांविके ॥ २२ ॥

वामना कारकं पीनं वृहज्जठर मण्डलः [ग: -लम्] ।

लंवशुण्डं वृहत्कुंभं दशवाहुं चतुर्मुखम्॥ २३॥

श्यामवर्ण सुरक्ताद्यं [ग: -ख्यं?] गेज्जमाला विभूषितः

[ग: -तम्]।

सिन्दूरित शिरोद्देशं [ग: शिरोदेशं] गिरिमृद्रक्त विग्रहम्॥ २४

॥

मृगनाभिविचित्राङ्गं * * दालक्तक सोभितम् [ग: शो-]।

२८६ब् ख्) दन्त कन्दधरं देवं कपालभृतलडुकम् [ग: -

लड्डुकम्]॥ २५॥

परशुञ्चाक्ष सूत्रञ्च वरदं चाभयं तथा।

अङ्कुशन्तु ध्वजं हस्तै [ग: हस्तैः] खड्गमन्ये च खेटकम्

॥ २६॥

प्रलयांवुद सीत्कार एकदन्तं [ग: मे-] त्रिलोचनम्।

पद्मपीठ स्थितन्देवमर्धचन्द्रा सनास्पदम्॥ २७॥

महामूषक प्रेतोध [ग: -धः] स्थितन् देवं विराजते।

नागयज्ञोपवीतञ्च कटका भरणमेखलम्॥ २८॥

इत्थं रूपं * * * ध्यात्वा साधको विगतामयः।

आसु [ग: आशु] सिद्धिमवाप्नोति ध्वस्तविघ्न सुसञ्चयः॥ २९॥

पूजा च प्रथमं कुर्याद् योगिनी सहितस्य तु।

षट्भि [ग: षड्भिः] संरशितो मंत्री विघ्नेशैर्नाभिभूयते

॥ ३०॥

जया च विजया चैव कुर्दना घुर्घुषा तथा।

विडांली [ग: विडाली] भद्रकाली च योगिन्यो देव पूजिताः ॥ ३१ ॥

योगिनीनां तथा मंत्रा [ग: मंत्राः] सिद्धि हेतौ [ग: हेतौः]
सलक्षणा।

कथयामि स्वरू * * यथा संसिद्धिकारणः [ग: -णम्] ॥ ३२ ॥

आशा तृष्णाधृतिश्चैव मलेच्छाराग संभवा।

२८८ब् ग्] प्रकृतिश्च समाक्याता गुणभेदेन सुव्रते ॥ ३३ ॥

मुक्त्वामोक्षं सदा यासा गोरक्षादि परिश्रमे।

मरणापि हि जीवासान जहाति सदाणवः ॥ ३४ ॥

जितातया जया तेन सा शक्तिः परमांविकाः [ग: -का] ।

जातमात्रानुसङ्घस्य स्वार्थ भोगान्वितार्थिना ॥ ३५ ॥

अत्यन्ता सद्विकल्पेन सं * * * [ख: * * * *] प्रवर्तते ।

रत्नानि धनदेहान्धा न मुमोक्ति विपत्स्वपि ॥ ३६ ॥

विजिता तृष्णया तेन विजयानायिकी तु सा ।

दुःखेपि हि स्वसंवित्त्यासु खंभाव्य विचेष्टते ॥ ३७ ॥

अणवोस्यात् [ख: -स्यान्] महानन्दे कुर्दती वसुखेच्छया ।

निरोधिता तयाशक्त्या नायकस्य महात्मया ॥ ३८ ॥

सुखै कर सभावेन भुक्तेनापि हि देहिनः ।

प्रत्युद्यतारनेकार्थं [ग: -ता अने-] भोगमोक्षयते [ग: भोगस्य क्रियते] य * * [ख: * * *] ॥ ३९ ॥

* * * रोमसच्छन्नाघुर्घुषा [ग: -च्छद्माघुर्घुषा] सा गणांविके ।

चापल्यराग भोगार्तांवु भुक्षामां करोति या ॥ ४० ॥

अप्राप्यानान्तु भोगाना [ग: -नां] क्रमाया ह्युद्यमः क्रिया ।

तिरस्काराय कुरुते विडाली सा विडालवत् ॥ ४१ ॥

अनुसंघं क्रियामुक्तं जगत्यस्मिन् विसर्पितम् ।

अरूपकन्तु यद्वस्तु रूपभावात् प्रदर्शिनी ॥ ४२ ॥

क्षीणकालाश्रयेप्येषा नाक्षीणेव प्रस * * [ख: प्र * * *] ॥ ४३

॥

२८७अ ख्) रुद्रत्वे काल मोहाभ्यां भद्रकाली वरानने ।

एवं करण षट्केण [ग: -न] मलमायाश्रये विभुम् ॥ ४४ ॥

नायकं रूपमास्थाय तत्मलानां [ग: तन्-] विमोचयेत् ।

कथं यथाप्रसाध्यन्ते नराक्या ग्रहणादिभिः ॥ ४५ ॥

कर्मसत् कीर्तनाद्यैस्तुत तथैशो नायकाश्रया ।

कतृतीयं हकारस्थं षट्दीर्घश्वरसंयुतम् [ग:

षड्दीर्घस्वर-] ॥ ४६ ॥

अङ्गजाति क्रमोपेतं षण्णां मन्त्रगणं क्रमात्।

तदेव [ख: तदे *] * * णन्देवि देवीनान्नायकस्य च॥ ४७॥

कर्तव्यं समुदायस्थ प्रत्येकं ताश्चशक्तयः।

नामतो गोत्रतश्चैव अङ्गत्वेनैव कीर्तिताः॥ ४८॥

वक्र वक्ष तथा नाभि कटिजानु पदस्थिताः [ग: पदे-]।

अङ्गभूतात्म देवस्य न्यस्त्व विघ्नप्रमर्दनम्॥ ४९॥

षट्कर्म गुणभूयिष्टा जातिषट्कसमन्विताः।

स्वपदाक्षर नामस्था [ग: -स्थाः] स्वजातिगुण लक्षणाः॥ ५०
॥

मुद्रामण्डल विन्यस्ता पूजिता * * * * भाः ।

महापल प्रियन्देव मलिलौ लुपमेव च ॥ ५१ ॥

नित्यङ्गुलगुलमंत्रेण [ग: -लुगुलुमंत्रेण] स्थापितव्यं
प्रयत्नतः ।

सर्वास्ताः [ग: सर्वास्तास्] तारका युक्ताः [ग: युक्ता]
नमश्चान्ता [ग: -न्ताः] प्रकल्पयेत् ॥ ५२ ॥

सितादि कुसुमै ह्यद्यैः स्ववर्णविहितैः शुभैः ।

२८९अ ग्] सितादि चतुरोवर्णा हरिता पञ्चमी स्मृता [ग: -ताः] ॥ ५३
॥

षष्ठि च कद्रुवर्णाभा तथा पुष्पविलेपनम् ।

सर्वैर्मध्यस्थितं पूज्यं नायकं नायके * * ॥ ५४ ॥

अभावाच्चैक वर्णैस्तु न तु मिश्रैः कदाचनः [ग: -न] ।

शमीपुष्परधो पुष्पै रजस्वला रजान्वितैः ॥ ५५ ॥

शशियुक्तैः प्रपूज्येत ईहितार्थ प्रसिद्धये ।

अग्निकार्य विधाने च तथा लक्षणसंयुता ॥ ५६ ॥

कामिकैस्तु यजेद् द्रव्यैर्यथा संभवकल्पितैः ।

रूपतत्व विधिश्चैव यष्टव्या साधकेन तु ॥ ५७ ॥

प्रकृतिः पुंगलोमाया इच्छा चैव क्रिया तथा ।

सर्वाध्व * * ता देव्या नायकस्तु तदीशिता ॥ ५८ ॥

भद्रकाल्यादितो ह्येतात् [ग: -तत्] कथितं रूपलक्षणम् ।

तत्वानां प्रतिभागन्तु क्रमाध्वगति कल्पितम् ॥ ५९ ॥

अर्वाकर्म प्रवक्ष्यामि कामिकार्थ समुद्यताम् ।

यद् यथा कर्मवर्णन्तु तद्द्रव्यं पुष्पमेव च ॥ ६० ॥

रसभावस्तथा कार [ग: कारं] शादिशा [ग: -सा] तु वरानने ।

शक्ति [ग: शक्तिः] शक्तिमतोन्तेन विधानेनार्चयेद्धुने ॥ ६१ ॥

नारी चर्याव्रती तद्व * * * यञ्च भैरवि ।

२८७ब् ख्) चरेद्व्रतं शुगुप्तात्मा [ग: सु-] ग्रामधर्म

समानधी [ग: -धीः] ॥ ६२ ॥

अद्वैता [ग: -ती] चा प्रमादा [ग: -दी] च निर्लज्जोनिघ्रणः [ग: -निर्घणः] सदा ।

वो कर्णोत्मत्तकचैव [ग: कर्णोन्मत्तकचैव]
भृङ्गराजस्तथैव च ॥ ६२ ॥

अधोपुष्पी शशीपुष्पं रध्यापुष्पैकतः कृतम् ।

अर्चयेद् देव विघ्नेशं योगिनी सहितं शुचिः ॥ ६३ ॥

महापलास वै नित्यं होमभक्षवलिक्रिया ।

शक्तिचित्तेक [ग: शक्तिचित्तैक] सन्तानो षडङ्गी कृतविग्रहं [ग: कृतं विग्रहः] ॥ ६४ ॥

सर्वावस्थेन चेष्टेन सप्रपञ्चेन चेतसा ।

क्रियाज्ञान विशुद्धात्मा ब्रह्मचर्यन्तथा यमः ॥ ६५ ॥

वामाचारेण मंत्रज्ञो हंसच्छा येन नित्यशः ।

अनेनविधिना मंत्री यत्नेन च जपङ्कुरु ॥ ६६ ॥

यथा जातेन मंत्रज्ञाः पूजाकर्मवलिक्रिया ।

दीक्षाकर्मञ्च कुर्वीत विघ्ननाशा पदे [खः ?] ॥ ६७ ॥

* * * * विभागेन पूर्वसूत्र क्रमं तथा ।

विशेषा [गः -षाः] शक्तिसंघस्य गुणषट्कविशोधना ॥ ६८ ॥

विनायकनिरोधाश्च शोध्या यावलयान्तिकम् ।

अभिषेक समस्ताध्व ध्वस्तविघ्नं प्रदापयेत्॥ ६९॥

एवं विशोधितो देवि नायकास्त्र विधौ प्रिये।

साधयेत् साधकोद्धार यत् फलन्तु मनेप्सितम्॥ ७०॥

अन्यथा तु कृतं व्यर्थं नायकैस्तन्नि * * *।

* * * * * * * * * * * * * विशोधयेत्॥ ७१॥

पूजये [ग: -येच्] च सदा यागागुरुपङ्क्त्याग्रसंस्थिताम् [ग: यागाद्- -स्थिता]।

२८९ब् ग्] अधुना संप्रवक्ष्यामि कर्मसंघमहोदयम्॥ ७२॥

विनायकस्य देवेशि शिष्टं मंत्र पदोद्भवम्।

न योजयेद्धमे यस्मात् फलार्थी गणनायकम्॥ ७३॥

कृत विद्यस्ततः क्रीडाकर्मं मंत्रपदं भवेत्।

???????गणशव्दं समुच्चार्य तदन्ते व समे तुतम्॥ ७४॥

साध्यनाम * * मध्येक्रौञ्चसारससंयुतम्।

शक्रोपि वशमायाति योऽपिहन्तुं समुद्यतः॥ ७५॥

गहगहेति च यत् प्रोक्तं सगृह्यति [गः संगृह्येति] ग्रहेण वै।

गुलुद्विधा तथा प्रोक्ते अत्यन्तग्रहपीडितः॥ ७६॥

गुमुद्विधा प्रयुक्तेन शीघ्रमाकर्षणं परम्।

गृह्य गृह्य च यत् प्रोक्तं नटस्याद्रंगहारकम्॥ ७७ ॥

कर्णचक्षुस्तथा वस्त्रहरेदाभरणानपि।

गृह्वस्त्वेन [ग: गृहस्त्वेन] न मंत्रेण प्रयोगमिदमाचरेत्॥
७८ ॥

स्मासानाङ्गारमादाय [ग: श्मशानाङ्गार-]
आत्मशुक्रेण भावयेत्।

२८८अ ख्] अनामा मृतसंयुक्तं अलिनासह भावितः॥ ७९॥

उन्मन्तरससंयुक्तं तिलकं तेन कारयेत्।

यं यं मनसि कृत्वा वै लभते तच्च तत्क्षणात्॥ ८०॥

सत्यमेतत् [ग: -मेतन्] महादेवि न कथ्यं यस्य कस्यचित्।

भैरवे तु न ये चैव सौक्रे [गः शौक्रे] चैव तु साधकः ॥ ८१ ॥

महासंमोहवीणे च गुह्यतन्त्रे सुदुर्भलम् ।

ब्रह्मयामलतन्त्रे तु विद्यापीठे तु भाषितं ॥

कथितं पिचुतन्त्रे तु प्रयोगमिद [गः -मिदं] दुर्लभम् ।

गूहितव्यं प्रयत्नेन समयाचारपालकः ॥

नदेयं दुष्टवुद्धीनां पर्यायं यस्यकस्यचित् ।

गुग्गुलुघृतसंयुक्तं [गः गुग्गुलुर्-] सिद्धिकर्मसु होमयात् ॥
८२ ॥

गुग्गुलुं शशिसंयुक्तं पञ्चाङ्गमलमेव च ।

साध्यधूलि समायुक्त [ग: -युक्तं] निसिचारेण [ग: निशि-]
होमयेत्॥ ८३॥

निष्टीवं [ग: निष्ठीवं] चात्मशाशिना [ख: चात्म * * *?]
अजामृत [ख: ?] समन्वितम्।

सिध्यर्थं होमं कर्तव्यं अलिना सहसंयुतम्॥ ८४॥

तत्क्षणाद् वशमायान्ति यावज्जीवन्ति किङ्कराः।

अर्कपत्रं पिचोः पत्रं दुर्भया पुष्पमेव च॥ ८५॥

महाक्ष्मापलसंयुक्तमलिनासह होमयेत्।

दुष्टयोगिनि कायस्य सिद्धिहेतौ महोदयम्॥ ८६॥

सर्वास्ता वशमायान्ति किं पुनः प्राकृता स्त्रियः] ।

पय [ख: * *] * * * * * * * * * * * * * * ॥ ८७ ॥

* * मेतन् [ख: * *] निशायान्तु [ख: * * * *] विघ्नराजेश्वरेण

[ख: * * राजेश्वरेण] तु ।

तत्क्षणात् सर्वसत्वेभ्यो वल्लभत्वं प्रजायते ॥ ८८ ॥

प्रियङ्गुनाग पुष्पञ्च शिशिनात्मसमायुतम् ।

होमयेत निशोसाध्यन् तत्क्षणाद् वसमानयेत् [ग: वशं-] ॥ ८९

॥

अधोपुष्पी शमीपुष्पमलिनात्म मृदान्वितम् ।

होमयेद् विघ्नराजेन भवेत् सर्वजनप्रियः ॥ ९० ॥

२९०अ गृ पिण्याकं गुग्गुलं चैव [ख: * *] अ [ख: *] * * * * * * * ।

होमयेद् विघ्नराजेन तत्क्षणात् कार्यसिद्धिदम्॥ ९१ ॥

अर्कपुष्पं पिचोः पुष्पं रासभस्य तु सेकजम्।

साध्यधूलि समायुक्तं काकपक्षं तथैव च ॥ ९२ ॥

राजिकाभिस्समायुक्तन् [ग: भिः स-] मेकी [ग: एकी] कृत्वा तु साधकः।

वायव्यमुखचारेण अर्द्धरात्रेण होमयेत्॥ ९३ ॥

तत्क्षणाच्चाटयेच्छीघ्रं ध्यानाक्षर नियोगतः।

अवसव्येन [ग: अप-] हस्तेन क्रुद्धचित्तेन साधकः॥ ९४ ॥

एवं विधानयुक्तस्तु [ग: -युक्तन्तु] दुष्टसत्वस्य विग्रहे ।

यावदायु [ग: -युः] क्रमेणैव साध्योच्चाटनकं भवेत् ॥ ९५ ॥

२८८ब् ख्] राजिकालवनञ्चैव पिण्याकं स्वमलन्तथा ।

होमयेद् [ग: होमं यद्] यस्य नाम्ना तु तत्क्षणाद्
वशवर्तिनः ॥ ९६ ॥

रामायाः सेकजं गृह्यमृत्तिका च विशेषतः ।

आत्मशुक्र समायुक्तमनामामृतसंयुतम् ॥ ९७ ॥

मर्दिता प्रतिमां कृत्वा रूपलक्षणसंयुताः ।

नवस्थानेषु वेधव्या कण्ठकैर्मदनोद्भवैः ॥ ९८ ॥

प्रस्त्रावस्था नमास्थाप्य त्रिसन्ध्यं तन्मुखस्थितः [गः तन्मुखे स्थितः] ।

मंत्रोच्चार पदं गृह्यप्रोद्धरित्वा तु साधकः ॥ ९९ ॥

ह्रींकाराद्यन्त युक्तेन रक्तवर्णेन साधारणात् ।

पूर्वाभिसन्धनं कृत्वा वामाचारेण मंत्रवित् ॥ १०० ॥

तत्क्षणाद् [खः ?] याति यक्षस्त्री मानुषीष्वथ काकथा ।

एषो भयात्मको योगोन कथ्यो यस्य कस्यचित् ॥ १०१ ॥

अजक्षीरात्म शुक्रञ्चगो कीटरुधिरन्तथा ।

गुग्गुलेन समायुक्तं होमयेत् सिद्धिकाम्यया ॥ १०२ ॥

पश्यते देवताः सर्वाः [ग: सर्वा] मन्त्रस्यास्य प्रभावतः ।

गुग्गुलं लशुनञ्चैव आत्मशुक्रन्तथैव च ॥ १०३ ॥

महातैल समायुक्तं गुडिकां तेन कारयेत् ।

होमयेद् यस्तु देवेन योगिभिश्च महात्मने ॥ १०४ ॥

पश्यते देवताः सर्वानिराचारेण साधकः ।

कञ्जिकञ्चात्म शुक्रञ्च हरिताल [ग: -लं] मनःच्छिला [ग:
मनःशिला] ॥ १०५ ॥

गुग्गुलुं घृतसंयुक्तं धूपं सानैध्यकारकम् [ग:
सान्नैध्य-] ।

रथ्यामृतक निर्माल्यं आत्मशुक्रं तथैव च ॥ १०६ ॥

क्षमापलं नृपसंयुक्तं गुग्गुलेन समन्वितम् ।

होमयेद् यस्तु देवेशे योगिनीनां प्रियो भवेत् ॥ १०७ ॥

हुत्वा चालि वसायुक्तं योगिनी वल्लभो भवेत् ।

कावञ्चुक शिरं गृह्य शुसुष्कतन्तु [गः सुशुष्कतन्तु] कारयेत्
॥ १०८ ॥

मंत्रेणानेन चालभ्य लक्षमात्रन्तु सिद्धयति ।

ते नैव चञ्चुना मंत्री वहिरेखा कृतञ्जपेत् ॥ १०९ ॥

यावत् तावज्जलायातां रिक्तकुंभा भवन्ति तु ।

२९०ब् ग्) शिरसा मृषे ततद्रेखा पुनः स्वाभाविका भवेत्॥ ११०
॥

मातुलुङ्गफलं गृह्यते न तच्चञ्चुनाहरेत्।

यद् रक्त मनसा कृत्वा तेन तत् पूरितं भवेत्॥ १११॥

शिरसा घृष्यते यावत् फलं स्वाभाविकं भवेत्। ११२॥

यत् किञ्चित् फलभक्षं वा तत्क्षणात् [ग: तत्क्षणाच्]
चाक्षयं भवेत्।

दानभक्षण पाने वा सहस्त्राणां न हीयते॥ ११३॥

पशूनाञ्चैव रोमाणि स्वशुक्रेणैव भावयेत्।

नरपित्तेन संयुक्तं हरितालं [ख: हरिता *?] मनःशिला [ख:

?] ॥ ११४ ॥

२८९अ ख्) क्रोष्टुकस्य तु पित्तेन भावितं स्वोषितं तथा ।

मंत्रेण सहितं कृत्वा तिलकन्तेन [ख: * *?कन्तेन] कारयेत् ॥

११५ ॥

तद्रूपं भवते [ख: ?] तस्य यद्रोमैस्तत् [ख: यद्रोमेस्तत्]

कृतं भवेत् [ख: भ * *?] ।

हस्त्यश्वरथ नावाश्च दर्शनात् स्तंभयेत् सदा ॥ ११६ ॥ [ख:

?]

मातुलं भ्रामरं कुष्ठमात्मशुक्रेण भावितम् । [ख: ?]

मंत्रेणा लव्धमात्रन्तु भक्षणे संप्रयोजयेत् ॥ ११७ ॥ [ख: ?]

तेन [ख: ?] भक्षित [ख: ?] मात्रेणं [ख: ?] यावज्जीवन्ति

किञ्कराः ।

क्ष्मापल [ग: -लं] चात्मशशिना क्रोष्टुकस्य तु फल्गुषः [ग: -षम्] ॥ ११८ ॥

शशिरेणु समायुक्तं गुग्गुलेन समन्वितम्।

इन्द्रगोपक संयुक्तं होमयेत् तैलसंयुतं ॥ ११९ ॥

धूपञ्च प्रतिमानान्तु सर्वसत्ववशङ्करम्।

कनकस्य तु पञ्चाङ्गं स्वशुक्रेणैव भावयेत्॥ १२० ॥ [ख: ?]

मंत्रेण [ख: ?] सहितं [ख: ?] कृत्वा पिशाचरसभावितम्।

मातङ्ग तैलसंयुक्तं धूपं सर्वप्रसाधकः ॥ १२१ ॥ [ख: ?]

तडिच्छशि [ख: * *?च्छशि] समायुक्तं गोमायो [ग: -योः] पित्तसंयुतम्।

गुग्गुलेन समायुक्तं अलिनासहसंयुतम्॥ १२२॥

होमयेद् यस्य नाम्ना तु सर्वरूपास्तु साधकम्।

कच्छपस्य तु पञ्चाङ्गं स्वशुक्रेणैव भावयेत्॥ १२३॥

मातङ्गतैलसंयुक्तं पललेन समन्वितम्।

अलिनासहसंयुक्तं होमयेन्निशि पुत्रकः॥ १२४॥ [खः ?]

तत्क्षणाद् दृश्यतां [गः वश्यतां] याति योपिहन्तुं
समुद्यतः।

निजबीजन्तु संगृह्य [खः ?] भावितं दन्तकाष्ठकम्॥ १२५॥

मदिरासवसंयुक्तं होमयेत् सिद्धिकाम्यया।

अशेष गुणसंपन्नः सर्वसिद्धि समन्वितः॥ १२६॥

क्रीडते सर्वलोकेभ्यो यथा हैरंव [ग: हे-] भैरवः।

श्वेतार्कचन्दने दन्तेकदंवे वा हिरण्मयम्॥ १२७ ॥

सर्वत्र स्वेन भ्वावेन भवतेर्त्थ [ख: -ते *?] प्रसाधकम्।

इति पिचुमते हैरम्भ [ग: हेरंव] भैरवोनाम चतुसप्ततिमः

[ग: चतुः-] पटलः॥

भैरव उवाच

अथातः संप्रवक्ष्यामि महाभैरव निर्गतम्।

नाम्ना तु यामलेतन्त्रे दध्राघृतमिवोद्धृतम्॥ १ ॥

महासारमिद [ग: -दं] डत्रं [ग: तंत्रं]

सारात्सारतरोत्तरम्।

२९१अ ग्) महामर्दक देवस्य कल्पं वक्ष्यामि तत्वतः॥ २॥ [खः ?]

येन सम्यग्विधानेन सिद्धिं पास्यन्ति साधकाः। [खः ?]

संभारं पुर्वमेवोक्तं तत्र मन्त्रान् समुद्धरेत्॥ ३॥ [खः ?]

अ-उमध्यमतो ग्राह्यं ञ टमध्याधः संस्थितम्। [खः ?]

ईहमध्याध संयुक्तमधस्ता तैलमध्यगम्॥ ४॥

व ऋ [गः ॠ] मध्याध संयुक्तं थाधस्थेनसमन्वितम् [गः थाधंस्थेन-]।

२८९ब् ख्) ए ढमध्योर्द्ध संयुक्तं अ ऋ [गः ॠ] मध्योर्ध्व संयुतम्॥ ५॥

आ ऊ मध्योर्ध्व भागेन भैरवामर्दका शिवम्।

खकारं हृदयं प्रोक्तं ठकार [ग: -रं] शिर उच्यते ॥ ६ ॥

शकारस्तु शिखाज्ञेया वकारो नेत्र उच्यते ।

कवचन्तु लकारेण ऊकारेणायुधं स्मृतम् ॥ ७ ॥

स्ववर्णजाति संयुक्तमङ्गभूतं क्रियात्मकम् ।

एक वीरं महारौद्रमर्धनारीश्वरं प्रभुम् ॥ ८ ॥

अर्धचन्द्रे स्थिता देवी शक्ति [ग: शक्तिः] शक्तिमतं शिवम् ।

कपालमालिनं देवं चन्द्रार्धकृतशेखरम् ॥ ९ ॥

उमार्ध देहसंपन्न [ग: -न्नं] भैरवामर्दकं शिवम् ।

हसन्तं किलिकिलायन्तं महामोहादिसंयुतम्॥ १० ॥

नावारूढं महारौद्रं प्रेतासन सुसंस्थितम्।

भुजाष्टकेन नृत्यन्तं मुहुः श्रोणित निर्झरः॥ ११ ॥

दक्षिणाभिमुखं देवि वलिकर्मप्रसाधने।

उत्तमे ष्वथकार्येषु खेचरत्वे च पूजयेत्॥ १२ ॥

नित्यमेवं सदाजाप्यं वामाङ्गमकृतश्रमः।

चतुर्वक्त्रं महारौद्रं दुःप्रेक्ष्यं [ग: दुष्प्रेक्षं]
योगिनी प्रियम्॥ १३ ॥

महामर्दक देवन्तु स्मरणात् पापनाशनम्।

क्ष्मापलं मृगसंयुक्तं घृतगुग्गुलमेव च ॥ १४ ॥

मगपलेन संयुक्तं होमयेन्निशि पुत्रकः ।

तत्क्षणा [ग: -णाद्] दिव्यदेहस्तु जायते होमकर्मणा ॥ १५ ॥

निष्ठिंवनच [ग: -वनञ्च] कनकं अजामृतसमन्वितम् ।

मगद्वय समायुक्तमात्म शुक्रसमन्वितम् ॥ १६ ॥

मृगनाभि समायुक्तं शशिरेणु समीकृतम् ।

रोचनाभावितं कृत्वा देवस्यामर्दकाग्रतः ॥ १७ ॥

लक्षमावर्तयन्मन्त्री दिव्यदेहस्तु जायते ।

त्रैलोक्ये विचरेशस्तु मन्त्रद्रव्य प्रभावतः ॥ १८ ॥

विचरेद् भैरवो यद्व [ग: यद्वत्] सर्वावस्थ कृतश्रमः।

२९०अ ख्] राजिकानिंव पत्राणि पञ्चात्मत्तकसंयुतम् [ग:
पञ्चोन्मत्त-] ॥ १९॥

तीक्ष्णतैल युतं होम्यं क्रोधाविष्टेन मंत्रिणा।

उच्छाटयेत वै शीघ्रं यदि शक्रसमोरिपुः॥ २०॥

कालज्ञेन तु होतयं मंत्राविष्टेन चेतसा।

रूपा न्यासविधानज्ञः सिद्धयते नात्रसंशयः॥ २१॥

२९१ब् ग्] कूर्माङ्ग पञ्चकं गृह्य आत्मशुक्रसमन्वितम्।

रोचनाया समायुक्तं पत्रकं नागकेशरम्॥ २२॥

मगमार्जार मांसेन गुग्गुलेन समीकृतम्।

स्त्रीतन्य [ग: स्त्रीस्तन्य] संयुतं कृत्वा कुङ्कुमेन समन्वितम्

॥ २३ ॥

एतद् एकीकृतं होमं पृथ्वीशं वशमानयेत्।

क्ष्मापलं नृपलञ्चैव अलिनासहमोदितम्॥ २४ ॥

शशिनात्म गते नैव होमयेनिशि [ग: -न्निशि] साधकः।

सिद्धयते नात्र सन्देहो यदि स्याद् ब्रह्महा भवेत्॥ २५॥

लगासृक्ष्मा पलञ्चैव गुग्गुलेन समन्विताः [ग: -तम्]।

लशुनेन समायुक्तमलिनासह मोदयेत्॥ २६॥

तत्क्षणाद् दिव्यदेहस्तु जायते साधकोत्तमः।

लशुनं गुग्गुलुश्चैव मार्जार [ग: -रं] पित्तमेव च ॥ २७ ॥

सरमापित्त संयुक्तं नरपित्तेन भावितम्।

शिखिपित्त समायुक्तं [ग: -युक्त] सौ वीराञ्जन संयुतम् ॥ २८ ॥

रथ्यापुष्प समायुक्तंवुकपुष्पसमीकृतम्।

गुटिकात्रिवृता कृत्वा मंत्रेणालभ्य मंत्रवित् ॥ २९ ॥

पूजां कृत्वा तु देवस्य महामर्दक भैरवे।

साधकः संशितोभुत्वा लक्ष्यमावर्त्य [ग: लक्ष-] सिद्धयति ॥

३० ॥

मुखे प्रक्षिप्यमेधावी तत्क्षणात् खगमोभवेत्।

चक्रवर्ति समोभूत्वा नवनाग वलोभवेत्॥ ३१॥

विचरेद् गगनान्भोगान् मर्त्यभोगेषु काकथा।

दिविभूमौ च पाताले खमध्ये तत्व गोचरे॥ ३२॥

क्रीडते साधकोधी मां यावच्चन्द्रार्क तारकम्।

अजरस्त्वमरश्चैव अक्षयो ह्यव्ययस्तथा [गः ह्यव्यंयस्तथा]

॥ ३३॥

२९०ब् ख्) महाप्रलय जीवी तु गुटिकायो प्रभावतः।

सत्यं सत्यं महादेवि नान्यथा ख्यापितं मया॥ ३४॥

इति पिचुमते महामर्दकभैरवोनाम पञ्चसप्ततिमः पटलः

॥

देव्युवाच

समुदायो विधिख्यातो योगिनीनां महेश्वर [ग: -रः] ।

पृथग्याग विभागस्तु [ख: -ग *?] साधनं रूपकान्वितम् ॥ १

॥

न स्फुटन्तु मयाज्ञातं तत् प्रवक्ष्याहिते [ग: प्रवु-] हर [ग:

हरः] ।

भैरव उवाच

साधु साधु महादेवि यत्वयाहं [ग: यत्त्वया-] प्रचोदितम् ॥ २

॥

सङ्क्षेपाद् योगि सद्भावं न कथ्यं यस्य कस्यचित्।

योगिनी पूर्वसूत्रेण मन्त्रकोषं तथा विधम्॥ ३॥

यजनञ्च महाभागे एकवीर विभागिकम्।

अष्टपत्रांवुजा वस्थमासनं पूर्ववद् यथा॥ ४॥

तद् व्याप्त्या च महाभागे क्रोष्टुवयाः [ख: ?] परिकल्पयेत् [ख:
* *?कल्पयेत्]।

ईशान्यां हृदयं कृत्वा दिशाग्नेये शिरादिकम्॥ ५॥

दिनेस्त्र [ग: दिगस्त्र] सहितन्देवि मध्ये व्याप्ताङ्ग [ख: ?]
संयुतम्।

पश्चिमन्तु स्मृतं वक्रंस्व रूपस्थं स्वजंकुलम्॥ ६॥

२९२अ गृ सितवर्णाः स्मरद् देवि दंष्ट्रोत्कट भयानकाः। [ख: ?]

एक वक्रां [ग: वक्रा] तु सा योगी महाप्रेत कृतासना [ख: ?]॥

७॥

नावारूढा तु [ख: ?] कर्तव्या कपालकृतहस्तिका।

कर्तृकाग्रहणे शक्ता कपालकृतशेखरा॥ ८॥ [ख: ?]

मुण्डमालावलंवी [ख: * * * ?ला-] च

शुल्कखण्डैर्विभूषिता।

कर्णे करे च वाहुभ्यां नागांभरणभूषिताम्॥ ९॥

इत्थं [ख: ?] रूपेण [ख: ?] ध्यातव्या [ख: ?] क्रोष्टुकी

वीरवन्दिते ।

अग्निकार्यविधानेन ध्याने [ख: ?] योगे जपार्चने ॥ १० ॥

कर्मकाले च देवेशि स्वभावकृतलक्षणाः [ग: -णा] ।

सा एव [ख: ?] रक्तवर्णाभा [ख: ?] इडानाडिगता शुभा ॥ ११ ॥

साध्यसाधन [साध्य * * *?] संयुक्तां [ख: ?]

कर्षयेन्मदनातुराम् [ख: ?] ।

क्रोष्टुकी [ख: ?] पीतवर्णाभा पद्मकिञ्जल्कसन्निभा ॥ १२ ॥

तडिद्वर्णसमाभासा पिङ्गलानाडिमध्यगा ।

हृदयान्त स्थिता ध्येया कुलिशाक्रान्तमस्तका ॥ १३ ॥ [ख: ?]

चतुरस्त्रान्त संस्था तु वज्रलाञ्छनलाञ्छिताम् [ग: -ता] ।

स्तंभयेत जगत् कृत्स्नं परमंत्रेषु काकथा ॥ १४ ॥

एवञ्च विधिविन्यस्ता [ग: -स्ताः] कृष्णवर्णं सुदारुणा ।

हृदयान्तः स्थिताघोरा कृष्णान्तान्तः सुवर्चसा ॥ १५ ॥ [ख: ?]

साध्यसाधन [ख: ?] संयुक्ता प्रवेशे निर्गमे तथा ।

फेत्कार कृतरावोग्रा साध्यारूढा महौजसा ॥ १६ ॥

२९१अ ख्) शस्तृका छेदना शक्ता भक्ष्यमाणा विचिन्तयेत् ।

म्रियते नात्र सन्देहो [ग: -हः] सत्यन्देवि वदाम्यहम् ॥ १७ ॥

सितवर्णेन चाश्वासमिडा चन्द्रमसे गता ।

शान्तिपुष्टि वशाकृष्टि स्तंभनं मारणं तथा ॥ १८ ॥

एवमाद्यानि कर्माणि कुरुते योगयोजिता ।

तथार्चिनाग्निकार्येण द्वितीया शृणु सांप्रतम् ॥ १९ ॥

विजया रक्तवर्णाभा षडङ्गोत्तरवक्त्रिका ।

नाभिचक्रे न्यसेद् देवि विजया भीमविक्रमा ॥ २० ॥

साध्यन्तु हृद्गतं ध्यायेत् [ग: -येद्] इडानाड्या व्यवस्थिता ।

नादभूता [ग: -तां] ततो देवी [ग: देवि] साध्यदेहे

लयंगताः ॥ २१ ॥

धारामृत समायुक्ता रक्तोघैः प्लावयेत् पुरम् ।

तत्क्षणाच्चित्त कृष्टि [ग: कृष्टिः] स्यादमृतस्य च काकथा ॥ २२

॥

कृष्णवर्णं तथा साध्यं नीलसूत्रेण वेष्टितम्।

पुटेन दक्षिणे नैव पूर्वन्यासेन सुव्रते॥ २३॥

प्रवेश निर्गमाभिज ध्यानाक्षरगतेन च।

कुरुते पूर्वकं कर्ममंत्र मुद्रा प्रपीडिता॥ २४॥

तृतीया संप्रवक्ष्यामि हृदिपीता महामतिः।

साध्यङ्कण्ठ गतन्ध्यायेत् पद्मकिञ्जल्कसप्रभम्॥ २५॥

मुद्रामण्डल विन्यस्ता वज्रवर्णसमप्रभा।

२९२ब् ग्) स्तंभयेत जगत् सर्वं मूकवद् भ्रमते क्षणात्॥ २६

॥

एवं वर्ण क्रमान्यानि [ग: -ण्यानि] ध्यानधारण योजनात्।

हृद्गता देवतां पूज्यस्वभावं पीतवर्णिकाम्॥ २७ ॥

राजकण्र्योमहालक्ष्मी सर्वकामफलोदया।

सुशुम्नान्तर्गता [ग: सुषुम्णान्तर्गता] देवी
साध्यन्नाभ्यान्तु पिङ्गला ॥ २८ ॥

कृष्णसन्दं शकैस्तीक्ष्णैजिह्वा [ग: शकैस्तीक्ष्णैर्-]
साध्यस्य कृन्तयेत्।

म्रियते नात्र सन्देहो [ग: -ह] इडा सान्तिञ्च [ग: शान्तिञ्च]
वश्यकृत्॥ २९॥

चतुर्थी संप्रवक्ष्यामि विन्यस्ता दक्षिणे करे ।

पूर्ववन् न्यासयोगेन पूर्वक्रेण सन्मुखा ॥ ३० ॥

रूपलक्षण संयुक्ता पूजनीयार्थ साधिका ।

महाप्रेत समाक्रान्ता वामहस्तेन पूजयेत् ॥ ३१ ॥

साध्यं मनसि कृत्वा वै हृद्गतं चाक्षरं विभुम् ।

कृष्णसूत्रेण सञ्चिन्त्य वेष्टितं साध्य कण्ठकम् [ग: कण्टकम्] ॥ ३२ ॥

योगध्यानात् समाकृष्य यावदागत हृद्गतम् ।

ततस्तु [ग: ततः *] समरसं कृत्वा स तत्वन्नाडिमण्डलम् ॥ ३३ ॥

रेचयेत् करमध्ये तु मुष्टिबन्धन्तु कारयेत्।

तत्क्ऽणाद् वश्यतां याति स्वभावे भावमाश्रितम्॥ ३४॥

विपरीतन्तु [ग: -स्तु] तं कृत्वा वाम [ग: वामं] हस्ते तु रेचयेत्।

२९१ब् ख्) पुनस्ते नैव मार्गेण [ख: मागेण]
विद्वेषोच्चाठमारणम् [ग: -च्चाट-]॥ ३५॥

पञ्चमी हरिता भामावक्रमध्ये तु विन्यसेत्।

पूर्ववत् क्रमयोगेन अङ्गषट्केन संयुता॥ ३६॥

दक्षिणाभिमुखा देवी पूजा होमादिकर्मसु।

इडायान्तर्गते नैव ध्यानयोगेन सुन्दरि॥ ३७॥

साध्यन्तु विन्यसेद् वक्ते विह्वलं त्रस्तलोचनम्।

जिह्वादन्तेषु विन्यस्य तालुमध्ये तु विन्यसेत्॥ ३८॥

तत्क्षणात् [गः -णान्] मूकतां याति वागीशमपि यो भवेत्।

षष्ठी तु विन्यसेद् वक्रे ध्यानलक्षगतेन तु॥ ३९॥

वर्णतो [गः -तः] कदुवर्णाभा वक्राङ्ग कृतविग्रहा।

जपलक्षाक्षरेर्युक्ता [गः -क्षरैर्युक्ता] पिङ्गला नाडि वाहिनी॥
४०॥

विन्यसेच्चक्षु मध्ये तु साध्ये मनसि संस्थिते।

कृष्णाञ्जन च य प्रख्यानीलजीमूत सन्निभा॥ ४१॥

तत्क्षणाद् भवते साध्य [ग: साध्यं] चक्षुहीनान्धवद्

यथा ।

एवं वर्ण विभागैस्तु ध्यान लक्षाक्षरैस्तथा ॥ ४२ ॥

नाडी तत्वकलाकालनादराव समाधिभिः ।

ध्यानायुध समाधिस्था वाहणा [ग: -ना] भरणान्विता ॥ ४३

॥

मण्डलैर्द्रव्यभेदाच्च नियुक्ता तत् फलप्रदा ।

अविभागविभागैश्च क्रियाकालां शयोजनैः ॥ ४४ ॥

२९३अ ग्] ऋतुयोगादि योगैश्च युक्ता सिद्धिप्रदायिका ।

यस्त्वे वमभ्यसेद् देवि क्रियायोगादि योजनैः ॥ ४५ ॥

ससिद्धयति न सन्देहो भैरवस्य वचोयथा ।

इति ब्रह्मयामले योगिनी पृथग्यागविधि [ग: -विधिः]

षट्सप्ततिमः पटलः ॥

देव्युवाच

श्रुतं देव मयासर्वं योगिविग्रह साधनम् ।

संप्रतं श्रोतुमिच्छामि कल्पसाधनमुत्तमम् ॥ १ ॥

एकैका तु यथा देवस्वविधान समन्विता ।

भवते साधकेन्द्राणां सर्वसंपत्ति कारकम् ॥ २ ॥

निर्णयत्वेन देवेश यथावस्थ जपं भवेत्।

तथा कथयदेवेश संशयोच्छित्तये गमः [गः मम] ॥ ३ ॥

भैरव उवाच

शृणु देवि महाभागे पृथक् कल्पा यथा स्थितः [गः -तम्]।

तथा ते संप्रवक्ष्यामि साधकानां हिताय वै ॥ ४ ॥

पूर्वादितः स्वरूपेण स्वबीज कृतविग्रहः।

देव्यास्तु कथितां सर्वामङ्गवक्रान्यथाधुना ॥ ५ ॥

पृथक् साधन विन्यस्ता यथा देवि तथा शृणु।

द्वादशश्वर [गः -स्वर] संयोगाद् विभिद्यन्तु यथा क्रमम्॥

६ ॥

२९२अ खᳬ ह्रस्वा [गः ह्रस्व] वक्रा समुद्दिष्टा तदन्ताङ्गा
वरानने ।

विशेषस्तु ततस्तासां स्वतत्व विधियोजनात् ॥ ७ ॥

कर्मभेदाथ कर्तव्यं विधिपूर्वं यथा मुखम् ।

देव्युवाच

स्वतत्व विधियोगस्तु देवीनां भैरवस्य च ॥ ८ ॥

स कथन्तु मयागम्यो त्वदी या देशवर्जनात् ।

भैरव उवाच

शिव तत्वमकाराख्यमावज्ञानात्मिका प्रिये ॥ ९ ॥

इकारस्तु स्मृता चेच्छा उ विन्दुस्तु वरानने ।

नादीश्वरस्तदन्तस्तु मलभावे नपुंसका ॥ १० ॥

कर्मरोध तिरस्कार बीजनाया क्रमोदिता ।

तदन्तेश्वरमित्याहुस्तस्यान्ता [ग: -स्या *?] यो वलात्मवान् ॥ ११ ॥

विद्येश्वरात् तदन्ते न विद्यानेन महात्मने ।

बिन्दु रूपमनन्तस्य माया चक्राधिपस्य तु ॥ १२ ॥

सृष्टौ तु संस्थिता माया एवैषः पूर्वजो विधिः ।

यस्यमायेश्वरा रेफेकालतत्वं व्यवस्थितम् ॥ १३ ॥

लवकालश्च विद्याख्या क्षकारो नियमात्मिका ।

हरागपञ्चकं विद्धिमकारः पुरुषः स्मृतः ॥ १४ ॥

तदादि प्राकृतं तत्वं शथा सास्तमपूर्वकाः ।

वुद्धितत्व पकारेण फेनाहङ्कारलक्षणम् ॥ १५ ॥

मनास्तत्वादिमेनोक्तं [ग: मनस्तत्वा-] नाद्या
वागादिसञ्चयम् ।

णद्याश्रोत्रादि [ग: नद्या-] सङ्घन्तु शव्दाद्यासादि [ग: -
द्याशेदि] लक्षणा ॥ १६ ॥

धरादयः ककाराद्या [ग: -द्यास्] तत्व जातिप्रकाशकाः ।

२९३ब् ग्] ईश्वरोर्द्धन्न विन्दोन्ता विन्दोन्तास्तदधो [ग: विन्दोन्तास्-
] हि ये ॥ १७ ॥

मायाधो ये स्मृता वर्णा बिन्दुयुक्ता वरानने ॥ १८ ॥

ईश्वरान्ता विशेषेण याव [ग: यावत्] तत्वन् [ग: तत्वंस्]
त्वनामयम् ।

यो मंत्रोयेन यत् तत्वे योजनीयो [ग: -यः] फलेच्छया ॥ १९ ॥

तदाद्यन्त समायोगातद्रूपित्वं [ग: समायोगास्-] व्रजत्य सौ ।

तत्वधर्म गुणाकार रूपयोगा तु तत्फलम् ॥ २० ॥

समस्ते नैव वीरेण विधानेन प्रसाधयेत् ।

समस्तव्याप्ति योयो [ग: योगो] वा स्वरूपस्थन्तु तं यजेत् ॥ २१ ॥

कर्मजातिभिस्वेष्टाभिः कर्मसाधनमारभेत्।

एवं देव्योथ दूत्यश्च योगिन्योमातरोपि वा॥ २२॥

प्रत्येक फलसिद्धयर्थं स्वरूपं वा प्रयोजयेत्।

देवतानां प्रवक्ष्यामि कल्पसाधनमुत्तमम्॥ २३॥

कृत्वा वक्राङ्ग विन्यासं स्वासनस्थां यजेत्मनि [ग: यजेन्-]।

प्रथमा तु यदा देवी [ग: देवि] देहलीस्थान संस्थिता॥ २४॥

योगजाति समोपेता व्रतचर्या समन्विता।

सोमाशक्तेन चेतेन स्वस्वभाव कृतेन वा॥ २५॥

२९२ब् ख्) शिवाद्येन यथान्यायं क्रियाकालं [ग: -लां]
शयुक्तधीः ।

धारणाध्यान योगेन सर्वावस्थेन चेतसा ॥ २६ ॥

रथ्यामृतक निर्माल्यैस्ता [ख: निम्माल्यैस्ता] सामर्घन्
निवेदयेत् ।

शक्तियुक्ता अचैतन्यो निराचारो वधूतकः ॥ २७ ॥

स्वलक्षयुक्त योगेन जपेन्मन्त्रस्तु साधकः ।

जपान्ते च तथा होमं तत्फल्गुष महोदयम् ॥ २८ ॥

पञ्चाङ्गमलसंयुक्तमलिनासह योजितम् ।

होमयेन्निशिचारेण सिद्धिमिच्छ समाहितः ॥ २९ ॥

अशेष चक्रसामान्या [ग: -न्यो] देव्या तुल्यस्तु जायते ।

तस्यान्ते भैरवत्वन्तु प्राप्वाने होद्भवे क्वचित् ॥ ३० ॥

क्रव्यादस्य पलं गृह्यमगद्वय समायुतम् ।

आत्मनो [ग: - नः] शशिसंयुक्तं होमयेन्निशिचारतः ॥ ३१ ॥

* * * *? [ग: नास्ति]

तत्क्षणात् सर्वसत्वेभ्यो वल्लभत्वमवाप्नुयात् ।

गोमायुपल संगृह्य सरमामृतसंयुतम् ॥ ३२ ॥

मगद्वय समायुक्तमलिना सुपरिप्लुतम् ।

होमयेद् यस्य नाम्ना तु तत्क्षणाद् वशतां नयेत् ॥ ३३ ॥

चैल गुग्गुल पिण्याकं स्वरोहैस्तु समन्वितम् ।

आत्मशुक्र समायुक्तमलिनासहमोदितम् ॥ ३४ ॥

साध्यधूलि समायुक्तं साधयेत् सिद्धिकाम्यया ।

कुष्ट निष्टीवनञ्चैव [ग: निष्ठी-] सरमार्जार फल्गुषम् ॥ ३५
॥

महातैल समायुक्तं होमयेद् यस्य कस्यचित् ।

नामं तत्रैव गृह्स्णीया [ग: -यात्] तत्क्षणाद् वशमानयेत् ॥
३६ ॥

इति भैरवस्त्रोतसि महातन्त्रे सत्तसप्ततिमः पटलः ॥

भैरव उवाच

सांप्रतं कथयिष्यामि उदकुंभादि देवताम्।

यागस्तु सिद्धिदा देवि पूर्वसाधन कल्पिता॥ १॥

सर्वावस्थेन भावेन स्वशक्ति गतचेतसा।

पूर्ववत् [ग: -व] न्यासयोगेन जपहोमं समारभेत्॥ २॥

व्रतचर्या वलंवी तु यथा तंत्रानुवर्तकः।

विधिङ्कृत्वा तथा सिद्धिस्तत्कर्मण [ग: -न] कृतोभवेत्॥ ३॥

सामान्य [ग: -न्यः] सर्वसिद्धीनां खेचरोमंत्र विग्रही।

विचरेच्छक्तिगां भोगात् [ग: भौगां?स्] तस्यान्ते

लयमाप्नुयात्॥ ४॥

कण्डन्या च तथा दूती याज्या वक्राङ्ग संयुता।

स्ववीज दीर्घकैर्भित्वास्वरै चाङ्गानि [ग: -स्वरैश्चाङ्गानि]
कारयेत्॥ ५॥

आ ई ऊकार युक्तानि स्वबीजानि वरानने।

२९३अ खृ) वीरादिकानि पूर्वायात्त्रीण्येव [ग: पूर्वायास्-]
परिकल्पयेत्॥ ६॥

तथासना तु देवेशी तत्वजाति समन्विता।

केवला वा विधानेन निश्रेय [ग: निःश्रेय] सविधौ यजेत्॥ ७॥

देव्युक्तानि अशेषाणि कर्मभोग फलानि तु।

ददति विधिनानेन साधिता तु वरानने ॥ ८ ॥

एवं दूत्यो महाभागे स्वाङ्गवक्त्र समन्विता ।

तत्वजातिगताः सर्वारयुक्ता [ग: [ग: सर्वाः अयुक्ता] वा प्रक्षे?
[ख: ?] जयेत् [ख: ?] ॥ ९ ॥

चतुर्थञ्चुल्लियागन्तु तद्विधान समन्वितम् ।

तद्विधान युतन्देवि [ग: -वी] यजं सिद्धिमवाप्नुयात् ॥ १० ॥

जपध्यान समायुक्तौ होमकर्म सुपेशलः [ग: -लम्] ।

तत्वजाति युतोधीमान्तद्भोगात् [ग: -मांस्तद्-] साधयेद्गतम्
[ग: साधये * *?] ॥ ११ ॥

होमकर्म विधानन्तु वुकसापलसंयुतम्।

अलिनासह संयुक्तमात्म शुक्रेण भवितम्॥ १२॥

निशिचारेण होतव्यं सीद्धिहेतोर्विपश्चितैः।

साक्षाद् भैरवतां याति निराचार पदेस्थितः॥ १३॥

सर्वज्ञः सर्वकर्ता च भवते नङ्गवक्षितौ [ग: -वत्क्षितौ]।

पञ्चमन्तु तथा देव्या [ग: देव्याः] पीषण्यां दक्षिणे

स्थितः [ग: -तम्]॥ १४॥

देव्यायागन्तु चण्डाख्या तथा वक्राङ्ग संयुतम् [ग: -

ताम्]।

स्ववर्णरूपकोपेतं तत्वजातिभि योजितम्॥ १५॥

अयुक्तं वा यजेद् देवि सर्वसंपत्तिकारकः [ग: -कम्]।

व्रतचर्या समोपेतं क्रियाकालांश संयुतम्॥ १६॥

होमश्चात्र प्रकुर्वीत वराह पिशितं शुभः [ग: शुभम्]।

अलिना तु समायुक्तं तथा चात्म मदान्वितम्॥ १७॥

निशिचारेण होतव्यं पूर्ववत् सिद्धिकारणम्।

कञ्चिन्या तु महाभागे वायव्यां दूतिरुत्तमा॥ १८॥

स्वतत्वाङ्ग समायुक्ता तत्वजाति समन्विता।

न तत्व योजिता वाथ पूर्वेव हि समभ्यसेत्॥ १९॥

व्रतचर्या विधानेन तन्त्राचारोदितेन तु।

२९५अ गृ) सर्वावस्थेन चैतन्यस्तेन रूपेण मंत्रवित्॥ २०॥

होमयेत् [ग: -येन्] मन्त्रतत्वस्थः क्रव्यादस्य तु फल्गुषम्।

अलिनासहसंयुक्तं निशिहोमन्तु कारयेत्॥ २१॥

शिध्यते [ग: सिध्यते] भाग्यहीनोपि जपयोगार्चने रतः।

सिद्धविद्या धरैर्देवैर्गन्धर्वैश्चैव [ग: -
वैर्गन्धर्वैश्चैव] सेव्यते॥ २२॥

कामदेवा च [ग: -देवश्च] सर्वत्र भैरवानन्त विग्रहः [ग: -
हा]।

उत्तरे तु प्रवक्ष्यामि यागसिद्धिप्रदं शुभम्॥ २३॥

महोच्छुष्मा महादेविमुपले तु व्यवस्थितम् [ग: -ता] ।

तत्ववक्त्राङ्ग संयुक्तं कर्मजाति समन्वितः [ग: -तम्] ॥ २४ ॥

व्रतचर्या विधानेन स्ववर्णकृतरूकम् ।

२९३ब् ख्) २९५ब् ग्) कर्णिकाष्टदलं कृत्वा तत्मध्ये [ग: तन्-]
भैरवेश्वरम् ॥ २५ ॥

यंत्रकालासनं देवं धरेन्द्वभ समाश्रितम् ।

वह्नितत्वं न्यसेत् कालवायु मध्ये महेश्वरि ॥ २६ ॥

रुद्रचन्द्रधरं शान्तं शिखासेखरमण्डितम् [ग: -
शेखर-] ।

पूर्वेदले न्यसेद् देवं प्रदीशं वायु बीजितम्॥ २७॥

तथाग्नेये तु दिग्भागे यजमानेन भैरवि।

विकराली शिव [ग: शिवं] न्यस्य ज्वल [ग: जलद्] दष्ट्रोत्कटाननः
[ग: दंष्ट्रोत्-] ॥ २८॥

याम्येग्नि वर्णमासीनन्देवं [ग: -नांदेवं]
खादकनायकः [ग: -कम्]।

तथेन्या व्योमबीजेन न्यसेद् देवं कपालिनम्॥ २९॥

ऐरावत् स्थितं देवं मेघनादन्तु पश्चिमे।

सदा गतौ तु रुण्डीशं [ग: रुण्डिशं] सोमवीजाश्रयं
न्यसेत्॥ ३०॥

पाशिताच्छेक पादीशमुत्तरे संव्यवस्थितम्।

तथैशानेक [ग: -नेव] कमलं समाश्रित्य न्यसेत् प्रिये ॥ ३१ ॥

हेतुकं देव देवेशं कपालकृत भूषणम्।

वीराष्टक युतं मध्ये देवदेवं परोदयम्॥ ३२ ॥

कालाग्नि वायुसंयुक्तमधोर्ध्व कृत सङ्गतिम्।

न्यसेत् स्वरूप भास्वन्तन्ततो योगिगणं न्यसेत्॥ ३३ ॥

पिशाची राक्षसी यक्षीगान्धर्वी च प्रजापती।

ऐन्द्री सोम्या [ग: सौम्या] तु विज्ञेया ब्राह्मी च परमांविका

॥ ३४ ॥

वज्रिणीशक्तिनी याम्या नैऋती [ग: नैर्ऋती] वारुणीरणा ।

सौम्या च शाङ्करी तारासु तारा च महायशे ॥ ३५ ॥

तरणी तारयन्ती च सुपूर्वा तारणी प्रिये ।

मोदमाना तथा रम्या सदा प्रमुदिताष्टमी ॥ ३६ ॥

एता वै नामगोत्राङ्कान्त्रि [ग: -स्त्रि] तत्वोक्ति विभागगा ।

योगिन्यस्तु समाख्याता चतुर्विंश प्रमाणतः ॥ ३७ ॥

कादिभान्तगणारूढा दीर्घाः सर्वास्तु शक्तयः ।

पिशाचादि नरा ह्रस्वा वीरास्ते ताव संख्यया ॥ ३८ ॥

स्वबीजदीर्घ ह्रस्वान्ता अङ्गवक्त्रसमन्विता [ग: -ताः] ।

उमामहेश वच्चक्रे तथा सर्वे व्यवस्थिताः ॥ ३९ ॥

भैरवस्य च देवेशि वक्राङ्गानि यथा शृणु ।

हंसं वायु समारूढं स्वरैकादश संयुतम् ॥ ४० ॥

पूर्ववक्त्रं समाख्यातं दक्षिणं कमलं पुनः ।

पावकस्थं महादेवि अधोविष्णु [ग: -विष्णुः] समन्वितम् ॥ ४१
॥

विन्दुयुक्तं तथाप्यं स्यात् पार्थिवस्थं सदाशिवः [ग: -
वम्] ।

गुह्यकेश समायुक्तं कलौतन्त्र पशस्यते [ग: प्र-] ॥ ४२ ॥

उदगस्थं तथा पद्मं लघुमाया सबिन्दुकम्।

२९४अ ख्) उत्तरन्तु स्मृतं वक्रं देवदेवस्य सुव्रते ॥ ४३ ॥

२९६अ ग्) सिंघं रेफासनं देवि बिन्दुशेखरचन्द्रगम्।

ऊर्ध्ववक्रे नियोज्येत भूक्तिमुक्तिफलप्रदम्॥ ४४ ॥

मूलदीर्घ स्वरोपेता षडङ्गं सर्वसिद्धिदम्।

योगेश्वराष्टकस्यापि तथा वक्राङ्ग कल्पना ॥ ४५ ॥

स्वबीज दीर्घमायोन्ता [गः -न्ताः] शक्तयोष्टौ वरानने।

तथा वक्राङ्ग संयुक्ता [खः सयुक्ता] देव्यो वीराश्च कीर्तिता

[गः -ताः] ॥ ४६ ॥

भैरवस्य स्वबीजेन [ख: ?] मायान्ते नैव भैरवि ।

तथा वक्राङ्ग योगेन पूजनीया विपश्चितैः ॥ ४७ ॥

नाभिगन्देवदेवेशं रक्तवक्रं सुभैरवम् ।

करालवदनं भीमं मुहुः शोणितनिर्झरः [ग: -रम्] ॥ ४८ ॥

प्रलयांवुद निर्घोषं [ग: -ष] ग्रसन्तमिवरोदशीम् [ग: -सीम्] ।

कपालमालाभरणं कपालकृतशेखरम् ॥ ४९ ॥

खड्गखेटधनुर्वाण मुण्डलंवन्त पाणिनम् ।

वरदाभय शूलाग्रधरं देवं शिवप्रदम् ॥ ५० ॥

प्रदीप्ताङ्गार वपुषंजवा सिन्दूर सप्रभम् [ग: सं-] ।

इत्थं रूपधरी देवि किन्तु ध्येया वरानना ॥ ५१ ॥

वीराष्टकन्तथा रूपं कुन्तु ध्येयञ्चतुर्भुजम् ।

वीरे योगिनिका पञ्च तथा वक्रभुजान्वितम् ॥ ५२ ॥

मुण्डखट्वाङ्गिनो वीरावरदाभय संयुताम् [ग: -ताः] ।

ईषिद्रक्षोन्नता [ख: * *?द्रक्षोन्नता] देवि सर्वे
खडेन्दुमौलयः [ग: खण्डेन्दु-] ॥ ५३ ॥

देव्य [ग: देव्यः] स्वरक्तवर्णाभा साधने दीप्तविग्रहा ।

नैमित्तिके तथा देवि चित्रवर्णा मनुस्मरेत् ॥ ५४ ॥

काम्यकामित्व भेदेन पृथग्भेदेन योजयेत् ।

नित्यकर्मे तु ध्यातव्या कपालव्रतधारिका ॥ ५५ ॥

मारणे कृष्णवर्णाभा उच्चाटे चाषवर्णिका ।

स्तंभने पीतवर्णाभा शान्तौ चैवेन्द्र स प्रभाः [ख:
प्रभां:] ॥ ५६ ॥

ध्यायेत् सर्वार्थ संसिद्धौ महाप्रेत कृतासना ।

नित्यकालं जपेनाशु सर्वेषां प्रियदर्शनः ॥ ५७ ॥

तेजाद्यस्तु [ग: -ख्यस्तु] वपुष्मन्तः सर्वकल्यान [ग: -ण]
संपदः ।

सर्ववर्णधराः सौम्यास्सर्वलक्षण [ग: सौम्याः सर्व-]
संयुताः ॥ ५८ ॥

सर्वकाम प्रदादेव्या [ग: -देव्याः] सर्वाभरणभूषिताः

[ग -तां]।

गन्धधूप पवित्रैश्च क्रमात् पूर्वोदितो यजेत्॥ ५९॥

होमश्च यादृशो यत्र तत्र तावत् समाचरेत्।

सिद्धयते भाग्यहीनोपि चक्रेनानेन [ग: -णानेन] सुव्रते॥ ६०॥

प्रत्यहं रक्तवर्णाभा जायते जनवल्लभः।

सौभाग्यमतुलन्तस्य भवतेनङ्गवत्क्षितौ॥ ६१॥

२९४ब् क्) सितेन भवते वाचावागेश्वर समोभवेत्।

पीतेन स्तंभयेत् सर्वान्सदेवासुर मानुषान्॥ ६२॥

कृष्णेनमारणं कुर्याद्धूमेनोच्चाटनं भवेत्।

एवं वर्णविभागेन यस्तु पूजयते निशि ॥ ६३ ॥

२९६ब् ग्) सर्वज्ञत्व गुणैश्वर्यान्निशिहोमेन फल्गुषात्।

त देवालि समायुक्तं स्वशुक्रेणैव [ख: स्व * *?णैव]
भावितम्॥ ६४ ॥

हुतं रांजावशी [ग: राज-] कुर्यात् ससैन्य वलवाहनम्।

गोमायुमांसं मद्येन होमभक्ष वासिक्रिया ॥ ६५ ॥

पश्यते देवताः सर्वानिराचारेण मंत्रवित्।

नृमांसेनालियुक्तेन अवधूतेन साधकः॥ ६६ ॥

करोति चित्रकर्माणि ईहितानि महीतले ।

क्ष्मापलं अलिसंयुक्तं शशिना च समन्वितम् ॥ ६७ ॥

मगद्वय समायुक्तं महातैलेन संयुतम् ।

स्वयंभु कुसुमेनैव चैलेन च समन्वितम् ॥ ६८ ॥

होमयेद् यस्य नाम्ना तु तत्क्षणाद् वशमानयेत् ।

विष्ठीवनं करञ्जस्य माणिमन्तन्तु भावयेत् ॥ ६९ ॥

प्रत्युषे नियतं कुर्याद् यावत् काकोन पश्यति ।

सप्ताहा नित्ययुक्तेन स्वश्क्रेणैव भावितम् ॥ ७० ॥

खानेपाने च माल्ये च दातव्यं मंत्र संस्कृतम्।

यावदायुः क्रमेणैव पुत्रपौत्रेण मंत्रवित्॥ ७१॥

वशीभवति भूनाथ समंत्री सपुरोहितः।

नृद्विक [गः -कः] कृष्णमार्जारमांसानि तु समाहरेत्॥ ७२॥

मगद्वय समोपेतमलिना पृक्तमेकतः [गः -तम्]।

होमयेन्निशिचारेण अवधूतेन मंत्रवित्॥ ७३॥

पश्यते [गः पश्यंते] देवताः सर्वानिराचारो जितेन्द्रियः।

द्विकविष्ट समादाय राजिका कृष्ण तण्डुलाम् [गः -लाः]॥ ७४॥

श्मशानेष्टक संयुक्ता पट्टसूत्रसमन्वितम्।

लेपयेत् प्रतिमा मंत्री शत्रोच्चाटनमुत्तमम् ॥ ७५ ॥

यत्र तत्र स्थितोवापिम?पि [ग: -पिद्य?पि] विद्या सुरक्षितः ।

अनेनैव प्रयोगेन शत्रोच्चाटनमुत्तमम् ॥ ७६ ॥

निष्ठीवनं कुष्ठयुतं सरमापलसंयुतम् ।

अलिनासह संयुक्तं निशिचारेण होमयेत् ॥ ७७ ॥

तत्क्षणात् सर्वसर्वेभ्यो भवते प्रियदर्शनः ।

दन्तधावनमादाय क्ष्माकीट रुधिरन्तथा ॥ ७८ ॥

मगद्वयसमायुक्तञ्चिताग्नौ होममाचरेत् ।

निर्वाणभस्मना तेन गोरक्तसहितेन तु ॥ ७९ ॥

२९५अ खु) खानपाने तथा माल्येवस्त्रे प्रावरणे तथा ।

चूर्णेन स्त्रीपुमान्वापि यावज्जीवं वशं नयेत् ॥ ८० ॥

कुसुंभमात्मशुक्रञ्चलगा सृक् पित्तयोजितम् ।

मार्जार विष्टसंयुक्तं लशुनेन समन्वितम् ॥ ८१ ॥

महापलसमायुक्तं धूपन्देव्या वशङ्करम् ।

तडिच्छशि समायुक्तं लोहं किञ्चि [गः किञ्चित्] समन्वितम् ॥ ८२
॥

धूपयेत् प्रतिमातेन आत्मानं मन्त्रविग्रहम् ।

२९७अ ग्] योगयुक्तः सदामंत्री साध्यस्याभि मुखस्थितः [गः मुखः स्थितः] ॥ ८३ ॥

साधयेद् यागयुक्तात्मा योपिशक्र समोनरः ।

अतोचक्र [गः अतश्चक्र] विभागन्तु योगिवीरेश संयुताम् ॥ ८४ ॥

चतुःपीठविभागेन यथाव [गः -वत्] कथयामिते ।

पूर्वारका समारभ्य यावत् स्यात् पत्रसंख्यया ॥ ८५ ॥

विद्यापीठन्तु विज्ञेयं योगिवीर परिच्छदम् ।

तस्माद् वारुण पर्यन्त [गः -न्तं] मुद्रापीठं महौजसम् ॥ ८६ ॥

तस्यान्ते मण्डलं पीठं मन्त्रपीठं तदन्तकम् ।

योगिवीर समोपेतं चतुः पीठं वरानने ॥ ८७ ॥

एतच्चक्रं समाख्यातं योगपीठन्तु मध्यतः ।

नाभ्यब्जाद् यावत् पद्मं ध्यात्वा प्राणः क्रमोद्गतम् ॥ ८८
॥

लयान्निवर्तिनञ्चक्रं यावनाभ्यन्त [ग: यावन्नाभ्यन्त] सा
दधी [ग: दधीः] ।

तावदेव विजानीय [ग: -याद्] हृदयन्तु [ख: * ?दयन्तु] वरानने ॥
८९ ॥

षट्त्रिंशदङ्गुलं चारं तथा तद्व [ग: तद्वद्] गुणान्विताम्
॥ ९० ॥

तद्धर्म गतियोगेन पदात् पदमिहाभ्यसेत्।

उदयञ्च समं कृत्वाधृत्वा योगान्तिकं पुनः ॥ ९१ ॥

तत् समच्चगुणा [ग: -त्वगुणा] वाप्तिर्याव [ग: -वत्] तस्योपजायते
।

सञ्चित्या [ग: सञ्चिन्त्या] भ्यासयोगेन सर्वतत्वात्मकेन तु ॥ ९२
॥

कालयोगाङ्गयोगेन शिववत् साधको भवेत्।

व्यापी तत्वगुणोपेतः [ग: -त] शृष्टिसंहारकारकः [ग: सृष्टि-]
॥ ९३ ॥

कालात्मवत् प्रदायेत [ग: प्रजायेत] योगसिद्धैः प्रपूजितः।

प्रत्यारकविधानञ्च सा मृतत्काल योजने ॥ ९४ ॥

समभ्यसञ्जयेत् [ग: -सञ्जपेन्] मृत्युञ्जरा व्याधिगरास्तथा

।

बीजसन्ध्यं शकालश्च गतिसङ्क्रान्ति लक्षणात् ॥ ९५ ॥

नाडी विभागयोगेन स्वतन्त्रत्वं प्रजायते ।

यथापिपीलिका देहे भ्रमन्ती स्पर्शरञ्जने ॥ ९६ ॥

प्रत्याहार विधानेपि तथा वायुं समभ्यसेत् ।

आत्मा [ख: आमा] नाडिकलाकाल शक्तिश्चैव शिवस्तथा ॥ ९७ ॥

एक लक्षलयं मन्त्र [ग: मन्त्रं] सतु योग इहेत्यते [ग: इहेव्यते]

।

समानता त्वशेषाणां पदार्था * * * * * ॥ ९८ ॥

२९५च् ख्) २९९अ ग्) तद् दक्षिणे तथा वह्निं हुत्वा स्वांसिद्धि संख्यया ।

उभयोन्तरसंस्थन्तु पूर्वामुखमथारभेत् ॥ ९९ ॥

* * * * * * * * * * * * * * * स्य तु ।

तहा सिधार्थकं तालं रोचनासमन [ग: -नः] च्छिला [ग: शिला] ॥ १०० ॥

गैरिका चैव कासी स [ग: सा] * * * * * * * * ।

* * * * * * * * * * * * * * * * * ॥ १०१ ॥

* * * * * * * * * टलाङ्गल सारिका ।

कुमारी सिंहिका व्याघ्री तथा च सुरमञ्जरी ॥ १०२ ॥

सुरसा सुमना कृष्णा कु * * * * * र्णिका [ख: * *] ।

भूधात्री भूकदंव सतालकम् ॥ १०३ ॥

खर्जूरकेशरं [ग: – सरं] श्यामा अमृता च विदारिका ।

२९९ब् ग्) * * * * * * * * * * * * * * * था ॥ १०४ ॥

संगृह्यचारभेत् पश्चात् साधनन्तु वरानने ।

चतुर्हस्त प्रमाणेन कृत्वामण्डलकं शुभम् ॥ १०५ ॥

गो * * *म * * वरोचना गन्ध वारिणा ।

कृत्वास्तार्य [ग: कृत्वातार्य] ततो मंत्रीपटं प्रेत गृहोद्धतम्

॥ १०६ ॥

तस्योपरि ततोन्यस्य विधिपत्रा सुवि * * * ।

* * * * * * * * * * * * * * * * * ॥ १०७ ॥

* * * * * * * * * * * * * * * * * ।

परियष्ट्वा जपञ्चास्त्रादिकं बह्वेत् ॥ १०८ ॥

पश्चात् [ग: पश्चान्] मूले तु [ख: ?] संयोज्य [ख: *?योज्य]

ऊर्ध्वदृष्टिस्तु साधकः ।

यावत् क्षपार्द्धमूलं वा तावदूष्मा प्रवर्तते ॥ १०९ ॥

धूमश्चात्रस्ततो [ग: -चात्र ततो] ज्वाला हस्तमात्रा प्रजायते।

यावद् दशदिशाभोगरवा कुलित भीषणम्॥ ११०॥

देवा * * * * * * * * * * * * * *।

* * * * * * * * * * * ह समाचरेत्॥ १११॥

न च संभाषणं कुर्याद् याव सारन्नसंस्थितम्।

उपविष्टेन तस्तस्मिन् [ग: तत्तस्मिन्] समन्ताद् भैरवार्चिते॥ ११२॥

अर्घपात्रं गृहीत्वा तु सुरासव सुपूरितम्।

अर्घन्दत्वा नमस्कृत्वा कपालन्तु निवेदयेत्॥ ११३॥

सिद्धमेतन् महापात्रं प्रसादा तु भवा [ख: भ *] * *।

* * * * * * * * * * * * * * * * ॥ ११४ ॥

२९५ब् ख्) * * * * ततो नाथ भैरवेशोल्वणाननः ।

उवाच साधु साध्वीति सत्वेनानेन [ख: ?] सुव्रतः [ग: -त] ॥ ११५ ॥

नामं [ख: ?] यद्देव गन्धर्वैः सिद्धरुद्रदिवाकरैः ।

तदिदन्दा तु मुद्यातो न त्वया सदृशोखिले ॥ ११६ ॥

जगत्यस्मिन् महासत्व योग्यो वा भैरवी पदम् ।

मत्प्रसादान् महास [ख: महा *] * * * * * * * * ॥ ११७ ॥

* * * * * * * * * * * वर्ल [ख: वल] दर्पिताः ।

त्वत् तेजानलसन्दग्धाध्व [ग: -ध्वं] संयास्यन्ति? निश्चितम् ॥

११८ ॥

भैरव्या च तथाप्येव कृतोमातृगणाधिपः ।

कपाल साधनेनायं द्वितीय इव भैरवः ॥ ११९ ॥

भयदाता च कर्ता च देवासुर महोरगाम् ।

द्रव्याणि सुसहायेभ्योदत्वो * * * * * * ॥ १२० ॥

* * * * * * * * * * * * * * * * * ।

* * * तेपि देवेशि सिद्धविद्याधराधिपः [क: -धिपम्] ॥ १२१ ॥

३००अ ग्] कृतान्तर्धान सिद्धिस्तु विचरेन्माय गोचरम् ।

ऊष्मायितेपि देवेशि लवयां [खः ?] भोधरं क्षणात्॥ १२२॥

भ्रमते सप्तद्विपांश्च न मज्जत्युदकादिषु।

नाम्य [कः न्यस्य] रोधांयेता [कः रोधयिता] कश्चिद् देवासुर

महोरगात् [खः महोर *?] ॥१२३॥

* * * * * * * * * * * * * * * * *।

* * * * * * * * * * * * * * * ॥ १२४॥

* * * पालमुत्पन्नं खट्वाङ्गञ्च महेश्वर।

येन धारयसे नित्यं गणमातृ निषेवितम्॥ १२५॥

प्रमाणञ्चैव स * * * * * * * * * *।

* धि देव फलञ्चैव येन विन्दन्ति साधकाः ॥ १२६ ॥

भैरव उवाच

शृणु देवि परं गुह्यं * * * * * * ।

* * * * * * * * * * * * * * * * * * ॥ १२७ ॥

* * * * * * * * दनाद्येव जगत् स्थितं ।

रुद्राणु [गः रुद्रास्तु?] शक्तिसङ्घैस्तु चितं सर्वमहात्मने ॥

१२८ ॥

तदिच्छानुकरश्चाहम * * * * * * * ।

* * * त्मिका शक्तिस्सा [कः शक्तिः सा] चेच्छात्वं विराजसे ॥ १२९ ॥

माया शृष्टि तथा [ग: सृष्टिस्तथा] कान्ति धृतिर्बुद्धि * * * * ।

* * * * * * * * * * * * * * * * * ॥ १३० ॥

* * * * * * * * * * * वपुषा त्वया ।

२९५द् ख्) प्रेरयित्वा नियुङ्क्षामि सृष्टिसंहार वत्मनि [ग:
वर्त्मनि] ॥ १३१ ॥

संभारोपि परार्द्धान्ते व्यतिक्रान्ते हुताशनः ।

कालरूपोध्व संस्थानं क्रमाददहमुद्यतः ॥ १३२ ॥

अनेक तुटिपर्यायैः स्वतत्व कृतसंख्यया ।

नरकादिक मायान्तं [ग: मा?-] ददाहप्रभुरिच्छया ॥ १३३ ॥

सृष्टं शृष्टं [ग: सृष्टं] पुनस्तस्मै महाप्रलयता यदा ।

गतं मायोदरे देवि तमोभूतं जगत् तदा ॥ १३४ ॥

एवन्देहभृतां सर्वाकपालानि [ग: सर्वाङ्-] जिग्राहतम् ।

कपालमालिनं रूपं कृत्वा क्रीडामि चेच्छया ॥ १३५ ॥

यानि नाराण्यनेकानि तदध्वनि निवासिनाम् ।

कटकेयूर सूत्राणि कटिदेशे जनानि तु ॥ १३६ ॥

मच्छरीरगतन्दृष्ट्वा सूक्ष्मा च वपुषाध्वनम् ।

लीनंलिङ्गा कृतिस्त्वेन प्रख्यातो भुवनेश्वरैः ॥ १३७ ॥

कपालमालिनं दृष्ट्वा कालान्ते भुवनाधिपैः ।

कालेश्वरङ्कपालीशं पर्यायेन तु भाषितम् ॥ १३८ ॥

३००ब् ग्) संहारन्तं स्वकालेन दृष्ट्वारौद्रं महेश्वरि ।

भैरवं भैरवाकारं सर्वाध्वविहिते रितम् ॥ १३९ ॥

अनामोपि हि देवेशो नामकोटिभिरीश्वरैः ।

यैर्यैरेव सदा दृष्टस्तैस्तैस्ते [ग: -स्त] द्वदुदाहृतम् ॥ १४० ॥

त्वञ्च ते नैव रूपेण तदातज्ज्ञैरुदाहृता ।

तमोमये ततस्तस्मिन् [ख: * *?स्मिम्] प्रलीने सकलाध्वनि ॥ १४१ ॥

कृताधारो निराधारस्य शक्तिविहितासनः ।

तत्व सदेश्वरे देवि योगक्रीडा सुलालसः ॥ १४२ ॥

समाधौ तु परे तत्वे सति ज्ञाने समर्पिते ।

तमसा व्याप्ति तत् तूर्णं शरीरं यज्जगाश्रयम् ॥ १४३ ॥

योगनिद्रेवशोभाति वृत्तिस्तु मम सुव्रते ।

गते परार्धकालेत्ये [ग: -भ्यः] शिवेच्छा बोधिते पुनः ॥ १४४ ॥

मच्छरीरे विनिर्यातं यत् तत्वं यत्र संहृतम् ।

भावभूतमयं विश्वं मायाद्यवनिगोचरम् ॥ १४५ ॥

विसृष्टङ्कारणे च्छातो विचित्रन्तु यथा तथा ।

परमाणु समूहन्तु पार्थिवं तदसद्गतम् ॥ १४६ ॥

योगेन स्वेन मुत्पाद्य संगृहीतं वरानने ।

कृत्वा करतले तन्तु मथितं शक्तियोजनात् ॥ १४८ ॥

अत्युष्णता समायातं दिशा तत्व निरीक्षणम् ।

तत् तेज सा विपक्षं [ग: विपक्तं] हि कठिनं काञ्चनामयम्

॥ १४९ ॥

विभातिकर मध्यस्थं भानुकोटि [ग: भाव-] समप्रभः [ग:

-भम्] ।

त्रिगुणं त्रितयाधारं लोकपालनिकेतनं ॥

चतुर्दश कुलावासं तन्निधिर्भोगमोक्षयोः ।

तन्त्रान्ते सत्वजन्मा वै ब्रह्माक्षिप्तो गुरुत्वया ॥

२९६अ ख) वृत्यो तु प्राकृतः श्रोवै [ग: स्रोवै] वुद्धौ
व्यक्तिगतस्तुयः ।

प्रजानां कारणं सो वै विविकात्मं प्रकाशकः ॥

द्वितीयोपि ततो देवि तमसा सत्वयोजनात् ॥ १५१ ॥

उभाभ्यान्तु रजो [ग: रजों] मूर्तिः [ग: मूर्ति] निर्मितः
कारणेच्छया ।

सोधिपालन योगायत दण्डे सन्निवेशितम् ॥ १५२ ॥

स्वस्वभाव स्थितो [ग: स्थितौ] तौ तु [ख: ?] क * * [ख: * * *]
तमसेहैतः [ख: तम *?हितैः] ।

प्रेरितौ तु मया देवि तमसा सृष्टि हेतुना ॥ १५३ ॥

तद्रजोभाव संपन्नं रूपं यद्यभिलाषजम् ।

तत्व संक्षोभ माया सब्रह्मजं रजसो महान् ॥ १५४ ॥

विक्षोभितं यदातन्तु मुक्त्वा सत्वात्मता पुनः ।

ममद्विषति कोन्योस्ति मत्समो त [ग: तु] महीतले ॥ १५५ ॥

ददृशुश्चाग्रतो विष्णुमतिकान्तव पुष्मतां ।

कस्त्वंभो इति संज्ञेया तमसा योजितो मया ॥ १५६ ॥

संक्रुद्धस्तु ततो पश्च? [ग: * *?] जगत्यस्मिन् प्रभुर्वरः ।

अहंकर्ता इति सोपि ऊवुर्विश्वात्मनामिति [ग: ऊधुर्?विश्वात्म-] ॥

१५७ ॥

३०१अ ग्) मनोवुद्धी भवौद्वौ तु तयोहं हं कृतात्मवान्।

प्रेरकोमदितिस्त्वेन ममत्वेनाति मोहिताः ॥ १५८ ॥

विवादानन्तरं युद्धं तयोर्जातं परस्परम्।

दृष्ट्वा वाचा भुजाभ्यान्तु मुष्टिभिश्च ततो युधैः [खः ?] ॥
१५९ ॥

आजपानौ [खः ?] महावीर्यु कृतवन्तौ परस्परम्।

दोर्दण्डशव्दं निर्घातं शस्त्रसङ्घपदाहता ॥ १६० ॥

भून्ननर्ददिशः सर्वा स्फुटन्तीव महायसे।

द्युधरित्री उभेयद्वन्मिलितन्तु समिच्छते ॥ १६१ ॥

गृध्रसञ्छन्न गमनं शिवा विप्लावितन्तथा ।

घनस्तनित निर्घोषं जलदग्नि [गः ज्वल-] प्रवर्षणम् ॥ १६२ ॥

भ्रमद् भिर्भ्रमते त्यर्थमण्डलञ्चक्र चोदितम् ।

पतन्त्य तु कपालोग्रां सुनिर्घात महास्वनाम् ॥ १६३ ॥

प्रचण्डवा तव लिनगिरिशृङ्गदिशोदिशम् ।

महाप्रलय मायान्तं दृष्ट्वायुद्धेतयोस्त्विदम् ॥ १६४ ॥

महार्णव षुकल्लोल [गः सु-] वीविसंघट्टसंकुलम् ।

अत्यन्त तमसा लव्धं युद्धं दृष्ट्वा सुदारुणम् ॥ १६५ ॥

चिन्तयित्वा विनादेवि विनाशमुपगच्छतम्।

दघ्र्यापशमनं [ग: दघ्र्यो-] ताभ्यां कृतं स्वेनैव

देहिनाम्॥ १६६॥

एकार्णवे [ख: एकाणवे] महाघोरे लिङ्गरूपाति तेजसम्।

कृत्वा ताभ्यान्तरस्थन्तु विनिवार्य परस्परम्॥ १६७॥

२९६ब् ख्) संलग्नवाहु युद्धन्तु गतरोषं महात्मने।

क्षणादमेय रूपोहमधोर्ध्वन्तु व्यवस्थितः [ग: -तम्] ॥ १६८॥

महाकालाग्नि रोचीभिस्त्रा सयित्वा उभौ प्रिये।

मूर्च्छा कुली कृतौ तौ तु यथास्युर्दीनताङ्गतौ॥ १६९॥

विस्मितौ च वरारोहे लिङ्गं दृष्ट्वा सुजाल्वनम् ।

नैवा श्मकाञ्चनन्तारं नारकूटान्नलोहजम् ॥ १७० ॥

त्रपुताम्रसीस जातिं वा नैव कांसं [ग: -शं] न चान्यजम्

।

तेजरूपं [ग: तेजे-] महातेजं दृश्यन्त? [ग: दृङ्मुषन्त]

दिवौकसा ॥ १७१ ॥

तौ समेत्यगतौ द्वौ तु अधोर्ध्व पुरुषोत्तमौ [ख: पुरुषोत्त* ?] ।

अदृष्ट्वान्तर्गतौ भीतौऽतोत्र [ग: -स्तोत्र] मारव्धमीश्वरम् ॥

१७२ ॥

नमः कालानलोशाय शिवाया शिवहारिणे ।

अव्यक्त व्यक्तरूपाय स्थूलसूक्ष्माय शंभवे ॥ १७३ ॥

ज्ञानात्म वृत्तिचोताय [ग: -चेताय] नमोभूतक्रियात्मने ।

अनन्ताय अमूर्ताय अनाथानाश्रिताय च ॥ १७४ ॥

तेजस्विनां महातेज दीप्तज्वालाधराय च ।

भूर्भुवस्वः [ग: -वःस्वः] स्वरूपाय स्वरूपाय
महात्मने ॥ १७५ ॥

महासाम्य महालिङ्गं महादेवाय वै नमः ।

३०१ब् ग्] एवं यावस्तुतो [ग: यावत्स्तुतो] देवि तयोर्देवात्मिका गिरा
॥ १७६ ॥

आविभूतस्तु [ग: आविर्-] वै ताभ्या [ग: ताभ्यां] स्वरूपेण
गणांविके [ख: ?] ।

कृत्वा तु भिरवं रूपं कालं द्वादशलोचनम् ॥ १७७ ॥

कपालमालिनं भीमं विस्फुरच्छूलपानिनम् [ग: -पाणिनम्]
।

महोरगो पवीतन्तु विस्फुलिङ्गं ह विर्मुखम् ॥ १७८ ॥

खट्वाङ्गधारिणं त्र्यक्षं कपालकरभासुरम् ।

घोणशव्द कृतोत्त्रासं देवासुर महोरगाः [ग: -गान्] ॥१७९ ॥

दंष्ट्राकरालवदनं [ख: दष्ट्रा-] विद्युलोलां [ग:
विद्युन्माला] विलोलितम् [ख: वि * * *?] ।

दृष्ट्वा [ख: ?] तु [ख: ?] भयमापन्नौ [ख: ?] स्थितौ [ख: ?]
सन्मीलिते क्षणौ ॥ १८० ॥

प्रश्वासितौ महादेवौ पृच्छतौ व्रतमुत्तमम् ।

किमेतत् [ग: किमेत] मद्भुतं [ग: दद्भुतं] रूपं किमेतद्
भूषणं विभो ॥ १८१ ॥

किमेतद् भ्राजते व्योम्नि त्रिशिखं शूलमुज्वलम् [ग: -मुज्ज्वलम्]
।

उत्तमाङ्गं शुभं कंपयन्ते करतलस्थितम् ॥ १८२ ॥

महास्थि भूषणञ्चैतत् कंतनूत्थं [ख: कंत * *?]
विराजते ।

ततोहं प्रत्युवाचेदं तयोः दंवोधकं वच ॥ १८३ ॥

अनेकमुण्डकोटीभीर्वेयं मालाविभातिमे ।

असंख्य [ख: ?] भुवनीशानं [ख: * * *?शानं] प्रलयैस्तु
त्वजैस्तथा ॥ १८४ ॥

२९७अ ख्) विनिवद्धा तु हे ब्रह्म विनष्टानां पुनः पुनः ।

यानि नाराण्यशेषाणि ग्रीवा वाहुकटि स्थिताम् [ग: -ताः] ॥ १८५
॥

नारायन [ग: -ण] त्वदीयानि भुवनीशाञ्च सङ्क्षये ।

मायया मांसमावृत्यतल्लक्षात् क्षोभ्यमुद्यतः ॥ १८६ ॥

मयापिसोत्वनाया सा हूंकारेण नियामितः ।

खट्वा सुरेति विख्यातो [ग: -त] असुरो देव कण्ठकः ॥ १८७ ॥

तदन्ते लीलया देवि शक्त्याविष्टेन चेतसा ।

घातितो हि क्षणाद् दुष्टो विध्वंस्य वलदर्पितः ॥ १८८ ॥

तस्याङ्गं सीघ्रमादाय दिव्य वज्रमयं महान् ।

धृतं महायुधं यस्मात् खट्वाङ्गन्तु ततस्त्वितम् ॥ १८९ ॥

एतच्छुत्वा तु तौ देवौ प्रणिपत्य पुनः पुनः ।

जन्ममृत्युभ यत्रस्तौ पुनश्चाश्वासितोमया ॥ १९० ॥

दत्वा वर सहश्राणि [ग: सहस्राणि] वुद्धिकामानुसारतः ।

सृष्टिं कुरुष्वहे ब्रह्मत्वं पालयजनार्दन ॥ १९१ ॥

अजितस्त्रिषु लोकेषु सुभगश्च भविष्यसि ।

मम तुल्यवलौ वत्समच्छरीरे भविष्यसि [ग: -ति] ॥ १९२ ॥

प्रजानां कारणं ब्रह्मविवेक्ता वेदवादिनाः [ग: -नाम्] ।

सत्वमर्थं प्रवृत्तानां त्वन्तु वोद्धा भविष्यसि [ग: -ति] ॥ १९३ ॥

एवमुक्त्वा पुनश्चाहं मन्तर्धानमुपागतः [ग:
अन्तर्धान-] ।

खट्वाङ्गस्य समुत्पत्ति [ग: -त्तिः] कपालस्य तु भैरवि ॥ १९४ ॥

कथिता तु समासेन अधिदेवामतः शृणु ।

तस्याङ्गं शीघ्रमादाय [ग: शीघ्रंमा-] सर्वदेवमयं

कृतः [ग: कृतम्] ॥ १९५ ॥

तत्केशाद् गृह्य तत्रैव मया देवि निवेशिता ।

३०२अ ग्] तस्यवस्त्राणि रक्तेन चर्चयित्वा शुभेक्षणे ॥ १९६ ॥

निर्मितानि विचित्राणि देवाङ्गानि ध्वजानि तु ।

मयूरहंस पत्राणि विनिवद्धानि तत्र तु ॥ १९७ ॥

त्रिगुणेन तु सूत्रेण मायातन्तु मयेन तु ।

ततः खट्वाङ्गमूलेन अनन्तं सन्निवेशितम् ॥ १९८ ॥

शूलरूपस्तु बोद्धव्योकालाग्नि [ग: -ग्निः] काश्चिदेशतः ।

तस्यो परिष्टान्नरकान्यङ्गुलान्तरितास्त्रयः [ग: -

कादङ्गुलान्तरितास्त्रयः] ॥ १९९ ॥

पातालाश्चैव लोकाश्च उपर्युपरिसंस्थिताः ।

शूलग्रन्थे रधस्ता [गः स्तान्] तु ब्रह्मा तत्र व्यवस्थितः ॥ २००
॥

तस्यो परिस्थितो विष्णुर्मूर्ध्निश्चाहं [गः
विष्णुमूर्ध्निश्चाहं] वरानने ।

सितसूत्रे स्थितः सत्वोब्रह्मा तत्राधि दैवतम् ॥ २०१ ॥

२९७ब् ख्] रक्ते रजस्तु विज्ञेयो विष्णुस्तत्राधि देवतम् [गः दैवतम्]
।

मम कृष्णे विजानीयादहं तत्राधि देवतम् [गः दै-] ॥ २०२ ॥

मिश्रे चा व्यक्तमित्युक्तं रज [ग: रजः] सत्वतमोमयम्।

एवन्तु नियतिः कालो माया च वरवर्णिनि [ख: वर * र्णिनि] ॥ २०३ ॥

पिञ्छानामुपरिष्टा तु संस्थितानि यथा क्रमम्।

उपरिष्टात् तु याकाञ्ची ग्रन्थिस्तत्र व्यवस्थितैः ॥ २०४ ॥

य त्रिशूलोपरिष्टा तु तत्र शक्ति त्रयं [ख: ?] विदुः [ख: ?]।

वामाजेष्ठा [ग: -ज्येष्ठा] च रौद्री च वामा
दक्षिणमध्यगाम्॥ २०५ ॥

उपरिष्टाशिवं [ग: -च्छिवं] शान्तं स्थितं सर्वस्य
मूर्धनि।

कलाविद्या च रागश्च पादकेशं व्यवस्थिता ॥ २०६ ॥

वायु ध्वजे स्थितो देवि सर्वा सुपरिवारितः।

केशैनाग [ग: केशैर्-] कुलान्यष्टौ ज्ञातव्यानि विपश्चितैः॥

२०६॥

भूतप्रेत पिशाचाश्च यक्षकिन्नर चारिणाम्।

राक्षसाश्चापि वेताला [ग: -लाः] पिञ्छके संव्यवस्थिताः॥

२०७॥

घण्ठिकायां स्थिता रुद्रागणाश्च वरवर्णिनि।

शव्दे सरस्वती देवी स्फोटे विन्दुर्ध्वनिध्वनौ॥ २०८॥

योगिन्यो मातरोलामा भगिन्यः पूतनास्तथा [ग: -ना तथा]।

स्कन्दाद्यास्तु ग्रहाः सर्वे तथा सेहारिकादयः ॥ २०८ ॥

जटाभि [गः -भिः] संस्थिता ह्येते अस्त्राणि विविधानि च ।

वेदाङ्गानि तथा वेदा स्थानान्येव चतुर्दशः [गः -श] ॥ २०९ ॥

ग्रहणे संस्थिता ह्येते गायत्री चैव मोक्षणे ।

उद्धृते तु स्थितोङ्कारः सावित्री स्थापिते विदुः ॥ २१० ॥

सर्वदेवमयं ह्येवं खट्वाङ्गं वरवर्णिनि ।

मयाकृतन्तु तत्काले पवित्रं परमं हितम् ॥ २११ ॥

ततः खट्वा सुरः शान्तं पदप्राप्तो वरानने [खः वरा * ने]

।

एषा खट्वाङ्ग उत्पत्तिर्योंविजानाति तत्वतः ॥ २१२ ॥

सयाति ब्रह्मलोकन्तु [ग: -स्तु] भिन्नदेहेन संशयः ।

३०२ब् ग्] यः पुनः [ग: पुनर्] दीक्षितात्मा वै धारयेद् युक्तं
[ग: युक्त] चेतसा ॥ २१३ ॥

सवीरेश पदेलीनोन चागच्छत्वधोमुखः [ग: -मुखम्] ।

षट्मासमव्दमात्रं [ग: षण्मास-] वामं त्रयुक्तस्तु
योनरः ॥ २१४ ॥

खट्वाङ्गं धारयेद् देवि विद्या सिद्धिमवाप्नुयात् ।

प्रमाणं संप्रवक्ष्यामि शृणुष्वेकमनासती ॥ २१५ ॥

स्वशरीर प्रमाणेन कर्तव्यमधिकन्तथा ।

चतुर्हस्तोर्द्धतो देविमर्त्य जेष्टसुखावहम्॥ २१६॥

२९८अ ख्) त्रिहस्तन्तु शुभं विद्धिमंत्र सिद्धिकरं हितम्।

अङ्गुष्ठ पर्वमानेन कुर्यात् पञ्चादशाङ्गुलम् [ग: पञ्च-]

॥ २१७॥

चतुरङ्गुल मानेन परिणाहो वरान।

त्रिहस्तं पञ्चपर्वाणि परिणाहेण [ग: -न] कीर्तितम्।

अष्टाङ्गुल परीणाह [ग: -हं] चतुर्हस्तस्य सुव्रते॥

चतुरङ्गुला भवेत् कञ्ची कीलको द्वादशाङ्गुलः [ग: -लम्]।

चतुरङ्गुल प्रवेशन्तु अधस्ताष्टाङ्गुलो [ग: अधसाष्टाङ्गुलो]

भवेत्।

एतत् प्रमाणमाख्यातं शून्यं किञ्चिन्न कारयेत्॥ २१८॥

पादको हस्तमात्रस्तु प्रकुर्याच्छास्त्र वित्तमः।

द्वादशाङ्गुलमानन्तु त्रिशूलन्तस्य चोपरि॥ २१९॥

नवाङ्गुल [ग: -लं] त्रिहस्ते तु इतरेषु षडङ्गुलम् [ग: षडंङ्गुलम्]।

पादन्तद्वत् प्रकर्तव्यं ध्वज [ग: ध्वजं] कुर्याद् यथेप्सितः [ग: -तम्]॥ २२०॥

द्वादशाङ्गुलमारभ्य चतुर्विंशति कन्नरैः।

गृहस्थेनापि कर्तव्यं यथागुप्तं प्रजायते॥ २२१॥

लक्षणेन विहीनं हि यदा कुर्वीत साधकः।

विभ्रमोद् वेग [गः वेगं] विद्वेष सिद्धिहानि करंभवेत्॥ २२२॥

न्यग्रोधपादपे रिह्वे [गः ऋत्वे] अथवं शमयं शुभम्।

सरलं देवदारुञ्च करवीरार्कजन्तथा॥ २२३॥

वुकश्चासोक खदिरो विल्वपिप्पलशिंशपाः।

सप्तपर्णमयं वाथ श्रीखण्डे रक्तचन्दने॥ २२४॥

कार्यं श्मशानकाष्ठे वा तारकाञ्चनजं तथा।

ताम्रजं वा महेशानि पुष्पलोहमयं तथा॥ २२५॥

यथा लाभेन कर्तव्यं साधकेन महात्मना ।

तमाराध्यम् [ग: -राध्य] प्रयत्नेन यथा युक्तेन मंत्रिणा ॥

२२६ ॥

खट्वाङ्गं पूजितं येन त्रैलोक्यं तेन पूजितम् ।

खट्वाङ्गं धारितं येन धृतन्तेन चराचरम् ॥ २२७ ॥

मन्त्रचर्या विहीनोपि ग्रामाशक्तोपि यो नरः ।

खट्वाङ्गं धारयेद् यस्तु नासौ लिप्यति पातकैः ॥ २२८ ॥

ब्रह्माधि देवतं देवि कपालं परिकीर्तितम् ।

पवित्रः [ग: -त्रम्] परमं दिव्यं माग्नेयं [ग: आग्नेयं]

ब्रह्मसंभवम् ॥ २२९ ॥

यस्तुधारयते नित्यं मत्परोनियमस्थितः।

पापहा सर्वमर्त्यानां दर्शना देव पार्वति ॥ २३० ॥

ब्रह्महा पितृहन्तारो भ्रातृहा [ख: भातृ-] मातृघातकम्।

३०३अ ग्] द्वादशाव्दानि भिक्षाशी कपाल व्रतमाचरेत्॥ २३१ ॥

मंत्रदीक्षा विहीनोपि शुद्धयत्येवं न संशयः।

दीक्षितो यस्तु मंत्रज्ञः शिवभक्ति समन्वितः [ख: -तंः] ॥

२३२ ॥

ब्रह्महत्य [ग: -हत्या] सहस्त्रेपि सप्ताहाद् विमलो भवेत्।

२९८ब् ख्] अपापी मंत्रयुक्तस्तु षण्मासा [ग: -सात्]

सिद्धिभाग्भवेत् ॥ २३३ ॥

रक्षयक्ष पिशाचानां भूतवेताल गुह्यकान् ।

अप्रधृष्या प्रजायेत षण्मासात् [ग: -सा] तृङ्ग?भुन्नरः [ग: * ङ्ग?भुन्नरः] ॥ २३४ ॥

जायते च महेशानि मत्युत्रोतीव वल्लभः ।

यक्षिणी गुह्यकनाञ्च [ग: गुह्यका-] योगिनीनां प्रियो भवेत् ॥ २३५ ॥

किन्तुतास्तत्र सान्नैध्यं मयापूर्वं प्रकल्पिताः ।

ब्रह्मणस्योत्तमाङ्गन्तु अतीवात्युल्वणं महत् ॥ २३६ ॥

पञ्चमंत्र समुद्भूतं तेन सञ्छादितं जपेत् ।

आदित्याश्च ग्रहाश्चैव नक्षत्राणि च चन्द्रमाः ॥ २३७ ॥

तेजसान स्वयं यान्तितारा सूर्योदये यथा ।

ततोहं संस्तुतः [ग: -त] स्तैस्तु देवैः सऋषिपुङ्गवैः ॥ २३८ ॥

ततो योगेन विज्ञाय कार्यमेतद् दिवौकसाम् ।

गन्धवत्या तटेरम्ये स्वरूपं दर्शितः [ग: -तं] मया ॥ २३९
॥

महाकालं महारौद्रं प्रज्वलं स्वमरीचिभिः ।

छादितः समयो [ग: समयस्-] तूर्ण स्वप्रभाभिः पितामहः ॥
२४० ॥

न ख रावा महस्तस्य छिन्नमत्युल्वनाननः [ग: -णाननम्] ।

तद्गृह्य नृत्यमानोहं गतो यत्र जनार्दनः ॥ २४१ ॥

तिष्ठते योगमाशीन [ग: -नं] पुराण पुरुषोत्तमः ।

ज्वलन्तं तेजसास्वेन सुरासुर नमस्कृतः ॥ २४२ ॥

प्रार्थितः समया देवि भिक्षान्देहि महातपः ।

कपालमालिनं दृष्ट्वा ज्ञात्वा च पुरुषोत्तमः ॥ २४३ ॥

स्वभुजं दर्शयामास महासत्वो महावलः ।

ततो मया त्रिशूलेन हतस्तु शुभलोचने ॥ २४४ ॥

श्रोणिस्याति [ग: श्रोणिस्तस्याति] वेगेन ततो धारा विनिर्गता ।

महाघोषेण पतिता कपाले चातिभास्वरे ॥ २४५ ॥

तस्या [ग: तस्याः] शब्देन महता कंपिता तु वसुन्धरा ।

वामहस्तेन [ग: -तु] तत्पात्रं ततो [ग: ततः] संघट्टितं

मया ॥ २४६ ॥

अहन्यहनि विक्षेभ्य [ग: -भ्यो] नारायणि रमाम्यहः [ग: -हम्]

।

स्वच्छायां तत्र पश्यामि तेज सातीवचोल्वणा ॥ २४७ ॥

विचित्रा [ग: -त्र] तत्र मे शृष्टिर्जाता [ग: सृष्टिर्-] चातिभयङ्करा ।

वामहस्ते प्रपश्यामि योगिन्यो वीरसंयुता ॥ २४८ ॥

विद्येश्वरी महाचण्डारक्ता चैव करालिनी ।

गुह्यकञ्चेश्वरं देवि तत्प्रपश्यामि भैरवः [ग: -वम्] ॥ २४९

॥

षडयोगिन्य [ग: -न्यः] प्रपश्यामि मातरोभीम विक्रमाः ।

३०३ब् ग्) असङ्ख्याता महादेव्यस्तत्रोत्पन्नास्तु [ख: महादे *

?त-] सुव्रते ॥ २५० ॥

२९९अ ख्) किङ्कर्यः किङ्कराश्चैव द्वादशादित्य वर्चसः ।

मन्थान भैरवस्तेन गीतः स परमेश्वरः ॥ २५१ ॥

दिव्येनाव्द सहस्त्रेण तत् पूर्णावीरवन्दिते ।

देव्यस्तत्र समुत्पन्ना शोणितासव लोलुपाः ॥ २५२ ॥

कपाले संस्थिता देव्यो दृष्ट्वा संपूजितामया ।

विष्णुनापि च तत्रस्था देव्यः संपूजिता सदा ॥ २५३ ॥

एवञ्च ब्रह्मणेनापि भावमाश्रित्य पूजिता ।

ब्रह्मणस्योत्तमाङ्गे तु विष्णु [ग: विष्णुः] शोणितपूरिते [ग: -तं] ॥ २५४ ॥

मम दृष्टि निपातेन उत्थिताच्चात्ररस्मयः [ग: -रश्मयः] ।

कपाले तेन सानैध्यं [ग: सान्नैध्यं] कल्पयन्ति वरानने ॥ २५५ ॥

कपाल पूजितं येन देव्यस्तेन प्रपूजिताः ।

कपालपूरितं येन तृप्तास्तस्य गभस्तयः ॥ २५६ ॥

कपालधारितं येन धृतन्तेन चराचरम् ।

वन्दिते वन्दितं सर्वं [गः सर्व] लङ्घिते लङ्घितं जगत् ॥ २५७ ॥

कपालं लङ्घितं येन पापात्मा चाथ निन्दितम् ।

लंघिताः समयास्तेन निन्दिता गुरवस्तथा ॥ २५८ ॥

तस्मान्नलंघयेत् प्राज्ञः कपालं त्रिदशार्चितं ।

गायत्र्योङ्कार सा वित्रिं सर्वशास्त्र समन्विता ॥ २५९ ॥

कपाले चतुरोवर्णा द्रष्टव्या वीरवन्दिते ।

तेन तत्रैव यत् किञ्चित् पतितं भिक्षभाजने ॥ २६० ॥

पावनन्तत् पवित्रञ्च कुत्सितान्नमपि भवेत्।

पापाचार रतेनापि स्त्रिया वा पुरुषेण वा ॥ २६१ ॥

सद्योमांसा सवन्दत्तं तत् पवित्रं न संशयः।

एकान्नमपि भुङ्जानो परिग्रह भयोज्झितः [ग: -तम्] ॥ २६२ ॥

किं पुनर्भक्षयेत् तुष्ट विशेषान् मंत्रमाश्रितः [ग: -तम्]।

ब्रह्माधि देवतन्देवि कपालं वरवर्णिनि ॥ २६३ ॥

सर्वदेव मयश्चैव सर्वतत्वमयं हि तत्।

चूडामणि कपालेन शिखायां यो निवेशितः ॥ २६४ ॥

ईश्वरस्तत्र विज्ञेयो [ग: य] अधिदेवो वरानने ।

ज्ञानशक्ति क्रियाख्या च कर्णिके परिकीर्तिते ॥ २६५ ॥

कण्ठस्थिता तु या मुद्रा अहं तत्राधि देवतम् [ग: -दैवतम्] ।

रुद्रोमातृगणैस्सार्द्धं [ग: -गणैः सार्धं] ज्ञातव्यस्तु
वरानने ॥ २६६ ॥

अनन्ता [ग: अनन्त्य] ह्युपवीते तु शक्तिस्सर्वार्द्धगा [ग: शक्तिः-]
परा ।

हस्तवाहु कटिस्थैश्च विष्णुज्ञेयोधि देवतम् ॥ २६७ ॥

शक्तयो विविधाकारा जटानामधि देवतम् ।

एतन्महार्थदन् [क: -हन्] देवि यो विजानाति तत्वतः ॥ २६८ ॥

शिववत्स तु वोद्धव्यो विरुद्धा चरणोपि यः।

२९९ब् ख्) यद्यपिशुचि कर्मस्थ [ग: -स्थं] कुरुते तीव साहसम्॥ २६९॥

३०४अ ग्) तथापि प्रेतराजानो भवते शिव भावितः।

स्थित्वा शिवेच्छया तत्र यावत् तत् कर्मसंक्षयः॥ २७०॥

ततोयाति परं स्थानं यत् तत् पदमनामयम्।

एतत् पुरा महादेवि देवैश्चीर्णं महाव्रतम्॥ २७१॥

ततो मृत्युजरान्त्यत्तवा [ग: -रांस्त्यत्तवा] मंत्रसिद्धि [ग: -सिद्धिं] पराङ्गता।

शुक्रेणापि पुराचीर्णं महेन्द्रेण महाव्रतम्॥ १७२॥

ततोदितेन पत्यानां मर्दिता तु वरूथिनी।

विष्णुनापि [ख: ?] पुराचीर्णं [ख: ?] चक्रस्यार्थे महाव्रतम्

॥ २७३॥ [ख: तमवाप्याजितो लोकेजातो देवारिषूदनः।]

च्तमवाप्याजितो लोकेजातो देवारिषूदनः।

ब्रह्मणेनापि देवेषु प्रनष्टेषु महाव्रतम्॥ २७४॥

चरित्वाधारितः पूर्वमहं सुरवरार्चिते।

मयातुष्टेन तस्या सुःपुनर्वेदाः [ग: सु-] प्रकाशिताः॥ २७५॥

मातृभिर्योगिनीभिश्च ग्रहवेताल राक्षसैः।

ममरूपन्तु [ग: -स्तु] विज्ञाय चीर्णमेतत् [ग: -तन्] महाव्रतम्॥

२७६ ॥

मासपक्षायनञ्चाव्दं मंत्रयुक्तञ्चरेद् यदि ।

जायते सर्वयोगीनां समन्तः साधकोत्तमः [खः -

कोत्तममः] ॥ २७७ ॥

तस्माद्यः सिद्धिमन्विच्छत् परापर गुणात्मिका ।

तत्रभैरवमाश्रित्य तेन कार्यं महाव्रतम् ॥ २७८ ॥

वेलाव्रतं समाश्रित्य सिद्धयन्ते गृहमेधिनः ।

मर्त्यभोगा विरक्तात्मान चोत्पतति खतले [गः खेतले] ॥ २७९ ॥

पशोरभावतो देवि न मेलकविवर्जितः ।

इति पिचुमते द्वादशसाहस्त्रके कपालखट्वाङ्गोत्पत्ति अशीतिमः पटलः ॥

भैरव उवाच

अथातः [ख: -त] संप्रवक्ष्यामि कञ्चुकी साधनं परम् ।

येन सिध्यन्ति कामानि कञ्चुकी साधकस्य तु ॥ १ ॥

फलानां कर्षणञ्चैव वस्त्रमद्यापकर्षणम् ।

तांवूलञ्चैव कृष्येत भक्ष्यभोज्यास्त्रियस्तथा ॥ २ ॥

शान्तिकं पौष्टिकञ्चैव वश्याकर्षणमेव च ।

विद्वेषोच्चाटनादीनि कुहकानि च सुव्रते ॥ ३ ॥

करोति नात्र सन्देहो [ग: -ह:] कञ्चुकी साधनेरतः ।

लक्षणं संप्रवक्ष्यामि येन सिद्धयन्ति साधकाः ॥ ४ ॥

निःशव्दे निर्जने देशेमंत्रोद्धारन्तु कारयेत् ।

आदौ द्वात्रिंशकं योनेः पञ्चमस्वरभूषितम् ॥ ५ ॥

एतत् ते प्रथमं तत्वं द्वितीयं शृणु सांप्रतम् ।

अष्टाविंश [ग: -शत्] पुनर्योनि त्र्योदश स्वरयोजितम् ॥ ६ ॥

द्वितीयं मंत्रमित्युक्तं तृतीयन्तु तृतीयके [ख: ?] ।

३००अ ख्] तृतीयन्तु स्मृतं बीजं स्वरैकादशयोजितम् ॥ ७ ॥

चतुर्थन्तु कषष्ठं य तृतीयस्वरसंयुतम् ।

३०४ब् ग्] अष्टाविंश तृतीयेन स्वरेणोक्तन्तु पञ्चमम्॥ ८॥

द्विधाभूत पदं न्यस्य अक्षरन्तु वरानने।

द्वात्रिंशे कुनत्रिंशन्तु [ग: ऊन-] द्वितीयस्वरसंयुतम्॥ ९॥

अष्टमन्तु स्मृतं बीजं त्रयं [ग: त्रयस्] त्रिंशतिमं पुनः।

द्वीतीयस्वरयोगेन नवमं परिकीर्तितम्॥ १०॥

प्रणवेन समायुक्तं मंत्रमेतद् दशाक्षरम्।

नमस्कारेण संयुक्तं रूपमेतत् प्रकल्पयेत्॥ ११॥

जपेत् [ग: जपेन्] मंत्रवरं श्रेष्ठं तद्गते नान्तरात्मना।

शाकयायावक भक्षस्तु मद्यमांसाशिनन्तथा [ग: -
शिनस्तथा] ॥ १२ ॥

क्षमापलेन तु धूपं स्यात् [ग: स्यान्] मार्जारविनियोजितम् ।

आत्मशुक्रेण संयुक्तं धूपं सानध्यकारकम् [ग:
सान्निध्य-] ॥ १३ ॥

गुग्गुलुं अलिकिञ्चिञ्च [ग: -च्च] होमयेदविशङ्कितः ।

निर्लज्जी कृतमात्मानो व्रतचर्या समन्वितः [ग: -तम्] ॥ १४ ॥

होमकर्मनियुक्तस्य सिद्धयते कञ्चुकी स्फुटम् ।

आदितुर्य चतुर्वक्त्रा अथषड्वर्ण योजितैः ॥ १५ ॥

अङ्गैर्यजे [ग: -जेत्] तु देवेशि प्रणवे कमलासने ।

अन्यथा मंत्रसद्भावं [खः -वंन्] न हि गच्छन्ति साधकः

॥ १६ ॥

आकर्षण प्रयोगेन रुद्राङ्कुश [खः रुद्राकुश] युतेन तु ।

दिव्याकृष्यन्तु भुञ्जीत न च स्त्रीश वला [गः वलात्] क्वचित् ॥ १७ ॥

काचमाचीर संगृह्य आत्मशुक्रसमन्वितम् ।

मार्जार विष्टसंयुक्तं पिण्याकेन समन्वितम् ॥ १८ ॥

होमधूप समायोगात् तत्क्षणात् कृष्यते नरः ।

यत् किञ्चिद् भक्षभोज्यं स्यात् तत्क्षणात् कर्षयेत् तथा ॥ १९ ॥

काष्ठे त्व रलुके कृत्वा प्रतिमा तु चतुभुर्जा [गः चतुर्भुजा] ।

अक्षसूत्राङ्गुली पञ्चकर्तव्यं सिद्धिसाधने ॥ २० ॥

यत्किञ्चिद् भाण्डकं गृह्यमंत्रेणानेन सुव्रते ।

एकविंशति जप्तेन मंत्रेणाछाद्यतञ्जपेत् ॥ २१ ॥

तस्यो परिन्यसेद् वस्तमधोदृष्ट्या [ग: -दृष्त्या] भुतञ्जपेत् ।

वक्राङ्ग नेत्रसंयुक्तं मन्त्रेणानेन साधकः ॥ २२ ॥

सिद्धिराशुः प्रवर्तत [ग: प्रवर्तन्ते] भैरवस्य वचोयथा ।

कञ्चुकी साधनं श्रेष्ठं पिचुतन्त्रे प्रकीर्तितम् ॥ २३ ॥

नमया कस्यचित् ख्यातं तथैका या वरानने ।

इति पिचुमते कञ्चुकी साधन [ग: -ने] एकाशीतिमः पटलः ॥

३००ब् ख्] भैरव उवाच

अतः [ग: अत] परं प्रवक्ष्यामि तन्त्रंमुत्फुल्लकं [ग:
तन्त्रमुत्-] परम्।

येन विज्ञात मात्रेण स्वच्छन्दः क्रीडते नरः ॥ १ ॥

विज्ञान गुणसंपन्नो [ग: -न्नः] सर्वमाया विवर्जितः।

कपटः कापटैर्हीन [ग: -नः] सर्वद्वन्द्व [ख: -द्वन्द्व?]
विवर्जितः ॥ २ ॥

सिद्धिराशुः [ग: -शु] प्रवर्तेत अद्वैतगुणशालिनः।

३०५अ ग्] अद्वैतगुणसंपन्नो [ग: -पान्न] अद्वैतेभाव तत्परः ॥

३॥

मंत्रञ्चास्य प्रवक्ष्यामि सर्वलक्षणसंयुतः [गः -तम्]।

ऋष मध्यगतं दत्वा ततोग्निर्बिन्दुना पुनः॥ ४॥

विद्यया भेदितं कृत्वा च चतुर्थस्य नोद्धरेत्।

वह्निस्थं विन्दुनायुक्तं कलाधारं समुद्धरेत्॥ ५॥

धराषष्ठं समुद्धृत्य वज्रदेहं तथैव च।

चतुर्थं बीजमेवोक्तं पञ्चमं शृणु सांप्रतम्॥ ६॥

द्वितीयस्य द्वितीयन्तु तृतीयश्चर [गः -स्वर] योजितम्।

द्विधाभूतं न्यसेत् [गः न्यसेन्] मंत्री षष्ठमेतत्

प्रकीर्तितम्॥ ७॥

ऋषप्तमं तथा योनेतृतीयस्वरयोजितम् [ग: योनेस्-]।

सप्तमं चोदितं मंत्रं अष्टमं शृणु सांप्रतम्॥ ८॥

द्वितीयस्य द्वितीयन्तु द्वुगुणङ्कुरसन्निधम्।

स्वरैकादश संयुक्तमष्टमं परिकीर्तितम्॥ ९॥

प्रणवं हंस भूयिष्ठं [ग: भूपिष्ठं]

षष्ठस्वरविभूषितम्।

बिन्दुमस्तक संभिन्नं शिखाशेखरभूषितम्॥ १०॥

आदौ नवाक्षरं मंत्रं प्रणवेन दशाक्षरम्।

नवाक्षरस्तु मंत्रोयमुत्फुल्लकमतं महत् ॥ ११ ॥

पञ्चदेवतसंयुक्तं चत्वारो दूतिसंयुतम् ।

नामतो गोत्र तश्चैव सर्वकामार्थ साधकम् ॥ १२ ॥

ह्रीं कारं हंसिमेवोक्तं ञ्रूंकारं बीज उच्यते ।

यकारन्तु उमा सा तु लकारं कान्तिनायिका ॥ १३ ॥

एवं वर्णविभान्तु चतुष्कं देवता [गः -ताः] स्मृतम् ।

दूतीनां नाम संज्ञन्तु [खः स-] सांप्रतं शृणु तत्वतः

॥ १४ ॥

खिकारां ब्राह्मिमित्युक्तं खिःकारं [गः खि-] रौद्रि उच्यते ।

णिकारं रुग्मिनी चैव अजामो जेतिच्छे कृता ॥ १५ ॥

दूतीनां मंत्रमाख्यातं विद्यापीठे तु यामले ।

अनेकभेद भिन्नास्ता [ग: -स्ताः] पिचुतंत्रेति लक्षिता [ग: -ताः] ॥ १६ ॥

सामान्यं सर्वतो भद्रमुत्फुल्लकमतं [ग: -तः] स्मृतम् ।

भावनं तस्य मंत्रस्य महोच्छुष्म कृतादराः ॥ १७ ॥

स्वबीज भेद वक्राङ्गलक्षणं परिकीर्तितम् ।

पूर्वेव दूतिवक्रास्तु त्रितत्वोक्ति विभागतः ॥ १८ ॥

३०१अ खु) पूजा तथैव कर्तव्या कालचक्र क्रियान्विता ।

ज्ञानोदय विभागेन सर्वतत्व प्रकाशिका ॥ १९ ॥

आसाञ्चक्रं समासेन कथयामिसुलोचने ।

ऋतुकालगतन् देवि सर्वज्ञत्व प्रकाशकम् ॥ २० ॥

भूतं भव्यं भविष्यञ्च येन जानन्ति साधकाः ।

अष्टारं पङ्कजं लिख्यदिक् सिद्धं स्वात्मयोजितम् ॥ २१ ॥

मध्ये देवं प्रतिष्ठाप्य सर्वकालेश्वरेश्वरः ।

तस्योदयं प्रकल्प्यादौ स्वेष्टन्ते नैव वर्मणा ॥ २२ ॥

देवी दूतीगणं न्यस्य सूर्यचारेण भैरवि ।

३०५ब् ग्) ध्वजधूम सिंघश्वानाद् [ग: सिंहश्वानाद्] वा

पूर्वतो केसरस्तथा ॥ २३ ॥

इभश्च व्योमचारी च एकादिवसुसंख्यया ।

तिथयः सूर्यचारेण दिवारत्रौ च व्युत्क्रमात् ॥ २४ ॥

शुक्लकृष्णविभागेन द्वौ द्वौ चारकसंख्यया ।

किन्तु षोडशभागेन हीना प्रत्येकश [गः -शः] स्थितिः ॥ २५ ॥

अनुलोम विलोमेन मासगत्या वरानने ।

नक्षत्रास्तु तथा त्रीणि त्रीणिस्तु त्वरकान्तगा ॥ २६ ॥

द्यर्द्ध षादाधिका [गः पादा-] देवि तच्चक्रगति संस्थिता ।

त्रिभागूना करावस्था राशयस्तु [खः -यंस्तु] वरानने ॥ २७

॥

योगानक्षत्र वज्ज्ञेया विष्कंभाद्यास्त्वनुक्रमात्।

अष्टमांसाधिकास्तारा करणास्तद् विवर्जनात्॥ २८॥

ग्रहास्तुतार वज्ज्ञेया ध्रुवाणि करणानि तु।

कृत्वान्ने तद्विभागस्तु क्रमशः संविकल्पयेत्॥ २९॥

अकशान्ता स्मृतान्धाया अष्टौवर्गाष्टकेन तु।

तिथिः स्वरैस्तु तिथयो राशयः शण्ठवर्जिताः॥ ३०॥

नक्षत्रादि ककारादि रेफाद् योगास्तु तावतिः [गः -ति]।

भयक्षान्तास्तथा तारातथा [गः तारास्-] चापि ग्रहा [गः

ग्रहाः] प्रिये ॥ ३१ ॥

क्षकारान्तौ समाख्याता ध्रुवानिति नपुंसकैः ।

करणानि भवन्त्येवं सप्तशान्तानि योदितः [गः पा–] ॥ ३२ ॥

दिशश्चाद्या स्मृता वर्गाकषोर्द्धाधो यथा स्थितिः ।

एवन्नामास्तु [गः –यास्तु] वसव [गः –वः] समुद्रा
मूर्तयस्तथा ॥ ३३ ॥

एकस्मिन् प्रणवे देवि स्थिता चक्रे विभोर्वरे ।

पार्थिवेशत रुद्रास्तु दिशाधोर्ध्वन् तथा स्थिताः [गः –ता] ॥ ३४
॥

अमरेशादि काश्चापि ज्वालानल निलाम्वरे ।

सर्वेवुद्धौ गुणाख्ये च प्रकृतौ पुरुषात्मके ॥ ३५ ॥

नियतौ विद्यया चैव कलाकाले च दिग्गता ।

मायाविद्येश्वरा शक्तिवामाद्या [ग: सक्तिर्-] विभुराद्यतः ॥
३६ ॥

ईशो [ग: ईशः] सदाशिवश्चैव शिवश्चैव यथा क्रमम् ।

३०१ब् ख्) मातरः शक्तयो देव्य [ग: देव्यः] कलातन्त्रानि [ग: -णि]
रश्मयः ॥ ३७ ॥

गभस्तयश्च ऋक्षाद्यातारादयाश्च [ग: ऋक्षाद्यास्-] वरानने
।

स्वांशस्वांश विभागेन दिक्तारा राशि संस्थिता ॥ ३८ ॥

अन्यं यद् वा विभागस्तु चक्रेशन्विश्वसंभवे ।

वर्णांसितादयः पूर्वा यथादिशि विलक्षिताः ॥ ३९ ॥

भवन्त्या यादि सर्वेषां नाड्यंष्टक [ख: ?] गतिस्थिता [ख: ?] ।

वेला [ख: ?] वलाच्च [ख: ?] वक्तव्य महोरात्राहकेवला ॥ ४० ॥

रात्रौ वा प्रहरेकैर्वा कृत्ये वा प्राणसंख्यया ।

कल्पिते तु सदा भावे कर्तव्यं निश्चितं प्रिये ॥ ४१ ॥

शितारक्ता [ग: सिता-] तथा पीताकृष्णवर्णा चतुर्थिका ।

हरिता कद्रुवर्णा [ग: कटु वर्णा] च श्याम पिङ्गा तथा [ग:

पिङ्गास्-] परा ॥ ४२ ॥

३०६अ ग्] एतन्नवात्मकं चक्रं वर्णरूपं पृथक् पृथक् ।

देवो देव्यस्तथा ज्ञेया दूत्योनाडिषु संस्थिता [गः -ताः] ॥ ४३
॥

इडा च पिङ्गला चैव सुषुम्ना च तृतीयका ।

गान्धारी हस्तिजिह्वा च पूषा चैव यथा तथा ॥ ४४ ॥

अलंवुषा कुहाचैव शंखिनी दशमी स्मृता ।

सुशुम्ना [गः सुषुम्णा] च कुहा चैव प्राणापानैर्व्यवस्थिता
॥ ४५ ॥

प्राणापान [गः -नः] समानश्च उदानोव्यान एव च ।

नागकूर्मोथ कृकरो देवदत्तो धनञ्जयः ॥ ४६ ॥

कुहा अपानके मध्ये सुषुम्ना [ग: सुषुम्णा] प्राण संस्थिति [ग: -तिः] ।

समान पूर्वपत्रस्था उदानोग्नेय गोचरे ॥ ४७ ॥

ध्यानस्तु दक्षिणे पत्रे नागो नैऋतिगोचरे [ग: नैर्ऋति-] ।

कूर्मारो वारुणावस्थ कृकरस्तु सदा गतौ ॥ ४९ ॥

देवदत्तस्तु सौम्या वै ईशावस्थो धनञ्जयः ।

एवं वायु समायोगाचेता [ग: -गाच्चेता] भावविवक्षया ॥ ५० ॥

गति [गः गतिः] शक्ति [गः शक्तिः] शिवात्मस्था ज्ञात्वादेश्यं शुभाशुभम्।

अर्चनञ्च महाभागे नाडीकालोदयात्मकम्॥ ५१॥

कर्तव्यं त्वन्यथा देवि हनते मुष्टिना नभः।

न च सिद्धि न [गः सिद्धिर्न] च ज्ञानं क्रियाकाल विवर्जितम्॥ ५२॥

फलदन्तु महादेवि अतोवश्यं समभ्यसेत्।

अधुना संप्रवक्ष्यामि तदभ्यासस्य यत्फलम्॥ ५३॥

भवते तु महादेवि तदेकाग्रमना [गः -नाः] शृणु।

दिनार्द्धयामिकं चारं सूर्यस्य शशिनस्य च॥ ५४॥

निशायान्तु विजानीया [ग: -याद्] ध्वजादि वृषनादिकम्।

पृथक् काल स्वरूपेण हृत्पद्मे वा व्यवस्थितम्॥ ५५॥

हृत्पद्मे चक्रमित्युक्तं वाह्ये वा वरवर्णिनि।

३०२अ ख्) स्थूलसूक्ष्म परत्वेन शिवं विश्वात्मकं

ध्रूवम्॥ ५६॥

पूर्वादि चक्रसंयुक्ता [ग: -युक्ताः] पूर्वाह्णे हंसि देवता

[ग: -ताः]।

सितवर्णा सदाध्येया सर्वसिद्धि [ग: -सिद्धिः] प्रकीर्तिता [ग: -

ताः]॥ ५७॥

पूजिता राधिता देवी ध्वजनाडी मुखेद्रुतम्।

यत् किञ्चिद् वाग्मयं [ग: वाङ्?मयं] सर्वन्नष्टं
हृतकमेव वा ॥ ५८ ॥

दूतस्या गमनं ज्ञात्वा स्थानं वा चोदयेस्वके ।

अन्यत्र वा विभागस्थं स्वनाडिस्था विजानते ॥ ५९ ॥

नान्यथा विपरीतं स्यादक्ष [ग: -क्षः] स्रोतवहे तथा ।

सौम्ये सौम्यं विजानीया [ग: -याद्] रौद्रेरौद्रं प्रकल्पयेत् ॥
६० ॥

एवं वर्णान्तरे नाड्य [ग: नाड्यः] कलातत्वार्थ साधिकाः ।

पूर्वाह्णार्धेव हे कालं ध्वजनाडी समन्वितम् ॥ ६१ ॥

तत्र बीजं वीजानीयादुदये चादि लक्षणे ।

धातुं द्वितीयके मूलमुदये तु तृतीयके ॥ ६२ ॥

तत्रापि योगनक्षत्र तारका करणक्षणे ।

३०६ब् ग्] ग्रहाणामुदयं ज्ञात्वा प्रतिष्ठ्य [ग: प्रतिष्ठा] तु
यथा क्रमम् ॥ ६३ ॥

स्वोदये स्वोदये ब्रूयात् तत्रस्थे तु शुभाशुभम् ।

जन्माया मरणं विन्द्याद्यदिस्या [ग: -दिस्यात्] कृत्तिकोदयम् ॥
६४ ॥

आदित्यन्तु तथा कल्प्ययोग [ग: कल्पयोग] नक्षत्र तारकम् ।

करणे च तथा ब्रूयात् तद्वला तु शुभासुभम् [ग: -शुभम्] ॥

६५ ॥

अश्विन्यान्तु प्रवासं स्याज्जन्माया उदये स्थितम् ।

वधे च करणे देवि पूर्वपादार्ध लक्षिते ॥ ६६ ॥

तस्मात् परे विनिर्दिष्टं बन्धनं मरणन्तथा ।

द्यर्धपाद प्रभावेन [ग: -ण] नवस्य तु विलक्षयेत् ॥ ६७ ॥

भरण्याश्चोर्थ स्थित्वा तु सा चादौ चतुभाजिता ।

स्थिरश्चलन्नधाम्यश्च धाम्यश्चैव विनिर्दिशेत् ॥ ६८ ॥

करणस्य विभागो हि योगस्य च वरानने ।

नाम नैव शुभा योगान शुभा वाम नैव तु ॥ ६९ ॥

नक्षत्राणां स्वभावाये पार्थिवाद्याश्च जायतः ।

ज्योतिषाख्ये मयाप्रोक्ता लोकसंवित्ति हेतुतः ॥ ७० ॥

तत् सामान्यं यतस्तेनलेशयात्र प्रकाशिता ।

योग नक्षत्र ताराणां करणानां ग्रहातथा [ग: ग्रहास्-] ॥ ७१ ॥

विभागादौ परिज्ञाय उदयाश्च स्वजास्तथा ।

नाड्यादि स्थान भेदेन वक्तव्यन्तु शुभाशुभः [ग: - शुभम्] ॥ ७२ ॥

एवं धूम्रगतं धातु पूर्वञ्जीवन्तु मध्यमे ।

उदयेन्तिमे स्मृतं मूलं तथा ज्ञेय [ग: ज्ञेयं] वलावलः

[ग: -लम्] ॥ ७३ ॥

सिंहमूलन्तथादिस्थं धातु जीवान्तिमान्तिमे ।

योगयुक्त्याथ वाह्येन कालेन तु तथा वदेत् ॥ ७४ ॥

जीवमूलान्त धातुस्याश्वानैवन्तु [ग: -स्याच्छ्वा-] विलक्षयेत् ।

३०२ब् ख्) तथा वृषोदये धातुमूलजीवानि चक्रमात् ॥ ७५ ॥

खरोदये तु मूलादि जीवधातुश्च [ख: -धातुंश्च] लक्षयेत् ।

गजोदये तु [ग: च] देवेशो जीवाद्यं मूलकं वसुम् ॥ ७६ ॥

ध्वङ्क्षे धातुश्च मूलञ्च जीवञ्चान्योदये [ख:

जीवचांन्यो-] बिदुः ।

उभयोपि यदा सन्धिदेवी [ग: सन्धिर्-] दूत्यो [ग: दूत्यः] फलस्य वा ॥ ७७ ॥

मिश्रोदयेस्तु [ग: -ये तु] तत्रापि उभयार्थं यथाशयम्।

ऋक्ष [ग: ऋक्षः] करणयोगानां ताराणाञ्च वलावदे ॥ ७८ ॥

स्थानस्थस्यापि चैवं हि क्रमाख्येयं शुभाशुभम्।

यन्त्रोदयस्तु सा नाडी पुष्पितान्या विपुष्पिता ॥ ७९ ॥

मुकुलान्यादिशा वेधयुक्तास्तापि [ख: वेधयु * स्तापि] तदात्मिका।

अमृतान्य द्वयं प्रोक्तं तत्रापि च फलं शृणु ॥ ८० ॥

पुष्पिते तु भवेल्लोभो हानिश्चैव न पुष्पिते ।

मुकुले किञ्चिनासस्या [ग: किञ्चिन्नाश स्यात्] स्थाने लब्धं
सुनिश्चितम् ॥ ८१ ॥

ब्राह्मी चाग्नेयपत्रे तु तथाप्ये वोदये विदुः ।

३०७अ ग्] रौद्री तु नैऋते [ग: नैऋर्ते] विद्धि रुग्मिनी वायुगोचरे ॥ ८२
॥

अजमोदेति या नाम्नी चेशपत्रे व्यवस्थिता ।

स्वोदये स्वोदये सर्वा [ग: सर्वाः] स्वफलं स्वफलं क्रमात् ॥
८३ ॥

दर्शयन्ति महाभागा नक्षत्रानि [ग: -णि] वलान्विताम् ।

आदिपञ्च त्रिगान्तारा नैधनानेष्टकर्मसु ॥ ८४ ॥

वज्रा विष्कंभशूलाद्या नामक्रूरस्तु ये स्मृताः ।

ते तथा कार्यसिद्धौ तु वक्तव्यास्तु ग्रहास्तथा ॥ ८५ ॥

आग्नेयानि तु ऋक्षानि [गः -णि] मारणोद्वेगमोहनम् ।

दर्शयन्ति तु विद्वेषं ज्ञाता आयोदये यथा ॥ ८६ ॥

नवापि सप्तकस्यापि मुख्याजन्म न शक्तता [खः ?] ।

दारिद्रं [गः -द्र्यं] विरहं लाभं मृत्युश्चापि विलक्षयेत् ॥ ८७ ॥

गरे गरं विनिर्दिष्टं यदि स्यादुदये रतः ।

तत्रापि हि विभागन्तु पूर्वभावा विपर्ययी ॥ ८८ ॥

एवं योगे च वाह्यस्थं फलन्ते समुदाहृतम् ।

उदयक्रमात् तु देव्यादिविभागान् प्रवदामिते ॥ ८९ ॥

द्वितीयार्धगते यामे ब्राह्मी धूमेन संयुता ।

आग्नेयदिक्षु संस्था तु आत्मविश्वोदयात्मिका ॥ ९० ॥

पूर्ववत् क्रमयोगेन अतीतानागतं परम् ।

ज्ञायतेति न सन्देहो भैरवस्य वचो यथा ॥ ९१ ॥

वेधघट्टविधानेन सर्वकामार्थनिर्णयम् ।

तृतीया संप्रवक्ष्यामि वीरानामेन देवता [गः -ताः] ॥ ९२ ॥

दक्षिणे तु स्थिता सा हि सिन्घानाडी [ग: सिंहा-] समाश्रिता।

३०३अ खृ) दिवार्द्धप्रहरे देवि स्वदिग्विश्व समन्विताः॥ ९३॥

तथा तत्काल संयुक्ता सर्ववे तृत्वलक्षणा।

रौद्री दूतिस्तथा चान्या श्वान नैऋतिनामिनी [ग:
नैर्ऋतिगामिनी]॥ ९४॥

स्वनाडी वायुना युक्ता स्वदिग्भागा ध्वरान्विताः।

भूतं भव्यं [ग: भवं] भविष्यञ्च ज्ञात्वा
कालादियोजनात्॥ ९५॥

पश्चिमे तु उमादेव्या वृषस्था पीतवर्णिका।

प्रहरद् वयेर्द्धसंयुक्तो स्वदिग्विश्वात्मिका प्रिये ॥ ९६ ॥

भूतकालादि वेतृत्वे कुरुते साधकेश्वरम् ।

रुग्विनीति [ग: रुग्मिनीति] तथा दूती खरग्रहण [ग: स्वर-] तत्परा ॥ ९७ ॥

कालनान्याय संयुक्ता [ग: -क्ताः] स्वाध्ववेला समन्विताः ।

कैवल्य ज्ञानयोगेन वेधयेत् साधकोत्तमम् ॥ ९८ ॥

पूजिताराधिता देवी भवत्यर्थ प्रसाधिका ।

सप्तमी तु तथा देवी कोन्ती नामेन चोत्तरे ॥ ९९ ॥

स्वदिग्वेलादि तत्वेन युक्ता त्रिःकालवेदिकाः ।

सर्वज्ञत्वं फलं [ग: फल] धत्ते सर्वैश्वर्यप्रदा हि सा ॥

१०० ॥

अजमोदेति या देवी ऐश्वर्यादिग् व्यवस्थिता ।

स्वकीय व्याप्ति वृत्त्याध युक्ता सा स्वोदयेन तु ॥ १०१ ॥

करोति विगतार्घन्तु ज्ञानकामान्विकासितुम् [ग: -सितम्] ।

३०७ब् ग्] मिस्त्रोदय [ग: मिश्रोदय] विधिश्चात्र एकपत्रे परं

परम् ॥ १०२ ॥

लक्षपादाधिके ख्यातं विशेषाद् ब्रह्मयामले ।

ध्वजवृषौ [ग: -वृषौ] खराग्नी च खगश्चा सिंहहस्तिनौ ॥

१०३ ॥

समवेधौ वरारोहे सूर्यचारप्रसिद्धये ।

एकैक शोथपत्रस्य प्रमाणं चाष्टधा कृतम् ॥ १०४ ॥

देवीनां स्वदिशायस्तु दूत्यन्तरितलक्षणम् ।

चारदूत्यादिकञ्चान्यं पत्रोदय विधौ प्रिये ॥ १०५ ॥

तत्रापि तत्त्रिधा भज्ययथा पूर्वफलन्तथा ।

समादेश्यं स्वनक्षत्रमुदयास्यानु [ग: -मुदयस्यानु]

रूपतः ॥ १०६ ॥

तत्पत्रे ये तु नक्षत्रा योगा [ग: योगाः] करणयोग्रहाः [ग:

करणयोर्-] ।

नानाविभज्य तद्देवं [ग: तन्देवं] फलं स्यात् प्रकटं

भवेत्॥ १०७॥

किन्तु स्वभावं भजते स्वपत्रायादि देवताम्।

तेन मिश्रमिदं प्रोक्तं कालज्ञोयोदिवेत्ति [ग: कालज्ञेयो-] तत्॥
१०८॥

अतः सञ्चार वृत्तिस्तु यथा तासां [ग: तासांस्] तथा शृणु।

प्रतिपत्युदये [ग: -येर्] हंसी [ग: हसी] पूर्व [ग: पूर्वे] तु उदये
प्रिये॥ १०९॥

षोडशांश विहीनन्तु स्वकारार्द्ध प्रनन्तु यत्।

एवान्या तत्र देवेशे रात्रावपि च कीर्तितम्॥ ११०॥

द्वितीयायां तथा दूती देवी चैव तृतीयगा।

३०३ब् ख्) चतुर्थ्यां पूर्वके स्थाने रौद्री पूर्वे विजानता ॥
१११ ॥

उमा च रुग्मिनी कौन्ती अजमोदार्द्धयामकम् ।

वहते किन्तु संख्याया अष्टम्यन्तर्द्ध [ग: अष्टम्यन्तेर्द्ध]
हीयते ॥ ११२ ॥

तन्त्रान्ति जजिगृणाति तथाङ्गासे [ग: -ह्रासे] तरात्मजः ।

याव [ग: -वत्] पञ्चदशी ताव [ग: तावत्] प्रहरार्द्धं
विवर्धते ॥ ११३ ॥

एवन्तु षोडशाख्याता उदयास्तु त्रिपञ्चभिः ।

दिवसैर्ह्रास वृद्धिश्च दिनाना [ग: -नाञ्] च विलक्षयेत् ॥ ११४ ॥

योदयो यच्च नक्षत्रंवा ताराकरणञ्चयत्।

योगा य नाडिका वायु युक्तं ज्ञात्वा ततोवदेत्॥ ११५॥

स्वभावञ्चैव देवीनां दिशायानाञ्च यादृशम्।

तादृशेन तु रूपेण ज्ञात्वा ज्ञात्वा विवेचयेत्॥ ११६॥

प्रश्नैहोरा [ग: प्रश्नैर्-] विभागे वा यस्त्वा यातिमनोभवेत्।

श्यामकृष्णञ्च कपिलमाता [ग: -लंमाता] पुत्रोथ

भ्रातरः॥ ११७॥

मातुः पितुश्च भ्रातृश्च पितापत्नी च या भवेत्।

सालकोभ्यागतो [ग: श्याल-] वापि नवभक्ते तु शेषतः॥ ११८॥

शितादिवर्णनिःपत्ति [ग: सि- -निष्पत्तिर्] अष्टभक्तेन जायते।

द्रव्याणि वर्णजातांस्तु सप्तभिर्लोहजातयः॥ ११९॥

सुवर्णादि विनिर्दिष्टा नगोन्ता वीरवन्दिते।

आलिङ्गिते तदेवेष्टन्दग्धे अस्त्रं प्रभारकम्॥ १२०॥

युक्तोव्याधि विनिर्दिष्टाशान्ते स्वस्वस्थं सदाविशेत्।

देव्यो दयाद् विभाव्येतद् वाह्य मध्यात्मिकञ्चयत्॥ १२१॥

३०८अ ग्) ख्यातं कैवल्य संसिद्धौ लाभालाभ [ग: -भं]
शुभाशुभम्।

मंत्रानुष्ठान युक्तानां क्षेत्राद्ये दूतिसंग्रहे॥ १२२॥

गमागमन कार्येषु सखायाध्व विचेष्टिते ।

होमे जपे गृहे देशे पर्वते वा प्रयोजयेत् ॥ १२३ ॥

ज्ञात्वा कुर्वं लभेत् [गः कुर्वल्लभेत्] सिद्धिरन्यथा तु
विपर्ययम् ।

संक्षेपात् सूत्रमात्रेण शास्त्रेस्मिन् वीरवन्दिते ॥ १२४ ॥

प्रोक्तं हि नायक गणां शेषं प्रोक्तं पुरातने ।

क्रमव्युत्क्रम संयुक्ते विस्तरे ब्रह्मयामले ॥ १२५ ॥

अत्रापि चक्र प्रस्तार कृतन्यास निशेवनात् [गः निषे-] ।

सर्ववित्तमवाप्नोति यस्मात् तत् सर्वतोमुखं ॥ १२६ ॥

सर्वज्ञो भूतवद् वक्रैतद् [ग: वक्रैस्तद्] विभाच्छिवे वसः ।

नालस्या ज्ञायते देवि ब्रह्माद्यैरपि देवतेः [ग: -तैः] ॥ १२७ ॥

उदयं कालवेला च विभागं करणादिके ।

ज्ञात्वा नाडयोदयान्येव ग्रहाचाराञ्च [ग: -रांञ्च]
भैरवः ॥ १२८ ॥

सर्ववित् पापहर्ता च विशेषञ्च प्रजायते ।

एतद् विना न सिद्धयन्ति प्रयत्नेनापि साधकाः ॥ १२९ ॥

३०४अ खु) जपहोमार्चने ध्याने निश्चया नैव जायते ।

एवं विनापि विन्यस्य निश्चयोभिस्तु जायते ॥ १३० ॥

शक्तिपातगुणः सोहि शास्त्रयुक्तिर्न सा स्मृताः ।

अधुना संप्रवक्ष्यामि साधनं साधकस्य तु ॥ १३१ ॥

मन्त्रस्या राधनाथन्तु [ग: -नार्थन्तु] क्रीडया योजितात्मनः

।

कालवेला विधिज्ञस्य व्रतसंशोधितस्य च ॥ १३२ ॥

जपहोम विशुद्धस्य पूर्वसेवा कृतस्य च ।

सोमाङ्गतनु संस्थस्य निःप्रपञ्चैक [ग: निष्-] चेतसः ॥ १३३ ॥

निराचारा व धूतस्य शक्तिमार्गजितस्य च ।

कृतार्चन विधानस्य होमकर्म प्रसाधनम् ॥ १३४ ॥

क्ष्मापलं होमकर्तव्यं परमासिद्धिमिच्छता ।

पिण्याकं लशुनञ्चैव आत्मशुक्रन्तथैव च ॥ १३५ ॥

अलिना सहसंयुक्तं होमयेत् सर्वसिद्धये ।

कण्ठकाग्नि [ग: कण्ट-] विधानेन क्रूरकर्म प्रसाधयेत् ॥

१३६ ॥

नाडीषु शिरसञ्चारी वेधघट्ट कृतश्रमः ।

होमकर्मणि युक्तस्य सिद्धिराशुः [ग: -शु] प्रवर्तते ॥ १३७ ॥

हृत्पद्मे संस्थिता देव्यः पूर्णचन्द्र समप्रभाः ।

इन्दुत्वमल शङ्काशा पूर्णचन्द्र समन्विताम् ॥ १३८ ॥

शान्ति [ग: शान्तिः] पुष्टिकराध्येया नष्टद्रव्येषु काकथा ।

इडायान्तर्गतं [ग: इड-] ज्ञात्वा शुशुम्ना [ग: सुषुम्ना]
चाभिचारुके ॥ १३९ ॥

इडा सुशुम्नयोर्मध्ये [ग: सुषुम्न-] मुक्तिमार्गानुसारिणी ।

वामया भव संसारे शृष्टिमार्गेक [ग: स्पृष्टिमार्गैक]
चेतसः ॥ १४० ॥

३०८ब् ग्) वियोगे सर्वकार्येषु जेष्ठया संप्रचोदितम् ।

तत्वत्रयेन [ग: -ण] युक्तस्य कर्मसाध्यानुसाधने ॥ १४१ ॥

सर्वतत्वविभागेषु तत्वचारन् तथाभ्यसेत् ।

चक्रप्रस्तारयुक्त्या तु स्वोदयेन समन्वितम्॥ १४२॥

कृतस्तत्वोदयो येन तेन सर्वोदयः कृतः।

उदयोद्युर्निशि [ग: उदयेद्युर्निशि] प्राणैर्मास संवत्सरोपि वा॥
१४३॥

कृत्वाभ्यासं लभेत् सिद्धि या [ग: सिद्धिर्या] स्वतत्वगुणोदिता।

अन्यथा न लभेत् सिद्धिः संप्रदायं न विन्दति॥ १४४॥

भावशून्यं मनः शून्यं कण्ठशून्यं तृतीयकम्।

नादशून्यात्मकं कृत्वा कोनमुच्यति बन्धनात्॥ १४५॥

वुद्धिसाम्यात्मनः [ग: -शाम्यात्मनः] शून्यं द्वितीयं
विषयात्मकम्।

सर्वनाडी समूहश्च सोच्चारं प्राकृतं बिदुः ॥ १४६ ॥

कंठशुन्यमिति प्रोक्तमुच्चारान्तस्तु यो परि ।

सशक्तौ लयमापन्नौ मनोवृत्ति विवर्जनात् ॥ १४७ ॥

नादशून्यन्ततो ज्ञेयं शक्त्यन्ते वन्धवर्जनाम् [ग: -नात्] ।

एवं प्रत्योदयाभ्यासं सा मृतं योभ्यसेत् सदा ॥ १४८ ॥

३०४ब् ख्] जरामरण निर्मुक्तो मन्त्रसिद्धिपरां व्रजेत् ।

क्षमापलं शशिसंयुक्तं तडिना च समन्वितम् ॥ १४९ ॥

होमयेन्निशिचारेण सर्वकल्याणसंपदः [ख: सर्वकयाण-] ।

होमं कुर्वीत यत्नेन निशिचारेण साधकः ॥ १५० ॥

धानदन्तु पलं गृह्य अलिनासहयोजितम् ।

पञ्चाङ्गमलसंयुक्तं होमयेत् सिद्धिकांक्षया ॥ १५१ ॥

पश्यते देवताः सर्वाः [ग: सर्वा] निराचारेण मंत्रवित् ।

लया [ग: लयां] सृक्पलमादाय जातीरससमन्वितम् ॥ १५२ ॥

क्ष्मापलेन समायुक्तं वसयासहयोजितम् ।

अलिनासहसंयुक्तं यस्यनाम्ना तु होमयेत् ॥ १५३ ॥

तत्क्षणात्सव [ग: -णाच्छव] संसाध्य [ग: -ध्यं]

आनयेन्नात्र शंशयः [ग: सं-] ।

लशुनं गुग्गुलञ्चैव जाती रससमन्वितम्॥ १५४॥

मार्जार पित्तसंयुक्तं निशिहोमन्तु कारयेत्।

पश्यते देवताः सर्वा [गः सर्वाः] खेचरीगुणसंपदा॥ १५५॥

मार्जारपित्तमादाय सरमापित्तसंयुतम्।

नरपित्तसमायुक्तं शशिना च समीकृतम्॥ १५६॥

गुडिकात् [गः -का] त्रिवृतां कृत्वामंत्रेणानेन साधकः।

लक्षमावर्तयेन् मंत्री देवी नामग्रतः स्थितः॥ १५७॥

पूजाङ्कृत्वा तु मन्त्रज्ञो वक्राङ्गं नेत्रसंयुतम्।

दीर्घ ह्रस्वे विभागेन पूर्वसूक्रक्रमेण [खः पूर्व * * * *

*?] तु [ख: ?] ॥ १५८ ॥

रूपलक्षण कर्मञ्च स्वध्यानाराधणानि [ग: -नानि] च ।

पूजां कृत्वा विधानज्ञा [ग: -ज्ञश्] चरुं वलिविशेषतः ॥

१५९ ॥

सिद्धयते नात्र सन्देहो [ग: -हः] मत्यमेतन्न [ग:

रात्प्र?मेतन्न] चान्यथा ।

३०९अ ग्] मुखे तु धारयेत् [ग: -येन्] मन्त्री न्यासं कृत्वा न

दृश्यते ॥ १६० ॥

सिद्धगन्धर्व वेतालै [ग: -ल] राक्षसैश्च विशेषतः ।

न च दृश्यति सिद्धैस्तु क्षुद्रसत्वेषु काकथा ॥ १६१ ॥

रासभन्तु पलं गृह्यशुक्रेणैव समन्वितम् ।

स्वाङ्गक्षतजसन्मिश्रं मंत्रयुक्तेन चेतसा ॥ १६२ ॥

यस्य कस्यचिदातव्यं [ग: -चिद्दातव्यं] वशीकरणमुत्तमम् ।

रूपकन्तु प्रवक्ष्यामि देवीनां साधनस्य तु ॥ १६३ ॥

पूर्वोक्तरुपकं [ग: -रूपकं] ज्ञेय [ग: ज्ञेयं]
कपालमुण्डसंयुतम् [ग: -लंमुण्ड-] ।

नावारूढास्तु [ग: -रूढस्तु] ध्यातव्या नावारूढास्तु
पूजयेत् ॥ १६४ ॥

एवं नग्न विभागेन नग्नरूपा चतुर्मुखा ।

महाप्रेतसमारूढा देवौ दिव्यश्च कीर्तिताः ॥ १६५ ॥

दूत्यो वै पद्महस्तास्तु त्रिमुखाः षट्भुजा [गः षड्भुजाः]
स्मृताः।

देव्यस्त्वष्ट भुजा ज्ञेया साधकेन तु धीमता ॥ १६६ ॥

अनेन विधिनाज्ञेया आशुसिद्धि [गः -सिद्धिः] प्रदायिका।

ईज्याञ्जलिनमस्कारै [गः इज्याञ्जलि- -रैः]
सिद्धिदामुक्तिदास्तथा [गः -मुक्तिदा तथा] ॥ १६७ ॥

३०५अ खु) स्वरूप ध्यानयोगेन एकेकस्याः [गः एकैक-] पृथक्
पृथक्।

अथतः संप्रवक्ष्यामि कर्मसिद्धिर्वरानने ॥ १६८ ॥

देवीनाञ्चैव नामानि पूर्ववत् कथितानि तु।

येन विज्ञानमात्रेण गम्यग्यागक्रमेण [ग: सम्यग्-] तु ॥ १६९

॥

दास्यन्ति विविधाः सिद्धीः साधकस्य न संशयः ।

अद्वैतभावसंपन्नः सर्वभक्षकृतान्तवत् ॥ १७० ॥

नटवत् पश्यभावेन आत्मा वै साध्केश्वरः ।

सिद्धिराशुः [ग: -शु] प्रवर्तेत सर्वावस्थस्य मंत्रिणः ॥ १७१ ॥

हंसी वीरा उमाकौन्ती ब्राह्मी रौद्री तथैव च ।

रुग्मिनी च अजामोदा देव्या दूत्यस्तथैव च ॥ १७२ ॥

नवमं भैरवन्देवि मंत्रमुत्फुल्लकं मतम् ।

प्रणवादि नमस्कारमाद्यन्ते सान्नियोजयेत्॥ १७३॥

हूंकार मध्यसंयुक्तं भैरवं नामपूजितम्।

विद्या चक्रेश्वरेशान [ग: -नं] निःसन्दिग्धैन [ग: -धेन]

पूजयेत्॥ १७४॥

वक्राङ्ग नेत्रयुक्तास्तु स्वमंत्राराधिता [ग: -ताः] शुभाः

।

स्वजातिभिः समायुक्ता अङ्गमन्त्रा [ग: -मन्त्राः] पृथक् पृथक्

॥ १७५॥

चतुर्वक्राष्टभुजादेवो देव्यश्च कीर्तिताः।

दूत्यस्तु षट्भुजाज्ञेया [ग: षड्-] स्वार्णरूप नियोजिताः॥ १७६

॥

सर्वकर्माणि कुर्वीत साधकः संशितव्रतः।

ओंकारादि नमस्कृत्वा हूंकारं मूर्ध्नि [खः मूध्नि]
विन्यसेत्॥ १७७ ॥

पूर्ववत् क्रमयोगेन वामहस्ते तु देवताम्।

दक्षिणे विन्यसेद् दूत्य [गः दूत्यं] मुद्रा बन्धन्तु कारयेत्॥
१७८ ॥

महानाद समायुक्ता [गः -युक्ताश्] चतुर्वक्त्रा महावलाः।

महाप्रेत समारूढा मुक्तकेशादिगंवराः॥ १७९॥

३०९ब् ग्] कपालखट्वाङ्गधरास्त्रकाद्य कृतशेखराः।

पाशाङ्कुशधरन्देवं खड्गखेटकधारिणम्॥ १८० ॥

वरदाभय करञ्चैव त्रिनेत्रं सर्वसिद्धिदम्।

भैरवस्य यथारूपं देव्याश्चैव तथैव हि ॥ १८१ ॥

दूत्यस्तु षट्भुजाज्ञेया [ग: षड्-] पृथग्रूपं प्रकीर्तितम्।

पाशकट्टारिका हस्ता वरदाभयहस्तिका ॥ १८२ ॥

कपालखट्वाङ्गधरा दूत्यो वै संप्रकीर्तिताः।

आद्यं बीजं न्यसेत् [ग: न्यसेन्] मूर्ध्नि प्रणवादि नमस्कृतम्
॥ १८३ ॥

द्वितीयं मुखविंवस्थ [ग: -स्थं] तृतीयं कण्ठदेशतः।

चतुर्थं हृदय [ग: -यं] प्रोक्त [ग: प्रोक्तं] पञ्चमं

नाभिमण्डले ॥ १८४ ॥

षष्ठं गुह्यप्रदेशे तु सप्तमं चोरुदेशतः ।

अष्टमं जातुनी [ग: जानुनी] देशे नवमं पादयोन्यसेत् [ग:

पादयोर्-] ॥ १८५ ॥

एवं विन्यस्य देहे तु पश्चात् [ग: पश्चान्] मुद्रांस्तु बन्धयेत्

।

पूर्वङ्कपालिनी वध्वा दक्षिणेनकारेण तु ॥ १८६ ॥

३०५ब् ख्] उत्तानौ तु करौकृत्वा हस्तयोरुभयोरपि ।

शाखाचोर्ध्वमुखां कृत्वा अङ्गुठं किञ्चि [ग: किञ्चित्]

प्रशृतम् [ग: प्रसृतम्] ॥ १८७ ॥

एषा मुद्रा महादेवि कपालस्य प्रकीर्तिताः ।

एकहस्ता भवेद् भद्रा द्विहस्तायामला भवेत् ॥ १८८ ॥

तर्जनी चोच्छ्रिता [ग: -तां] कृत्वा शेषामुष्टिन्तु बन्धयेत् ।

खट्वाङ्गस्य त्वियं मुद्रा सर्वविघ्नविमर्दनी ॥ १८९ ॥

कनिष्ठानामिका चैव कुञ्चयेत् [ख: ?] करमध्यतः [ख: ?] ।

अङ्गुष्ठे [ख: * *?ष्ठे] च ततो [ग: ततः] क्रम्य खड्गमुद्रा
विधीयते ॥ १९० ॥

दक्षहस्तमधो [ग: -मधः] कृत्वा वामं चोर्ध्वमतः
परम् ।

अङ्गुष्ठ पृष्ठतोऽङ्गुल्यैः पीडनात् खेटकं भवेत्॥ १९१॥

कनिष्ठानामिका मध्या करमध्ये तु कुञ्चयेत्।

तर्जन्याङ्गुष्ठकञ्चैव उभौसन्मुखताङ्गतौ॥ १९२॥

अभिमुखौ चैव संलग्नौ पाशमुद्रा प्रकीर्तिता [गः -ताः]।

तर्जनी कुञ्चितां कृत्वा शेषामुष्टिन्तु बन्धयेत्॥ १९३॥

अङ्कुशस्य भवेन्मुद्रालक्षणेन समायुताः।

एवं लक्षणतो ज्ञेयं मुद्राबन्धन्तु साधकैः॥ १९४॥

सामान्यं सर्वतन्त्रेषु वरदाभयसञ्ज्ञकम् [गः -
संज्ञकं]।

सामान्यं सर्वदेवीनां कथिन्तु वरानने ॥ १९५ ॥

खड्गं शूलञ्च नाराचं शक्तितोमरमेव च ।

विजयेन समायुक्तं मुद्रा षट्कन्तु दूतिगम् ॥ १९६ ॥

एतैर्मुद्रैः समालव्धो विद्यावीजित देहधृक् ।

सिध्यते नात्र सन्देहो भैरवस्य वचोयथा ॥ १९७ ॥

इति पिचुमते उत्फुल्लकाधिकारोनाम द्वाशीतिमः पटलः ॥

भैरव उवाच

अथातः संप्रवक्ष्यामि सुशक्तित्रय साधनः [ग: -नम्] ।

येन सिध्यन्ति कार्माणि विविधानि तु साधके ॥ १ ॥

३१०अ गु) यासा शक्तिः समाख्याता नन्ताद्यानन्त संभवा ।

तस्याः [गः तस्या] भेदं प्रवक्ष्यामि शृणुष्वेकमनासती ॥ २
॥

व्योमव्यापिनमत्यन्त कालहीनं कलात्मकम् ।

शिवं सूक्ष्मं सुनिर्वाणं कारणं योगपीठगम् ॥ ३ ॥

योगपीठन्त देवास्य शक्तित्रयविनिर्मितम् ।

सैका शक्तिरनन्ताद्या पुंसा तु स्नेह हेतुना ॥ ४ ॥

स्थितात्मानं त्रिधादेवि प्रविभज्य विभागतः ।

बन्धानानात्व रूपेण ज्ञेयस्था त्रिविधात्मिका ॥ ५ ॥

सम [ख: ?] * * * * * * * * * * * * * * ।

* * * * य गता शक्तिज्ञानस्था [ग: शक्तिर्-] त्वधुनोच्यते ॥ ६ ॥

पृथक्त्व भागरूपेण मलकर्म कलादितम् [ख: ?] ।

३०६अ ख्) तन्नियोग प्रपंचेन वेतृत्वञ्चोह्वया युधा ॥ ७ ॥ [ख: ?]

मलादिकर्मरूपाणां क्षयापया विवेचिता । [ख: ?]

यथा विभागकालात्मा धृत्वाज्ञानं त्रिधा प्रिये ॥ ८ ॥ [ख: ?]

क्रियास्था त्रिविधा शक्ति एका [ग: शक्तिरेका] एव विकाशते ।

बिन्दुत्वया [ख: बिन्दु * *?] * * * * * * * * * * * ॥ ९ ॥

* * * * धा [ख: ?] चैव [ख: च?व] द्वितीया सा प्रकीर्तिताः ।

वर्णांविश्वाकृतीनाञ्च विभागोयोस्य दृश्यते ॥ १० ॥

ते नैव तु स्थिता तज्ज्ञैः किर्यावस्था तृतीयका । [ख: ?]

एवं त्रिधा विभागेन ज्ञानज्ञेय क्रियात्मना ॥ ११ ॥

संस्कृत्यैक विभागस्था प्रणवत्वे प्रचर्यते ।

यत् तज्ज्ञेयामलन्दिव्यं निस्तरङ्गमनो हृतम् ॥ १२ ॥

सर्वगन्तेन भावेन तदादीश्वर लक्षणम् ।

ज्ञानेच्छास विभागेन [ख: ?] उभयान्तर [ख: ?] वर्तिनम् ॥ १३

॥

स्थिरनिश्चय रूपं हि बिन्दुत्वे नमकारजम् ।

विभेदकर्मयोगेन व्यक्ति शक्त्याः प्रपञ्चितम् ॥ १४ ॥

क्रियाख्य [गः -ख्यं] तन्तु विज्ञेयं तदुकाराख्य संज्ञया

।

तिर्य [गः तिर्यक्] कुण्डलिनी चाद्या विन्दुभूता तु सन्धिगा ॥ १५ ॥

शक्तित्रय विभिन्नासा तद्विधानं प्रचक्ष्यते [गः -चक्षते] ।

ज्ञेयज्ञाना क्रियोत्थेन अनुलोम विलोमगा ॥ १६ ॥

विश्वत्रय विभागेन समा [गः समाः] शूलेव संस्थिता [गः -

ताः] ।

यागेस्मिन्नान्यथा देवि यजनन्तु विधीयते ॥ १७ ॥

या तु तिर्यगता [ग: तिर्यग्गता] रेखामरकुन्देन्दु सप्रभा ।

वामानामेन सा ज्ञेया प्राणिनां पाशबन्धनी ॥ १८ ॥

मोहनी सर्वभूतानां जगत्स्थावर जङ्गमे ।

उभयोन्तर्गता देवि बिन्दुज्ञानात्मिका तु या ॥ १९ ॥

रौद्री तत्र स्थिता शक्तिविस्फुलिङ्गकणत्विषा [ग: शक्तिर्-] ।

दाहकी पाशजालानां मलानाञ्च व्यपोहनी ॥ २० ॥

३१०ब् ग्] तस्या तु [ग: तस्यास्तु] अङ्ग ओकाराजेष्ठा [ग: -ज्येष्ठा]
शक्तिस्तु कीर्तिताः ।

अ उमेति त्रिधावस्थ मेतच्छक्तित्रयं [ख: मेत * * * *?] स्मृतम्
[ख: ?] ॥ २१ ॥

मोक्षभोग तिरस्कारकारकंस्या विभोस्वकम्। [ख: ?]

* * *? तृतयावस्थं फलत्रय विभागगम् [ख: ?] ॥ २२ ॥

पीठन्तु देवदेवस्य शक्तित्रयविनिर्मितम्।

नित्ययुक्तं शिवं [ख: ?] शैवन्तदाचारगतं [ख: * *?न्तदा-]

प्रिये ॥ २३ ॥

योगपीठेति संज्ञाया गीतं योगीगणेर्चिते।

भोगमोक्ष प्रसिद्धयर्थं शक्तिसाधनमुत्तमम् ॥ २४ ॥

प्रोच्यते तु महादेवि वामादि [ख: वामा *?] त्रि * * * का [ख: ?]।

३०६ब् ख्) अकारश्च उकारश्च मकारश्च वलत्मका ॥ २५ ॥

सर्वात्मकाश्च देवेशो त्रयोवर्णाः प्रकीर्तिताः।

अकारे तु स्थितो ब्रह्मा आत्मा ब्रह्मप्रतिष्ठितः॥ २६॥

मकारे तु स्थितो रुद्र [ग: रुद्रस्] त्रिशक्त्यात्मा महात्मवान्।

उकारे तु स्थितो विष्णुवामात्मामाय [ग: विष्णुर्-] विग्रही॥ २७॥

वमयेति [ख: वम * *?] जगत् [ख: ?] सर्वसृष्टिमार्गे [ख: ?]
व्यवस्थितः।

स्थितिज्येष्ठा [ग: स्थितिर्-] गताज्ञेया रौद्री सहारवर्त्मनि [ग:
संहार-] ॥ २८॥

शक्तित्रयमिदं ज्ञेयं सर्वकामार्थसाधकम्।

एषान्तु साधनं देवि त्रिधास्थानगतं शृणु॥ २९॥

वामाया तु विधिं वक्ष्ये शृणुष्वेकाग्रमानसा ।

कृत्वासनन्तु पूर्वोक्तं प्रेतान्तन्तु वरानने ॥ ३० ॥

शक्तित्रय कृताटोपं विशेषस्थान्तदा भवेत् ।

नदी समुद्रगातीरे यजेद् वामा तु साधकः ॥ ३१ ॥

शाकाहारो यदामन्त्री अवधूतेन चेतसा ।

जपेत नवलक्षाणि त्रिगुणं वापिसाधकः ॥ ३२ ॥

होमये [गः -येत्] तद्दशांशेन ततो वामं व्रतञ्चरेत् ।

अधिदेवस्य रूपेण तद्वर्णा भरणान्वितः ॥ ३३ ॥

उत्पते तु महासत्वो वामाशक्ति प्रभावतः ।

दिविभूमौ तु पाताले खमध्ये तत्वगोचरे ॥ ३४ ॥

विचरेत् स्वेच्छया देवि सर्वज्ञः सर्वकृच्छिवः ।

जेष्ठा श्मसान [ग: श्मशान] निलये जपेद् ध्यायेत् तथा हुने
[ग: हुनेत्] ॥ ३५ ॥

चरेद् व्रतन्तु सुश्रोणि पूर्ववद् यजनान्वितः [ग: -तम्] ।

हृत्पद्मेव [ख: ?] स्थिता जेष्ठा पीतरक्तान्त सन्निभाम् [ग: -
भा] ॥ ३६ ॥

चतुर्वक्त्राष्टभुजा [ग: चतुर्वक्त्रा अष्टभुजा]
पीनोन्नतपयोधरा ।

सर्वावस्थेन [ख: ?] चैतन्य [ख:?] जपेत् पद्मासने स्थितः ॥ ३७ ॥

तद्गतेन तु भावेन षट्लक्षं [ग: षड्-] तद्गतो द्विजः ।

तत्क्षणात् सिद्धयते देवि यदि ध्यानेन यन्त्रितः ॥ ३८ ॥

प्रवशेद्योग युक्तात्मा शक्ति [ख: ?] * * * * * ।

* * * * * येगेन [ख: ?] अमृतीव [ख: * मृतीव] शरीरके ॥ ३९ ॥

क्रमते ह्यप्रयत्नेन जेष्ठाया विधिसंस्थितः [ख: ?] ।

सर्वावस्थन्तु [ख: ?] देवेशि कथितन्नान्यथा [ख: -न्नाय *] तु

[ख: ?] तम् [ख: ?] ॥ ४० ॥

एवं विधान योगेन रौद्यास्तु * * * * * । [ख: ?]

३११अ ग] * * स्फटिक प्रख्या चन्द्रमण्डलसंप्रभा [ग: -

सप्रभा] ॥ ४१ ॥

संपूर्णेन्दु स्वभावे तु तन्मण्डल सुसंस्थिताः ।

ध्यात्वा देवी महारौद्री सिद्धिल [ख: ?] * * * ॥ ४२ ॥

* * * * * * * * * * * * * * * * * ।

इति ब्रह्मयामले शक्तित्रय विधानोनामः [ग: -नाम]

त्रयोशीतिमः [ग: त्र्यशीतिमः-] पटलः ॥

३०७अ ख्] देव्युवाच

मूलसूत्रविभागन्तु [ग: -स्तु] उत्तरं विनयात्मकम् ।

कल्पस्कन्ध विधानन्तु शासनन्तु यथा स्थितम् ॥ १ ॥

कथितं संग्रहं सूत्रं कुलकाल ऋतूज्ज्वलम् [ख: *

*?ज्वलं] ।

महामण्डल यागन्तु तन्त्रेस्मिन् कथितं त्वया ॥ २ ॥

वशुयोग [ग: वसु-] विविक्त [ख: वि * *?] * * * * * * * * * ।

* * * * * * * हि तन्त्रेस्मिं चोत्तरे विभो ॥ ३ ॥

विश्वचक्र सुशोभाढयश्चारोदय समन्वितः [ग:- तम्] ।

योगिमातृगणोपेतं यागञ्च पिचुसंभवम् ॥ ४ ॥

मन्त्रोद्धारञ्च देवेश सर्वावरण संयुतम् ।

संक्षिप्ततरयोगेन योगसद्भाव लक्षणम् ॥ ५ ॥

सङ्ग्रहार्थं विभागेन समयाये विशेषगा [ग: -गाः] ।

चर वस्तु यथा प्रोक्ता ऋतुजं कुसुमामृतम् ॥ ६ ॥

साधकानान् तथा वृत्तञ्चष्ठास्था षट्कसाधन [ग: -नम्] ।

दीक्षाशेष विधानन्तु सर्वतोमुखमेव च ॥ ७ ॥

यागक्षेत्रेश्वराणाञ्च नवयागप्रसाधनम् ।

समस्तैकत्र योगेन मूल तन्त्र [ग: * *?] विनिर्णयम् ॥ ८ ॥

कथयस्व प्रसादेन [ग: प्रशादेन] उक्तानुक्तञ्च मे प्रभो ।

भैरव उवाच

मूलसूत्रादिकानान्तु क्रमं साधनलक्षणम् ॥ ९ ॥

दुर्लभं त्रिषुलोकेषु समयाचार पालनम्।

यागं विधिस्तथा ज्ञानं चक्रं योगञ्च शोभनः [ग: -

नम्] ॥ १० ॥

कथयामि महादेवि यत्त्वया चोदितं वलम्।

अधमोत्तमच्छागेन गन्धोदसहितेन तु ॥ ११ ॥

वटिकां प्राशयेत् प्राज्ञः पूजाकाले विशेषतः।

विधानन्तु सदायोज्यं चर्वाहारेण सुव्रते ॥ १२ ॥

समये साधने चैव द्रव्यालभन कर्मणि।

तस्यैव दूतयः सिद्धाः सहजावीरवन्दिते ॥ १३ ॥

गुरुणादि विभागेन सृष्टि द्रव्यादि सङ्ग्रहे ।

ऋतुयोग वियोगेन अनुलोमविलोमजा ॥ १४ ॥

यांगाधोर्द्धगतो [ग: यागाधोर्द्ध-] देवि
सर्वकामविलक्षणा ।

कुण्डगोलोद् भवे नैव स्वयंभु कुसुमेन च ॥ १५ ॥

जपहोमार्चनं स्नानंवुक पुष्पसमन्वितम् ।

नियोज्यं स्वेनमार्गेण स्वकाले यागपूर्वकम् ॥ १६ ॥

चरुकं नित्यनैमित्त [ग: -मित्त्य] शक्तिजं वान्यदेहजम् ।

स्वविभागात् प्रकर्तव्यं स्वाधिकार वशोचितम् ॥ १७ ॥

३११ब्‌ ग्‌ कर्मण्यत्र समस्तानां यागानाञ्चरुयोजनम्‌।

धानदं वा चरुंकुर्यात्‌ पवित्राशेषसंस्कृतम्‌॥ १८॥

३०७ब्‌ ख्‌ पशुमार्ग विभागेन कर्तव्यं यत्क्रमागतम्‌।

आस्वादंशालि पृष्ठोस्त्थञ्चरुमूर्तौ पुराकृतम्‌॥ १९॥

यदा सिद्धस्तु प्राग्योगाद्‌ विशेषचरुमाहरेत्‌।

नाड्योदयान्तथा यागः कर्तव्यस्तु गणांविके॥ २०॥

कलानाद विभागेन ऋतुरागनियोजनात्‌।

उदगस्थः सदारात्रौ पूजांकृत्वा तु दीक्षितः॥ २१॥

दक्षस्थञ्चाग्निकार्यन्तु कृत्वाक्षोभं समाचरेत् [खः समा

* *?] ।

नवशक्तिविभागेन [गः –गे *] नवग्रन्थि प्रभेदनात्॥ २२॥

जपादि पञ्चके नैव शिवशक्ति समन्वितम्।

सप्तकं पङ्कजं व्योम्नि सा मृतन्तु नियोजयेत्॥ २३॥

यत्र यत्र व्रजेद् बिन्दु स्वोदये स्वोदये प्रिये।

गतिरागति योगस्थं वर्जितन्तन्तु लक्षयेत्॥ २४॥

प्रतिपद्म विभागेन चक्रेविश्वात्मकेरितम्।

भवेत् तद्द्रव्य संघातं पृष्ट्वां यागं पुनर्पयेत्॥ २५॥

कुसुमस्थास्तुये यागायावत् त्रिषष्टिलक्षिता ।

तद्वत्तं विहितं तन्त्रे सर्वसाधनवर्जितम् ॥ २६ ॥

आगतन्तु शिवात् सर्वं शिवपीठविनिर्गतम् ।

द्रव्यस्या लभनं कुर्यादधमोत्तमसिद्धये ॥ २७ ॥

तत्पीठाल्लभनञ्चैव कृत्वा वा साधनारभेत् ।

रोचनामञ्जनञ्चैव शिवपीठ [गः -ठं] प्रकाशितम् ॥ २८ ॥

साधनन्तु समाख्यातं नित्यनैमित्तिकञ्चयत् ।

शिवामृत प्रयोगन्तु क्षोभक्षोभ ऋतूद्भवम् ॥ २९ ॥

त्र्यहन्तु पुनरालभ्यकौ सुमामृतसिद्धये ।

आकृश्यर्घे [ग: आकृष्यघ्र्ये] नियोजीत प्रत्यहं याग सन्निधौ

॥ ३० ॥

एवं शक्त्यामृतं साध्यम्यशु शिद्धिश्च [ग: सिद्धिश्च]

साधयेत् ।

गृहयागं पुराभ्यस्य स्वस्थानस्थो यथा पुरा ॥ ३१ ॥

क्षेत्रयागञ्च कृत्वादौ ततश्च पशुमालभेत् ।

वेधघट्टविधानेन पूर्ववच्च प्रसाधयेत् ॥ ३२ ॥

पशुयागात् परासिद्धि [ग: -सिद्धिर्] अधमोत्तमसिद्धये ।

द्विकोवुकमहानेत्री अधमोत्तमसिद्धये ॥ ३३ ॥

पर्याय नाम संसिद्धा एते पर्यायलक्षणे ।

तथाप्यत्र समासेन मुद्रासमयगोचरे ॥ ३४ ॥

अन्यथा न भवेत् सिद्धिः [ग: सिद्धि] समयाचारवर्जिते ।

समयाचार हीनस्तु [ग: हीन *?] पञ्च [ख: ?] * * * * * कः [ख: ?] ॥ ३५ ॥

अन्यथा न लभेत् कश्चित् तन्त्रसारं सुदुर्लभम् ।

अधमं छागमित्युक्तं मध्यमं गोभवं भवेत् ॥ ३६ ॥

३०८अ ख्) पुरुषोत्तमं महादेवि त्रिधातु चरवः स्मृताः ।

३१२अ ग्) पर्यायेण समाख्यातात् विकाकाक इति स्मृतः ॥ ३७ ॥

वुको लिङ्गमलोज्ञेयस्तथा शांवूक उच्यते ।

शशकश्च समाख्यातो महानेत्री तु पिङ्गलाः ॥ ३८ ॥

कुण्डं माद्य * * * * * * * * न्तु [ख: ?] गुह्यके [ख: ?] ।

वस्तिवक्त्रं तह्ता विष्णुं शृष्टिं [ग: सृष्टिं]
मायाविमोहकम् ॥ ३९ ॥

क्रियाश्रयं शिवानन्दं पर्यायेन [ग: -येण] मयोदितम् ।

गोलकं शिवसन्दोहं पीठमर्दं वराङ्गकम् ॥ ४० ॥

मन्थकं स्मरणं वीरं शशिवक्त्रं द्विमण्डलम् ।

धानदं यक्षनासैश्च अशेशैः [ग: अशेषैः]
श्वानलक्षणम् ॥ ४१ ॥

जाठरमङ्गवो प्लुष्टं व्योमचारं पराश्रयम्।

माण्डूकं प्रीतिगञ्चैव कथितं तवसुव्रते ॥ ४२ ॥

श्यामादिभिश्च पर्यायैस्सुराशीधुस्तथा [ग: -यै
सुरासीधुस्तथा] पुनः।

सर्वै [ग: सर्वे] भैरवनामैस्तु युक्तो वे [ग: वै] सर्ववेति च ॥ ४३ ॥

अवलादि विपर्यायैः शाक्तैरेषारिपूर्वकैः।

दूतीनां लक्षणं प्रोक्तं मीनाकेशा तथा चला ॥ ४४ ॥

ऋजवो वेदधाराश्च निश्चलाक्षाश्च पूर्ववत्।

शेषं ज्ञात्वा गमीव्रूयान्नलोके सर्वनामभिः ॥ ४५ ॥

हस्तसंज्ञादिभिर्वाथ मातृकोद्धार वर्त्मना ।

सर्वकुंभन्तथा चक्रण्ठञ्कञ्चैव वडागकम् ॥ ४६ ॥

पद्मं यवंशशिं [ग: पवं-] वर्गोवर्णाश्चाङ्गुलिभिः

[ग: -वर्णाश्चाङ्गुलिभिः] क्रमात् ।

स्वरयोगान्निवर्तेत वर्णैकेन्यार्ण योजनात् ॥ ४७ ॥

एवं सर्वार्णनामानि कथेदुत्तर साधकाः [ग: -कान्] ।

च सकाररिकाराद्यैर्भाषाश्चान्तरिताथवा ॥ ४८ ॥

रक्षणायात्म द्रव्याणां मया प्रोक्तार्थरक्षिका ।

समयाचार हेत्वर्थं त्रयाणामपि कीर्तितम् ॥ ४९ ॥

संवृत्युपरतानान्तु नैवं श्राव्यात् कदाचनः [ग: -नः] ।

चर्या तेषां गुरोर्दूरं गत्वा बन्धुजनस्य च ॥ ५० ॥

मंत्रे संघमशेषन्तु सप्तावरण मे विधौ ।

संक्षिप्तञ्चोत्तरे तन्त्रे कथ्यते सिद्धिदो यथा ॥ ५१ ॥

शक्तित्रयं प्रवक्ष्यामि मन्त्रमूर्तिगताश्चये ।

अष्टाष्टक विभागञ्च शेषा [ग: शेषाः] पूर्वोक्तलक्षणाः

॥ ५२ ॥

तत्रापि क्षेत्रयागानां योगिरक्षतरूमपि ।

क्रमागताः प्रवक्ष्यन्ते मंत्रायाग विधौ यथा ॥ ५३ ॥

३०८ब् ख्) चण्डेति घातनि प्रोक्ता क्रोधा वै नासनिः सदा।

ईश्वरी कामदा प्रोका [ग: प्रोकाः] सोदर्का योगमातरः ॥ ५४ ॥

वामगा शिवतत्वस्य कमलेपत्र संस्थिता।

चतस्रस्तु मनोयुक्ता सोदर्का मूर्तिमातरः ॥ ५५ ॥

ॐ चण्डेमोहनेश्वरि घातनि हूं फट् स्वाहा।

॥ वामा ॥ ॐ चण्डे क्रोधेश्वरि नाशानि हूं फट् ॥ ५६ ॥

॥ ज्येष्ठा ॥ ॐ चण्डे चण्देश्वरि कामदे हूं [खः हू] फट्।

३१२ब्) ॐ चण्डे घातनि स्वाहा ॥

ॐ चण्डे क्रोधेश्वरि स्वाहा ॥

ॐ चण्दे चण्डेश्वरि स्वाहा ॥

ॐ चण्डे मनोवति स्वाहा ॥

पूर्वाद्यावामाश्चोत्तरान्तांस्तु [ग: -द्या * *
श्चोत्तरात्तांस्तु] मूर्तयेद् इत्स्थरूपिकाः [ग: इत्थ-] ॥ ५७ ॥

उत्तरे तु स्थिता तन्त्रे चतस्त्रोमूर्तिशक्तयः ।

सद्भावस्था [ग: -वस्थाः] शिवस्यैता [ग: -ताः] मूर्तित्वे
हृदयात्मिका ॥ ५८ ॥

ह्रस्व हंसास्य योगेन वक्रभूता शिवात्मिका ।

हूं फेतिद्व्यक्षरं [ग: -द्व्यंक्षरं] मंत्रं

उदर्कान्तं [ख: * *?र्कान्तं] षडक्षरम्॥ ५९॥

हृदयं परमं ह्येतच्चतुष्कस्यास्य कीर्तितम्।

चण्डा तु मोहनी साक्षा [ग: साक्षाद्] वामाचैतेन चोच्यते॥ ६०

॥

उत्तरे तु स्थिता ज्येष्ठा क्रोधनाशित रूपका।

मध्यतश्च तथा रौद्री ऐश्वर्यात् कामदेश्वरी॥ ६१॥

उपदलेदलाग्रे च मन्त्रयुग्म प्रतिष्ठिता।

चतुर्विंसति [ग: -शति] योगिन्यो विन्यसेद् गर्घमण्डले॥ ६२॥

कादिभान्त शिखायुक्ता बिन्दुचन्द्र समन्विताः [ग: -ता]।

त्रिकत्रिकं यथा न्यायं केसरे तु व्यवस्थिताः ॥ ६३ ॥

मूलपद्मे समाख्यातं कर्णिकायान्तु भैरवम् ।

कर्णिकायां स्थितो देव हंसबिन्दुकलाङ्कितः ॥ ६४ ॥

चतुष्कयुगपद्मे तु देव्यो दूत्यः स यामलम् ।

कालवह्निसतारान्नि [ग: -रान्निः] स्मरणः सर्वतः स्थितः ॥ ६५ ॥

चतुष्कयुगपद्मे तु कर्णिकायान्तु भैरवः [ग: -वम्] ।

स्वदेवतानुरूपेण स्ववक्त्रे [ख: ?] शक्तय [ग: -यः] स्थिताः ॥
६६ ॥

चङ्कालि स्वास्थितादिक्षुडेपानिहातदन्तरे ।

पिण्डस्तु मध्यदेशस्थः सर्वसाधनविग्रहाः ॥ ६७ ॥

चण्डे चण्डेश्वरी ख्याता चण्डे लोकेश्वरी तथा ।

देवेशि शव्दयोगेन सोदर्कांदिक्षुशक्तयः ॥ ६८ ॥

द्विरावरणसंस्था तु शेषान्यानुक्रमेण [गः -शेषाण्या-] तु

।

चण्डे मनोवति ख्याता चण्डेवारोवती [गः -वाचोवती] तथा ॥ ६९

॥

चण्डे योगेश्वरी ख्याता पूतनाद्यास्तथैव च ।

३०९अ ख्) चण्डादि भूर्भव [गः -वः] स्वेति सप्तमे

संव्यवस्थिताः ॥ ७० ॥

चण्डाघोरेश्वरी ख्याता अष्टमे संव्यवस्थिताः ।

रुद्रमातर एवोक्ता [ग: एवोक्ताश्-] चण्डाद्यास्तु वरानने ॥ ७१ ॥
चण्डालोकमनो वाच योगपूतनदिङ्मुखाः ।

रुद्राख्या वलिमंत्राश्च वाह्यतः संव्यवस्थिताः ॥ ७२ ॥

दिग्मातरोपि [ग: दिङ्-] वाह्यस्था इत्यावरण सप्तके ।

एवं यागसमस्तस्तु उत्तरे संव्यवस्थितः ॥ ७३ ॥

ॐ चण्डे चण्डेश्वरी चण्डसंभवे स्वाहा ॥

ॐ चण्डेलोकेश्वरि देवेशि लोकसंभवे स्वाहा ॥

ॐ चण्डेमनोवति मनो [ग: मनः] संभवे स्वाहा ॥

३१३अ ग्) ॐ चण्डेवागेश्वरि वाक्संभवे स्वाहा ॥

ॐ चण्डे योगेश्वरि योग संभवे स्वाहा ॥

ॐ चण्डे पूतनेश्वरि पूतिसंभवे स्वाहा ॥

ॐ चण्डे भूर्भुवःस्वः दिग्देश्वरि दिक्संभवे स्वाहा ॥

ॐ चण्डे अघोरेश्वरि रुद्रसंभवे स्वाहा ॥

चतुर्विंसति [ग: -शति] योगिन्यो विन्यसेद् गर्भमण्डले ।

रुद्राख्या वलिमंत्राश्च वाह्यतः संव्यवस्थिताः ॥ ७४ ॥

लादि मंत्रगणं हान्तं रशषावयसान्तगम् ।

मरयत्रय समारूढं स्तंभखेचरसंयुतम् ॥ ७५ ॥

नादशक्तिधरं मंत्रा रुद्राणां परिकीर्तिताः।

वृक्षाश्चोक्ता तु सिन्घे [गः सिंहे] नरकाराधोगतेन तु॥ ७६॥

तथा स्तंभादि योगेन राक्षसाश्च वदाम्यहम्।

हंद दीप्तसमायोगा [गः -गात्] तथा दीप्त्यादियोजना [गः -नात्]
॥ ७७॥

योगिन्योहंस सन्घार [गः संहार] वज्रयुक्तास्तथा स्थिता।

लोकपालाश्च क्षेत्रस्था मंत्रायागनवोद्भवा॥ ७८॥

भवन्ति तु यथान्यायं सर्वसंपत्ति कारका।

श्मशानं वाह्यतः कृत्वा अष्ठधाघोर साधने॥ ७९॥

गृहयागेन कर्तव्यं तत्र वेश्मसमाहरेत्।

चीर्ण विद्याव्रतो मंत्री मनसा वा स्मरेत् सदा॥ ८०॥

हरि दीप्त शषाख्यातो वयश्चसहसेन तु।

पालाष्टकमिदं पुण्य [गः पुण्यं] दशधा व्यस्त योगतः॥

८१॥

श्मशानानि विचित्राणि अष्टधाघोरसाधने।

अतोमंत्र पदानि भवन्ति॥

ॐ कं वटेश्वराय नमः॥

ॐ ह्क्षूँ वरुणायै नमः॥

ॐ ह्क्याँ [ग: ह्क्यौँ] कोलगिर्यै नमः ॥

ॐ हं हः अट्टहासायै नमः ॥

ॐ जूँ जयन्त्यै नमः [ख: ?] ॥

३०९ब् ख्) ॐ क्षूँ चरित्रायै नमः ॥

ॐ ऐँ एकाम्रकाय नमः ॥

ॐ ह्सौँ देविकोट्टाय [ग: -कोटाय] नमः ॥

प्रदीप्ता राक्षसावस्था [ग: राक्षसान्तस्थाः] संपुज्या [ग: -

ज्याश्] चोक्त लक्षणा ॥ ८२ ॥

योगिन्यो रौरवास्तत्व ऐरावत वलक्षिताः ।

प्रयागा वरूणा कोल्ला फट्टहासा [ग: अट्टहासा] जयन्तिका ॥

चरित्रैकाम्रकश्चैव कोटि वर्षन्तथाष्टमम् ।

लोकपाला [ग: -लाः] स्मृताचात्रो [ग: स्मृताश्चास्त्राः] ह्रस्वा वर्णार्ण योजना ।

प्रदीप्ता इति मन्तव्याः [ख: मन्त *?] कवन्धानेक लक्षणा ॥ ८३ ॥

अन्त्रैरन्त्र विमालिन्यो रक्तैरक्तोघजाघना ।

अधश्चोर्ध्वञ्च तिर्यक् वसुगन्धद्रवलक्षणम् ॥ ८४ ॥

ॐ चण्डे अन्त्रान्त्रमालिनिभ्यो [ग: -भ्यः] स्वाहा ।

ॐ चण्डे सुरक्त रक्तोघ घनाय स्वाहा ॥

ॐ चण्डे अधोर्ध्व तिर्यक्सुगन्धद्रवलक्षणाय स्वाहा ।

ॐ हूँ कवन्धेभ्यः स्वाहा ॥

देकं उचूपिकं मूसेव ॥

वर्द्धमानान्तका ह्येते यागाद्याक्षर संयुता ।

देहल्याद्य तु पूर्वेण बिन्दुनादसमन्विताः ॥ ८५ ॥

नवयागा मयाप्रोक्ता नवबीजोपचारका ।

वर्द्धमानान्तको देवि ईज्याध्येयानुलोमतः [ग: इज्या-] ॥ ८६ ॥

भवन्ति साधकेन्द्राणां देव्यः सिद्धि प्रदायिकाः ।

वक्त्रनेत्राङ्ग संयुक्ता स्वबीजाक्षरनायिका ॥ ८७ ॥

यागेस्मिन् यजनार्थाय [खः -नाथाय] सप्तावरणको विधिः ।

पशुयाग विधाने तु न्यासोस्या [गः -स्याः] पूर्वलक्षणः ॥ ८८

॥

चण्डमातर क्षेत्रस्था लोकजा गृहमातरः ।

चतुःपथे पूतनाद्या वागाद्या देहसंस्थिताः ॥ ८९ ॥

दिग्मातरस्य [गः दिङ्-] रौद्राश्च दिक्तत्वे संव्यवस्थिताः ।

करालाद्यो हि यः षट्क अधस्ता [गः -स्ताद्] गुह्यजः परः ॥ ९० ॥

क्षेत्रा प्रयाग पूर्वास्तु गृहादेहलिकादिकाः ।

चतुपथं [ग: चतुः-] ह्रदेद् देशदेहस्याष्टकसंज्ञया ॥ ९१ ॥

पुर्यष्टकमयन्तन्तु दिक्तत्वन्तु विकारजम् ।

दिग्मातृरौद्रसंज्ञानां [ग: दिङ्-] श्रोत्र पूर्वं
प्रकीर्तितम् ॥ ९२ ॥

कराला राक्षसा प्रोक्ता योगिन्यः षट्कसंज्ञया ।

गुह्यनाभिरिति प्रोक्त सर्वनाडि वहान्वितम् ॥ ९३ ॥

चतुष्कन्तु मरीच्याद्यरक्ताद्यन्तु तदानुजम् ।

सर्वकामार्थ दन्तच्च [ख: ?] सर्वत्रैव व्यवस्थितः [ग: -तम्] ॥
९४ ॥

कालाग्नितार दहनै रौरवाद्या समाश्रिताः।

३१०अ खृ) रोरवस्तु [ग: रौर-] क्षकाराख्यो लस्वैरावत

संज्ञया ॥ ९५ ॥

दिव्योहंस इति प्रोक्तः कालोमश्च प्रकीर्तितः।

अग्निरेफ इति प्रोक्तो दहनस्तद्यतानिलः ॥ ९६ ॥

तारः प्रणव शव्दस्य हंससोयं त्रिधादितः।

त्रिविधस्तु समाख्यातो योगिसंघोमयोदितः ॥ ९७ ॥

सर्वत्र परमो हंसकलाषट्केन षट्पदः।

जन्माद्यो हि ग्रहस्तत्र पशोन्नित्यं [ग: पशोर्-] सुयंत्रितः ॥ ९८

॥

आस्वाद चरुकानान्तु [ग: -णान्तु] पूर्वसाधन कल्पना।

वेशेषिकान्तथा [ग: वैशेषिकान्-] देवि साधनं पूर्वयोगगम्

॥ ९९॥

दिव्यन्तरिक्ष भौम्येवं योगिन्यस्तु त्रिविग्रहाः [ग: -हा]।

त्रिविधाहंस पूर्वास्तु कर्मकाले पशोस्थिताः॥ १००॥

पिण्डखण्डाक्षरेणैव पशूनां मंत्रयोजनात्।

वेधघट्ट विधिज्ञात्वा पशोर्ग्रहणसाधनम्॥ १०१॥

अन्यथा तु न कर्तव्यं वृथा तत्वं पशोरिव।

वेधनं घट्टनञ्चैव पिण्डभेदोक्त लक्षणम्॥ १०२॥

हीनशक्ति [ग: -शक्तिः] पशोर्न्यासं समलञ्चात्मनो भवेत्।

देहली लङ्घनायागो मोहनान्मुद्रणं स्मृतम्॥ १०३॥

३१४अ ग्] देहल्यादि विभागौ [ग: -गो] ये योगाभ्यासात् प्रकीर्तिताः
।

तदाभ्यासं विनासिद्धिर्नभवेद् योगकर्मणि॥ १०४॥

मुक्त्वा शक्त्यात्मकाभ्यासं वेधघट्टक्रमान्वितम्।

योभ्यसेन्यन्तु सद्योगं वृथातत्वन्तु तस्य वै॥ १०५॥

एतदर्थं महादेवि देहली यागपूर्वकम्।

कर्तव्यं साधकेन्द्रेण [ख: ?] समयज्ञेन साधुना॥ १०६॥

अन्यथा न भवेद् योगोकर्मसिद्धिस्तु व्यर्थिका।

क्षेत्रासीनेन [ग: -शीनेन] कर्तव्यं मोहनोन्मुद्रणं स्मृतम्

॥ १०७ ॥

प्रत्येकयाग योगेन सिद्धिर्मोक्षादिका [ग: -काः] स्मृता [ग: -

ताः]।

देहल्यादि विभागस्य प्रथमी देहलीमता ॥ १०८ ॥

कर्मसाधन विन्यास [ग: -सं] शेषा [ग: शेषाः] पूर्वोक्त

संयुतः [ग: -ताः]।

कण्डन्यां कुट्टितोभूयः सितासितकणागतः ॥ १०९ ॥

मृदाष्टकण्ठकैर्युक्तो भिन्नदेहस्तु जायते।

चुल्याप्रताप कृन्त्यस्तस्मंकु [ग: -स्तः शङ्कु] योगेन

वाप्यधः ॥ ११० ॥

आकृष्टस्तु सरक्तौघं पशुः पततिचाग्रतः ।

पीषण्यां पीषितो भूयोभिद्यते सैन्यतत्परः [ग: -रम्] ॥ ११३ ॥

३१०ब् ख्) आकृष्टाकर्षणं [ग: आकृष्ट्या-] कुर्याद् विसर्जनगति

[ग: -तिः] क्रिया ।

कञ्चिन्यां मुद्रकान्तस्थो गर्भाद्य स्तंभितो भवेत् ॥ ११४ ॥

मुशलेन तु संक्षुण्ण [ख: ?] अङ्गभङ्गसुदारुणम् [ख: ?] ।

वर्द्धमानो महाशाख सर्वसाधनलक्षणम् ॥ ११५ ॥

सिद्धार्थकस्तु कञ्जिन्यां वासितास्तु समाहरेत्।

मार्जिन्या तु सदाशान्ति [ग: -शान्तिः] कुंभे नित्यं सतूरजम्

॥ ११६ ॥

क्षीरमध्ये सदाशान्ति [ग: -शान्तिस्] तूराप्यायनमेव च।

एवन्नवविभागेन कर्मपूर्वोक्त लक्षणा ॥ ११७ ॥

वर्णादिरूपभेदेन [ख: * * *?रूप-] समाधि * समन्वितम्।

मूलसूत्र विधानस्थ [ग: -स्थञ्] चतुष्कं षट्कसंवरम्॥

११८ ॥

यजे [ग: यजेत्] तु तत्र संसिद्धौ नान्यथास्य स्वकोविधिः।

सकलीकरणं वक्ष्ये चतुष्कं षट्कलक्षितम्॥ ११९॥

चतुष्कं करशाखाषु तत्वबीजादि मंत्रितम्।

षड्विन्दुकप्रदीप्तञ्च बीजं सर्वत्र विन्यसेत्॥ १२०॥

तत्वं स्वलक्षणस्थन्तु मन्त्रनामपदस्थितम्।

हूं फेतिद्व्यक्षरं मंत्रं उदर्का तु [खः नास्ति]

षडक्षरम् [खः नास्ति]॥ १२१॥

हुं फट्काराक्षरैर्युक्तं वौषडन्तं षडक्षरम्।

मन्त्रपञ्चकमेवं स्यात् स्मरणाद्यं प्रकीर्तितम्॥ १२२॥

सर्वत्रलक्षणोपेतं सर्वावरणसंस्थितम्।

चतुष्केण तु वाक्काणि अङ्गानाञ्च पृथक् पृथक्॥ १२३॥

विष्णुस्तंभोक्षरोन्तोन्तो वक्रस्था [ग: -स्थः] षट्स्वरान्वितः ।

वक्राङ्गास्तु महादेवि चतुष्कस्यानुजस्य च ॥ १२४ ॥

३१४ब् ग्) वाम दक्षिणमध्यस्था योगिन्यस्तु त्रिविग्रहाः ।

हरकषमलवय सिद्धा कलोव्यस्त समस्तगा [ग: -गाः] ॥ १२५ ॥

उ ऊ ए ऐ वक्रसंस्था षडयोगिन्यास्तथानुगा ।

एवं यागोनुमन्तव्यश्चोत्तरास्ये वरानने ॥ १२६ ॥

शरीरवक्र विन्यासः कालाख्यो योदयान्वितः ।

सोच्यते मध्यदेशे तु नवव्योमात्मसंवरः ॥ १२७ ॥

ह च कलस्वय महापिण्डा मध्यदेश व्यवस्थितः।

स्मरणानुग्रहः साक्षा [ग: साक्षात्] तत्त्वञ्चतुष्क कल्पितम्॥

१२८॥

द्वा * * * * * * * * * * द [ख: ?] न लक्षितम्।

कृत्वा तु चाभ्यसेन् नित्यं क्षयवृद्धिसमर्थकृत्॥ १२९॥

संल्लिहेद् बिन्दुविन्दुन्तु पूर्वचक्राद्यवस्थितः।

जरामरण निर्मुकोमन्त्रचक्राद् भविष्यति॥ १३०॥

देव्युवाच

सूत्रोत्तरादि भेदेन चक्रमेतत् त्वयोदितम्।

सर्वोदय विभागन्तु कृताध्यात्म सुविस्तरम्॥ १३१॥

देवतानाडि भेदेन गतियुक्त्या वधारितम्।

३११अ ख्) इदानीं * * * * न [ख: ?] सर्वाध्व कृतनिश्चयम्॥ १३२॥

विश्ववक्त्रात्मकं नाथ श्रोतुमिच्छामि तत्वतः।

भैरव उवाच

समे मध्ये तु भूदेशे निम्नोन्नत विवर्जितः॥ १३३॥

सुगुप्तेसु विविक्ते तु तत्र चक्रं समालिखेत्।

तुरीय वसवादित्य [ग: -दित्यश्] चन्द्र संख्याद् विधान्विता॥

१३४॥

नामपत्रकृताटोपं समभाग विभाजितम्।

सितधातुसु सूत्रेण विधानेन विनिर्मितम्॥ १३५॥

एवं वाह्यन्तथान्तस्थं [ख: वाह्यंन्-] हृच्चक्रं तस्य
दर्शयेत्।

शुद्धविद्यान्तगं वाह्यं द्वात्रिंशतिगणं स्मृतम्॥ १३६
॥

नाडीद्वय कृताटोप चन्द्रसूर्यकलान्तगम्।

पुर्यष्टकाग्नि नाडिस्थं मध्ये वसव लक्षणम्॥ १३७॥

चन्द्रादित्य वसूभिस्तु त्रिचक्रन्तु विनिर्मितः [ग: -तम्]।

अंभोज्योति [ग: -तिस्] तथात्मा च शक्तिश्चैव शिवस्तथा॥ १३८॥

मार्गपञ्चकमेवन्तु चक्रगं वीरवन्दिते ।

पञ्चवक्त्रात्मकं पिण्डं पञ्चभूतकलात्मकम् ॥ १३९ ॥

ईश्वरो वाह्यचक्रस्थश्चन्द्रचक्रे सदाशिवः ।

रविचक्रे तथाचात्मा वसुसंख्ये स्थिताव्ययाः ॥ १४० ॥

शक्तिज्ञानक्रियस्त्वेन मार्गेण प्रविवेचनी ।

पञ्चात्मको हि भगवां शिवो [गः छिवो] वै चक्रनायकः ॥

१४१ ॥

अष्टत्रिंशात्मको योध्वाकारणैश्च कलार्थिनः ।

वायुनाडी [खः स] समोत्पन्नश्चक्रेस्मिन् संप्रतिष्ठितः ॥ १४२

॥

३१५अ ग्] आध्यात्मं चिन्तयेद् वाह्यं

वाह्यमध्यात्मिकान्तथा ।

चक्रे समान भावेन ततो विन्यासमारभेत् ॥ १४३ ॥

मरीची [ग: -चि] ज्वालिनी चैव स्थिरिणी चामृता तथा ।

शिवकाय गता ह्येता [ग: ह्येतास्] तथा रक्तादि देवता ॥ १४४ ॥

मूर्तिश्चतुर्विधा शंभोर्जयाद्याश्चापि शक्तयः ।

हव पूर्वे महापिण्डे न्यसेद्देवं विभागतः ॥ १४५ ॥

मरन्येहं मंरीच्याद्यञ्जपाद्यं [ग: मरीच्या-]

सूक्ष्मलक्षणम् ।

स्थूलं रक्तादिभिर्ज्ञेयं शरीरं पारमेश्वरः [ग: -रम्] ॥

१४६ ॥

एवमध्यात्मिकं त्रेधाभौतं स्थूलतरं स्मृतः [ग: -तम्] ।

व्यापित्वे पञ्चमन्देवि चारन्देवस्य कीर्तितम् ॥ १४७ ॥

शिवशक्ति विवेकश्च [ग: -कञ्च] प्रपञ्चोलक्षरूपका [ग: -

काः] ।

पञ्चधा चारयोगेन चक्रेस्मिंश्चरते प्रभुः ॥ १४८ ॥

सारीर [ग: शारीर] संप्रयोगेन [ग: -ण] विश्वात्मा खतनु [ग:

स्वतनुः] स्थितः ।

अविभक्तो विभागैस्तु जगन्मात्रेः [ग: -त्रैः] प्रतीयते ॥ १४९ ॥

३११ब् ख्) स्फटिकोपाधिवन्नाथस्थान चारविभागशौः [ग: च्चार-] ।

शान्तघोर विमिश्रैस्तु भजतेनुग्रहात्मवान् ॥ १५० ॥

स्थूल सूक्ष्मपरत्वेन शास्त्रेस्मिङ्गतियोगतः [ग: शास्त्रेस्मि गति-] ।

लक्षणीयो विभागेन मार्गतत्वमयेन तु ॥ १५१ ॥

तारासु तारातरणी तारयन्ती सुतारणी ।

मोदमाना तथारम्या सदा प्रमुदिताष्टमी ॥ १५२ ॥

विद्याया चक्रमध्ये तु युग्मयोगाच्चतुर्दले ।

शिवतत्वं स्मृतं ह्येतच्छिवमध्ये व्यवस्थितम्॥ १५३॥

शान्तिविद्या प्रतिष्ठा च निवृत्तिस्तु यथाक्रमम्।

ब्रह्मवेद युगानाञ्च विदीशा [ग: विदिशा] कालकल्पना॥ १५४
॥

विश्वचक्रविभागस्था मूर्तित्त्यक्त्वा तु शक्तयः।

भोगस्थानं यथा प्राप्ता [ग: प्राप्तञ्] चत्वारो [ग:
चत्वारंश्] चतुरात्मिका॥ १५५॥

पूर्वपत्रे स्थिता रक्ताकराला दक्षिणेन तु।

पश्चिमेन तु चण्डाक्षी महोच्छुष्मा तथोत्तरे॥ १५६॥

एवं नाडिमुखां [ग: -खा] शेष पूरिकामृत विप्तयैः [ग:

विपुषैः] ।

शेषान्याश्चापि ऋक्षाद्या आग्नेयादि [गः वा-] दलाश्रया ॥ १५७

॥

तास्त्र पश्चतुरो देवि द्वादशाच्छदकं गताः ।

पूर्वादिरक्तमार्गेण स्थिता [गः -ताः] सर्वत्रशोभना ॥ १५८ ॥

गभस्तयस्तु याश्चाषौ पूर्वपत्रान्त देशतः ।

स्थिता पत्रद्वपाटोप विदिक्षुकृत विग्रहाः ॥ १५९ ॥

द्विरष्टदल पूर्वादि द्विदलो [गः द्विदलश्] चोत्तरान्तिका ।

रश्मिमंत्र्य स्थिता चाष्टौ तदन्तद्वितयेषु वै ॥ १६० ॥

तत्वाख्या संस्थिता ह्येवद्विगुणे याधुना [ग: वा-] शृणु ।

इशाष्टके [ग: ई-] न्यसेन्मात्र्य उत्तरान्तास्तु साधकः ॥ १६१ ॥

तस्मात् तु शक्तयो न्यस्य पौरुषं तत्वमाश्रितः [ग: -ताः] ।

पश्चिमान्ता महादेवि तस्माद् देव्या [ग: देव्यस्] तथाष्टके ॥
१६२ ॥

३१५ब् ग्] याम्यन्ता तु कलास्तस्माद् [ग: कला-] यावत् पूर्वदलं
गताः ।

शक्तिभिस्तु चितं चक्रं तद्वद् रुद्रैर्महात्मभिः ॥ १६३ ॥

तन्नामगोत्रमन्त्रैस्तु सर्वैर्विद्यात्मकं प्रिये ।

विद्याचाष्ट स्वरादीर्घा यो * * *ष्ट [ख: ?] संख्यया ॥ १६४ ॥

समूहं [ग: -ह] चक्रमेवोक्तं तच्चाष्ट कृतसंख्यया ।

विद्या स्वरूप युक्तास्तु [ग: युक्ता तु] तारादि गणयोजिताः ॥ १६५ ॥

शिवाभिमुखमंत्रास्तु सर्व [ग: सर्वे] प्रणव पृष्ठगाः ।

न तिरग्रा महादेवि शिवामृत रसार्थिनः ॥ १६६ ॥

* * * ह्रश्च? * * * * * तत्वं [ख: ?] प्रतिष्ठितम् ।

ईशकोणात्म सारास्व पूर्वान्तन्तु वरानने ॥ १६७ ॥

३१२अ ख्] इशः [ग: ईशः] सदाशिवोत्मा च शक्तिश्चैव
शिवस्तथा ।

तत्तत्व रुद्रशक्त्वाध्व [ग: शक्त्याध्व] तत् [ग: तन्] मंत्रैः

स्वदलानुगैः ॥ १६८ ॥

प्रस्तार्य देवदेवेशो कालयुक्तं समभ्यसेत् ।

कालोम्ना वायुशक्तिश्च शिवश्चैव वरानने ॥ १६९ ॥

यत्र यत्र विभागस्थ [ग: -स्थं] तत्र तत्रामृतं भवेत् ।

तत्पुण्यं साधकं क्रान्तिसो मृतायाग [ख: ?] उच्यते [ख: ?] ॥ १७० ॥

* * * वा [ख: ?] स्थितं [ख: ?] ह्येतत् कलाभिः संविलक्षयेत् ।

यथा शरीरचारोक्त विभागेन तथा प्रिये ॥ १७१ ॥

स्थाने स्थाने तथा प्राणै [ग: प्राणैः] स्वोदये प्राणकल्पिते ॥

परे वाथ महेशानि शैवेस्त्रोते प्रचोदिताः ।

अहोरात्र विभागेन नाडी सक्रान्ति [गः सं-] लक्षणम् ॥ १७२ ॥

प्राणैके हो निशाभिर्वा त्रिधासूक्ष्म विवक्षया ।

वाह्ये वा स्वेच्छया स्थूल योगिनां संप्रशस्यते ॥ १७३ ॥

नाडी कालानिलात्मा च शक्तिश्च शिवपञ्चधा ।

गतौगतौ विदित्वा तु तत्रलेह्यं सदामृतम् ॥ १७४ ॥

एवं विश्वोदयन्देवि ज्ञात्वा ह्यस्था [गः हृत्स्था] यथेरितम् ।

जरामरण निर्मुक्तो मन्त्रवक्राद्भविष्यति ॥ १७५ ॥

संल्लिहेद् बिन्दु बिन्दुन्तु पूर्व चक्रा व्यवस्थितः [गः -तम्] ।

कालञ्च लक्ष निष्पत्तौ लक्षणेन विलक्षयेत्॥ १७६॥

एकविंश [ग: -शत्] सहस्राणि ऋतुसंख्याशतानि तु।

सर्वत्राहोनिशं भोगं प्राणानां भुञ्जते प्रभुः॥ १७७॥

सहस्र पञ्चप्राणानां सततुर्यञ्चतुर्दले [ग: शत-]।

सप्तविंशशतं [ग: सप्त-] मानं मष्ठपत्रे विलक्षयेत्॥
१७८॥

शताष्टादशकं सौर्येशता त्र्योदश संख्यया।

शतार्द्ध सहितान्देवि [ग: सहिता-] भुञ्जते षोडशच्छदे॥ १७९
॥

पादू [ग: पादो] न सप्तशतकं वारं द्वात्रिंश गोचरे ।

एवं परन्तथा सूक्ष्मं स्थूल सूक्ष्मतरन्तथा ॥ १८० ॥

स्थूलञ्च देवदेवेशे क्रमा [ग: क्रमाद्] भज्योदयं सदा ।

३१६अ ग्] यन्त्रोदये मृतन्तत्र तत्पिवेद् योगसंस्थया ॥ १८१ ॥

समभ्यसेत् [ग: -सेन्] महायोगी तदा पूर्वोदितास्तु या ।

सापेक्ष प्रतिलोमन्तु हंसच्छाया जपेत् सदा ॥ १८२ ॥

स्तोभमायाति वै साक्षाशरीरं [ग: -च्छरीरं]
क्षेत्रसङ्गतम् ।

क्षेत्रन्तु भुवनं कृत्वा अभ्यसेन्नित्यमेव हि ॥ १८३ ॥

पवित्री कृतमात्रस्तु गृहवक्त्राद् विभूषितः ।

शरीरं स्तोभमायाति सद्यमेव न संशयः ॥ १८४ ॥

पवित्रास्तु स्मृता मन्त्रा [ग: मन्त्राः] प्राणायागादि शोधिते ।

निष्कलङ्कशरीरे तु मंत्राः कायेतिपूतके ॥ १८५ ॥

योगयुक्त्या तु यत्तत्र देवता [ग: -तास्] तत्मयङ्गतः [ग: तन्-] ।

३१२ब् ख्) तदादेशः समन्तात् तु [ग: समन्तास्तु] संवित्या स्तोभ उच्यते ॥ १८६ ॥

स्तुत्वे तस्मिस्तु तत्तत्र स्वरूपात्मा तु साधकः ।

दर्शयेच्चात्मरूपन्तु यथाविद्यालये तथा ॥ १८७ ॥

सर्वतत्वात्म धर्मात्वाजित प्राणादि रूपवान्।

स्वेच्छया तु महाभागे याति चा गच्छते क्षणात्॥ १८८॥

मूर्ध्नानं [खः मूध्नानं] व्यापकं कृत्वाकरणं
चोर्ध्वमूलिकम्।

विहारम्यादचारश्च सर्वमस्मात् प्रवर्तते॥ १८९॥

देव्युवाच

प्रयोग राजसर्वस्वं कथं कर्मादिनाशकः।

विभागश्चापि चक्रस्य भुक्तिमुक्ति प्रसाधने॥ १९०॥

भैरव उवाच

स्त्यागादि गममार्गो यो नादयोगान्त शक्तिगः ।

ऋतु योग विभागेन ऊर्ध्वगत्वन्तु यत्स्मृतः [गः -तम्] ॥ १९१ ॥

शिवशक्तिसमत्वेन त्यक्त्वा व्यापारगोचरम् ।

यदा याति विभुत्वन्तु तदा तद्व्यापकं स्मृतम् ॥ १९२ ॥

मूर्ध्नानं व्यापकं कृत्वा अधो [गः अधः] स्फोटादि
योजनात् ।

तत्प्रपन्ना तु [गः -न्नास्तु] सन्त्यज्य तत्व धर्ममशेषकम् ॥ १९३
॥

अनच्छाक्षर संयोगात् तत्वं तत्वान्तरे सदा ।

करणाध्यात्मिकं ह्येतज्जित प्राणस्य जायते ॥ १९४ ॥

वामजङ्घा वहिः सव्यापर्यङ्कासन रोधिते ।

तदावकाश शाखाभ्यां कुक्षिपीडनको विधिः ॥ १९५ ॥

विवर्तन विभागेन नाभिकन्दादि [ग: नाभिस्कन्धादि] देशतः ।

* * * कान्तरं यावत् प्रयोगेत् तत्र वा चरेत् ॥ १९६ ॥

जिह्वाग्रन्तद्विलान्ते तु क्षिप्ताचोर्ध्वानिलेगते ।

समाधि [ग: -धिः] च्छिवभावेनकरणं [ग: शिव- -णश्]
चोर्ध्व] मूलिकम् ॥ १९७ ॥

साध्यात्म वायुसंयोगाच्छिव शक्तिकृतैवृता [ग: -कृतैर्वृता]
।

विहारं पादचारञ्च सर्वम्मस्मात् [ग: सर्वमस्मात्]
प्रवर्तते ॥ १९८ ॥

नमः शिवान्तगैमत्रैकृत्वाचारं [ग: -कैः कृत्वाचारं]
समभ्यसेत् ।

गुह्यकैर्भूतिमे * * * * * * * * * * ॥ १९९ ॥

* * * * * * * * * * * * * * * सदा ।

३१६ब् ग्] ज्ञात्वोदयस्तु चक्रस्य प्रतिकर्म निषेवनात् ॥ २०० ॥

ग्रहणं मोक्षणच्छेदं [ख: मोक्षण * *?] शोषणं
मनसङ्ग्रहम् ।

सर्व कुर्यात् समाधिस्थो योगज्ञः सर्वतोमुखः ॥ २०१ ॥

द्विपादश्च त्रिशृङ्गश्च हममध्ये [ख: ?] व्यवस्थितम् [ख: ?] ।

षड्विन्दु [ख: ?] कृतसारथ्या [ग: -सारभ्याद्] रूपादि परिवर्तनम् ॥ २०२ ॥

देव्युवाच

सर्वतोमु * * * * * * * * * * * * ।

* * * * * * * * * * * * * भि भैरवम् ॥ २०३ ॥

३१३अ ख्] कथन्तदित्य शेषेण साधकैस्त्व वधार्यते ।

भैरव उवाच

षट्विधस्यापि [ग: षड्विव-] योगेस्मिं नङ्गसंज्ञस्य [ग:

योगेस्मिनङ्ग-] भैरवि ॥ २०४ ॥

लक्षणं संविधास्यामि श्लोकेनानेन सुव्रते ।

द्वौ पादौ वर्णमाकारो [ग: -र] आ [ख: ?] * * * * * * * * ॥ २०५ ॥

* * * हम [ख: ?] शाव्दञ्च चेता शान्तान्तमादिशेत् ।

षड्विन्दुस्तत्र संहारो रूपादि परिवर्तनम् ॥ २०६ ॥

अशुद्धरेचन [ग: -नः] पूरः पादौ द्वौपरिकीर्तितै [ग: -तो] ।

कुंभकोरेचकः शान्तः [ग: शान्त] स्त्रिशृङ्गं शिवचेतनः ॥

२०७ ॥

मध्ये जपस्तुयः प्राणो जपादायाम उच्यते ।

षड्विन्दु [ग: -विन्दुर्] अनिलस्योक्ता सारथ्यं शिवचेतनः ॥ २०८ ॥

प्राग्भाव रूपसंहारमदितः [ग: -मादितः] परिकीर्तितः ।

गुणाकार द्विपादं स्वाद् व्याप्तिकर्म तथात्मता ॥ २०९ ॥

त्रिशृङ्गं [ग: त्रिः-] शिवचैतन्य [ग: -न्यं] हममध्यं [ख: -मध्यंम्] प्रकीर्तितम् ।

गुणादि रूपसंहार सन्ताषट्विन्दुकस्तथा ॥ २१० ॥

शिवशक्ति [ग: -शक्तिः] सुसारथ्या रूपादि परिवर्तनम् ।

व्याप्ति स्वरूपपादो द्वौलक्षणं लक्ष उच्यते ॥ २११ ॥

शिवाध्वनि प्रभुत्वं यल्लाव्याप्ति स्वस्वरूपिणी ।

स्वरूपं यस्य यत् प्रोक्तं लक्षणं तस्य तत्स्मृतम्॥ २१२॥

तच्चजाति [ग: -याति] गुणाकार सन्ताभाव्य चतुर्विधम्।

जातिः शिवस्तथा शक्तिः पञ्चभूतात्म लक्षिताः॥ २१३॥

जात्यानुसारतो लक्षं लक्षणीयं यथागमम्।

गणगन्धादयो येषामधिकारः शास्त्रचोदिताः॥ २१४॥

शिवाद्यस्तथा वर्णा [ग: वर्णाः] पृथिव्यादि गुणामता [ग: -
ताः]।

आकारो यादृशो यत्र तत्वे प्रोक्तः शिवागमे॥ २१५॥

पृथिव्याद्यैर्गुणैर्युक्तः आकारस्मैवलक्षयेत् [ग: [ग:
आकास्मै?व-]।

यासन्ता सा द्विधा रूपा क्रियाज्ञानात्मिका स्मृताः ॥ २१६ ॥

वर्णमुद्रादि संभेदः [गः संभेदौ] क्रिया सर्वत्र लक्षयेत् ।

ज्ञानशक्ति [गः -शक्तिः] स्मृता वोध स चैवं [गः चैव]
द्विविधा स्मृता ॥ २१७ ॥

शिवशक्तिस्तथात्मा च त्रिशृङ्गं परिकीर्तितम् ।

कालाग्न्यादि शिवान्ता [गः शिवान्तो] वा हममध्यं विलक्षयेत्
॥ २१८ ॥

प्रत्याहारादिको वर्गो लक्षान्तं पञ्चकन्तु यत् ।

चित्षष्ठ बिन्दुसारथ्यो रूपादि परिवर्तनम् ॥ २१९ ॥

३१३ब् ख्) प्रत्याहारस्तथा यामो द्वौपादौ परिकीर्तितौ ।

३१७अ ग्) धारणा ध्यान लक्षे च त्रिःशृङ्गन्तु विलक्षयेत् ॥ २२०
॥

वायुशत्कि [ख: वायु * *?] शिवश्चेता [ग: -तास्] तत्रस्थ
हममध्यगम् ।

षट्विन्दु [ग: षड्-] प्राणपूर्वं यत्सारथ्यं [ग: -थ्य]
गतिगत्वता [ग: -मत्वता] ॥ २२१ ॥

युगपत् सर्वसंहारः समत्वं सर्वतः स्थितम् ।

स्वेष्टयोगान्यहान्या च रूपादि परिवर्तनम् ॥ २२२ ॥

वर्णोंचारं द्विपादं स्वाङ्गति लक्षलयन्तथा ।

त्रिशृङ्गमिव [ग: त्रिः-] शक्तिश्च [ख: ?] चेताकर्मकलामता ॥

२२३ ॥

तदाधार परित्यागो वायुशक्त्यात्म चैकता ।

प्रत्येक स्थान सन्त्यागा [ग: -गाद्] रूपादि परिवर्तनम् ॥ २२४ ॥

एवं नाडी विभागोपि पृथग् योगात्मकेन तु ।

अनेनैव प्रगेन [ग: -ण] योगोयं सर्वतोमुखः ॥ २२५ ॥

नातः परतरं किञ्चित् त्रिषुलोकेषु विद्यते ।

ज्ञात्वापि प्चुमतं तन्त्रं सर्वतन्त्रात् [ग: -त्रान्] परित्यजेत् ॥

२२६ ॥

चर्वाहारा विभागोपि तालकाराधने तथा ।

सर्वात्मके च योगोयं सर्वतः स्वानुरूपतः ॥ २२७ ॥

दूतीयोगात्म योगाच्च प्रक्रिया योगयोजनात् ।

सर्वत्र च चतुर्णान्तु योगोयं परिकीर्तितः ॥ २२८ ॥

अनुलोम विलोमेन दूतयः संव्यवस्थिताः ।

अधोर्ध्व सिद्धिदा देवि आत्मदूती तु सर्वदा ॥ २२९ ॥

तद् द्रव्यं सर्वदासिद्ध दर्शनात् स्पर्शभक्षणात् ।

चुंवनागूहनञ्चैव शिवपीठे विशेषतः ॥ २३० ॥

यावतो द्रव्यसंघातः सर्वसिद्धिकरः परः ।

दातव्यं मन्त्रसद्भावं नान्यथा तु कदाचनः [ग: -न] ॥

२३१ ॥

माता च भगिनी पुत्री भार्या वै दूतयः स्मृताः ।

यस्या [ग: यस्यां] मन्त्रं ददेन्नित्यं तस्यै यो हि विधिः

स्मृतः ॥ २३२ ॥

इति पिचुमते उत्तराधिकारो नामः [ग: नाम] चतुराशीतिमः [ग:

चतुर-] पटलः ॥

ॐ हूं फट् वौषट् कपालभैरवाय नमः ॥

ॐ [ख: ?] * * * * * * * * * * * * * * * * * यै [ख: ?] नमः ॥

ॐ लिं [ख: ल्लिं?] निं हूं फें चण्डाक्षी [ग: -क्ष्यै] नमः

॥

ॐ स्वां हां हूं फें महोच्छुष्मायै नमः ॥

चतुष्क न्यासः ॥

ॐ ह्स्क्ष्म्ल्व्रयूँ [ख: ?] कपाल भैरवाय नमः ॥

ककार लकार रहिता योगिन्यः ॥

उ ऊ ओ औ वक्राणि दीर्घश्वरोन्ताङ्गानि [ग: -स्वरोङ्गान्तानि] ॥

ॐ ह्स्क्ध्ल्म्व्रयूँ [ख: ?] महापिण्डमध्यदेशे व्यवस्थितः ॥

* * * * ** ** * * * * * ॥

३१४अ ख्) समयान्पथ [ख: * *?यान्पथ] वक्ष्यामि

घोरतन्त्रेषु दुर्लभाम्।

यामवाप्य नरस्त्रीवा सिद्धिचेष्टानुमच्छ्र्ति [ग: [ग: सिद्धिश्-]
॥ १ ॥

विज्ञायते सदूरेपि गृहक्षेत्रे व्यवस्थितः ।

नशिवस्य परोदेवः [ग: -व] आचार्योमातरस्तथा ॥ २ ॥

अस्मिन्तन्त्रे [ग: अस्मिंस्तन्त्रे] तु गुरवः साधकाः साधुरेव वा
।

३१७ब् ग्) नावमान्या [ग: -मन्या] नधिक्षेप्या पूजनीयाश्च
शक्तितः ॥ ३ ॥

अष्टा [ग: अष्टौ] तु समया ह्येते भक्तिश्रद्धा विवर्द्धकाः ।

सिद्धीनां कारणं ह्येतत् समयाचार पालनम् ॥ ४ ॥

अनन्य देवता सङ्गोह्य विकल्पोह्य लोलुपः ।

अद्वैतञ्चा प्रमादञ्च समयाचारचेष्टितम् ॥ ५ ॥

नारीचर्य समुत्थानं ब्रह्मचर्यं तथायमः ।

अक्रोध स्त्रोत सञ्चार इत्यष्टौ समयापराः ॥ ६ ॥

ज्ञातव्या [ग: -व्याः] साधकैर्नित्यं साधनाराधन [ग: -ने]
स्थितौ ।

सामान्याः सर्वतन्त्राणां नहन्तव्यास्तु हेतुभिः ॥ ७ ॥

शुद्धाशुद्ध विमुक्तस्तु साधकस्त्रिविधः स्मृतः ।

आराधको विशुद्धस्तु दीपकादि गुणैर्विना ॥ ८ ॥

ग्रामे ग्रामे व्रतन्तस्य देवता रूप लक्षणम्।

उन्मत्तमसिध्यरञ्च पवित्रक्षेत्र वर्जितः [ग: -तम्] ॥ ९॥

साधकस्तु द्विधाप्रोक्तश्चरुमार्गोथ [ग: -प्रोक्तं चरु-]
तालकः।

तालमार्गे रतानान्तु नचरुर्नैव संयमः॥ १०॥

विद्याव्रत विशुद्धिस्तु त्रिषष्टिव्रतमेव च।

अभेद्यत्वं ततस्तस्य तालादौ साधने विधौ॥ ११॥

चरुमार्गैक देशो हि तालः सर्वात्मको भवेत्।

क्षेत्रस्थानानि सिद्धानि योगिन्यो यत्र सङ्गताः॥ १२॥

तेषु स्थित्वा जपं कुर्याच्चरुमालभते द्विजः।

तालकृद्यन्त तन्तस्थः [ग: तन्त्रस्थः] साधयेत् साधनैः

परैः॥ १३॥

गुरु पूर्वक्रम प्राप्तरभियुक्तः सुयंत्रितः।

अप्रमत्तः सदायुक्तो निर्लज्जो निघृणस्तथा॥ १४॥

निःसङ्ग ज्ञानशीलश्च संपूर्णज्ञान देहजः।

प्रातरुत्थाय शुद्धात्मा शकली [ग: सकली] कृतविग्रहः॥ १५॥

अत्यङ्गानि [ग: अत्य् *?नि] तु वस्त्राणि शरीरस्थानि धारयेत्।

पवित्री कृतदेहस्तु सततं मन्त्रमुच्चरेत्॥ १६॥

यागस्थानानि सिधानि अस्त्राणि तु नलंघयेत्।

ना क्रमेत् समय [ग: -यं] ज्ञाने [ख: ?] * * * क्तान्न निन्दयेत्॥

१७॥

३१४ब् ख्) तैश्चसार्द्धं मखं कुर्यादात्मार्थी वा

तदर्थकृत्।

समयाचार एषो हि भ्रमञ्चेष्टि तु मुच्यते॥ १८॥

रात्रौ तु सततं नग्न [ग: नग्नः] कृष्णरक्तैर्दिवा भवेत्।

प्राण्यङ्गवासो वासोवाम खार्थी चाद्यमालभेत्॥ १९॥

यज्ञोपवीतं संत्यज्यशौ वञ्चैव अह [ग: अहः] स्थितम्।

पञ्चमुद्रा व्रतीनद्धः सर्वकर्माणि कारयेत्॥ २०॥

रात्रौ तु प्रकटौ नित्यं कृष्णरक्तैर्दिवा भवेत्।

क्रियाज्ञाना विगुप्तस्तु प्रशान्तस्तु जितश्रमः॥ २१॥

शौचन्तु त्रिविधं प्रोक्तं स्वस्रोतसि व्यवस्थितः।

सितासित मुखक्षेप [ग: -पः] शिखाबन्धन वर्जनम्॥ २२॥

शौचन्तु प्रथमं सिद्धं सर्वसाधनलक्षितम् [ग: -
वलक्षितम्]।

यवसः प्राशनञ्चैव द्वितीयं शौच उच्यते॥ २३॥

३१८अ ग्] शिवांभः प्राशनञ्चैव तृतीयं घोरदर्शनः [ग:
-नम्]।

जन्मनाशनमेवं हि श्रोत [ग: स्रोतः] शुद्धि प्रपालनम्॥ २४

॥

तपश्विनान्तु [ग: तपस्वि-] शैवानां यद्भवेत् पुण्यलक्षणम्।

दीक्षाज्ञान [ग: -नं] विशुद्धानां चतुष्कः षट्कर्मनथ

[ग: षट्कना?नथ] ॥ २५॥

प्रापञ्चिकान्तथैवं [ग: प्रपञ्चिकान्-] हि

सर्वसाधनलक्षितम्।

एवं पूजाविधिः कुर्याद् वलिन्दद्याच्च शक्तितः॥ २६॥

मंत्रदिक्षा विशुद्धस्तु [ग: विशुद्धिस्तु] निर्वाणगुणनिर्गतः।

द्विजस्तु पूजयेद् देव्यः स्वस्त्रोतद्रविणार्थ कृत्॥ २७॥

पूजयेद् रात्रिचारेण सोमाङ्गतनु संस्थितः।

भ्रातृभिः पुत्रकै [ग: -कैः] शार्धं [ग: सार्धं]
सुखदुःख समोभवेत्॥ २८॥

मन्त्रं प्रकाशयन्नैव उपदेशं न नाशयेत्।

यथार्थमुपदेशन्तु दद्यात् स्वगुणवर्जितः॥ २९॥

दूतीन्त्यक्त्वा न चान्यत्र गच्छेत् कामविमोहितः।

तपः संक्षीयते तस्य जन्महीनैरध [ग: -धः] स्थितैः॥ ३०॥

दूतीरक्षा सदाकार्या अधिकेन तु भोजयेत्।

सङ्करन्नैव कुर्वीत जन्महीनैरध [ग: -धः] स्थितैः॥ ३१॥

तपः संक्षीयते तस्य चरुं वा सिद्ध योषिवा।

उत्कर्षचोत्तमैः [ग: उत्कर्षञ्-] सार्द्धं [ख: ?] * * * * * * * * ॥

३२ ॥

* * * * * * मन्त्री [ख: ?] वामाचारेण संक्रमेत्।

वामहस्त परीधानो वामहस्त प्रपूजकः ॥ ३३ ॥

वामाङ्गगूढ गात्रस्तु वामतर्पण लक्षणः।

अब्रह्मघ्नो व्रतः पूर्णः साधकः सर्वकृत्परः ॥ ३४ ॥

फलदीक्षा विशुद्धान्य [ख: विशु * *?] निर्वाण [ख: ?]

गुणगोचरे [ख: ?]।

* * * त कुलचारेण एकत्र चरुभोजनम्॥ ३५॥

पञ्चवर्ण समाचारो * * * * * * * * ।

३१५अ ख) * * * * * * * * * * सिद्धः प्रपूजितः॥ ३६॥

नैवेद्यं शिवनिर्माल्यं सर्वस्तोत्र विलक्षणम्।

धारणं सततं ह्यस्त्रं रक्षा सा सर्वकर्मिणाम्॥ ३७॥

निर्विघ्नः सर्वदा सिद्धिर्नान्यथा कश्चिदाप्नुयात्।

तस्य दूतीपरा देव्या सत्वस्था साह [ख: ?] * * न्विता [ख: ?]॥

३८॥

विरक्ता [ख: ?] * * * * * यागद्रव्य विभविता।

गुरूपदेशसंयुक्ता [ग: -तास्] तदर्थं सुकृतश्रमा [ग: -माः]
॥ ३९ ॥

भ्रातरं पितरंमन्ये स्वामिवत् पश्यते क्षणात्।

स्थूल द्विजा च पिङ्गाक्षी कर्कटाकपिलोरुहा ॥ ४० ॥

सामान्या [ग: -न्याः] सर्वसिद्धीनां जपव्रतरता सदा।

स्मरणेन समायुक्त [ग: -युक्तं] चण्डेत्यादि पदान्वितः [ग: -
तम्] ॥ ४१ ॥

कापालिन्यन्त संयुक्तं स्वाहा पदविभूषितः [ग: -तम्]।

हृदयं सर्वशक्तीनां भुक्तिमुक्तिफलप्रदम्॥ ४२ ॥

स्मरणं योजयेन्नित्यं स्मरणं सर्वतः स्थितम्।

स्मरणाज्ज्ञायते ज्ञानं योगक्रीडा फलप्रदम् ॥ ४३ ॥

अस्मज्ज्ञातायतो मंत्रा वाग्मयं [ग: वाङ्मयं]

सचराचरम् ।

३१८ब् ग्] स्मरणं त्र्यक्षरं प्रोक्तं त्रिकं बिन्दुविभूषितम् ॥

४४ ॥

अवधूत निराचारो [ग: -र] आद्यमार्गतनुं सदा ।

षष्ठाकला तु रक्ताया [ग: -याः] करालाहंसविग्रहा ॥ ४५ ॥

मस्तके चैव चण्डाक्षी महोच्छुष्मा तु निर्गुणा ।

शिखाकलाप [ग: शिखा?-] धृग्देवो [ग: -व] निराचारो [ग: -र]

परापरः ॥ ४६ ॥

निवृत्तिश्च प्रतिष्ठा च विद्याशान्तिस्तथैव च।

ब्रह्मा विष्णुस्तथा रुद्रः [ग: रुद्र] ईश्वरः शिव एव च॥ ४७॥

सद्य वामस्तथा घोरः पुरुषशानमेव च।

कृतं त्रेतायुगञ्चैव द्वापरश्च [ग: द्वापरञ्च] कलिस्तथा॥

४८॥

इति चेशकलाद्यौ [ग: चेच्छ-] तु शिखान्ते स्मरणः स्थिता [ग: -

ताः]।

स्मरणे नैव कर्तव्यो दीक्षाकाले पशोर्ग्रहः॥ ४९॥

शेषन्तु विद्यं [ग: विद्य] या कर्मशक्तिसंपुट संस्थया।

शक्तिस्तु हंस एवात्र द्वितीयश्चरभेदिता [ग: -स्वरभेदिता] ॥ ५०
॥

स बिन्दु भैरवो देवः [ग: देव] एष एव प्रकीर्तितः ।

अग्निमूर्ध्नि समारूढश्चतुर्थस्वरभूषितः [ख: -
चतुथश्चरभूषितः] ॥ ५१ ॥

हंस बिन्दु युतः कर्मकाले शक्तिरिहेप्यते ।

देव्युवाच

मूलतन्त्रादि तन्त्रेषु मन्त्रसाधनचोदितम् ॥ ५२ ॥

मन्त्र तन्मयतानाथ न च दीक्षाविना क्वचित् ।

तस्मात् [ग: तस्मान्] मन्त्रमयी दीक्षा समासाद् ब्रूहिशङ्कर

॥ ५३ ॥

भैरव उवाच

३१५ब् ख्) प्रकल्प्याध्वा स्वमंत्रान्तः सप्तधा वीरवन्दिते ।

यदैवं प्रक्रिया योगात् स्वेष्टतन्तु प्रकल्पयेत् ॥ ५४ ॥

कुंभे पद्मे द्विदेशे च आत्मशिष्य तनौसमम् ।

तन्त्रिधारात्मका [गः तन्त्र?-] शक्तिर्वह्नि मूर्तौ निवेशयेत् ॥ ५५
॥

तत्रस्थन्तु न्यसेत् तत्वं विभिन्द्यभुवनोपि वा ।

तत्वेश्वरोथवा न्यस्य भुवनीशो हि * * * कः ॥ ५६ ॥

पदादि कलयो भावायो चैष्टाध्वनि संस्थितः ।

संपूज्य योजयेत् तस्यवागेशीन् तत्स्वरूपतः ॥ ५७ ॥

ईशञ्च भैरवी देवी उक्तबीजद्वयेन तु ।

पूजा संयोजना [ग: -नां] ताभ्यं विद्याया [ग: विद्यया]
कारयेत् सदा ॥ ५८ ॥

स्वमंत्र हृदये नाथ यथा भावस्य निर्वृतिः ।

ताडने द्वार ग्रहणं वियोगोच्छेदनात्मगम् ॥ ५९ ॥

आत्मैकी करणोद्वार निर्गमं मुष्टियोजमम् [ख: मुष्टियो *
नं] ।

शिखाहृद्वर्म शिरसा क्रमात् कुर्यात् महामति ॥ ६० ॥

योनौ स्थिति तदैकत्वं हृद्वर्माभ्यां समाचरेत्।

अधिकारञ्च भोगञ्च [ख: ?] मूलेनैव [ख: ?] शिखाशिरम्॥

६१॥

शुद्धौ लयन्तु मूलेन शुद्धिस्तस्या युधेन तु।

पाशच्छेदं तथा कुर्यान्निष्कृतो [ग: -निःकृतौ] च शतं

हुनेत्॥ ६२॥

कर्मतत्व मलानान्तु वियुक्त त्रितयेन तु।

स्मृत्वा पूर्णाहुतिं दद्या [ग: दद्याद्] भोगमोक्षार्थतोपि

रु?वा [ख: * वा]॥ ६३॥

३१९अ ग्) मूलमत्रेण मन्त्रज्ञस्तत्व धर्मावियोजनी [ग: -वनी]।

तस्थ प्लवसमुद्धार ग्रहणान्यत्रयोजनम्॥ ६४॥

हृदा सर्वं प्रकर्तव्यं क्रमा [ग: क्रमात्] तत्वेषु सर्वसु।

एवं दीक्षा विधिर्मन्त्रेस्वके कृत्वाविधानवित्॥ ६५॥

अभियेचयेत् ततो [ग: ततः] शिष्यं स्वमन्त्र कलशेन तु।

मन्त्रदानन्ततः कृत्वा आज्ञा [ख: आस्व?] च तदनन्तरम्॥ ६६॥

पटंतूरन्तथान्यं वा शास्त्राद्यं संप्रदापयेत्।

लिङ्गं वाथ [ख: वा *?] * लङ्कृत्वा अनुज्ञो वाथ देशिकः॥

६७॥

३१६अ ख] सर्वरूपाश्रयेष्वेवन्दत्वा शिष्यं विसर्जयेत्।

क्षेत्रे यथोचितेन्यैवा स्वगृहे वा राधिकादिकाम् [ग: अधि-] ॥ ६८ ॥

स्वशरीराश्रयं वाथ तालकत्वे नियोजयेत् ।

तथापि स्वस्थ लिङ्गस्य संशया सिद्धिरुच्यते [ख: -रुच्य *?] ॥ ६९ ॥

लिङ्गहीना न सिद्धिः स्यात् साधकानां महेश्वरि । [ख: ?]

विनायकात् प्रवर्तन्ते विनालिङ्गेन सुन्दरि ॥ ७० ॥

तस्मा * ने सि [ख: हि] * * ङ्गं स्वेष्ट सिद्धि समीहकैः ।

परिग्राह्य महाभागे क्रियाथन्तु सलक्षणम् ॥ ७१ ॥

ज्ञानं योगन्तथा चर्यात्रितयन्तु क्रियाश्रितम् ।

व्यज्यते फलरूपेण यथा चेतो [ग: चेतस्] तनौ प्रिये ॥ ७२ ॥

तथा ज्ञानादि बुद्धापि तदा कुर्यात् परिग्रहम्।

सिद्धिमुक्ति प्रसिद्धयर्थं लिङ्गस्यात्मान रक्षणे [ख: रक्ष *?] ॥ ७३ ॥

इति भैरवश्रोतसि [ग: -स्रोतसि] पिचुमते समयाधिकारो नाम पञ्चाशीतिमः [ख: * श्चा-] पटलः ॥

देव्युवाच

लिङ्गार्चन रतां सिद्धिस्त्व योक्तन्तु महेश्वर।

कीदृशं [ख: कीद्द *?] लिङ्गमाख्या [ख: *?ङ्ग-] हि तथा तच्च सलक्षणम्॥ १ ॥

किन्द्रव्यजं प्रकर्तव्यं किं क्षेत्रं वा महेश्वर।

प्रतिष्ठा चललिङ्गानां स्थिरायाञ्च यथा विभो ॥ २ ॥

प्रासाद् लक्षणं नाथ तत्प्रतिष्ठा च मेव द [ग: ?] ।

अधिदेवाश्च मे ब्रूहि उक्तानुक्तञ्च तत्वतः ॥ ३ ॥

पीठा *? लक्षणं सम्यक्तथा स्नानादिको विधिः ।

भैरव उवाच

सर्वाध्वा स्थिति संहारं सृष्टि [ग: सृष्टिः] सत्फल पूर्वकम्

॥ ४ ॥

यस्मात् तत्र स्थितं सर्वं शृजते [ग: सृजते] वलयं नयेत् ।

आलयं सर्वसिद्धीनां तत्वानामधि दैवतः [ग: -तम्] ॥ ५ ॥

लयालय विभागेन तेन लिङ्गं प्रकीर्तितम्।

तच्च व्यक्तं तथा व्यक्तं व्यक्ताव्यक्तं तृतीयकम्॥ ६॥

व्यक्तार्चा चोदिता पूर्वमव्यक्तं लिङ्ग * * *।

३१६ब् ख्) व्यक्ताव्यक्तं महादेवि मुखलिङ्गं प्रकीर्तितम्॥ ७॥

एवं रूपमनालंवि सर्वावयव वर्जितम्।

शैवन्त [ग: शैवन्तद्] द्रव्यते लिङ्गमुखलिङ्गं तथा शिवः
[ग: शिवम्]॥ ८॥

व्याक्ताव्यक्त अरूपेण [ग: स्व-] उभयार्थ [ख: -याथ] प्रदं
भवेत्।

व्याक्ताव्यक्त स्वरूपेण तद्भाव गतचेतसा ॥ ९ ॥

३१९ब् ग्) व्यक्तमन्यत् [ग: -न्यः] पुराप्रोक्तं दिव्यादिविधिना
प्रिये ।

योगपूर्वत्रयं सर्वं [ग: सर्व] प्रददादि [ग: -ति] समर्चितम् ॥
१० ॥

विभागोयं विदेच्छा ततन्त्रभेदोन्त्र भैरवे ।

किन्तु स्यात्रापि युक्तिस्या व्यक्ताद्यां [ग: व्य?क्ता-] च
शृणुष्वमे ॥ ११ ॥

संपूर्णा वयवाहीना मध्यमा वा तथा फलम् ।

भवेत् पूर्णेन सिद्धिश्च किञ्चित् सिद्धिस्तु मध्यमा ॥ १२ ॥

न च मर्त्योः प्रशस्येत कर्तुन्पूर्वाङ्ग [ग: कर्तु-] लक्षणः

[ग: -णम्] ।

तस्माल्लिङ्गं सदाश्रेष्ठमव्यक्ता वयवं प्रिये ॥ १३ ॥

अपूर्णेपि कृते तस्मिं [ग: तस्मिंल्] लक्षणेन विलक्षिते ।

संपूर्णता भवेत् तस्मात् तस्मास्त्रेष्ठतरन्तु [ग: -

च्छ्रेष्ठतरन्तु] तत् ॥ १४ ॥

प्रतिमा वा तु गोभाढ्या [ग: शोभाढ्या] वर्णिताचार्य

सिल्पिभिः [ग: शिल्पि-] ।

नेत्रोन्मीलनके पूर्णे अपूर्णा पूर्णतां व्रजेत् ॥ १५ ॥

मुखलिङ्गस्य सदृशं हृद्देशे लक्षणं भवेत् ।

उभयोपि हि संपूर्णे कृतन्तदपि शस्यते ॥ १६ ॥

महेन्दे [ग: -न्द्रे] मलये सह्ये पारिपाठे [ग: -पात्रे] तथार्बुदे ।

उज्जयन्ते थ श्रीशैले विन्ध्यो दारुणिमानयेत् ॥ १७ ॥

अन्ये वाद्रौ [ख: वा *?] * * भा यन्त्रशिला मृद्विरुगोज्झिता ।

गर्भमण्डल निर्मुक्ता विमलैः परिवर्जिता ॥ १८ ॥

आग्नेय वायु व्योमाख्यैर्विना चाक्षरमण्डलैः ।

तत्र तत्कारयेल्लिङ्गं व्यक्ताव्यक्तं त्रिधा यथा ॥ १९ ॥

स्वेष्टा लोहेथवा कुर्या [ग: कुर्यान्] मृन्मयं [ग:
मृण्मयं] वाथ दारुजम् ।

महाशंखेथ कूर्मे वा उक्तपूर्वेदलेषु च ॥ २० ॥

पूर्वादित [ग: -तः] प्रमाणन्तु स्वमान नवमांशिके ।

तत्र द्वादशमा * * पर्वमानादि लक्षणम् ॥ २१ ॥

र [ख: ?] * * * * * * * यथा [ख: ?] * * *न्तु [ख: ?] कारयेत् ।

अव्यक्ता वयवन्देवि चतुरर्चातुरन्नजा ॥ २२ ॥

भागकाले विनाशस्या [ग: -शः स्याद्] रत्नानां दीप्ति हारिता ।

तस्मात् कुर्यान्नरन्नोत्था प्रतिमा व्यक्तिदूषिका ॥ २३ ॥

आयामार्धाष्ट भागन्तु कृत्वात्यागा [ग: -त्याग] गुणेष्वपि ।

पञ्चाभिश्चतुरस्रन्तु एतन्ते मध्यमं भवेत् ॥ २४ ॥

षट्भिभागैः [ग: षड्-] सुभोगाद्यचतुर्भिः [ख: -गा * *?
तुर्भिः] सुरपूजितम्।

३१७अ ख्) कर्णाद्वाष्टा * * * * सप्तभिर्वा [ख: -भिव्वा]
त्रिमध्यगम् [ग: त्रि?-] ॥ २५ ॥

तथा कर्णार्द्ध सूत्रेण पुनर्भक्तेथ षोडशम्।

अष्टास्त्रगति योगेन सर्वलिङ्गेष्वयं विधिः ॥ २६ ॥

लोकपालार्चितां वाथ साधनार्थन्तु [ख: -नार्थन्तु] कारयेत्
।

मूलाढ्यन्तु षडश्रोर्द्धलिङ्गं [ग: -स्त्रोर्द्धलिङ्गं]
माहेन्द्र उच्यते ॥ २७ ॥

श्लक्ष्णमूलन्तु सप्ता शुमाग्नेयन्तं [गः सु-] विनिर्दिशेत्।

चिपिटं यमलिङ्गन्तु किन्तुतन्तु नवश्रकम् [गः -स्रकम्] ॥ २८ ॥

दशास्रं नैऋतं [गः नैर्ऋतं] लिङ्गं मध्यमूलं
प्रकीर्तितम्।

३२०अ ग्] विनासृभिस्तुयैर्मध्यं लिङ्गतन्तु प्रचेतसः [गः -सम्] ॥
२९॥

प्रदीर्घं वायवं लिङ्गं तन्तुज्ञेयं षडस्रकः [गः -
कम्]।

सौम्यं वृहोदरं कुर्यालिङ्गत्रय [गः -लिङ्गत्रय] विचक्षया
॥ ३० ॥

अनाढ्य मूलं मध्वाढ्यं मूर्ध्नि [गः मूर्ध्नि] स्यात्

सुरगणार्चिते ।

लिङ्गत्रय विभागोत्तृमसृभेद [ग: विभागोत्थ-] विवर्तनैः ॥

३१ ॥

साधनार्थन्तु देवेशे मयालिङ्गाष्टकं स्मृतम् ।

मुखलिङ्गाविधानञ्च [ग: -लिङ्गविधानञ्च]

नवषट्त्रिविभाजते ॥ ३२ ॥

अर्चाभागे प्रकुर्वीत त्यक्त्वा भागत्रयं द्वयम् ।

एकं वादिभवेन्मूर्ध्नि ललाटे नासिकास्यकम् ॥ ३३ ॥

कण्ठं वाहुं प्रकुर्वीत खत्वास्य चतुरङ्गुलम् ।

लिङ्गभाग स्वमानेन तथाग्रीवा च सुव्रते ॥ ३४ ॥

पञ्चोन्नतं चतुःखातमेतत् ते तु चतुर्मुखम्।

द्विभागं शिरसि कृत्वा अर्द्धभागस्तु मस्तकम्॥ ३५॥

त्रिभागूने * भागेन ललाटं तद्वन्नासिकम्।

तदास्यन्तदधोग्रीवा भोगाद्व [ग: भोगार्ध्व] कृतलक्षणे॥

३६॥

भागमात्र विशालेन वक्षेणां शयुतेन तु।

षट्तालना हि योगेन हानिवृद्धिञ्च लक्षयेत्॥ ३७॥

भागमेकं शिरः कुर्याद् व्यर्द्धभागोमुखं भवेत्।

भागार्धादौ धृतौग्रीवा सप्ततालार्द्ध नाभकृत्॥ ३८॥

मूर्ध्नदेशं प्रशान्नास्यं मुखलिङ्गं त्रिधास्मृतम्।

पूर्वं विपुलगंभीरदक्षिणं भैरवन्तथा ॥ ३९ ॥

पीनास्यं सुप्रसन्नञ्च उत्तरन्तु प्रकल्पयेत्।

विनास्य त्यमुखं [ग: त्रिमुखं] तद्वदेकवक्त्रन्तु पूर्ववत्॥

४० ॥

प्रतिमालक्षणं पूर्वकथितं पीठिका [ग: पीडिका] शृणु।

विकारा श्रीकृतापीठा भागभाग प्रवेशना ॥ ४१ ॥

एकतुर्य त्रिभागैक [ग: -कं] स्वोच्छ्रयाच्च त्रिभिः पुनः।

कण्ठान्त निर्गतं कुर्याद् भागभागावधिं यथा ॥ ४२ ॥

पादादि समसूत्रेण भवेत् पीठं सुशोभनम्।

३१७ब् ख्) मेखलाभिस्तथान्यानि संख्यया प्रवदामिते ॥ ४३ ॥

एत देवं यदा पीठं वृत्तकुंभं मजङ्घकम्।

कृत्वापद्म दलच्छन्नमूर्द्धभागैक वर्जनात्॥ ४४ ॥

कृतवृत्त त्रिभागेन तच्चोर्ध्व च्छदकल्पितम्।

पद्मोयं वज्रिणी ज्ञेया अधोर्द्ध पुटकल्पिता ॥ ४५ ॥

चतुरश्रा [गः -स्र] समापृष्ठी यक्षी चापि त्रिमेखला।

पूर्वेव मेखलायुक्ता चर्तुलापूर्णमण्डला ॥ ४६ ॥

चतुरश्रा [ग: -स्रा] त्रिभागेन भागैके सुशिरं [ग: षु-] भवेत्।

भागद्वयाष्टधा भज्यतत्रैकं [ग: -क] तन्त्र [ग: तु *]
मेखला ॥ ४७ ॥

जलधारस्तथा षड्भिप्रोन्नतोश्वभ्रगोचरे।

अर्चायाम प्रणालं [ग: प्रणा *?] स्याचतु [ग: स्याच्चतु]
दृतुतशांशकम्॥ ४८ ॥

३२०ब् ग्] कृत्वाभागैकमानेन प्रदीर्घं ह्रासयेत् क्रमात्।

लिङ्गं दैर्घ्या [ग: दैर्घ्यात्] षडंशेन वाहल्या तु
जलाश्रयम्॥ ४९ ॥

तत्रभागाद् भवेद् [ग: भवेत्] खातं सर्वपीठेश्वयं [ग: -
पीठेष्वयं] विधिः।

अकारभेद तोन्यांश्च प्रोच्यन्ते ते जलाश्रयम्॥ ५० ॥

चतुरस्त्र त्रिभागन्तु तत्रैकन्तु विवर्द्धयेत्।

प्राच्यान्तन्मानः [गः -न] सूत्रन्तु ब्रह्मस्थानान्तु यक्षयोः

॥ ५१ ॥

एवा प्यस्थाङ्कयेद् वेधा त्र्यग्रं सूत्रत्रयान्वितम्।

चतुरस्त्रे तु यद्यास्यं वर्णसूत्रैस्तदङ्कयेत्॥ ५२ ॥

खण्डद्वयन्तु तन्मध्या [गः तन्मध्यात्] कोणतुल्यन्तु

भ्रामयेत्।

कोणात् कोणन्तु मध्यस्थं कृत्वाभाग चतुष्टयम्॥ ५३ ॥

समसं [ग: समस्तं] तस्यभागैक मग्रे योज्या त्रिधापुनः ।

कृत्वाक्षेत्र त्रिभागन्तु तद्भागार्द्धन्त सूत्रतः ॥ ५४ ॥

कृत्वो भाभ्यान्तु विक्षेपन्तस्थं सूत्रद्वयं भवेत् ।

तदग्रेर्चा वदुत्मानन [ग: वदुन्-] तद्भासात् प्रपालकः [ग: -
कम्] ॥ ५५ ॥

आग्नेयीयं समाख्याता याम्याचापा कृतिर्भवेत् ।

अष्टभागकृतं क्षेत्रं भागाम्भागान्तथोभयोः [ग:
भागभागान्-] ॥ ५६ ॥

पार्श्वयोः संपरित्यज्य भ्ववेच्चापा कृती तु ।

सरावाग्रे [ग: शन-] प्रणालन्तु पूर्ववद्धास [ख: पूर्वव *

*?] संख्यया [ख: * *?या] ॥ ५७ ॥

कर्णाच्च पूर्वतोन्यस्य तंत्रिभागाङ्भ्रमात् पुनः ।

वृत्तैषा तु यत् प्रणालं कर्तव्यं पूर्ववद् यथा ॥ ५८ ॥

त्रिकोणाद्वितयं [ग: त्रिकोण-] कृत्वा किन्तु षट्भागभाजितम् [ग: षड्-] ।

पूर्वास्य निर्गमस्थन्तु कृत्वाहस्तन्त [ग: -हसन्तु] कल्पयेत् ॥ ५९ ॥

मत्स्य तुर्यविभागेन षट्कोणेषा [ग: षट्कोणैषा] प्रकीर्तिता ।

उपकोणस्थ निष्कासः युक्तापूर्व प्रणालकम् [ख: * *?लकं] ॥ ६० ॥

३१८अ ख्) वाह्यपत्र कृतारम्या वृत्तामेखल वाह्यतः।

निष्कास योजितारम्या पद्मासा पद्मपिठिका ॥ ६१ ॥

भागद्वादशकं क्षेत्रं भागैकं परिवर्जनात्।

कर्णसूत्रा [ग: -सूत्र] समान्येपि दिकोणाष्टां [ग:
दिक्कोणाष्टा] श्रिता स्मृता ॥ ६२ ॥

लोकेशार्चित लिङ्गानां कथिता जलधारिका।

भिन्नकर्मविभागेपि भिन्नपीठ जलाश्रयात् ॥ ६३ ॥

कर्तव्यास्तु शिरांस्येतां वेद्मिसं [ख: ?] * पतो यथा।

उदयो वसुवं कृत्वा तदन्ते द्वौतदर्धतः ॥ ६४ ॥

कृत्वार्द्ध भाग [ग: भागं] व्यर्द्धाच्च द्विभागा
तुर्यधा प्रिये ।

छत्राकारं समाख्यातं ऋतुभागविवर्जिते ॥ ६५ ॥

भागद्वयार्द्ध संयोगात्त्र पुषीकृतिकं भवेत् ।

तुर्याच्चा भाजितं कृत्वाभागद्वय विवर्जनात् ॥ ६६ ॥

कुर्कुटाण्डं [ग: कुक्कुटाण्डं] त्रिभागाच्च अन्तिमं [ग:
अन्तिम] द्वयवर्जिता ।

बालेन्दु कथितं ह्येवं मस्तकं वीरवन्दिते ॥ ६७ ॥

पञ्चभाग विभेदेन त्रिभागा [ग: -गान्] मध्यसंस्थितः ।

३२१अ ग्] भागद्वय परित्यागाद् भवते खड्गमस्तकम् ॥ ६८ ॥

सप्तभागान्तिमं त्यागा [ग: –गान्] मध्येच्चा

शक्तिसंज्ञकम्।

नवधा भाजिते मूर्द्धिर्न भवेद्दण्ड त्रिभिर्विना ॥ ६९ ॥

तथैकादशभागाच्च प्रोक्तं सर्पशिरं त्रिभिः।

वतितैर्दशभागै तु [ग: –गैस्तु] षड्भिश्च ध्वजमस्तकम्॥ ७०

॥

भागद्वादशके नैव भागत्रयविवर्जनात्।

गदा शिरस्तु कथितं भाग [ग: भागः] पञ्चदशेन तु ॥ ७१ ॥

तुर्यभाग परित्यागाद् भवते शूलमस्तकम्।

ओतप्रोत विभागेन मिश्रकर्माणि कारयेत्॥ ७२॥

त्रिधाभज्यार्च भागन्तु द्विभाग [ग: -गे] लंवयेद्वयम्।

सुत्रार्द्धा पक्षसूत्रन्तु भ्रामयेत् समलक्षणौ॥ ७३॥

तत्सूत्रं तुर्यधा कृत्वा अधोभागैक वर्जनात्।

सङ्गमन्तु तयोः पृष्ठे अतोन्यन्तु निवोधमे॥ ७४॥

दशभागी कृतायार्चा षड्भागात् सूत्रलंवनम्।

भागत्रयोर्द्धतो भ्राम्य पक्षसूत्रौ तु पृष्ठतः॥ ७५॥

भागैकं वर्जनाह्येवमेकरेखा तथापि वा।

गज पक्षशिरं कुर्याल्लंवसूत्रद्वयो यथा॥ ७६॥

खड्ग्वा [ग: शंखा] कृतिशिरं कृत्वारेखाधो [ग: -ध] अथ तस्य वै ।

अर्धसूत्रा त्रिभागान्तु मध्यसूत्रा परिभ्रमम् ॥ ७७ ॥

द्विभागं भागपृष्ठन्तु लक्षणन्तु यथा कृतिम् ।

द्विभागाल्लंवसूत्रौ तु तदर्द्धस्तु विकारवत् ॥ ७८ ॥

३१८ब् ख्) उभयोः पक्षयोः कुर्यात् समार्द्धचतुरश्रकम् [ग: -स्रकम्] ।

तत्कोणा सृविभागेन सूत्रं [ग: सूत्र] भागैः क्रमान्नयेत् ॥ ७९ ॥

शरन्तुर्य गुणापक्षसंख्यया याव [ग: यावत्] पृष्ठकम् ।

भागद्वयोर्द्धतो योगं तयोः [ग: तयोत्] कुर्यात् [ग: कुर्यान्] महामतिः ॥ ८० ॥

एवान्यरूपकं वापिसामान्यं वाथ कारयेत् ।

लक्षणं मण्डपं तस्मि [ग: तस्मिन्] स्नानाख्यै [ग: -ख्ये] च विचक्षणः ॥ ८१ ॥

वाणलिङ्गमथैवं वा सर्वलक्षणसंयुतम् ।

चललिङ्गं प्रकुर्वीत त्रिभागारोपिताधतः ॥ ८२ ॥

अर्चाद्विधोच्छ्रयः पीठे परिणाह सुविस्तरम् ।

रैत्यादि लोहजा सिद्धयैः स्फटिकं सर्वकामदः [ग: -दम्] ॥ ८३ ॥

रत्नजञ्च तथा देवि सर्वकामात् प्रयच्छति ।

दारवं मौक्तिकं वाथ यथा सिद्धयै [ग: सिद्धयैः]

प्रकल्पयेत् ॥ ८४ ॥

प्रतिमा वा यथेच्छातलोहादर्चादिनिर्मिता ।

अङ्गुष्ठ पर्वादारभ्य महाप्रतिमयावधि [ग: -धिः] ॥ ८५ ॥

साधनार्थं प्रकुर्वीत रौद्रलिङ्गमथापि वा ।

हस्तादधस्तलिङ्गानि [ग: -दधस्तल्लिङ्गानि] सर्ववृत्तानि भैरवि

॥ ८६ ॥

त्रिभागारोपणं [ग: त्रिभागाद्-] तेषां पीठमर्चा

विधावहि ।

गुहागुह्य प्रदेशेषु स्थाप्यान्तां लक्षणान्विताम्॥ ८७॥

स्वमंत्र साधने श्रेष्ठान्नेष्टां सर्वत्र भैरवि।

असृसाधन वृत्तञ्च प्रोक्तं स्याद् ब्रह्मयामले॥ ८८॥

३२१ब् ग्) मंत्रकल्प विधानन्तु संक्षिप्त तरलक्षणम्।

सुनक्षत्र दिनेयोगे ताराचन्द्रवलात्मके॥ ८९॥

ग [खः ?] * * * दि [खः ?] देशन्तु द्रव्य ग्रहणमाचरेत्।

अधिवास्य स्वमन्त्रैस्तु वृक्षोवाथ शिलाथवा॥ ९०॥

उत्पाट्याच्छेदयेद् वाथ वाम तुल्यदिगास्यकम्।

शिलोत्तरे शिलाया तु तथेशे वान्यथा पुनः ॥ ९१ ॥

साधने तु प्रशश्येत [ग: -स्येत] वृक्षाधस्ताशिरो [ग: -च्छिरो] भवेत् ।

अधोमुखं शिलाया तु तद्विसा यान्यथा यदा ॥ ९२ ॥

यागोद्वय * * * नाश्रेष्ठं दिशाशि [ख: ?] * * * ।

* * * * * * प्रासादं यदास्या स्थिरकल्पना ॥ ९३ ॥

वास्तुं कृत्वा तु तत्मानालिङ्गं [ग: तन्-] कार्यं विपश्चितैः ।

तदेकाशीति संख्यातं अष्टाष्टक युतोपि वा ॥ ९४ ॥

मध्ये चतुर्णवो ब्रह्मा आपोतद्वत्समेव [ग: आपस्तद्वत्-] च ।

यदार्द्ध द्विपदो ज्ञेयो [ग: ज्ञेया] षट्त्रिभिश्च मरीचिक ॥ ९५ ॥

सावित्र्यः सविता तद्वद्विवस्वा च [ग: -स्वांश्च] तथा पुनः ।

३१९अ ख्) इन्द्र इन्द्र जयोमित्रराज [ख: -मित्र * *] * * * * * * ॥ ९६ ॥

धिरञ्च [ख: ?] दिक्संस्थं विदिक्संस्थ प्रमाणतः ।

दिगीशोथान्तरिक्षोर्मि पितृद्यौ वारिकस्तथा ॥ ९७ ॥

रोगवायुरिति द्वे द्वे पदार्द्धाष्टाष्टक [ग: -का] श्रिता ।

पर्जन्य भृषपूषा [ग: भृश-] च मृगो [ग: मृगः]
सुग्रीवशोषकः ॥ ९८ ॥

नागादिति सुविज्ञेया पादैके संव्यवस्थिता ।

शेषाद् विपादिका ज्ञेया तथान्ये पादिकाः क्रमात्॥ ९९॥

इ * * वतु पर्जन्यजयो माहेन्द्रमेव च।

आदित्य सत्य भृषकश्चान्तरिक्षश्च पावकः॥ १००॥

पूषा वितथ [ग: वि *?थ] नामा च गृहक्षतन्यमस्तथा [ग: -क्षतयमस्तथा]।

भृङ्गराज मृगश्चैव पितृद्वौ [ख: ?] वारिकश्चयः [ख: *?रि-]॥ १०१॥

सुग्रीव [ग: -वः] पुष्पदन्तश्च वरुणश्चा सुरस्तथा।

शोषरोगे [ग: -गो] रुणोनागारेख्याभल्लाट [ग: -ख्योभल्लाठ] सोमकः॥ १०२॥

रिगिश्चदितिमेवोक्तदितिश्च पदभोक्तृणः ।

चरकी विदारिका पापराक्षसी [ख: * परा-] पूतनावहि ॥ १०३ ॥

कोणगान्तपदं ह्येतां केवलां स्थानचोदना ।

नैऋतेश [ग: नैऋर्तेश] गतारेखा तथा वह्निरणागता ॥ १०४ ॥

षट्पदा त्रिपदाशेषारज्जु वस्तु वरानने ।

फलं स्वस्तिक पादेन संपुटार्द्धेन वा भवेत् ॥ १०५ ॥

वंश रज्ज [ग: रज्यु?] विभागेन स्वस्तिकं पदमध्यगम् ।

चरका विदारिका पापराक्षसी पूतना वहि ॥ १०६ ॥

कोणगान्त पदं ह्येतां [ग: ह्येता] केवलं स्थान चोदना ।

नैरितेशगतारेखा [ग: नैर्ऋतेश-] तथा वह्निरणागता ॥ १०७ ॥

षट्पदा त्रिपदाशेषारज्जुवस्तु वरानने ।

३२२अ ग्) फलं स्वस्तिक पादेन संपुटार्धेन वा भवेत् ॥ १०८ ॥

वंसरज्जु विभागेन स्वस्तिकं पदमध्यगम् ।

रज्जुमर्माभ्यां नाडीभ्यां नाडीभ्यां यच्च

संङ्गमम् ॥ १०९ ॥

पद्ममष्टभि षट्वज्रं त्रिशूलं कोणगं त्रिभिः ।

त्रिकटं त्रिभिरन्यत्रं [ग: -त्र] पञ्चभिर्मनि [ग: -णि]

बन्धकम् ॥ ११० ॥

पदमर्मं विशुद्धं यत्पदमध्ये पदन्तु तत्।

देवताश्च तथामर्म मध्यं मध्याद् विवर्जयेत्॥ १११॥

तदीशान्यां न्यसेत् [ग: -सेन्] मध्यंस्तत्रपातविलक्षितम् [ग:
[ग: मन्ध्यं-]।

पदस्य कुड्यमध्यस्य स्तंभस्या न्यस्य वा प्रिये॥ ११२॥

एवं संत्यज्य वर्णेत मंत्री प्रासादमुत्तमम्।

मेकाद्विकं यदिष्टंस्या स्थिराणां साधनं विना॥ ११३॥

साधने स्वेष्टमंत्राणां यदभीष्टं स्रुतागमे [ग: श्रु-]
।

देवीनां रासमार्गे तु कुर्या [ग: कुर्याद्] दिग्भद्र

संज्ञकम् ॥ ११४ ॥

३१९ब् ख्) नेष्टान्यं विघ्नदं यस्मात् तस्मान्यं
नान्यकल्पना ।

पंक्तिमागे [ग: -मार्गे] च वलभी भवन्त्येकमुखा पदा ॥
११५ ॥

रासमार्गेण शेषास्तु दृष्टिमेलापकान्विता ।

चतुर्विंशतिभिर्भागैः [ग: -गैश्] चतुरस्त्री कृतं यदा ॥ ११६ ॥

मध्ये चतुभिरथकं [ग: चतुर्-] द्विभिश्चोपथकं भवेत् ।

भागेनैकेन तस्यान्ते भागभाग प्रवेशना ॥ ११७ ॥

रथकेव स्मृता पिण्डी प्रसादोयं दिगाह्वयः ।

सिंहकर्णैश्चरथके कोणैः खिंखिरिकैस्सुभैः [ग: -कैः
शुभैः] ॥ ११८ ॥

गवाक्षत्रितयोत्पन्नं द्वारैक कृतशोभकम् ।

कटोरककृतं मध्येछादन त्रयसंवृतम् ॥ ११९ ॥

ऊद्ध्वर्स्थं वृत्तघण्ठाया दिग्भद्रं नामकीर्तितः [ग: -
तम्] ।

एकमुत्तवा न चान्यस्मिन् प्रासादे विहितार्चनम् ॥ १२० ॥

स्थिराणान्तु तथान्येषां गृहादिषु गुहास्त्रयम् [ग: -श्रयम्] ।

प्रविष्टा [ग: प्रविष्टाः] षड्भिभूताया वलन्यां
सशुभामता ॥ १२१ ॥

अन्यथा वातदा विघ्नं सुतभार्यार्थ नाशनैः ।

लिङ्गार्चनन्तथा कुर्यात् सामान्यं यत्र रोचते [खः ?] ॥ १२२ ॥

स्वमन्त्रैः साधक [गः -कं] कुर्याल्लिङ्गस्थापनमुत्तमम् ।

प्रतिमा वा यथा पूर्वं तथा वात्रोत्रिरेहिता ॥ १२३ ॥

न्यासश्च लिङ्गमूर्तौ वा चले साधकपुङ्गवाम् ।

स्थिरो [गः -रः] सामान्य यागन्तु [गः -स्तु] मूलतन्त्रोदितं [गः -तन्त्रादितं] न्यसेत् ॥ १२४ ॥

क्रियापीठं शिवोज्ञानं [गः शिवेज्ञानम्] उभाम्यां
यागयोजनाम् ।

विवेच्यवाचकं ह्येतत् प्रतिष्ठा विश्वसन्निधौ ॥१२५॥

रत्नादिकं शिलावेदी मण्डपादि प्रवेशनम्।

स्वमन्त्र हृदिना सर्वं यत्रान्यच्च समाचरेत्॥ १२६॥

गर्भमण्डलहीनं यच्छुभं [ग: -तं] ज्ञात्वा
प्रतिष्ठितः [ग: -तम्]।

अन्यथा विघ्नदं प्रोक्तं विफलं मृत्युसाधनम्॥ १२७॥

जीर्णोद्धारादिकं सर्वं लिङ्गं प्रासादिगं प्रिये।

अस्त्र [ख: ?] * द्धं प्रकुर्वीत अन्यलिङ्गं समाश्रयः [ग: -
यम्] ॥ १२८॥

३२२ब् ग्] गोसकृत् पञ्चगव्येन मृदा सर्वौषधादिभिः [ग:

सर्वौ-] ।

स्नाप्यलिङ्गन्तु सामान्यं स्वयं भाव्यं समास्नयेत् [ग: -
श्रयेत्] ॥ १२९ ॥

चल लिङ्गं पृथक्पीठं सपीठं विंवनिर्मितः [ग: -तम्] ।

ज्ञानक्रिया विभागेन स्थाप्यस्थैर्य विवर्जितम् ॥ १३० ॥

तंत्रीपीठ स्थितं वापि पुष्पान्तर क्रियान्तरः [ग: -रम्] ।

कृत्वासनं प्रतिष्ठाप्य कृत्वाधारं सु * * हम् ॥ १३१ ॥

३२०अ ख्] एवेष्ट मंत्रसामान्यै [ग: -न्यैः] कृतं
वान्यैर्यदा तु तम् ।

सा लक्षणन्तु संप्राप्तं उपहृत्यन्तु चाध्वरम् ॥ १३२ ॥

शिवं योज्य ततोस्त्रेण शोध्यस्नाप्य प्रतिष्ठयेत्।

दारुशैलमयं युक्त्वा एवं कुर्यात्मको विधिः ॥ १३३ ॥

षट्वंश [गः षड्विंश] तत्व योगेन तन्तथेश्वर देवतम्।

प्रासादास्तु ध्वजं शक्तिध्यात्वा देवं प्रतिष्ठयेत्॥ १३४ ॥

एवै तन्त्रविधानं हि सम्यग्लिङ्गात्मकं स्मृतम्।

विनायेन विसद्धयन्ते [खः * *? ध्यन्ते] साधकात्

साधनोक्छुका [गः -त्सुका] ॥ १३५ ॥

इति पिचुमते लिङ्गलक्षणाधिकारो नाम षडाशीतिमः [गः

षड-] पटलः ॥

भैरव उवाच

अतः परं प्रवक्ष्यामि ज्ञानमुष्टिमनुत्तमम् ।

नाम्नाचोत्तर तन्त्रे तु दध्नाघृतमिवोद्धृतम् [गः दध्ना-] ॥ १
॥

मधुवच्च यथा पुष्पं सारात्सारमिदं शुभम् ।

अप्रकाश्यमिदं देवि गोपनीयं प्रयत्नतः ॥ २ ॥

नादाख्य [गः -ख्यं] य [खः ?] रं वीजं सर्वभूतेष्व
वस्थितम् ।

स्थूलं सूक्ष्मं परं देवि ज्ञात्वा सिद्धिः प्रवर्तते ॥ ३ ॥

शव्दमात्रं स्मृतं सूक्ष्मं स्थूल चिन्ता विनिर्मितम् ।

परं यच्चित् तयाहीनं निष्कलं परमेश्वरम्॥ ४ ॥

स्फोटादिराव निर्मुक्तं कंठतालुव्य वर्जितम्।

प्रयत्नोच्चार निर्मुक्तं स्वतोयं तत्वताङ्गतम्॥ ५॥

स्थूलन्तन्तु मयाज्ञानं जायते गुरुदर्शितम्।

प्रत्यक्षे तत् स्थितं यस्माच्छ्रूयते गुरुभाषया॥ ६॥

दृष्टस्थानं महादेवि नादाख्यन्तेन शव्दितम्।

स्थूलन्तु प्रोच्यते देवि शिवं तद्यन्त्र वाहकम्॥ ७॥

शव्दाष्टक सुसन्त्यागा वियोगात् तत्व संघते [ग: संष्यते]।

गुणाद्गुणान्तरे विद्धिसूक्ष्मत्वं परमेष्ठिनः ॥ ८ ॥

आदित्यन्तु रजं विन्द्यात् सोमं सत्वमुदाहृतम् ।

तमोग्नौ मण्डले देवि तदन्ते त्रितयं स्मृतम् ॥ ९ ॥

ज्योतिरूपन्तु यच्चान्यं पञ्चमं परिकीर्तितम् ।

गुणं भेदसमस्तं यत् तद्विन्द्यान्तु सदान्वितम् ॥ १० ॥

ज्योतिमध्ये तथा चेता ज्ञेया सोपि गुणाश्रयी ।

तस्था शक्तिरनन्ताद्या या शिवाकारणेश्वरी ॥ ११ ॥

भोगभोक्तृत्व कारित्वे तस्थश्चापि शिवस्थितः ।

चिच्छक्ति कृतसारष्यः [ग: -रथ्य] कारणोस्तित्व लक्षणे ॥ १२ ॥

विनातेन स्वतन्त्रात्मा सुखैकरसिको भवेत् ।

३२३अ ग्) परतन्त्रत्व वृत्तित्वान्ते नान्त्रोक्तः शिवः प्रभुः ॥१३ ॥

३२०ब् ख्) एवं तत्वात्मना देहे सूक्ष्मत्वन्तु यथा शृणु ।

पञ्चभूतमये यन्त्रे अशेषाध्वकृताम्पदे [ग: -कृतास्पदे] ॥
१४ ॥

प्रवाहकारणं यस्मात् सदादेह प्रपूरणम् ।

प्रवाहवायु भावैश्च यस्मात् सर्वत्र दृश्यते ॥ १५ ॥

यन्त्र वाहोयतो नात्र स्थूलोव्यक्तोपि भैरवि ।

शव्दमात्र प्रसिद्धेन व्यक्तिरूपेण चोच्यते ॥ १६ ॥

शव्दो व्योमात्मकः प्रोक्तः सचाधारत्व संस्थया ।

अतः प्रोक्तो विवेकेन विकारेणात्मना प्रिये ॥ १७ ॥

नाडी संकोच मोक्षैश्च हंसति [गः हंसेति] गति योजना ।

संवित्तिस्तु द्वितीयासौ नाडी सन्दर्शदर्शनात् ॥ १८ ॥

ध्वनिः शदात्मको योहि तस्थस्यासौ स्वभावता ।

रतिस्या ह्लादवृत्तेन रशश्चासौ [गः रसश्चासौ] विभावयेत् ॥ १९ ॥

रूपं हंसात्मकः शव्दः शव्दादीनां यदैकता ।

आमोदोसौ तु गन्धाख्यः सुगन्धस्यापि भैरवि ॥ २० ॥

विवेको यत्र वाहित्वेनाती [ग: -ति] ग्रहणमोचने ।

स्मृतो यो व्यवसायस्य साधीयेति वरानने ॥ २१ ॥

अहं सेति चितो भोग्य [ग: भोग्ये] योजयामीति निश्चितम् ।

अहं कर्तात्वशेषस्य जगतोस्य विभुस्तथा ॥ २२ ॥

अहं यः परमोलोके आत्मा देहभृतां प्रभुः ।

सेति पूर्वार्थ निर्देशः सोहङ्कारात्मकोत्र तु ॥ २३ ॥

अयमात्मान्नयं [ग: अयमात्मा अयं] प्राणः कार्यै तन्तु
क्रिया तथा ।

कारणत्व विकल्पेन गतिरागति लक्षणा ॥ २४ ॥

विभागानेक संकल्पात् [ग: -ल्पान्] मनोरूप [ग: -पं]
तदात्मनः ।

निर्जीवैतन्तु [ग: -वैस्तन्तु] शक्तं स्याद् यस्मा [ग: यस्मात्]
स्याच्चेतनाष्टकं ॥ २५ ॥

योत्र सर्वगुणं भोगीसोन्मा सिद्धस्तु भैरवि ।

कर्तव्ये शब्दरूपादि विदन्ते या प्रभासते ॥ २६ ॥

स्वसामर्थ्यान्तु सा शक्ति अन्यथा न सुखेतरम् ।

शक्त्यात्म भोक्तृ वृत्तञ्च हितशक्तिविना प्रिये ॥ २७ ॥

शक्तिरात्मामनोद्यास्तु शब्दाद्यानोश्चतेप्परा [ख: -नो * * *
*?] ।

तेना सौ विश्ववृत्तित्वाच्छिवो चैव [ग: -वश्चैव] वरानने ॥ २८ ॥

एवमेकादशैतानि कारणानि तदात्मनः ।

तत्स्वरूप क्रमः [ग: क्रमस्] त्यागात् सूक्ष्मं [ग: सूक्ष्म]
रूपं विभावयेत् ॥ २९ ॥

सूर्यो ब्राह्मः [ग: ब्राह्मो] हरिः सोमोरुद्रोग्नौ
चेश्वरोंभसः ।

ज्योति [ग: ज्योतिः] स्थितो [ग: स्थितः] सदानाथ आत्मा
पञ्चात्मकोत्र तु ॥ ३० ॥

तस्था शक्तिः शिवश्चापि एवमेव हृदिस्थितम् ।

क्रमात् परित्यजेच्छव्दाद्या [ख: ?] वस्याच्छिवतां [ख: ?]

गतः ॥ ३१ ॥

३२१अ ख्) शव्द स्पर्शो तु सूर्यस्थो रसेत्रै रूपकत्वकम्।

वह्नौधियाभिमानञ्च त्यजेदंभो निधौ प्रिये ॥ ३२ ॥

मना [ग: मनस्] तत्वन्तु तज्यो तौ एवात्मा [ग: *?वात्मा] केवलं भवेत्।

३२३ब् ग्) आत्मस्थिता तु व्यापारा इच्छाभिक्तृत्व सत्क्रिया ॥ ३३ ॥

त्यजेतस्थं निजे भावो ज्ञानरूपो भवेत् तदा।

तज्ञानं [ग: तज्ज्ञानं] चित्समानत्वे यावत् ताव [ग: तावद्] विवेचिका [ग: वि * * *?] ॥ ३४ ॥

वेद्यवेदन रूपस्य वासना ज्ञान यत्कृधा [ग: -क्रुधा]।

वेदको [ख: ?] ज्ञानता [ग: * *?ता] पन्नोस्तज्ञानं [ग:
पन्नस्तज्ज्ञान] ज्ञेयताङ्गतम्॥ ३५॥

ज्ञानाज्ञानञ्च संत्यज्य लयोसौ निष्कला भवेत्।

गुणागुणान्तरात् सूक्ष्मा एवं स्यत् तु परान्तगम्॥ ३६॥

याव [ग: यावद्] भविं स्मृता चिन्ता तद्विना चिन्तवर्जितः।

नगुणो नैव सन्त्यागो नात्माशक्तिशिवस्तथा॥ ३७॥

सर्वत्र समभावेन गतिरागति वर्जनात्।

तस्थान्यस्थ विवेकेन विनासौ परमोभवेत्॥ ३८॥

पराद्वैत विभागेस्थ भावाभावात्म वृत्तिना।

सकलो निष्कलः प्रोक्तो देवदेवो नवात्मनः ॥ ३९ ॥

एतद् बीजं समाख्यातं सर्वमंत्र प्रसाधकम् ।

मन्त्रमेकन्तु नादाख्यं स्मरणा [गः -णात्] स्मरणोच्यते ॥ ४०
॥

किमन्यैर्वहुभिर्देवि विभागैस्तु मलात्मकैः ।

ज्ञात्वा नादेश्वरन्देवं त्यजेत् सर्वं पलालवत् ॥ ४१ ॥

एतत् ते तन्त्र सर्वस्वं ज्ञानमुष्टिं वरानने ।

आलव्ध्वातेन पशवः शिवं यान्ति अनामयम् ॥ ४२ ॥

किमन्यैर्वहुभिर्वीजैश्चित्तव्या कुलकारकैः ।

वीजेनैकेन तत्सर्वं [ग: -र्व] बहुदाफलदायकम्॥ ४३॥

प्रयोगेन [ग: -ण] तु सूक्ष्मेण योगदृष्टेन मन्त्रवित्।

मुद्रामन्त्र प्रयोगैश्च स्वध्यानाद् दीपितं द्रुतः [ग:
द्रुतम्] ॥ ४४॥

प्रयच्छति महासिद्धिविधिना [ग: -सिद्धिर्विधिना] साधकस्य तु।

नात्त्यन्त योजितन्तेन सर्वकर्मकरं नृणाम्॥ ४५॥

वश्याकर्षणमावेश विद्वेषोच्चाटमारणम्।

स्तंभनं मोहनञ्चैव यण्ढी करणमेव च॥ ४६॥

शोषणञ्चैव [ख: -चेव] वृक्षाणां नदीनदसमुद्रगाम्।

वृक्षपुष्प फलाकर्षकुपितस्य प्रसासनम् [ग: प्रशा-] ॥ ४७ ॥

एवमाद्यञ्च यत्किञ्चित् सर्वङ्कुर्वति [ग: -कुर्वन्ति] योजितम् ।

स्मरणेन समायुक्तं हृच्चक्रे संव्यवस्थितः [ग: -तम्] ॥ ४८ ॥

स एष प्राणिनां प्राणः स एष परमाक्षरः [ग: -रम्] ।

शिवतत्वं स एवात्रं [ग: -त्र] आत्मा चैव निगद्यते ॥ ४९ ॥

३२१ब् ख्) अस्मिन् मन्त्रात् समुद्भूताः [ग: -ता] ये केचित्
प्रथिताभुवि ।

शास्त्राणि च विचित्राणि [ख: -त्रा *?] वेदात् [ख: ?] सिद्धयन्तमेव
[ग: * * *?मेव] च ॥ ५० ॥

योगशास्त्राणि [ख: योग * * *?] चान्यानि [ख: ?] सर्वमावृत्त्य
[ग: सर्वमा * *?] तिष्ठति ।

न च तेन विना सिद्धिरिह लोके परत्र च ॥ ५१ ॥

यदा चोश्वसते देवो [ग: देवस्] तदा रुत्यन्ति [ग: रुत्त्यन्ति] देवताम्
।

यदा निश्वसते देवो [ग: देवस्] तदा संहारमेव च ॥ ५२ ॥

निष्कले तु परेस्थाने गुणप्रकृति वर्जिते ।

३२४अ ग्] गुणालंकाकर संपन्ने [ग: -न्न] अगुणस्के निरामये ॥
५३ ॥

उत्पत्तिरेषा देवीनां योनिरेषा प्रकीर्तिताः ।

ब्रह्मविष्णु महेशानां सदानादादिशक्तयः ॥ ५४ ॥ [ख: ?]

आत्माश्रयास्तथोत्पन्नाः [ख: * * * * * *?पन्नाः]

स्वमण्डलविवेचिता ।

एष एव लय [ग: लयः] प्रोक्तो [ग: प्रोक्ताः] सर्वेषां प्राणिनां

तथा ॥ ५५ ॥

अविदित्वा तु तां योनिं यः सिद्धिमभिवाञ्छति ।

मूढवुद्धिदुरात्मा [ग: -युद्धिदु-] सौ हनते मुष्टिना नभः ॥

५६ ॥

यद्योनि संभवा मन्त्रादेवास्तत्वास्तु भैरवि ।

त स्थान जातिसंयुक्ता गुणाकार समन्विताः ॥ ५७ ॥

शिवसन्तान मुक्तास्तु सिध्यन्ते [ख: ?] लीलया नृणाम् ।

स्मरणेन समायुक्ता उत्पन्नास्तत्र देवताः ॥ ५८ ॥

प्रणवासनमारूढा दिप्यमाना स्वतेजसा ।

शिवशक्तिस्तथा नादविन्दु [ग: विन्दुश्] चेन्द्रश्च भैरवि ॥ ५९ ॥

तिर्यग् रेखा तथा विन्दु कुटिलान्य [ग: -न्यत्] प्रकीर्तिता ।

एवाष्टधा स्मृतो देव्यो दूत्यश्च क्रमलक्षणा ॥ ६० ॥

समस्ते तु स्थिते देवो भैरवो वीरवन्दिते ।

स्वक्षेत्रेस्व ऋतुं प्राप्यमलमाया च कर्मकम् ॥ ६१ ॥

दृष्ट्वाचितां स्वभावेन पुंसानुग्रहकेण [ग: -केन] तु ।

तत्कारणान्विता सृष्ति [ग: सृष्तिस्] तस्मा [ग: तस्माद्] विभज्यते यतः ॥ ६२ ॥

सर्वात्मा च यथात्मस्था [ग: -स्थस्] तेनायं प्रणव [ग: -वः] स्मृतः ।

स्मृतिज्ञानं शिवाद्यस्य जगत्यस्मिन्विवेचकम् [ख: - ववेचकं] ॥ ६३ ॥

सर्वात्माक्षर वृत्तिस्थं तेनायं स्मरण स्थितः ।

व्याप्तिः प्रणवयोगेन यो यो वर्णस्तु भैरवि ॥ ६४ ॥

त्रिधातत्व स्वरूपस्थः [ग: -स्थ] स [ग: सः] स [ग: सः] स्मरण उच्यते ।

एवं तत्वगतो देव्यः सर्वाध्व विहितास्पदा ॥ ६५ ॥

समुत्पन्ना महादेवि सर्वसिद्धयर्थदायिकाः।

तासां मध्यस्थितो देवः कपालभरणोज्वलः [ग:
कपालाभरणोज्ज्वलः] ॥ ६६ ॥

काद्यखट्वाङ्गहस्तस्तु त्रिशूलज्वलिता युधः।

३२२अ ख्) त्र्यक्षोदशभुजो भीमः पञ्चवक्त्रोपशोभितः ॥ ६७ ॥

नादीशो व्याप्ति संयुक्तः [ग: -क्त] अधस्तंभा यतीकृतः।

कथितो देवदेवस्तु मंत्रमूर्ति [ग: -मूर्तिः] परापरः ॥ ६८ ॥

कवर्णा [ग: कवर्ण] षष्ठकं वीजं स्वर [ग: स्वरः]
पञ्चदशार्चितम्।

पूर्वपत्रे [ख: पूव्व-] न्यसेद् देवि रक्तानामेन देवता ॥ ६९ ॥

सितवर्णाष्ट भुजादेवी चतुर्वक्त्रा त्रिलोचना ।

कपालखट्वाङ्गधराः [ग: -धरा] वरदाभयहस्तिका ॥ ७० ॥

बालमुण्डावलंवी च शरशृङ्गावतानिता ।

पूर्वञ्चाङ्गुष्ठके योज [ग: योज्य] तर्जन्यान्तु च वर्णकम् ॥
७१ ॥

ध्यानमन्त्राक्षरन्देवि विरक्ताया [ग: -याः] परिकीर्तितम् ।

आदिवर्गादिमं वीजं द्वितीय [ग: -यं] स्वरभूषितम् ॥ ७२ ॥

करालानामतो देव्यारक्ता [ग: -रक्त] वर्णा प्रकीर्तिता ।

चतुर्वक्त्रा त्रिनेत्रा तु भुजाष्टकसमन्विता ॥ ७३ ॥

३२४ब् ग्] खट्वाङ्ग काद्यवरदं अभयं चाङ्कुषन्तथा [ग:
-शान्तथा] ।

पाशं खड्गञ्च परशुं ध्यात्वा दक्षे निवेशयेत् ॥ ७४ ॥

षष्ठवर्गा [ग: -वर्गात्] तृतीयन्तु तृतीयस्वरभूषितम् ।

चण्डाक्षी चण्डनिर्घोषा वारुणे तु दलेस्थिता ॥ ७५ ॥

तुर्यास्या वस्थदोर्दण्दा पीतानेत्र [ख: पीता * *?] त्रयान्विता
[ख् *?यान्विता] ।

वरदाभय खष्वाङ्ग कपालकृतहसित्का ॥ ७६ ॥

वज्रदण्डा युधा देवी शक्तितोमरधारिणी ।

द्वात्रिंशौ [ग: -शा] कूनत्रिसन्तु [ग: यूनत्रिंशन्तु]

द्वितीयस्वरभूषितम्॥ ७७॥

उत्तरे तु न्यसेत् पत्रे महोच्छुष्मा महोजसा [ग: महौ-]।

कृष्णेन्दीवर वर्णाभा मायातत्वे व्यवस्थिता॥ ७८॥

पशुतत्वे तु क्षेत्रज्ञा चतुवक्त्राष्टहस्तिका [ग: चतुर्-]।

गदामुद्गर खट्वाङ्गापरशुञ्च [ग: खट्वाङ्ग-]

कपालकम्॥ ७९॥

शस्त्रिका च महादेवि अभयं वारदं तथा।

एवैषा त्र्यंविका देवि सिद्धिमुक्तिप्रदायिका॥ ८०॥

टादिवर्गे तृतीयन्तु स्वरैकादशभूषितम्।

अग्निपत्रे स्थिताघोरा सुमना दूतिकीर्तिता॥ ८१॥

त्रिमुखा षड्भिदोर्दण्डैर्वरदाभयहस्तिका।

शक्तिवाण धनुश्चैव मुण्डलंवन्तहस्तिका॥ ८२॥

शुक्लरक्ता तु सा दूती त्रिनेत्रा यौवनोद्धता।

एकविन्स [ग: -श] द्वितीयेन स्वरेणान्तन्तु नेऋते [ग: नैऋर्ते]॥ ८३॥

पत्रे विन्यस्य देवेशि ज्वालिनी दूतिरुत्तमा।

राक्षसी दिशिमाश्रित्य दंष्ट्रोत्कट महामुखा॥ ८४॥

गुणवक्त्रा त्रिनेत्रा च खड्गखेटकधारिणी।

खट्वाङ्ग [ग: कपाल] कपालधरा [ग: खट्वाङ्गधरा]
वरदाभयहस्तिका ॥ ८५ ॥

पीतरक्त त्वचा देवी प्रणतार्ति विनासनी [ग: -शनी] ।

३२२ब् ख्) विंशमन्तु पुनर्योनि तृतीयस्वरभूषिता ॥ ८६ ॥

रौद्री दूती समाख्याता त्रिमुखा [ग: स्त्रिमुखाः] षड्भुजा
प्रिये ।

दण्डाङ्कुश कपालन्तु [ख: कपा * *?] खट्वाङ्गं
वरदाभयम् ॥ ८७ ॥

पीतकृणा तु सा देवी सिद्धिदा मंत्रवादिनाम् ।

सान्तं वीजवरं देवि द्वितीयस्वरभूषितम् ॥ ८८ ॥

नाम्ना तु मनसादूती ऐशान्यां कृष्णभेदिता ।

शुक्लवर्णा तु त्रिमुखाद्विगुणास्य भुजान्विता ॥ ८९ ॥

शूल [ग: शूलं] कपालखट्वाङ्ग गदास्तं वरदाभय [ग:
-यम्] ।

सिद्धिदा [ग: -दाः] कथिता देवि देव्योदूती समान्विता [ग: -ताः]
॥ ९० ॥

स्वनाम स्थान संयुक्ता प्रेतासन सुसंस्थिता [ग: -ताः] ।

नावारूढा [ग: -ढाः] कचेर्मुक्ता [ग: कचैर्-] नग्नरूपाः
सुसिद्धिदाः ॥ ९१ ॥

एवं यागे जपेहोमे अर्चने च विधि [ग: विधिः] स्थिता [ग: -ताः] ।

कुर्वन्ति च सदायोगं भुक्तिमुक्तिरतात्मनाम् [गः -ना] ॥ ९२ ॥

उत्पत्तिनिधनञ्चैव [गः उत्पत्तिर्-] देवीनां स्थितिमेव च ।

योन विन्दन्ति तत्वेन तस्य सिद्धिर्नविद्यते ॥ ९३ ॥

देव्युवाच

३२५अ ग्] उत्पत्ति प्रलयं प्रोकं सिद्धिमुक्तेस्तु कारणम् ।

तत्कथन्देवदेवेश प्रसादात् सूक्ष्मगोचरः [गः -रम्] ॥ ९४ ॥

भैरव उवाच

शुणु देवि प्रवक्ष्यामि य [गः यत्] त्वयाहं प्रचोदितम् ।

कथयामि न सन्देहः सत्यन्देवि न चान्यथा ॥ ९५ ॥

ऊर्ध्वन्तु स्वसनन्देवि [गः श्व-] प्रलयं मुक्तिसाधनम् ।

निराचार [गः -रः] स एवात्र उच्छुष्मं परिकीर्तितम् ॥ ९६ ॥

अधार्द्धा [गः अधोर्ध्वा] चोर्द्धनादेननये या वलयान्तिकम्
[गः वल्ल-] ।

हेयो पादेय वृत्तेन गुणधर्म विवक्षया ॥ ९७ ॥

यथा सूक्ष्मलयन्तद्वत् परमीशं प्रकीर्तितम् ।

निष्कलङ्क कलातीतं तल्लयान्मुक्ति [गः -क्तिर्] उचय्ते ॥ ९८ ॥

अधो [गः अधः] श्वासगताश्चैव [गः -ता चैव] सृष्ट्युत्
पत्तिस्तथैव च ।

गुणधर्मा सृजं सिद्धि [ग: सिद्धिः] स्वेच्छा तत्वात्मिका भवेत्

॥ ९९ ॥

शक्तिमार्ग [ख: -माग] समुच्चारा स्मरणानुग्रहात्मिका ।

अवधूतेति सा ज्ञेया भुक्तिमुक्ति प्रसिद्धिदा ॥ १०० ॥

अनेन विधिना देवि जपहोमादिकर्मषु [ग: -सु] ।

वाह्या ध्यात्मेव मन्त्रज्ञः पूजाङ्कुर्वन् [ख: कुव्वन]

प्रसिध्यति ॥ १०१ ॥

देव्युवाच

करन्यासं महादेव सृष्टिसंहार संस्थितम् ।

भुक्तिमुक्तो [गः भुक्तिमुक्त्यु] भयार्थार्थं घृणां कृत्वा

व्रवीहिमे ॥१०२॥

भैरव उवाच

शृणु देवि यथान्यासं सुरासुर नमस्कृतम्।

नान्येन विधिनाख्यातं तंत्रसारं क्वचित् प्रिये ॥ १०३॥

३२३अ ख्) उत्तराभिमुखो भूत्वा सर्वाध्व प्रणवासने।

हूंकारेण दिशांशोध्य करशुद्धिं समाचरेत्॥ १०४॥

शक्तिन्यासन्तु कृत्वादौ करन्यासं समाचरेत्।

करन्यास कृतो वीरः शुद्धे देहे न्यसेत् तनौ॥ १०५॥

प्रकृत्त्यादि शिवान्तन्तु ऊर्ध्वश्वास कृतश्रमः।

प्रलयं प्रथमं न्यासं निराचार गतिर्युतम्॥ १०६॥

प्रणवादि च हंसान्तं मूर्ध्नि यावन्नियोजयेत्।

एतद् देवि महान्यासं प्रलयं परिकीर्तितम्॥ १०७॥

प्रलयात् तु परं कुर्यादुत्पत्तिस्तु वरानने।

अधश्वाससमुत्पत्ति [गः अधः श्वास- -त्तिः] क्रमान्यासं यथाहितम्॥ १०८॥

उभयात्म्यं तथान्यासं सृष्टिसंहारलक्षणम्।

प्रलयं ज्वलनप्रक्यं कालाग्नि समतेजसः॥ १०९॥

अधोन्यासं शशिप्रख्यं सामृतन्तु स्मरेत् सदा ।

अग्नि [ग: अग्नि] सोमात्मकं देवि उभयात्म्यं वरानने ॥ ११० ॥

आलभेत ततोत्मा * सृष्टिसंहारयोगतः ।

शिवी भूत्वा ततः पश्चामुद्रा [ग: पश्चान्-] वन्धन्तु
कारयेत् ॥ १११ ॥

वीजयोगं पुराहस्ते पश्चा [ग: पश्चाद्] देहे तु भैरवि ।

शुद्धकायः शिवात्मा तु मुद्रां वध्वान विघ्नभाक् ॥
११२ ॥

हूंकार [ग: -रं] मूर्ध्नि संयोज्य चकारं
मन्त्रमध्यतः ।

व्यापयन्ती स्मरेद् रक्ता स्वमुद्रासन लाञ्छिता ॥ ११३ ॥

३२५ब् ग्) डेकारं नासिकाग्रे [ग: नासि * ग्रे] तु काकारं कण्ठमध्यतः ।

पाकारं हृदये न्यस्य लिकारं नाभिमण्डले ॥ ११४ ॥

निकारं ऊरुजानुभ्यां स्वाकारं जङ्घयोन्यसेत् [ग: - योर्न्यसेत्] ।

हाकारं पादगं न्यस्य तले चैव तु विन्यसेत् ॥ ११५ ॥

एतेष्वेव तु विन्यस्य च काराद्यङ्घ्रिमूलतः ।

पादजङ्घे तथोरुभ्यां कटिनाभौ हृदेगले ॥ ११६ ॥

वक्रनासाग्र योगेन नेत्रमध्ये शिरस्पथ ।

हूंकारान्तं महा देवि हूंकारादि समन्वितम्॥ ११७ ॥

उभयात्म विभागन्तु हूंकाराच्च हकारतः।

अधि देव विभागेन देवी ध्यानं समारभेत्॥ ११८ ॥

कृत न्यासः करात्मस्थ [गः -स्थं] मुद्राबन्धन्तु कारयेत्।

जिह्वा तुलालयेत् प्राज्ञ [गः प्राज्ञो] हा हाकारन्तु कारयेत्॥ ११९
॥

तस्य शव्देन नश्यन्ते गुह्यकाराक्ष सादयः।

दृष्ट्वा तु वशमायान्ति भूताः साकिनिभिः सह॥ १२० ॥

एष मुद्रा महामुद्रा वदनेन प्रकीर्तिता।

देवता कल्पना कुर्यान्मुद्रामण्डलसंयुता ॥ १२१ ॥

३२३ब् ख्) हूंकारं मूर्ध्नि विन्यस्य प्रणवासन भैरवम्।

रक्ता तु वक्रदेशस्था करालाकष्ठदेशतः ॥ १२२ ॥

चण्डाक्षी हृदये नाभौ महोच्छुष्मा प्रपूजयेत्।

कट्यूरुजानु पद्मान्तु दूती विन्यस्य मंत्रवित्॥ १२३ ॥

सुमना ज्वालिनी चैव कट्यूरुभ्यां निवेशयेत्।

रौद्री च घोरनामा च जानुपादे गते न्यसेत्॥ १२३ ॥

पूर्वोक्त मन्त्र मुद्रा तु न्यस्तव्या तु शरीरके।

न्यस्ते तस्मिन् विभु * * * * रवि योनियोजयेत्॥ १२४॥

अन्येषाञ्चैव मुद्राणां लक्षलक्षं न विन्दति।

भैरवस्य महामुद्रा मुद्रा सान्निध्य कारिका॥ १२५॥

प्रयुक्ता तु यदा मुद्रा लक्षणेन वरानने।

भावात्मक विधानेन सद्योमंत्रो विजृंभति॥ १२६॥

करोति साधका वेशं जपध्यानविवर्जिता।

करन्यासं प्रवक्ष्यामि मन्त्रबीजोद्भवं परम्॥ १२७॥

यं कृत्वामुपतिष्ठन्ति [ग: कृत्वात्मु?-] देवता साधकेश्वरः

।

विचित्रैर्भूतवस्त्रे तु दिव्यचन्दन चर्चिता ॥ १२८ ॥

दिव्यालङ्कार संयुक्ता रूपयौवन गर्विता ।

नभेतव्यं ततस्तासां भगिन्यस्तु यथा स्मृता ॥ १२९ ॥

पद्माकारौ करौकृत्वा प्रथमं प्रणवेन तु ।

अङ्गुष्ठकर्णिकाङ्गुल्य दलाष्टकसमन्विता ॥ १३० ॥

मध्याङ्गुष्टकमूध्नस्थं [ग: -मूर्ध्नस्थं] स्मरणन्
तत्र विन्यसेत् ।

ज्वालामालान्त [ग: -ला *] कुलं भीमत्रिनेत्रन्तु महावलम् ॥
१३१ ॥

कपालमालिनन्देव त्रिशूल ज्वलिता युधम् ।

३२६अ ग्) वामहस्ते तु खट्वाङ्गं कपालं दक्षिणे करे ॥ १३२ ॥

तृतीये वरदाख्यन्तु चतुर्थे तु तथाभयम् ।

खड्गखेट धनुर्वाणमुण्डलं वन्त पाणिनाम् ॥ १३३ ॥

त्रिशूलायुध हस्तन्तु ध्येयं दंष्ट्रोत्कटाननम् [खः
दष्ट्रोत्-] ।

अङ्गुष्ठकर्णिकान्ते तु तर्जन्यां [खः ?] विन्दुविग्रहम् ॥ १३४ ॥

चकारं विन्यसेत् तत्र शुक्लवर्णं महावलम् ।

स्वबीज बीजितं बीजंबीजेन परमेण तु [गः तुः] ॥ १३५ ॥

परं बीजं स्वबीजेन यस्यचाद्यं मनाक्षरम् ।

एवन्तु बीजितं बीजं यस्तु विदन्ति [ग: विन्दन्ति] साधकः ॥ १३६ ॥

स भवेद् देव गन्धर्वैः पूज्यो देवि यथा शिवः ।

एषा शक्ति [ग: शक्तिः] पराख्याता परमेशेन भाषिता ॥ १३७ ॥

हृदयं सर्वशक्तीनां भुक्तिमुक्तिफलप्रदः [ग: -दम्] ।

त्रैलोक्य द्रावणी [ग: द्राविणी] ह्येषा नित्यं सिद्धि प्रदायिका ॥

१३८ ॥

सर्वसिद्धिकरी ह्येषा दीप्यमानस्तु [ख: ?] तेजसा [ख: ?] ।

३२४अ ख्] स्फुरन्ती विद्युदाभासा कपालाभरणोज्ज्वला ॥ १३९ ॥

[ख: ?]

खट्वाङ्गोद्यतकरा देवी ऊर्ध्वकेशा त्रिलोचना । [ख: ?]

तृतीय लोचनो [ग: -नोद्] भूता [ग: भूताः] परमेशस्य सुव्रते ॥
१४० ॥

हृदि तिष्ठति यस्यैषा देवी त्रैलोक्यनायिका ।

संपूज्यते नरै [ग: नरैः] सर्वैर्देव गन्धर्वकिन्नरैः ॥ १४१ ॥

गुह्यकै [ग: -कैः] पन्नगैर्यक्षै [ग: -क्षैः] पिशाचोरेग
राक्षसैः ।

गणैश्च विविधाकारैः सिद्धरुहैस्तथैव [ग: -रुद्रैस्तथैव]
च ॥ १४२ ॥

अथास्यैवाङ्ग विन्यासं कथयामि समासतः ।

चकारं बिन्दुसंयुक्तं द्वितीयश्वरभेदितम् [ग: -
स्वरभेदितम्] ॥ १४३ ॥

हृदयन्देवदेव्याया एतत् परमशोभनम्।

चतुर्थस्वरसंयुक्तं त्रिपञ्चस्वरयोजितः [ग: -तम्] ॥ १४४ ॥

शिर एतत् समाख्यातं सर्वविघ्नविनाशनम्।

स्वरषष्ठ [ग: स्वरः षष्ठः] समायुक्तं बिन्दुनाद

विभूषितः [ग: -तम्] ॥ १४५ ॥

शिखा तु परमाख्याता कवचं शृणु सांप्रतम्।

अष्टमश्वरसंयुक्तं [ग: -स्वर-] बिन्दुनादविभूषितम्॥ १४६

॥

कवचं कथितं ह्येत [ग: ह्येतद्] वज्रपञ्जरसन्निभम्।

अस्त्रं विसम्भजं [गः विसर्गजं] प्रोक्तं नेत्रञ्चौकार

सन्निभम्॥ १४७ ॥

आकार संभवं वक्रमिकारस्त्वासनं भवेत्।

एवमष्टाङ्ग विन्यासं यः कुर्यात् साधकोत्तमः॥ १४८ ॥

सर्वविघ्न विनिर्मुक्तः सलभेत् सिद्धिरुत्तमा।

एषा सा तु महाशक्तिरक्ता कृष्टिकरापरा॥ १४९॥

योगयुक्ता महादेवि स्मरणेन समन्विता।

सवृतोमुख विन्यस्ता भवते सिद्धिदायिका॥ १५० ॥

एवं रक्ता समाख्याता कराला वा महायसे।

चण्डाक्षी वा महोच्छुष्मादुत्या वा स्मरणान्विता [ग: -ताः]

॥ १५१ ॥

स्वबीज न्यासयोगेन अष्टाङ्गकृतविग्रहाः ।

३२६ब् ग्) एकमार्ग विधानेन प्रत्येक यजनं प्रिये ॥ १५२ ॥

ददाति परमा सिद्धिः साधकस्य वरानने ।

स वर्णरूपकोपेता स्वर्णभाषा शिवान्विता ॥ १५३ ॥

अष्टौयागा महादेवि व्यस्तयोग समस्तगा ।

नवयागा [ग: * *?यागा] महादेवि नवशक्तिसमन्विता [ग: ताः]

॥ १५४ ॥

नवग्रन्ति विभागस्थं ते च तत्व व्रताश्रया ।

नवाक्षरयुता [ग: -ताः] सर्वाः स्वरूप नवकान्विताः ॥ १५५ ॥

नवामृत विधाने तु सिद्धिदा [ग: -दाः] परिकीर्तिता [ग: -ताः] ।

सामान्यगा विशेषस्था [ग: -स्थाः] स्वकर्मतनु रूपिकाः ॥

१५६ ॥

स्वास्त्र वर्णस्वय * * * समाधि [ग: -धिः] समन्विता [ग: -ताः] ।

३२४ब् ख्) एवमेते स्मृता यागा [ग: यागाः]

स्वाङ्गमुद्रादयोन्विता ॥ १५७ ॥

अथमुद्रां प्रवक्ष्यामि देव्यः सान्निध्य कारिका ।

तर्जन्या मध्यमश्चैव अङ्गुष्ठेन निपीडयेत् ॥ १५८ ॥

कन्यानामाश्रिता हृस्था [ग: हृत्स्था] हृन्मुद्रा संप्रकीर्तिता

।

मुष्टिंवध्वा समाङ्गुष्थां कृत्वा शिरसिरुन्नता [ग: -सि

उन्नता] ॥ १५९ ॥

शिरोमुद्रा समाख्याता शिखामुद्रामतोच्यते ।

तदेवमुष्टि * * * तर्जनी तु समुच्छ्रिता ॥ १६० ॥

शिखामुद्रा समाख्याता कवचस्याधुना शृणु ।

मुष्टिंवध्वा क्षिपेदूर्ध्वमङ्गुष्ष्थौ कन्यसा वुभौ ॥

१६१ ॥

कवचस्य त्वियं मुद्रा शरीराच्छादनी स्मृता ।

मुष्टिंवध्वा क्षिपेदूर्ध्वं तर्जनी मध्यमा च वै ॥ १६२ ॥

खड्गमुद्रा भ्वेद्धयेया? अस्त्रस्य तु परान्विता ।

अङ्गुष्ठाग्रादवष्टभ्य कन्यसाग्रं निपीडयेत् ॥ १६३ ॥

त्रयः प्रसारिता * * * खड्गमुद्रा प्रकीर्तिता ।

प्रसृताङ्गुष्ठकं कृत्वा नेत्रमुद्रा प्रकीर्तिता ॥ १६४ ॥

त्रयः प्रसाराताङ्गुल्यौ वक्रस्य परिकीर्तिता ।

अङ्गुष्ठ कर्णिकान्तस्थ मष्टाङ्गुलिदलान्वितम् ॥ १६५ ॥

पद्मस्य तु इयं मुद्रा आसनार्थं प्रकल्पयेत् ।

मंत्रमुद्रास्तथा [ग: -मुद्रा तथा] ध्यानं त्रिभिः सन्न

ह्यविग्रहः ॥ १६६ ॥

सकली कृत देहस्तु सर्वकर्मकरो भवेत् ।

अष्टानां पद्मपत्रेषु तत्रमध्ये प्रपूजयेत् ॥ १६७ ॥

हृदयादिषु विन्यासं शरीरे प्रथमं भवेत् ।

भोगस्थाने ततोङ्गानि पूर्वादि परिकल्पयेत् ॥ १६८ ॥

हृत्पूर्वे दक्षिणे मूर्ध्नं [खः मूध्नं] शिखाप्ये नैऋते
[गः नैर्ऋते] पुनः ।

कवचन्तु न्यसेन् मन्त्री अत्रञ्चाग्नेयगोचरे ॥ १६९ ॥

उत्तरे तु न्यसेन्नेत्रं वायव्ये वक्त्रमेव च ।

इश [ग: ईश] पत्रे तु देवेशि स्मरणन्तु निवेशयेत्॥ १७० ॥

प्रणवादि दलान्ते तु बीजं सर्वत्र विन्यसेत्।

पुनरस्त्रं दलाग्रेषु प्रणवाद्य स्फडान्तिकः [ग: -डन्तिकम्]
॥ १७१ ॥

३२७अ ग्] रक्षार्थन्तु महादेवि सर्वयोगेषु योजयेत्।

आग्नेये नैऋते [ग: नैऋर्ते] चैव [ख: चेव] शङ्करे हृदयादिकम्॥
१७२ ॥

कवचान्तन्तु दूत्या वै प्रथमायाः प्रकल्पयेत्।

अस्त्र [ग: अस्त्रे] नेत्रन्तथा वक्त्रं स्मरणं दक्षिणादिकः [ग: -
कम्] ॥ १७३ ॥

पूर्वन्तु [गः पूर्वन्ततु] कीर्तितं देवि सुमना वा वरानने ।

स्ववर्ण वक्रयोगेन देव्योदूत्यञ्च पूजयेत् ॥ १७४ ॥

३२५अ ख] दक्षाप्योत्तर पूर्वेण हृदा ह्यस्त्रादिके पुनः ।

नैऋतादि [गः नैर्ऋतादि] प्रकर्तव्यं स्मरणं पावके यथा ॥
१७५ ॥

नैऋत्यादि [गः नैर्ऋत्यादि] तथाङ्गानि ज्वालिन्या पश्चिमोत्पुनः
[गः -मे पुनः] ।

अस्त्रादिकं यजेत् तावत् स्मरणं दक्षिणे यथा ॥ १७६ ॥

एवाप्याद्धृदयाद्यन्तु यावदस्त्रादिकन्तथा ।

स्मरणैता [गः -ताः] स्मृता चण्डा एवन्देवि फलप्रदा ॥ १७७ ॥

तथा समीरणाद्यन्तु हृदाद्य [गः हृदाद्यश्] चोत्तरादिकम्।

अस्त्राद्यन्तु न्यसेद् रौद्र्या स्मरणं पश्चिमेन तु॥ १७८॥

एवोत्तरादिकन्देवि हृदाद्यन्तु प्रकल्पयेत्।

अस्त्राद्यञ्चैश्वराद्यन्तु [गः -चेश्वराद्यन्तु] स्मरणं
वायवे दले॥ १७९॥

तथा साद्या हृदारभ्य पूर्वास्त्राद्यं वरानने।

घोराया [गः -याः] कथितं यागं व्यस्तयोगात् समस्तगम्॥
१८०॥

एवमेते स्मृतायागा देहल्यादिमधो [गः -धः] श्रयाः [गः
श्रया]।

सिद्धिदा साधकेन्द्राणां स्वबीजेन्नाहरान्विता ॥ १८१ ॥

स्वरूप ध्यानसंयुक्ता रक्ता याद्वस्तथा यजेत् ।

कर्मकाले यथा तद्वद् ध्यात्वा पूज्या वरानने ॥ १८२ ॥

एवं पूजा [गः पूजां] ततो [गः ततः] कृत्वागन्धधूप
पवित्रकैः ।

होमं कृत्वा यथोदिष्ठं [गः यथोद्दिष्टं] क्ष्मापल
मलिना सह ॥ १८३ ॥

धूपं [गः धूप] मार्जारविष्टेन लशुने नरजेन तु ।

सान्नैध्यकरणं देवि नित्यमेव समाचरेत् ॥ १८४ ॥

देव्युवाच

कुच्छितन्तु [गः कुत्सितन्तु] इदं कर्मकथन्देव त्वयाकृतम्।

विहस्य परमेशान इदं वचनमब्रवीत्॥ १८५॥

संस्कार भावहीनानां शक्तिपात विवर्जिताम्।

वञ्चनार्थं महादेवमया मायाप्रसारिता॥ १८६॥

विद्याविवेक मोहेनशास्त्रं दृष्ट्वा तु येपि हि।

प्रयन्नान्तेन [गः प्रपन्नास्तेन] सिद्धयन्ति पराद्वैत विवर्जिता

[गः -ताः]॥ १८७॥

तेनभाव विदुष्टानां नात्र सिद्धिर्वरानने।

संभवेत महादेवि भैरवाश्रय वर्जिता [ग: -ताः] ॥ १८८ ॥

एतदर्थं [ख: एतद *?] विगुप्तन्तु तत्र रक्षार्थकारणम्।

तव देवि सुतुष्टेन रहस्यं प्रकटी कृतम्॥ १८९॥

पवित्राणां स्वरूपन्तु तत्त्वजन्तु मयास्मृतम्।

त्रिषष्टियाग योगेन अधिदेवात्मकेन च॥ १९० ॥

क्रियाकारण योगेन शक्तिवीराध्व वर्जितम्।

३२७ब् ग्] श्राद्धं द्रव्यं वरारोहे पवित्रं परिकीर्तम्॥ १९१ ॥

क्षमापलं गुग्गुलं [ग: -लुं] प्रोक्तं सुराचैव घृतं

स्मृतम्।

मार्जार * * * श्रीवासं [ख: ?] वालासर्जरसं स्मृतम्।

३२५ब् ख्) कुन्दुरुं स्वमलं लिङ्गे छर्दिजाती रसः स्मृतम्॥
१९३॥

तडिद्रजस्वला रक्तं मीनाकेशाः प्रकीर्तिताः।

मगमाण्डूकमेवोक्तं [ख: -मेवोंक्तं] ए मारी
शुक्तिरुच्यते॥ १९४॥

वुकशांवुकमित्युक्तं किञ्चिद्दिष्टस्य [ख: किंचिद्-] लक्षणम्।

शुक्रं शशिसमाख्यातं वुकं लिङ्गमलं स्मृतम्॥ १९५॥

सेकं शिवांभ सूत्रञ्च आसनं स्थिरौ च्यते।

चन्द्रसोमन्तथा ज्ञेयं द्रवं * चामृतः प्लुतम्॥ १९६॥

एवं रहस्यनामानि रनन्ते [ग: अनन्ते] ब्रह्मयामले ।

पञ्चनिर्यासको धूपो देवो देवी प्रियः सदा ॥ १९७ ॥

तडिच्छशि लोहकिञ्चिद् एत [ग: एतद्] द्रव्यस्य लक्षणम् ।

तडिद्रजस्वला [ख: डालद्रजस्वला?] रक्तं शशिशुक्रं
प्रकीर्तितम् ॥ १९८ ॥

लोहाकेशा [ग: -शां] समाख्याता [ग: -ताः] किञ्चिद्विष्टस्य
लक्षणम् ।

शुक्रेण च समायुक्तो धूपः पञ्चकल [ग: -लः] स्मृतः ॥ १९९
॥

स्वशरीरे तु वोद्धव्यो मुद्रा सम * गोचरे ।

पञ्चनिर्यासको धूपसंज्ञा मात्रेण चोदितः ॥ २०० ॥

गुह्यमेतन् महादेवि देव्यो धूप [गः -पः] प्रकीर्तितम् ।

घृतं [गः घृत] गुग्गुलु होमेन लक्षमात्रेण सुव्रते ॥ २०१ ॥

भगिन्या वरदा नित्यं भवते साधकस्य तु ।

पातालोत् तिष्ठ खड्गं वा राज्यं वाथ रसायनम् ॥ २०२ ॥

शत्रुनाशं रसं वित्तं मनसा चित्तितन्तु [खः ?] यत् [खः ?] ।

ततः प्रभृति सर्वाणि सिद्धयन्ते साधकस्य तु ॥ २०३ ॥

रूपाणि च विचित्राणि मनसा चिन्तितानि तु ।

कुरुते क्षिप्रमात्मानं द्रेश्याद्रेश्यं तथैव च ॥ २०४ ॥

न दृश्यते दिवाभूतैर्देवासुर [ख: दिवा * * * *?] महोरगैः ।

इच्छया दृश्यते मंत्री इच्छया न च दृश्यते ॥ २०५ ॥

न तं पश्यति सिद्धास्तु देवघन्धर्वकिन्नराः ।

ब्रह्मादि सर्वदेवास्तु [ख: सर्व * * *?] पश्यते दिव्य [ख: ?]

चक्षुया [ख: ?] ॥ २०६ ॥

धनदेन समैश्वर्यं शिवतुल्यस्तु जायते ।

मृत्युयोगजरारोगैस्सर्वव्याधि [ग: -गैः सर्व-] विवर्जितः ॥ २०७ ॥

शापानुग्रहकारी च कामरूपी च जायते ।

महाशक्तिम्महावीर्य [ग: महाशक्तिर्म-] रुद्रतुल्य

पराक्रमः ॥ २०८ ॥

देवगन्धर्व यक्षाणां कन्यकाभिः समावृतम् ।

कुहकानि विचित्राणि कुरुते पृथिवीतले ॥ २०९ ॥

रतेते [ख: ?] साधकेन्द्रस्तु रूपयौवन गर्वितः ।

यागं योगं जपं होमं लीनस्तु स्मरणे [ख: ?] सदा [ख:

नास्ति] ॥ २१० ॥

ंस् ख पगे नो । ३२६ अन्द् ३२७ मिस्सिन्ग् फ़्रोम् हेरे

एषा शक्तिः समाख्याता स्मरणेन तु भाविता ।

स्मरणाज्जगदुत्पत्तिस्तत् सकाशात् प्रजायते ॥ २११ ॥

३२८अ गृ संहारः स्मरणः प्रोक्तस्तेनासौ स्मरणः।

स्मरणाज्जायते सिद्धिः स्मरणात् सर्वतः स्थितः॥ २१२॥

क्रियाज्ञान स्वरूपात्मा सर्वतः स्मरणात्मकः।

मुद्रामण्डल विन्यस्तस्य वीर्यकृतलक्षणः॥ २१३॥

देव्युवाच

मुद्रामण्डल मंत्रस्थो विद्यादेहे कथं स्थितः।

स्मरणस्तु महादेव सर्वगस्तु कथं भवेत्॥ २१४॥

भैरव उवाच

सर्वगत्वं शिवस्योक्तं सूत्रादि विधियोजनात्।

ज्ञानरूपक्रियावस्थं फलंदा तृत्व योजितम्॥ २१५॥

चित्संभोग वियोगादि लयरूपैर्विभासते।

अचेतनादि रूपाणां काला नृष्ट प्ररोहणैः॥ २१६॥

फलपुष्प विभागैस्तु पाद यत्वेन सुन्दरि।

विवेको यः सदातस्थः सौक्तोही संविना न हि॥ २१७॥

न चान्यत्रापि देवेशे विनाशेन प्रभुत्वता।

फलदा तृत्वरूपेण मंत्रादिभि विवेच्यते॥ २१८॥

मननत्राण धर्मित्वं दृष्ट्वा मंत्रगतं प्रिये।

तद्विवेक विवेक्तृत्वाद् दिव्यत्व फलकांक्षिणम्॥ २१९॥

विद्या स्थितन्तु मन्तव्यं दिव्यदेह विवक्षया।

यदा सन्नद्धिरूपास्यं मंत्रविद्यात्मकस्य तु॥ २२०॥

भोगभोक्तृत्व रुपस्य चिदाकार व्यवस्थया।

विष्टयाकार रूपेण शिवैश्वर्यं वरानने॥ २२१॥

मण्डसारशिवं भागं तत्प्राप्त्यालन्तु मण्डलम्।

सर्वत्र भैरवस्तेज द्रावणे परिपन्थिना॥ २२२॥

विघ्नानां सिद्धविद्यादियं मुदं फलहारकाम्।

तद्भावणमुदा मुद्राशिव युक्ताफलप्रदा ॥ २२३ ॥

एवञ्चतुर्विधन्देवमष्ट पुष्पादिभिर्युतम् ।

यजितन्तु वरारोहे सर्वकामफलप्रदम् ॥ २२४ ॥

अथातः संप्रवक्ष्यामि रहस्यं गूढगोचरम् ।

उत्तानमङ्गुलिं कृत्वा हस्तयोरुभयोरपि ॥ २२५ ॥

कनिष्ठान्योन्य संवेष्टय तर्जन्यान्योन्य संहतौ ।

अनामा मध्यमायुक्तौ कोष्ठमध्येगता वुभौ ॥ २२६ ॥

कुञ्चपित्वा तथाङ्गुष्ठौ वनामा मध्यमा तथा ।

प्रसार्य च ततो जिह्वां हाहाकारन्तु कारयेत् ॥ २२७ ॥

वक्रमुद्रात्वियं प्रोक्ता भैरवस्यामि तद्युतेः ।

अनया रहिता देवि न च सिद्धिर्भविष्यति ॥ २२८ ॥

न च मन्यन्तितं देव्यः पशुरेव सपठ्यते ।

प्रत्यहं यः स्मरेन्मुद्रा न्यासयुक्तो महामतिः ॥ २२९ ॥

तस्याः सिद्ध्यन्ति वै देव्यस्तुन्वन्ति च मरुद्गणाः ।

अहन्तस्य न सन्देहो नित्यदेहे व्यवस्थितः ॥ २३० ॥

मुद्रारूपो ह्यहन्देवि स्मरणत्व व्यवस्थितः ।

सान्निध्यकरणं श्रेष्ठं स्तंभने भेदने तथा ॥ २३१ ॥

३२८ब् ग्) छेदने परम ख्यातां? विघ्नानाञ्चैव नासने।

सर्वकर्मकरी प्रोक्ता सर्वकर्मषु योजयेत्॥ २३२॥

मध्यमाक्षमिति प्रोक्तं प्रधानं स्मरणाद्य?तम्।

तथैरावः बीजं हि मनामत्वं? वरानने॥ २३३॥

स्वाकारञ्च शिवे नोक्तं तत्वं न्यस्य कनिष्ठिके।

तथैव नादिनी बीजं दक्ष तर्जनिकोपरि॥ २३४॥

स्मरणोक्तन्तु मध्याया एकविंशं तथा युतम्।

विंशमन्तु न्यसेन्नामा शिवभासा व भाषितम्॥ २३५॥

नादीशं नादसंयुक्तं स्तंभ व्याप्ति विभूषितम्।

कन्यसा दक्षहस्तस्य समाश्रित्य निवेशयेत्॥ २३६॥

एवं समस्त यागे तु न्यस्तङ्गुष्थ समाश्रयम्।

अङ्गाष्टकयुतं बीजं तर्जन्यादिगतं यजेत्॥ २३७॥

चारीश्वर विभागं वा उमामाहेश्वरोथवा।

पृथग्भेदोथवान्यस्य भैरवाङ्गुष्ठ देशतः॥ २३८॥

तर्जन्या चैव रक्ताद्या देव्या साः शेषया गताः।

आसनन्तु तलेन्यस्य न्यासोयं सर्वगः परः॥ २३९॥

एक वीरार्द्ध नारीश उमादेहादि भैरवे।

षडङ्ग सकलीकारः कर्तव्यन्तु गणांविके ॥ २४० ॥

एका सर्वगता शक्तिवहुभेदैर्विसर्पिता ।

परापर विभागस्थाः सर्वगा कारणेश्वरी ॥ २४१ ॥

विद्यावस्था स्वरावस्था वर्णावस्थानदात्मिका ।

वोधशक्तिर्वरारोहे क्रियारूपाध्वगा तथा ॥ २४२ ॥

द्रष्टव्याः सर्वतत्वस्थाः सामर्थ्यात् प्रकटीकृता ।

परापरविभागेन व्याप्य सर्वं व्यवस्थिता ॥ २४३ ॥

इत्येवं कथिता न्यासं रूपलक्षणसंयुतम् ।

अतः सर्वे तु विन्यस्तं स्मरणं नोभयात्मके ॥ २४४ ॥

एवं न्यासंकरे कृत्वा साधकेन्द्रो महात्मने ।

अर्चनं पूजनं चैव वामहस्तेन कारयेत् ॥ २४५ ॥

यथा जातेन कर्तव्यं मुक्तकेशेन सुन्दरि ।

एवं न्यास वरश्रेष्ठः कथितन्तु समासतः ॥ २४६ ॥

कपालमुद्रां वध्वा तु केशैर्होमो विधीयते ।

तिलाः केश समाख्याताः पर्यायाक्षर नामकाः ॥ २४७ ॥

मीनास्थूल समाख्यातास्तिल्यः सूक्ष्मास्तु सुव्रते ।

मधुना तु कृता पृक्ताहोमान्तेन समाचरेत् ॥ २४८ ॥

एकेन लक्षहोमेन सम्यग् युक्तेन चेतसा ।

त्रैलोक्य वशमायाति साधकस्य न संशयः ॥ २४९ ॥

किं पुनर्मानुषास्तस्य जपहोमार्च शीलितः ।

स्मरणं कर्णिकामध्ये यथा पूर्वन्तथा न्यसेत् ॥ २५० ॥

दलपूर्व समारभ्य यावदीशान गोचरम् ।

३२९अ ग्) न्यसेद् देव्यस्तथा दूत्यो यथा स्थाने तु साधकः ॥
२५१ ॥

परिपाट्या क्रमेणैव स्वरूपं ध्यानयोगतः ।

मुद्रामण्डलमन्त्रैश्च वाहना भरणैर्युताः ॥ २५२ ॥

स्वकाले नैव यष्टव्याः सन्निधान भवन्ति हि ।

अन्यथा नैव सिद्धयन्ति शास्त्रेस्मिन् निश्चितं वचः ॥ २५३ ॥

परापरविभागेन मयापूर्वं प्रकाशितम् ।

द्विप्रकारस्तु संक्षेपान्मया सर्वं वरानने ॥ २५४ ॥

जपार्चने तथा होमे ध्याने चैकाक्षरायत् ।

कर्तव्यं सततं देवि सर्वसिद्धिप्रदायिका ॥ २५५ ॥

अपरा सर्वविघ्नोघ्नाः कर्तव्या मूर्तिकल्पना ।

नाभाम्यं प्राप्नुयाद् एतत् पिचुतंत्रेषु विस्तरम् ॥ २५६ ॥

येन जन्म सहस्त्रन्तु भक्तयात्वा राधितः शिवः ।

सप्राप्नोति महापुण्यं पिचुतन्त्रे तु सुव्रते ॥ २५७ ॥

द्रष्टव्यं सर्वतन्त्रेषु जलचन्द्र इव स्थितः ।

नदेयं पापकर्मायो गुरुनिन्दा पराय च ॥ २५८ ॥

जिज्ञासुः शठधूर्ताय गोपयेद् वरवर्णिनि ।

पुरीय मूत्रसन्त्यागे शयने पानभोजने ॥ २५९ ॥

ना?प्नुवन्ति वरारोहे येनराः पुण्यवर्जिताः ।

अत्रोक्तञ्चापि यद्यासं तद्यासं वा सुरेश्वरी ॥ २६० ॥

उत्तरोक्तं महादेवि कुर्यात् मूलादि सूत्रगाम् ।

अन्यथा कुरुते यस्तु तस्य सिद्धिर्न विद्यते ॥ २६१ ॥

सुशिष्ये च भवेद् देवि कामिकञ्च महाफलम् ।

लाभः ख्याति यशः पूजा गुरुभक्तिश्चतुर्विधा ॥ २६२ ॥

यः शिष्यः पालयत्येवं सभवेत् सिद्धिरुत्तमा ।

इति पिचुमते ज्ञानमुष्टि उत्तरतन्त्राधिकारे सप्ताशीतिमः पटलः ॥

देव्युवाच

अद्यापि प्रश्नकामाहं प्रश्नमेकांगरीयसी ।

उत्तरोत्तर तंत्रे तु तन्त्रशेषार्थ साधनी ॥ १ ॥

मूर्तिकूटविभागेन प्रतिवीजगताः प्रभो ।

नवात्मानां महेशस्य यदादौ तु प्रसंशिता ॥ २ ॥

तथा चक्ष्व महादेव महायाग विदो परा ।

पर्थिवे तु यथा तत्वे मुर्तिं धृक्परमः शिवः ॥ ३ ॥

स्थितो हितः स्थितोमन्त्राः सिद्धिहेतोर्वदप्रभो ।

भैरव उवाच

साधु साधु महाभद्रे अतिभद्रं वदामिते ॥ ४ ॥

प्रस्तारं देवदेवस्य धराधरणमंडले ।

अथकुर्म समालिख्य समन्तात् परिवर्तुलम् ॥ ५ ॥

षोडशाङ्गुल विस्तीर्णं खर्परं चतुरङ्गुलम्।

द्वादशाङ्गुल कर्तव्यं समन्ताच्चाग्रतोमुखम्॥ ६॥

अष्टाङ्गुलाभवेद् ग्रीवासुमुखा तु वरानने।

पादान्तस्य तु चत्वारश्चतुर्भिरङ्गुलैः कृतम्॥ ७॥

३२९ब् ग्) नखाङ्गुलि समोपेता शिश्नद्यङ्गुल संमितम्।

द्वादशां शदले मध्ये वर्णद्वादशकं न्यसेत्॥ ८॥

ऐन्द्री दिशिसमारभ्य यावत् तस्यानुजंदलम्।

तेजिने चक्षुषी ज्ञेया क्रमशोदक्षवामिके॥ ९॥

गन्धाग्रेय रसंस्थे तु विज्ञेये गन्धदेवते ।

दक्षपादकराङ्गुल्यो नखा काद्यविलक्षिताः ॥ १० ॥

तद्वांशका वसव्यन्तु वामन्तु परिकीर्तितम् ।

शेषतद्व स्फिचोङ्घ्रिश्च पादाङ्गुल्यो नखापिवम् ॥ ११ ॥

टादिना तादिना वामयादौ ह्येवं प्रकीर्तितौ ।

चोष्टभूतौप फौदौ तु तृतीयो वक्रमण्डले ॥ १२ ॥

रसनाम माकारश्च लंवकात्वे तु कीर्तितम् ।

द्विजोष्मा मारुतो हृत्कोरेफः प्रजननं स्मृतम् ॥ १३ ॥

पुच्छन्तु वरुणश्चापि ललाटस्थः प्रकीर्तितः ।

कूर्परस्थोप संहारनादीशो नाभिसंस्थितः ॥ १४ ॥

सर्ववर्णमयं देवं सर्वगं सर्वकृत् प्रभुम् ।

एतावत् पृथिवी चक्रे शिवान्तं तेन धार्यते ॥ १५ ॥

ंस् ख् मिस्सिन्ग् उम्तो हेरे

तत्र देव्यः समुत्पन्ना पिण्डाक्षर मयाशुभा ।

किम्कर्यो योगिनी चैव कपालीशन्तथा प्रिये ॥ १६ ॥

तासां शरीरतोत्पत्तिर्यथा वर्मीति तच्छृणु ।

गन्धपुष्प पवित्रैश्च वस्त्रैर्नानाविधैस्तथा ॥ १७ ॥

सकृ [ग: सकृद्] दयार्चितो देवो वाथिकाकर्म [ग: वार्षिका-] बन्धना ।

मोचते तत्वविज्ञानौ किमुतो वहुयोर्चना ॥ १८ ॥

एवं संपूज्य लान्ती शंस्तव्धरोमो महामति [ग: -तिः] ।

गुह्यका [ग: -काः] पूर्वसिद्धाद्या [ग: -द्यास्] ततो मन्त्रान् समुद्धरेत् ॥ १९ ॥

एवोद्धृतेषु मंत्रेषु सम्यक् सिद्धिर्नदूरतः ।

अतोद्धारं समासेन कथ्यमानं निवोधमे ॥ २० ॥

ऐन्द्रारे प्रथमं बीजं ततो लान्ती शमुद्धरेत् ।

लंवकन्तु अधोभागे शिश्नन्तु तदनन्तरम् ॥ २१ ॥

हृदयन्तु अधोभागे एन्द्रात् [गः ऐन्द्रात्] षष्ठे विभेदितम्।

एवं देवि तवाख्यातं [गः -त] पिण्डरूपधरं शिवः [गः शिवम्] ॥ २२ ॥

नवान्तमुद्धरेत् पूर्वन्ततो लान्तीश भैरवम्।

लंवकं शिश्न हृदयं रुद्रयुक्तं महावलः [गः -लम्] ॥ २३ ॥

एतद् देवि समाख्यातं रक्ता [गः रक्तां] पिण्डमनुत्तमम्।

ऐन्द्राच्चतुर्थबीजन्तु प्रथमन्तु समुद्धरेत्॥ २४ ॥

लान्तीशा चोद्धरेल्लंवं शिश्नि हृद्रुद्र संयुतम्।

ऐन्द्रात् षष्ठ्य समायुक्तं कराला पिण्डमुत्तमम्॥ २५॥

ऐन्द्रात् तृतीयकं लान्तं लंवकं शिश्नहृन्तथा।

रुद्रयुक्तं महादेवि पिण्डं चण्डाक्षि पूजितम्॥ २६॥

ऐन्द्रात् षष्ठञ्चलान्तीशं लंवशिश्नन्तु योजयेत्।

३३०अ गृ हृदयं रुद्रयुक्तन्तु महोच्छुष्मा तु पिण्डकम्॥ २७॥

ऐन्द्रबीजात् परं बीजं लान्तीशं लंवकावृतम्।

श्रुतीन्द्रियेधो हृदयं रुद्रान्तन्तु सदास्मरेत्॥ २८॥

करालिकाया [गः -याः] कथितं पिण्डं परमदुर्लभम्।

इन्द्राद्यायद्भवेद् बीजं द्वितीयं कपरेश्वरम्॥ २९॥

लंवशिश्नाधो सद्भावं स्तंभोन्तं दन्तुरामयम्।

पिण्डन्तु कथितं देवि सर्वसिद्धयुदयात्मकम्॥ ३०॥

ऐन्द्राद्यं यद्भवेद् बीजं लान्तीशं लंवकान्वितम्।

लिङ्गं हृदयसंयुक्तं स्तंभान्तं कूटमुत्तमम्॥ ३१॥

कथितं भीम वक्रायाः पिण्डराजमनुत्तमम्।

ऐन्द्राद् बीजं सलान्तीशं हर गुह्येन्द्रयान्वितम्॥ ३२॥

हृदयं यज्ञ संभिन्नं पिण्डमेतन् महोदयम्।

महावलाया देवेश सर्वकामार्थ साधकम्॥ ३३॥

३२८ब् ख्] पञ्चमं चक्रमध्ये तु लान्तीशन्तु ततो न्यसेत्।

लंवकं शिश्नहृदयं षट्कभिन्ना तु क्रोष्टुकी॥ ३४॥

षष्ठान्तमैन्द्रबीजन्तु लान्तं लंवञ्च गोलकम्।

कमलालयं सरुद्रन्तु विजया पिण्डमुत्तमम्॥ ३५॥

सप्तमाद्य शलान्तीश लंवलिङ्ग हृदं पुनः।

स्तंभ युक्तं [ग: वृक्तं] समाख्यातं गजकर्ण्यास्तु

पिण्डकम्॥ ३६॥

पञ्चमं लान्त लंवञ्च आद्यस्थं हृत् सरुद्रकम्।

महामुख्याः [ख: -मख्या] समाख्यातं पिण्डमेतत् [ग: -

मेतन्] महात्मने॥ ३७॥

ऐन्द्रा [गः ऐन्द्रात्] तृतीयकं बीजमधस्ताल्लान्त भैरवम्।

लंवकं शिश्नसंयोगा [गः -गाद्] उद्धृता वियत स्थितिः॥ ३८॥

ऐन्द्रा तु [गः ऐन्द्रान्तु] षष्ठ संयोगाच्चक्रवेगा प्रकीर्तिता
[गः -ताः]।

दशान्तं नाभिगं लंवं शिश्नं हृदयसंयुतम्॥ ३९॥

षट्कयुक्तं समाख्यातं महानासा सुपिण्डकम्।

एषा योगी स्मृता षष्ठा त्रैलोक्या कृष्टिकारिका॥ ४०॥

एकत्र देवदेवीनां कूटानि सहयोगिभिः।

एतानि तु यथान्यायमुद्धृतानि यशश्विनि [गः यशास्विनि]॥ ४१॥

कूटेन रहितो मंत्री यस्तु साधनमारभेत्।

न तस्य जायते सिद्धिर्जन्मकोटिशतैरपि ॥ ४२ ॥

कूटे तु संस्थितो देवः कपालीशो वृषध्वजः।

गुह्यका चैव योगिन्यः किङ्कर्योमातरस्तथा ॥ ४३ ॥

अविदित्वादिमं सर्वं यः पूजां कर्तुमर्हति।

हनतेमुष्टिनाकाशमीहते मृगतृष्णिकाम् ॥ ४४ ॥

अनन्ता [गः अनन्तात्] पार्थिवं यावत् सर्वाधार विवक्षया।

चतुर्विंश विभागस्थं चिद्देह [गः -हं] भोगसाधनम् ॥ ४५

॥

प्रकल्प्यादौ महादेवि सर्वावयव संयुतः ।

भूतपिण्ड स्वमन्त्रैस्तु सकलं प्रणवेन वा ॥ ४६ ॥

३३०ब् ग्) अष्टत्रिंश कलाधारं सर्वावयव भूषितम् ।

आत्मदेहन्तु भूताख्यं कृत्वा विद्यात्मक [ग: -कं] न्यसेत् ॥

४७ ॥

शास्त्रोक्त देहरूपन्तु मंत्रोद्धारमयन्तु यत् ।

तत्कृत्वा वक्र विद्याङ्गं युक्तं विद्याशरीरकः [ग: -कम्] ॥

४८ ॥

विष्टयाकारकाध्वायो सा मूर्तौ स्थूलता कृति [ग: कृतिः] ।

षट्त्रिंश भोगतत्वात्मा वृत्तिसंयोगकारणः [ग: -णम्] ॥ ४९

॥

सामर्थ्यगं विवेकेश्च [ग: -कैश्च] ज्ञेयो विद्यात्मको हि सः।

अध्वा [ग: अध्वाः] शरीरसिद्धयर्थं शक्तिमंत्र विवक्षया

॥ ५० ॥

तद्देह संस्थितो न्यायो तेजरूपो व्ययात्मवान्।

सर्वतस्तु शरीरेस्मिन् क्षीरज्यं [ग: -राज्यं] सदृशस्थितः॥ ५१

॥

तस्थोप्यन्य स्वरूपो सौ [ख: ?] तत्व [ख: ?] धर्मविवर्तना [ख:

?]।

ंस् ख: पगे नो। ३२९अब् उन्च्लेर्

दृष्टो सौ देवतेशा निफलदस्तु वरानने ॥ ५२ ॥

यथाद्या सिवमूर्तस्तु अदृष्टवपुषोवलम् ।

दृष्टं ग्रहात्मकं वद्धमन्त्राणाञ्च विवक्षयेत् ॥ ५३ ॥

भूत निर्धारणे चैव साधवौ तु तथात्रवै ।

आत्मविद्यात्मके देहे शिवत्योक्तं तथाफलम् ॥ ५४ ॥

किन्तु दृष्टान्तमात्रेण तत्समत्वं न पुज्यते ।

यतस्तु निष्कलोनाथज्ञानादिकरणर्यतः ॥ ५५ ॥

पुर्यष्टक विनिर्मुक्तस्तत्सरूप फलोन हि ।

यैस्तु संप्रोच्यते कर्ता सर्वज्ञत्वादिभि प्रिये ॥ ५६ ॥

काद्यस्तु मानयोगेन जगत्यस्मिन् क्रियात्मके ।

ज्ञानेच्छासं विवेकेन प्रभुत्वेना तु सङ्गतौ ॥ ५७ ॥

तत् समानफलन्तेन शिवभावानुरञ्जिताम् ।

नभूत नभूत वियसङ्ग्राहं स्थूलान्तः करणादिषु ॥ ५८ ॥

सदृशन्तु फलन्देवि कथितं शिवविग्रहो ।

देव्युवाच

एकोधवान शिवोय्येक एकशक्तिशिवाव्यया ॥ ५९ ॥

कर्माकर्मैकता तत्वा त्रिखण्ड ध्वनि दृशयते ।

क्रिया च त्रिविधानाथ तन्त्रेतन्त्र उदीरता ॥ ६० ॥

आसनत्वेन मूर्तौ च शंभुभ देहविवक्षयेत् ।

यदासन त्वयां प्रोक्तं सर्वाध्वस्तु इदं विभोः ॥ ६१ ॥

तथा च सर्वगा मूर्तिः शिवस्थे?क्ता फलोदया ।

शिवदेहञ्च यन्नाथ तत् तत्वैर्नीरिता भवेत् ॥ ६२ ॥

त्रितत्व रूपभेदेन संशयोद्यापि मे महान् ।

अविभाग क्रियान्यस्य विभागो वा त्रिधाध्वरम् ॥ ६३ ॥

त्रिरध्वरा त्रिधामोक्य? अधोध्वाध्वान कल्पितः ।

समन्ताध्वं त्रिधानस्यादस्ति चेद्वागमान्यतः ॥ ६४ ॥

योगेन तन्निवर्तेत तथा मन्त्रजपेन च।

वह्निकार्ये विधानेन व्याधिघातं समाचरेत्॥ ३८॥

अभिषेकश्च पर्वेषु पूर्वोक्तैस्त्वौषधान्वितम्।

वायुवीज सरेफोर्ध्वं मात्राया तु द्वितीय या॥ ३९॥

बिन्दुनाच्च [गः -ना च] विनिर्यान्तं वायुना सहमेकतः।

स्मरेद् व्याधिं सदा कृष्णश्वेतञ्चाप्या मृतान्वितम्॥ ४०॥

द्वितीयस्वरनिर्मुक्तं केवलं बिन्दुयोजितम् [गः -जि *?]।

३४२ब् ग्] वामदक्षिण चोभाभ्यां पार्स्वाभ्यां [ग:
पार्श्वाभ्यां] संविशोधयेत्॥ ४१॥

द्वितीयोपि हि बिन्दोन्तौन्नयेत् [ग: -न्तौनयेत्] तत्वे निरामये।

शृष्टिरुद्र [ग: सृष्टि-] समायोगा [ग: -गान्] महामृत
विवर्षणा [ग: -णो] ॥ ४२॥

महोदधौ सुफेनाढ्ये फेनामृत समुद्भवः [ग: -वम्]।

नवनीतमयं यद्वत् स्मरेद् देहं स्वकं प्रिये॥ ४३॥

सितपद्मासना रूढं दीप्यमानामृतात्मकम्।

न्यासं शितं स्वमन्त्रेण एवं रोगाद्रजा जपेत्॥ ४४॥

तेजात्मा योगतं वापि विलोमेन सदाशिवम्।

पूर्ववीजेन तत्कृत्वा नमः प्रणव वर्जितः [ग: -तम्] ॥ ४५ ॥

कुलमन्त्र समाख्यातं पूर्वयोग विसोधितम् [ग: विशो-] ।

द्रव्यन्यस्तं तथा जप्तं मृताह्वे रुग्विनाशनम् ॥ ४६ ॥

भेषजं वा प्रयोजीत रायुर्वेदोक्त [ग: आ-] लक्षणम् ।

मंत्राराधन हेत्वर्थन्न देहार्थन्तु भक्षयेत् ॥ ४७ ॥

औषधानि महावीरे यतो देहं न कारयेत् ।

कालमन्त्रं जपं चर्यायाग होमात्म पञ्चमम् ॥ ४८ ॥

नियमन्तु समाख्यातं सास्त्रयस्य [ग: -श्रयस्य] महात्मने ।

स्वप्ने शुभाशुभे वादे पात्रावेशे च पर्वके ॥ ४९ ॥

शस्त्रलाभे सखट्वाग्ने द्रव्यप्राप्तौ गृहागते ।

वीरेथ गुरवे सिद्धिर्निर्घातोल्कादिनिः [ख: सिद्धि * * * * *?]

स्वनः [ख: ?] ॥ ५० ॥

ंस् ख: पेगे नो । ३४२अब् उन्च्लेर् फ़्रोम् हेरे

३४२अ ख्) मृते समयिने राष्ट्रयतौ चान्यौपि शोभने ।

कार्य प्राते विशेषेण यागं कुर्यात् महामति ॥ ५१ ॥

अन्नया नाशयाद्यैस्तु तद * चा * * * नवा ।

* * * * * * * * * * * * * * * * ॥ ५२ ॥

भैरव उवाच

एवं वृत्तरामा युक्तमेकाकी स्थान वर्जितः।

भ्रमं सिद्धिमवाप्नोति स तु वीरो निराश्रयः॥ ५३॥

* * * * स्तु तस्यापि स्वमंत्राद्यस्त्र संयुतः।

लोकयात्रा विनिर्मुक्तो गृहधर्मविवर्जितः॥ ५४॥

वलोत्साहस्तु संपन्ना योगेशी ष?मयेत् सकृत्।

यथा लाभाय चरुकं पात्रप्राप्तं नवर्जयेत्॥ ५५॥

न तत्र भावयेत् सौख्यं न च दुःखं न सङ्गतिः।

न दोषश्चोपकारेण न कोपोप कृतो प्रिये॥ ५६॥

दिनैकद्विजयं वापित्रि चतुः पञ्च एव वा ।

एकस्थान स्थिरश्चर्या कृत्वान्यत्र व्रजेन्मति ॥ ५७ ॥

तीर्थस्थानानि यात्रायां धमेच्चर्यान्वितो गुणी ।

स्वमन्त्रश्चोदेशाश्च स्वगोत्रं स्वकुशा?नि च ॥ ५८ ॥

नोदीरयेन्न लोकेस्मिन् प्रकटो नैव भाषयेत् ।

तुरादिकं समस्तन्तु आचारं सा श्रयात्मकम् ॥ ५९ ॥

सामान्यैः किन्तु चैकाकी तेनोक्तस्तु निराश्रयः ।

विशेषोन्योपि येना * * अन्तरङ्ग प्रधानता ॥ ६० ॥

क्रिया क्षेत्रादि संयोगो नित्ययुक्तः समानता ।

३४३अ गृ॒ कथिता तु द्वितीयस्य सिद्धिकामस्य भैरवि ॥ ६१ ॥

भैरव उवाच

मात्रालङ्कार निर्मुक्तो यथा लब्धोपजीवकः ।

हस्तमात्राक्ष सूत्री च यजनात्मस्थ संश्रयः ॥ ६२ ॥

दिग्वासो वाथ प्राण्यङ्गवासौ वाग्वादवर्जितः ।

प्रतोलितोरण स्थान प्रदेशः परिवर्जितः ॥ ६३ ॥

त्यागादान विनिर्मुक्तो यागैक कृतनिश्चयः ।

श्मशानगोपुरोद्यान एक वृक्षाश्रयोनिशि ॥ ६४ ॥

दिवाचोद् भ्रान्त पत्रेव भ्रमञ्चेष्टास्वका स्मरेत्।

पुष्पं तोय विनिर्मुक्तोमानदंभ विवर्जितः॥ ६५॥

जटामुण्ड शिखीनैव नोपवीतं विधारयेत्।

व्रतग्रहण सेवाद्यं नान्यहोमं स्थितन्तु तत्॥ ६६॥

उच्चासनन्न नीचंवासमनिम्नोन्नतानि वा।

न संश्रयेन् न कुष्येत न च तोषः सुखासने॥ ६७॥

विविक्त वुद्धिः सर्वत्र नाविविक्तां विभावयेत्।

आत्मन्तु जपं पश्येदहं वीजगतिस्थितः॥ ६८॥

न गृहं कस्यचिद् गच्छेन्न गृहस्थैः समं प्रति।

एवं पर्यटतस्तस्य निग्रह यस्य महात्मनः॥ ६९॥

योगिन्यः सिद्धिदा देवि षण्मासाभ्यन्तराद् भुवम्।

भवन्ति वीरराजस्य तत्व युक्तस्य भैरवि॥ ७०॥

भैरव उवाच

नग्न प्रेतमिवोन्मत्तन्न तु देह्येतिमब्रवीत्।

न पथं कुपथं वापि न गतिर्नागगतिः स्थितिः॥ ७१॥

नतत्वं तत्त्व सन्धानं न योगे प्राणि योजनम्।

नाडीकाल कलारूपं वर्णावयव कल्पनम्॥ ७२॥

न कुर्यादात्मभावेन आराध्याराधके क्षणम्।

न योयोनापि चा योगः पृथग्भिन्नङ्कथञ्चन ॥ ७३ ॥

अभक्षणे तथा भोज्ये न विधिः प्रतिषेधककम्।

नित्योदितः स्वरूपेण स्थितं तच्च महात्मने ॥ ७४ ॥

समत्व सर्वमेकस्थं दृष्ट्वालंवन वर्जितम्।

सिद्धयते देव देवेशे मासमात्रेण सुव्रते ॥ ७५ ॥

इति ब्रह्मयामले द्वादश साहस्त्रके त्रिनवतिमः पटलः ॥

भैरव उवाच

साधारणस्तु सर्वात्मा सर्वातीतो निरञ्जनः।

सर्वात्मकस्तु देवेशो साधकः परिकीर्तितः॥ १॥

व्रतचर्यास्त्व शेषास्तु त्रयस्यापि क्रिया स्मृता।

समाचरन् महात्मा तु सौ तु साधारण स्मृतः॥ २॥

विशेषतो यथा कामां परिग्रहणमाचरेत्।

अव्रतघ्नस्य तस्यैवां जायते सर्वसिद्धयः॥ ३॥

येन येन हि वेषेन व्रतेन नियमेन वा।

क्षेत्ररक्षा विधानेन द्रव्येना चरणेन वा॥ ४॥

निष्ठानिष्ट व्रतेनापि भवेत् सर्वात्म वृत्तिना।

३४३ब् ग्) न व्रतं शास्त्रसंसिद्धं न चापि नियमं क्वचित्॥ ५

॥

वर्धमानव्रतेनाथ सर्वातीततत्वतां व्रजेत्।

त्रयाणां व्रतचर्याभिः कृताभिरकृतानि च॥ ६॥

लेपालेपौ न यस्यास्ति स तु वीरो निरञ्जनः।

स रुन्द्रे सर्वतत्वानां मन्त्राणाञ्च महेश्वरि॥ ७॥

समैव तु मतिर्यस्य ज्ञानयोगागमादिषु।

परत्वे चापरत्वे च क्रियाकालात्मवृत्तिषु॥ ८॥

स्थितेपि धर्निता तस्यास्तादात्मी सौ निरञ्जनः।

ंस् खः उन्च्लेर् उप्तो हेरे

आराधकादिवृत्तानां वृत्तिष्वे वा मृतः क्वचित्॥ ९॥

३४३अ ख्) न गृह्यते विलोमेन शङ्करी चाप्यशङ्करी।

देव्युवाच

एको मन्त्रः शिवः शक्ति [गः शक्तिस्] तथाध्वा दृक्रियापि [गः दृक्क्रि-] च॥ १०॥

वृत्तिभेदोन्यथा दृष्ट्वा द्वैतभावं प्रणश्यते।

भैरव उवाच

सत्यमेव समानं हि मन्त्रस्थ [गः -स्थः] सर्वसाधनम्॥ ११॥

मनो निवृत्ति हेत्वर्थं [ग: -र्थ] वृत्तिभेदो गणांविके ।

पूर्वैव शक्तिसंयोगो भावाभावात्मकस्त्रिधा ॥ १२ ॥

सान्निपातिकवृत्तिश्च प्रख्यातो गुह्यकाश्रमे ।

फलैकसाधकानान्तु चित्तशक्तिशिवेच्छया ॥ १३ ॥

अविभिन्नं विभेदेन दृश्यते जलचन्द्रवत् ।

दृष्ट्वा [ख: दृष्ट्या] हा हानि सामान्या कूपाद्यं

स्थानसंज्ञया ॥ १४ ॥

न भेदोदक शक्तेस्तु तृषाहानौ वरानने ।

भेदोवृत्त प्रभेदस्य फलभेदो न कल्प्यते ॥ १५ ॥

साधनै [ग: -नैः] साधकत्वं हि तच्चभिन्नं चतुर्विधम्।

विभेदोभाव भेदेन प्रसद्यति न चान्यथा ॥ १६ ॥

फलसमेपि विन्यासमेवं दृष्टं न चान्यथा।

इति पिचुमते द्वादशसाहस्त्रके चतुर्नवतिमः पटलः ॥

देव्युवाच

समुदायो [ग: -यस्] त्रिभिर्नाथ ज्ञान पूर्वोयथा तथा।

सिद्धिमुक्ति प्रसिद्धयर्थं यथा [ग: प्यथा] तथ्येनमेव व ॥ १

॥

भैरव उवाच

साधु साधु महाभागे सर्वज्ञानार्थभाजने ।

निराचारा वधूतस्य सूत्रस्य वरवर्णिनि ॥ २ ॥

समुदायः परानाडी लयालय विवक्षया ।

सर्वगा सा हि सारीरे [ग: शा-] योगेत्वे काकिनीमता ॥ ३ ॥

नव यागात्मके चैव विधाने देहलीगतम् ।

लक्षं कृत्वैक वीरादि विभागास्तु समाचरेत् ॥ ४ ॥

महायागविधौ देवि गर्भावरणमारभेत् ।

स्वयागे चाङ्गविन्यास [ग: -सं] महास्थाना [ग: -न]

समाश्रयः ॥ ५ ॥

महायागो भवत्येवं तूराणान्तु नृशङ्खजम्।

मुद्राणां चन्द्रिकात्वेका सखट्वाङ्गा [ग: -ङ्गाः]
प्रकीर्तिता [ग: -ताः] ॥ ६ ॥

३४४अ ग्) नृमांसधूपयुक्तीनां अर्घानां
कृष्णनामिकाम्।

स्वशरीरन्तु क्षेत्राणां मुद्रा पञ्चामृता परा ॥ ७ ॥

शक्तीनां द्रव्यसङ्घातं पुरक्षोभायकन्तथा।

ऊर्ध्वनाडी तु सर्वत्र भुक्तिमुक्तिक्रियास्वपि ॥ ८ ॥

भूतविद्या शिवाद्यानां कर्मभोगविमुक्तयः।

जातिवर्णगुणाकार सत्तामन्त्रात्म लक्षणे ॥ ९ ॥

धानदं स्वचरूणान्तु व्रतानां वर्द्धमानकम् ।

खरतूरविधौ कर्मसाधने चोपमार्जनी ॥ १० ॥

३४३ब् ख्) द्विकोवुक महानेत्री भवेत् सिद्धिविधौ त्रिधा ।

वज्राद्यं शस्त्रसङ्घातं वर्णप्रीतादिका प्रिये ॥ ११ ॥

चतुरस्त्रादि वज्राङ्काधारणा व्योममन्तिका ।

करन्यासादिक [गः -कः] प्रोक्ताः क्रिया सर्वा न चान्यथा ॥ १२ ॥

आवाहनादिकान्या च भवेत् पुष्पाष्टकान्विताः ।

उल्लेखनादि पूर्णान्ता [गः -न्ताः] याचकात्मक्रिया स्मृताः ॥

१३ ॥

क्षेत्रद्रव्य [खः क्षे?त्र-] सहायानां शक्तिनाञ्च विधौ

सदा ।

ग्रहणे तु स्मृतो योगोगनेन्द्रस्यादिमः [गः -णेन्द्रस्यादिमः]

सदा ॥ १४ ॥

भस्मकौ पीनकानान्तु जटानियमकादिषु ।

यागपूर्वोग्रहः प्रोक्तोमध्यस्थञ्च विमोचने ॥ १५ ॥

च्यवने वाथ विक्षोभे विपर्यस्ते च साधने ।

कामा पदानकामे च लक्षादित्रिगुणं जपेत् ॥ १६ ॥

शक्तिसाधकद्रव्याणां शङ्करे च तथा भवेत् ।

दुःस्वप्नेशत जापन्तु सहश्राणीष्ठ सूचने ॥ १७ ॥

मृते च स्वजने [खः ?] सैवे तथा सन्ध्या विधिर्विना [गः ?] ।

द्वैतमंत्रस्य निर्माल्यं भक्षणेत्व युतं जपेत् ॥ १८ ॥

वाग्वाद् वाह्यकथने वृद्धाव स्कन्धने तथा ।

सा श्रयाश्रय भङ्गे च लक्षजापाद् विशुद्धयति ॥ १९ ॥

महापातक संयोगात् तथा चैवोपपातकान् ।

पातकानाञ्च सुश्रोणि लक्षादि दशधा दधः ॥ २० ॥

देव्युवाच

ब्रह्महत्य [ग: -हत्या] सुरापानं स्तेयं गुर्वङ्गणागति [ग: -
नागतिः] ।

संयोगच्च [ग: -गश्च] समानो वा पातका गुह्यसाधने ॥ २१ ॥

भैरव उवाच

यद्यप्यन्तु? [ग: -प्यन्द्र] विधिर्दृष्टः पाशवे तु विधौ
स्फुटम् ।

तथापि न फला वाप्तौ वनन्नेष्ट गणांविके ॥ २२ ॥

योगेन प्रार्थितश्चापि भव्यं वातसदूषणम् ।

पतिशक्ति नवक्तारं हन्यान्तेन नदोषभाक् ॥ २३ ॥

अपुशुं पशुवकृत्वायो [ग: वक्तृत्वाद्यो] हन्यात् पापदुर्मति

[ग: -तिः] ।

ब्रह्महत्या भवेत् तस्य भक्षहेतोर्निपातितः ॥ २४ ॥

योन्यामेलापकानान्तु नैवेद्यार्थन्तु मेव वा ।

गुरुवृद्धार्थ [ख: गुरु * * *?] वीराणां [ख: ?] सङ्गमे
देवताग्रतः ॥ २५ ॥

३४४ब् ग्] निपातयन्न दोषस्यात् पर्वेषुवलिकांक्षया [ग:
पर्वेषु * * काङ्क्षया] ।

लोलुत्वा श्रयवृत्तेन विनार्घविधिना पिवेत् ॥ २६ ॥

३४४अ ख्] सुरापानात्मको दोषोभवेत् तस्य न संशयः ।

परश्वहरणं एवं [ग: सर्वे] सर्वकालविगर्हितः [ग: एवं

काल- -तम्] ॥ २७ ॥

गुर्वङ्गमागमं यस्तु तत्सर्वस्यातकारणम् ।

संपर्कश्च सहैतेभ्यो न शास्तस्तु [ख: ?] क?दाचनः [ग: -न] ॥

२८ ॥

तन्त्रमार्ग प्रसिद्धेन विधिनावर्तयं सदा ।

प्राप्नुयात महादेवि सिद्धयो मनसेप्सिता ॥ २९ ॥

कलिकस्तु विधिर्योक्तस्तत्रैतास्तु न यन्त्रणा ।

निराचार पदावस्थां लोकधर्म विवर्जिताम् ॥ ३० ॥

गुरोर्द्धरगता नान्तनिज जातिषु निस्पृहाम् [ग: निःस्-] ।

तेषां पर्यनियोगन्तु न भवेत् समयादिकम्॥ ३१॥

इलि सिमिका पदाद्या तु विद्या सप्तदशाक्षराः।

पूरणी तु विशेषस्य [गः -स्यं] कुलाचारस्य भैरवि॥ ३२॥

तन्त्रसिद्धामथान्येषां व्याख्यातं कुलसाधनं।

पशुयागादिकं सर्वं [गः सर्व] यथा दृष्टन्तथा चरेत्॥ ३३॥

हीनाधिक विधिर्योहि तन्त्रे प्रोक्तो न पूरितः।

स्मरणोचार योगेन सर्व संपूर्णतां व्रजेत्॥ ३४॥

द्रव्यमन्त्र क्रियाणान्तु सुरभ्यापूरणं हितम्।

शेषं ध्यानादिभिर्देवि विख्यातं सिद्धिपूरणः [गः -णम्]॥

३५ ॥

यदन्यदपि तन्त्रेस्मिन्नोक्तं संपूर्णलक्षणम् ।

स्मरणं योजयेत् तत्र सर्वसंपूर्णकारणम् ॥ ३६ ॥

इति विद्यापीठे ब्रह्मयामले पञ्चनवतिमः पटलः ॥

देव्युवाच

क्रियाकालां शवेत्तातु यदा साधनमाचरेत् ।

संयोगस्तु कथन्तस्य येन सिद्धिर्मनेप्सिता ॥ १ ॥

भैरव उवाच

वर्णमुच्चार्य नाभ्यव्जे क्षोभोत्पन्नं यथा पुरा ।

स्थानात् स्थानान्तयेत् कालं स्वांअसलक्षाणि लान्वितम्॥ २॥

धारणा नाडि योगाङ्ग [ग: -ङ्गैः] प्रत्याहारादि योजनम्।

स्वस्थान लययोगेन युक्तं सिद्धिप्रदं भवेत्॥ ३॥

पञ्चकारण योगेन त्रिशून्येनात्मसंयुतम् [ग: त्रिः-]।

सकलं निष्कलंवापि क्रियाकालात्म [ग: -कालांवा] योगतः॥

४॥

वह्वक्षरेषु तद्वच्चनाड्यादि परिकल्पितम्।

समुच्चारमनुच्चारङ्कर्तव्यं सर्वसिद्धिदम्॥ ५॥

कलाकूटपदानान्तु तथा रूपं समभ्यसेत्।

जातिवर्ण विभागेपि तत्समं [ख: ?] व्रतमाचरेत् [ख: ?] ॥ ६ ॥

३४४ब् ख्) कुलमंत्रेषु सर्वेषु क्रियाकालात्मवर्जनम् ।

मुद्राणाञ्च यथा भीष्टक्रियाद्यं परिकल्पयेत् ॥ ७ ॥

३४५अ ग्) क्रियाकलात्मकं [ग: -लांशकं] ध्यानं
नेत्रयोगमशेषकम् ।

लयालयविभागेन नयेत् स्वेच्छा समाप्तये ॥ ८ ॥

यस्य मंत्रस्य यत्स्थानं फलस्याध्व [ग: फलस्यांध्व]
विभोक्रिया [ग: विभोक्रिया] ।

स्वेच्छा विभागभक्तात्मा तत्फलं समवाप्नुयात् ॥ ९ ॥

वर्णध्यानादि संयुक्तं प्रक्रियाकारसंयुतम् [गः -ताम्] ।

आत्मा समत्व वृत्तेन यत्र यत्रलयं व्रजेत् ॥ १० ॥

तत्स्थान सदृशं तस्यफलं योगात् प्रभाषते ।

नायुक्ते तु फलावाप्ति अन्तरङ्गवहिर्गते ॥ ११ ॥

लयान्ताक्षगणा देवि सर्वानाड्यादि योजने ।

समुच्चारे निरुच्चारे निर्भास्ये ज्ञानयोजिते ॥ १२ ॥

निष्कलङ्क कलावस्थे युक्तयोगेन्यथा न हि ।

स्वेच्छाफलं [खः * *?फलं] महागौरि साधकस्य वरानने

॥ १३ ॥

उक्तङ्काल क्रियायोगं त्रिशून्ये [ग: त्रिः-] तु यथा तथा ।

साधकानां हितार्थाय किमन्य [ग: -न्यत्] परिपृच्छसि ॥ १४ ॥

देव्युवाच

सर्व एवोदितन्नाथ मन्त्रयोग क्रियात्मकम् ।

ज्ञानयोगन्तु मेध्यातं निराचारगतं तथा ॥ १५ ॥

सांप्रतन्देवदेवेश महाश्वरकरन्नृणाम् ।

विज्ञानपञ्चकं ब्रूहियया [ग: -यथा] तथ्यं सुरेश्वर ॥

१६ ॥

प्रवेशन्तु [ख: प्रवे * *?] पुरेनाथ [ख: ?] पाशस्तोभं

सुशोभनम् ।

तथा च स्तंभनन्देव वीरचित्तानुरञ्जकम्॥ १७ ॥

पशुमुद्रणयोगञ्च पशुमुत्क्रामणन्तथा।

आत्मगञ्च परेषाञ्च सद्यः प्रत्ययकारकम्॥ १८ ॥

भैरव उवाच

ज्ञात्वा तु स्मरणं पूर्वं [ग: पूर्व] सारीरञ्च [ग: शा-]
वरानने।

नाडीसन्धान विन्यासं [ख: ?] ग्रहणञ्च [ख: *?ह-]
यथोदितम्॥ १९॥

विज्ञानपञ्चकं पश्चादनभ्यस्तेपि युज्यते।

आसनं [ख: ?] रुचिरं [ख: ?] वध्वा येन याति ऋजुत्वता ॥ २० ॥

शरीरन्तु महादेवि चक्रेदोषो महाभवेत् ।

हृत्पार्श्व गुह्यदो [ग: -दोः] सन्धिनासाधरसिरोधरम् [ग:
सन्धिर्- -शिरोधरम्] ॥ २१ ॥

नियम्य वायुमापूर्य आपादतलमस्तकम् ।

निरोध्य तेज सोद्भाष्य हृत्पद्म कृतकन्दकम् ॥ २२ ॥

पार्थिवेना निरुद्धेन पीतेन कटिनेन [ख: ?] च ।

स विन्दुकेन वर्णेन वज्राख्येन वरानने ॥ २३ ॥

नाडीमुखानि सर्वाणि मण्डलान्तेन घट्टयेत् ।

प्रणवाद्यादि गात्रीणि रुद्रोन्ता [ख: ?] बिन्दुसंवेता [ग: –
संयुता] ॥ २४ ॥

३४५अ खु) पाद्या तथा चतस्रस्तु पञ्चविंशस्तु भैरवि ।

विकरालान्त युक्तस्तु द्वितीयस्वर योजिताम् [ग: –ताः] ॥ २५ ॥

दशग्रन्थी श्वराह्येते पादाङ्गुष्ठ पुरः सराः ।

गुल्फजानु तथा नाभि हृत्कण्ठमुखबिन्दुकम् ॥ २६ ॥

ललाटे शक्तिमार्गस्थं क्रमात् क्षाद्य [ग: क्षाद्यं]
समाचरेत् ।

यशवर्गौ [ग: –वर्गाः] क्रमाष्टश्च [ग: क्रमा * *?] स्वर
ह्रस्वान्वितो [ग: –तः] प्रिये ॥ २७ ॥

३४५ब् ग्) आदौ ह्रीं ह्रूँ कृतान्ते तु क्रमात् कादिनिवेशयेत्।

ग्रन्थयस्तु महादेवि शक्त्याधार प्रतिष्ठिता ॥ २८ ॥

रावमुच्चार्य शक्त्यान्तं तथान्तस्थं पुनानयेत्।

क्रमा क्रामत् [ग: ?] प्रवर्द्धेत [ग: *?वर्द्धेत] तुट्याद्यं
योगसाधनम्॥ २९॥

तथा हृत्स्थ निविष्टन्तु द्विगुणन्तु समभ्यसेत्।

कृता भ्यासस्तु [ग: *?सस्तु] वै मन्त्री देहाद्देहं व्रजेत्
कषणात्॥ ३० ॥

आस्वाद चरुमार्गेण तत्प्रतिष्ठा [ग: ?] युतेन [ग: ?] तु।

पशुसाधन सिद्धेन पशुसङ्ग्रहणेन तु॥ ३१ ॥

विशोध्य साधको वीरनान्याद्येन क्रमेण तु ।

प्रविशेन्नात्र [ग: प्रविशे *?त्र] सन्देहो मृतजीव शरीरके ॥ ३२ ॥

काष्ठे पाषाण रूपे [ग: ?] वा [ग: ?] नृत्य [ग: ?] ये वा
महामति [ग: -तिः] ।

योगेशी योगत्वज्ञः प्रस्पन्दन कृतास्पदः ॥ ३३ ॥

सर्वमन्त्र क्रियायुक्तो नादशक्तिप्रदान्वितः ।

शिवादि नवभूतात्मा लक्ष शून्यत्रयान्वितः ॥ ३४ ॥

प्रणवाद्यादि [ग: * * *?द्यादि] योगेन क्रीडते खिलभूमिषु ।

भैरव उवाच

विंशमस्तु शिखाषण्ट पुरूषावेशके स्थितः ॥ ३५ ॥

सप्तादश शिरोनेत्र षष्ठमूर्द्धजदीप्तकम् ।

ऊनविंअशद्वयेनेव दृशाभ्यां परिवारितः ॥ ३६ ॥

त्रयोविंशन्तु वक्रस्तु चतुर्थस्वरनासिकः ।

आदिषट्कद्विजो देवि रसना त्रिश्वरादयः [ग: -स्वरादयः] ॥ ३७ ॥

व्याप्ती शवान्कृताटोपस्त्रयो विंशशिरोधरः ।

दक्षवामांशकैरात्मा [ग: -सकैरात्मा] दढ वाहु [ग: वा *?] युगोद्वहः ॥ ३८ ॥

द्वादशेन स्मृतौ बिन्दूर्नवमं [ग: बिन्दुर्-] दशमेन च ।

करजाभिसुशोभाढ्या जरशूलसषष्ठकः ॥ ३९ ॥

तृप हृत्थकपालञ्च [ग: हृस्थ-] प्राणभूत सदाशिवः ।

यो मृतानां परः सोत्माशृष्टि [ग: -सृष्टि] तत्वसमन्वितः ॥ ४०

॥

सप्तमेनाष्ट [ग: -नाष्ठ] विंशेन स्तनयुग्मद्विराहतः ।

एक [ग: ?] त्रिश्चोदरो [ग: ?] रौद्र [ग: ?] सिघनाभि [ग: * * *?भि]

विभूषितः ॥ ४१ ॥

प्रधानीश नितंवस्तु त्रिंशगुह्यस्तु [ग: -गुहास्तु] सुव्रते ।

बीजभूतानुस्वारेण [ग: -स्तारेण] शुसुभो [ग: सुशुभः]

षोडशोरुकः ॥ ४२ ॥

अग्नि वाम सुजानुस्तु कृतजङ्घा कृतादिकाम् [ग: कृतादिका?म्] ।

३४५ब् ख्] द्वाविंशाष्ठा दशौ पादौ साधकस्तु विनिर्मिमे ॥

४३ ॥

साध्यस्य च तथा रावमार्ग योगक्रमेण तु ।

वर्णद्वादशकं कृत्वा एकैकन्तु समभ्यसेत् ॥ ४४ ॥

प्राणवह्निस्तथा मायाबिन्दु युक्ताक्षराक्षरे ।

नयेत् तावशिखा [ग: -च्छिखा] यावद्दक्षिणा या गुहं प्रिये ॥

४५ ॥

आनीत्य [ख: आ * *?] वामया देवि हूं फटेन फकारकम् ।

वह्निवायु प्रचूरेणमण्डलेव [ग: -ले *?] प्रदीपितम्॥ ४६॥

पतते क्ष्मातले ताव [ग: तावद्] यावत् स्पृष्ट्वा तनुं क्षिपेत्।

३४६अ ग्] अयमेव महान्यासं सर्वपीतं प्रकल्पितम्॥ ४७॥

वज्रबीज कृतन्तद्वत् स्तंभ कृत्वखिलेजगे।

स्तंभितो नष्ट संज्ञस्तु तिष्ठते साधकेच्छया॥ ४८॥

पशोर्ग्रहणकं वक्ष्ये न्यासेस्मिन् प्राग्विनिर्मिते।

प्रतिबीजं प्रतिस्तत्व मेकैके पञ्चविंशकम्॥ ४९॥

लयालय विभागेन द्वादशः [ग: -श] द्विगुणेन तु।

चतुर्विंशोप संहारो वर्णसत्तापुमान्यथा॥ ५०॥

उपसंहृत्य पूर्वैव नाड्याताडन कर्मणा ।

पतते विद्ययायुक्तं संपुटाख्य नियोजनात् ॥ ५१ ॥

समाहृत्य प्रयोगेन [गः -ण] उदाना पानगेन तु ।

मज्जमांस समायुक्तं स्नेहञ्चाप हरेन्मति [गः -तिः] ॥ ५२ ॥

ते नैवो दानयोगेन मोचते व्योमवासनात् ।

सामृता प्यायनं कृत्वा पुनरुत्थापयेत् पाशुम् ॥ ५३ ॥

एत देव महान्यासं हूँ फट्कार विदर्भितम् ।

कृत्वाच्छिन्ने महास्त्रेण सुकृच्छृक त्रयोजनात् [गः प्र-] ॥ ५४ ॥

साकारा कारनिर्मुक्तं बिन्दुशून्य [ग: -न्यं] लयाल्लयम्।

नयेत् तावच्छिवं यावन्मूलच्छेदात्म धारणैः॥ ५५॥

पुनरागति निर्मुक्तं शुष्कनृक्षं [ग: -वृक्षं] यथा तथा।

न पुनः संघटो देहांशिवास्त्र [ग: देहाञ्छिवास्त्र]
किरणाहतम्॥ ५६॥

नीतमध्यानयेन्मन्त्री तदेवामृत योजितम्।

पञ्चानामपि देवेशो यदिमूलं न नाशितम्॥ ५७॥

देव्युवाच

मूलं किन्तत् सुरेशान येनात्मा रक्षते विभो।

महास्त्रादि विभागानां सुसूक्ष्मा कृतकर्मणाम्॥ ५९॥

भैरव उवाच

आदितत्वो महादेवि मलः सर्वाध्वसंस्थया।

पाशकर्म च तस्यैव बीजभूतस्यरूपकम्॥ ६०॥

मुमूर्छादेह कामित्वं भोक्तृकायं विभुस्तनौ।

मलभावास्तथा पाशातत्व [ग: पाशास्-] बन्धादिकास्तुये॥

६१॥

३४६अ ख्) भावभूत भुवनास्तु तत्र साधारणादयः।

विचित्रका [ग: -काः] स्वरूपाणां वर्ण तस्तुपृथग्विधा॥ ६२॥

सुखदुःखात्म [ग: -खात्म?] संवेत्ता वासना या विभासते ।

स्कन्धनाभि [ग: -नाभिस्] तथा नाडीस्फोटच्छेद् विवर्जनात् ॥ ६३ ॥

रक्षितस्तु महेशानि देवैरपि न बाध्यते ।

सूक्ष्मा सत्तामृतेन्दुर्य रक्षणीयः शुशोभनः [ग: सु-] ॥ ६४ ॥

तेनाशु पितरूपेण रक्षितं सकलंजगत् ।

एवमूलमिदन्देवि सर्वदेहे व्यवस्थितम् ॥ ६५ ॥

अविनास्य परावाप्तिविनास्य [ग: -वाप्तिर्विनाश्य] न पुनर्भवेत् ।

सर्वमेतत् समाख्यातं ज्ञानविज्ञानसंपदम् ॥ ६६ ॥

क्रियाकालांशसंयुक्तं किमन्यम्परिपृच्छसि [ग: –

मन्यत्परि–] ।

इति ब्रह्मयामले षण्णवतिमः पटलः ॥

३४६ब्) ग) देव्युवाच

सर्वमेव न सन्देहो भावोद्भासात्मके फले ।

मन्त्रयोगसंसंसिद्धे कथितन्तु रहस्यकम् ॥ १ ॥

कुलानां साधनं नाथ कथितन्तु पुरा यथा ।

तत् तथा विदितं सर्व [ग: सर्वङ्] कुलसिद्धिप्रदायकम् ॥ २ ॥

सांप्रतं सरहस्यन्तु योगेन कुलसाधनम् ।

कथयस्व सुरेशान मनोविस्मयकारकम् ॥ ३ ॥

भैरव उवाच

नदीनद समुद्रेवा महापर्वतनिर्झरे ।

चतुष्पथेथ शृङ्गाटे एकवृक्षे गुहालये ॥ ४ ॥

शून्यवेश्म चितारामे पुष्पारामेथ [ख: पुष्पा * * *?]
गह्वरे ।

स्थित्वा वीरो महासत्वसखायसहितो निशि ॥ ५ ॥

दशसप्तकुलं चक्रं ध्यायेत् सर्वान्दिशागतम् ।

भेदोपभेद संयुक्तं प्रसूति गुणविक्रमम् ॥ ६ ॥

मनोवेगाति वृत्तन्तु वसाश्रोणितलोलुपम्।

कन्दर्पमदमूर्छाभि रहितं प्रतिभाषितम्॥ ७॥

ध्यायेच्छरीरमायान्तं वरदाभय पाणिनम्।

द्वितीयं नाभिचक्रन्तु रावमार्गाविनिर्गतम्॥ ८॥

उदानेनोर्ध्वमायान्तं [ख: उदा *? नोर्द्ध-]
चक्रस्योन्मुखताङ्गतम्।

तथान्य भूतले देवि तथा रूपं विनिर्गतम्॥ ९॥

पृथग्भुवनवृन्दाच्च [ग: -वृन्दान्त?] शिवाद्योमागतं
क्रमात्।

तत् स्थरुद्रगुहोद्भूतं शक्तिसंघातनुक्षितं [ग: –
नूस्थितम्] ॥ १० ॥

अनन्तानन्तभावित्वं प्रतिभिन्नमनुस्मरेत् ।

तनुत्व भूतभावानां गुणाना [ग: –नां] कुलवाहकम् ॥ ११
॥

शिव चेतात्मशक्तिस्थं [ख: –स्थंम्] मृणालाख्या [ग: –
लाख्य] शरीरिणाम् ।

सर्वभाव विधाता रंध्यायेन्नित्यन्तु योजितम् ॥ १२ ॥

३४६ब् ख्] योगियोगं महेशानि महायोगेशि योजितः [ग: –तं] ।

निवातशरणाधारे समन्ताद्योतकारकम् ॥ १३ ॥

तत् तेजसा तु तद्युक्तं कुलसङ्घं महामते ।

क्षिप्रन्तत्मय तामेति स्वदेहा वेशलक्षितम् [ग: वेष-] ॥ १४ ॥

अशेषाध्वनि वाशिन्यः प्रतिप्राणिगतास्तु या ।

दृष्टे गोचरमायान्ति अव्यक्ताव्यक्त मूर्तयः ॥ १५ ॥

यदापि हि मनोद्यन्त [ख: ?] वृन्त्याह्येतन्मनुस्मरेत् ।

षट्मासाभ्यन्तराद् [ग: षण्-] देवि कुलासामान्यतां व्रजेत् ॥ १६ ॥

अशेष योगिनी नाथ कुलविज्ञानसंपदः ।

भवते साधकेन्द्रस्तु भैरवेश इवा परः ॥ १७ ॥

कुलज्ञानानि यावन्ति अशेषाध्व स्थितानि तु ।

वेत्ति सर्वाणि देवेशि ददाति च तदर्थिनाम् ॥ १८ ॥

नाभ्याव्जाद्रावमार्गेण [ग: नाभ्याव्ज-]

मु?मोचध्वनिरामयम् [ग: मुनोचाध्व-] ।

३४७अ ग्) कुलचक्रं परेव्योम्नि यावत् तन्मयताङ्गतम् ॥ १९ ॥

कालरुद्रात् समारभ्य कुलचक्रमशेषकः [ग: -कम्] ।

शिवस्थाने प्रपात्येवं महामेलापकन्तुतम् ॥ २० ॥

शेषं सदाशिवारभ्य पृथग्भोगजिगीषया ।

स्मरेन्मेलापकान्तावद् यावत् कालाग्निसञ्चरम् ॥ २१ ॥

तात्विकैर्भोगभोगैस्तु सुतृप्तातोषसंयुता ।

ददन्ति शक्तयः कामात् तत्तत्व विधियोजिता ॥ २२ ॥

हृत्कण्ठतालु विन्दौचनाद शक्तितदन्तगे [ग: शक्तिस्तदन्तगे] ।

स्थाने ददन्ति तद्भोगां व्याप्ति [ग: याप्ति] सिद्धिसमन्वितान् ॥
२३ ॥

एकनादात्मका [ग: -को] वापितत्वोच्चार समन्विता ।

सर्वगा कुलजा सिद्धिर्जायते वीरवन्दिते ॥ २४ ॥

मातृयोगिनिकायानि शाकिनीनां कुलानि तु ।

सिद्ध्यन्ति साधकेन्द्रस्य योगनानेन [ग: योगे-] सुव्रते ॥ २५ ॥

कथयन्ति च सद्भावं कुलजं ज्ञानमुत्तमम् [ख: ज्ञान *

* *?] ।

तेन [ख: ?] सर्वगतो [ख: ?] भूत्वा [ख: ?] योगिनी

सिद्धिमाप्नुयात् ॥ २६ ॥

इति भैरवस्तोतसि महातन्त्रे ब्रह्मयामले सप्तनवतिमः

पटलः ॥

देव्युवाच

कुलयोग विधानन्तु यथावद्विदितं विभो ।

मेलकञ्च विधानेन पूर्वोक्तं योगिलक्षणे ॥ १ ॥

कुलभेदकथन्तासां समयाचारचेष्टितः [ग: -वेष्टितम्] ।

तदनुष्ठान युक्तानां येन सिद्धिर्ददन्ति हि ॥ २ ॥

भैरव उवाच

यो सौ पूर्वमयाख्यातो [ख: * *? मया-] ज्ञानात्मा
सर्वतोमुखः ।

३४७अ ख्) अनाद्यव्ययमीशानो व्यापीसूक्ष्मो निरञ्जनः ॥ ३ ॥

तस्य देवातिदेवस्य यथा शक्तोघमागतं [ग:
शक्त्योद्यमागतम्] ।

यथा ते कथितं पूर्वं कुलभेदस्त्वतः शृणु ॥ ४ ॥

शिवशक्तिस्तथा चेच्छा क्रियाविन्दुकलाश्चया ।

नवधाकुलसंभेदो [ग: नवभाकुलसंभेदः]

पूर्वन्व्यक्तोवरानने ॥ ५ ॥

मरीच्याद्यस्तु यो भेदोजयाद्याश्च तथा प्रिये ।

नवधा सा [खः ?] प्रसूतीयं [खः ?] कुलानां शृणुशोभने

॥ ६ ॥

यातस्या [गः वातस्य?] व्याहताकाष्ठादीधिती वा पराजिताः ।

तं कुलं प्रवरन् देवि शैवं चा [गः च] घोरिसंज्ञितम् ॥ ७ ॥

बोधकं वा [गः चा] परं यच्च स्वसामर्थ्येन भूषितम् ।

शाक्तं योगेशि जंदेवि कुलं प्रवरलक्षणम् ॥ ८ ॥

प्रवृत्तिर्वा परायोगे कालकालान्तरोदया ।

सन्धिच्छा [ग: सन्धीच्छा] सङ्गमासक्ता विज्ञेयायमदेवता

॥ ९ ॥

सर्वतोक्षिविभागेन क्रियाभावेन शालिना ।

कारणत्व प्रभुत्वेन इन्द्रभावं भवेत् सदा ॥ १० ॥

विन्दुना सर्ववीजानां संहार [ग: -रः] सर्ववर्णिका ।

३४७ब् ग्] उत्पत्तौ च विपत्तौ च कथने कश्मली तु सा ॥ ११ ॥

पञ्चपूर्वा च तस्त्रस्तु विन्दुभेदाद् विसर्पिता ।

निवृत्यादि समूहस्य शृणुताश्च यथा स्थिता ॥ १२ ॥

विनिवर्तनशीलश्च भवोत्पत्याधिकारिणः ।

निवृत्तितनुना [ग: निवृत्तिस्तनुवा] व्यक्ता वृहतत्वा [ग: वृहत्वाद्]
वृहतत्वगा ॥ १३ ॥

ब्राह्मी तु परमाशक्ति तत् [ग: परमाशक्तिस्तत्] कुलस्या
ग्रणिपरा [ग: शशीपरा?] ।

प्रतितत्व स्वरूपेण सङ्ग्रह ह्लादकत्वतः ॥ १४ ॥

विवेको यो स्थितः सर्वतेन विष्णुत्व तत्कुलम् ।

समाश्रित्याभि नन्दन् तत्क्रीडतेत्वखिलेध्वनि ॥ १५ ॥

तेजोमुर्तित्वमापन्नं [ग: तेन्नोमूर्तित्वमापन्नं] विश्वदीप्ति
प्रबोधकम् ।

अक्षोभ्यस्तु कुमारं तु [ग: कुमारस्तु] कुलन्तन्तु विशाखजम् ॥
१६ ॥

संयोग व्यूहनोत् क्षेपप्रभुभावाच्च सर्पितम्।

महत्ववृत्ति भेदेन तन्तु माहेश्वरं परम्॥ १७॥

शान्ति तत्वा समुत्पन्न [ग: समुत्पक्य]

सिद्धिमुक्त्यभिभासकं [ग: सिद्धिमुक्त?भिभासकम्]।

मरीच्यादि समूहस्य व्यक्तम्मुर्त्यष्टकं [ग:

व्यक्तमूर्त्यष्ठकं] प्रिये॥ १८॥

क्ष्माग्नियजमानात्य [ग: -नाड्य?] मूमार्तकारणात्मकम्।

कराली कश्मलाख्यन्तु शेषान्यं मूर्तिसंभवम्॥ १९॥

अमूर्तस्य शिवस्यैतन्मूर्तित्वेनोपचर्यते।

एवमेतत् समुत्पन्नं शिवात् परमकारणात्॥ २० ॥

अनुग्रहाय शक्त्योघं भोगमोक्षफलप्रदम्।

एतत् प्रधानभेदन्तु मूर्तिभेदन्तथापरम्॥ २१ ॥

३४७ब् ख्) अघोर्यादिसमूहाद्यं यथा भूतं तथा शृणु।

शिवेच्छा भुवनाध्वस्थं रुद्रशक्तिविभागगम् [ख: ?] ॥ २२ ॥

सामीप्यानुचरावस्थं तथा कर्महराश्रयम्।

नवकं वाधिकाराय स्थितन् तत्प्रतिमूर्तिगम्॥ २३ ॥

मूर्तिरूपाष्टकन् देवि नान्यथा भुवनाकृतिम्।

भुवने भुवने ह्येवं प्रतिमन्ते च भैरवि ॥ २४ ॥

कुलसप्तादशयुतं कारणत्व [ख: कारण *?] समन्वितम् ।

शारीरे [ग: शरीरे] च तथाख्यातं यथातत्वव्यवस्थया ॥ २५

॥

द्रव्यगञ्च तथा देवि संवित्या संविलक्षते ।

एवं भावगतञ्चापि भावावस्थाश्रया यथा ॥ २६ ॥

भूताख्योपि तथा भेदो व्यक्तिप्राप्तो [ग: -प्तः] कृलामयीम् ।

प्रसूतिस्थितिसंहारे आप्तभावसमाश्रयैः [ख: ?] ॥ २७ ॥

योनिरूपं विभास्वन्तं विख्यातं कुलसंज्ञया ।

तथान्यो मूर्तिदेवीनां व्यक्तोऽसौ प्रोच्यतेऽधुना [ख: ?] ॥ २८

॥

मन्त्रसत्वकुलोद्भूतं [ख: ?] कर्मप्राकृत लक्षणम्।

पञ्चधातुः स्मृतो भेदः कुलानां कुलनायिके ॥ २९ ॥

मन्त्राराधनयुक्ता या व्यक्तिर्या कुलरूपिणी।

सामान्या मन्त्रजाता या मन्त्रजा सा वानना ॥ ३० ॥ [ख: ?]

३४८अ ग्) पुत्रादि श्रीचरुत्थेन [ख: *?चरुत्थेन] विधानेन तु या पदम्।

प्राप्य नित्यं [ख: ?] विचेष्टन्ते [ख: ?] ज्ञानविज्ञानयोजितम्॥ ३१ ॥

सत्त्वजन्तदधिष्ठानं भैरवे भैरवेश्वरि।

मन्त्रहीनापि याश्चान्या भक्त्या वै देवतार्चनम्॥ ३२॥ [ख: ?]

कुर्वन्ति तत्प?देच्छाया भक्तिमाश्रित्य [ख: * * *?शृत्य] कौलिकीम्।

अन्यजन्मभवेन्नाथ कौलेन शुभकर्मणा॥ ३३॥

प्राप्नुवन्ति पदन्तव [ग: -तत्र] कर्मव्यक्तानुसारतः।

प्राकृत व्यक्तिजाताया प्राकृता या गणांविके॥ ३४॥ [ख: ?]

तद्भर्भे तु समुत्पत्तिः शिवेच्छाया वरानने। [ख: ?]

प्राकृतन्तु कुलन्देवि कथितं स्फुटलक्षणम्॥ ३५॥

गर्भस्थ ज्ञातमात्रे वा पञ्चविंशः समान्तिके। [ख: ?]

जायते कुलसामान्यं पदञ्चरुकभक्षणात्॥ ३६॥ [ख: ?]

एकैकस्य कुलस्यान्तु भेदः सप्तदशात्मकः।

व्यज्यते शिवशक्तिस्थो लोकानुग्रह हेतुना ॥ ३७ ॥ [ख: ?]

मन्त्रमुत्तवा कुलं शुद्धं शेषन्तु त्रितयं प्रिये । [ख: ?]

अशुद्धभेदमायाति डाकिन्याद्यं गणांविके ॥ ३८ ॥

डाकिन्योरुद्र डाकिन्यो डाव्याडामरिका शिवा ।

पञ्चधा चाधमा देवि शिवान्ताश्चोत्तमोत्तमा ॥ ३९ ॥ [ख: ?]

शुद्धानामपि देवेशे देशेभेदस्तु यत् स्मृतम् । [ख: ?]

३४८अ ख्) प्रधान त्रिंशाभिर्भेदैस्तच्चानन्त कुलोद्भतौ ॥ ४० ॥

चतुर्युगविभेदाच्च [ग: -दाश्च] कल्पने त्वन्तरादिका ।

भेदाद्भेद न तत्वं हि अधिकार विवक्षया ॥ ४१ ॥

ना कुलन्तु जगत्यस्मिन् प्रतिप्राणिशरीरकम् ।

किन्तु व्यक्तिस्तु यत्काले तत्तस्मिन् प्रकटी भवेत्॥ ४२॥

स्वकुलं स्वकुलं सर्वं [ग: सर्व] पाराक्यं नास्ति सुव्रते।

व्यक्तिजाति विवक्षाया वहुभेदं प्रकीर्तितम्॥ ४३॥

एकात्माशुशिवोह्येक एकाशक्तिर्वरानने।

सूर्यस्यैव यथा दृष्टा सत्था? [ग: संक्ये?] च प्रविकाशिनी॥
४४॥

बहुना व्यज्यती तस्था सा भिन्नेव विभासते।

रक्तपद्मा विशुल्का [ग: ?] नामर बिन्दानां यथा हि सा॥ ४५॥

स्वकीयस्थानजो देविगुणभेदः पृथक्स्थितः।

विचित्रता स्वरूपेण भेदानन्त्यम् प्रकीर्तितम्॥ ४६ ॥

अभिन्नस्यापि देवेशो शिवस्येव विचारितम्।

स्थान सिद्धि [गः सिद्धिः] पृथत्तवं हि मुत्तयेक फलसिद्धये ॥

४७ ॥

पृथग्भाव विभिन्नस्य जगसोनुग्रहेच्छया।

इति ब्रह्मयामले अष्टानवतिमः [गः अष्ट-] पटलः ॥

भैरव उवाच

मेलापकं महेशानि यथा वृत्तं कुलात्मकम्।

३४८ब् ग्] तथा ते मविधास्यामि शृणुष्वायत लोचने ॥ १ ॥

चर्ययोनियमस्थस्य जपतोहोम तत्परः ।

ध्यानस्थस्य वरारोहे कुलमेलापकं भवेत् ॥ २ ॥

कदाचिच्चरुमार्गेण ज्ञान संबोधनेन वा ।

मन्त्रवीर्य प्रधानेन देहमुद्भिभवेन वा ॥ ३ ॥

कुलाचार प्रदानेन स्वसंस्कारेण वा क्वचित् ।

अनुग्रहं प्रकुर्वन्ति कृत्वामेलापकं प्रिये ॥ ४ ॥

यदा तु कुलसिद्धीनां भाजनस्तु महोजसः [ग: महौ-] ।

तदा वलोकनं कृत्वाहरते प्राकृतं भयम् ॥ ५ ॥

वीरसत्व कृतस्यास्य दृष्टेनायान्ति गोचरम्।

नान्यथा तु महादेवि क्लिष्टस्यापि कदाचनः [ग: -न] ॥ ६ ॥

समयो ह्येषयोगीनां मन्दसत्वेन दर्शनः [ग: -नम्]।

नवादं स्नेहता देवि न च वाह्ये प्रकाशनम्॥ ७ ॥

जन्महीन पशुत्यागा [ग: -गात्] तिरस्कारेणमानिता।

नाभिमानं स्वविज्ञानेना शिवेच्छा त्वनुग्रहम्॥ ८ ॥

समयैर्नवभिर्युक्ता क्रीडते स्वेच्छया प्रिये।

ददन्ति साधकेन्द्राणां कामां शिवपदान्तिकाम्॥ ९॥

मेलापकास्तथान्ये ये हठात् प्रोक्ता वरानने।

३४८ब् ख्) ते तु डाकिनि वृन्दानां न शुद्धानां नियोजयेत्॥ १०

॥

एवं मेलापकः प्राप्ताः साधकेन्द्राः [ग: -केन्द्रा]

वरानने।

प्राप्नुवन्तीप्सितां कामान्विलोमान्तु विपर्ययम्॥ ११॥

यथा देवी पदं प्राप्ता विलोमान्तागिनी भवेत्।

साधकेपि तथा देवि तन्मध्ये पशुतां व्रजेत्॥ १२॥

किन्तु ते नैव मार्गेण शक्तिविज्ञानघातनात्।

प्रभावेन [ग: -ण] कुलानान्तु सोपि सामान्यतां पुनः॥ १३॥

मुक्त्वा देहमवाप्नोति जातिज्ञश्च प्रजायते ।

यथा मेलापके सिद्धिः प्रभुत्वं व्रजते प्रिये ॥ १४ ॥

न तथा पशुमार्गेण क्रूरसत्वस्तु सुव्रते ।

पुष्पधूप सुगन्धाद्यै [गः -द्यैः] पूजयं वा शिवाध्वरे ॥
१५ ॥

नित्योदयादवाप्नोति शक्तिमेलापकं परम् ।

एवन्तु व्यक्तिशक्तीनां स्फुटमेलापकं विना ॥ १६ ॥

कुलसप्तादशं चक्रं समभ्यस्यङ्गुहं [गः -भ्यस्य
गुहं] प्रिये ।

या कश्चित् सिद्धयो देवि अधमा मध्यमोत्तमाः ॥ १७ ॥

मेलापके तु [ग: -कन्तु] ताः सर्वाः [ग: सर्वा] लभते
साधकोत्तमः ।

भूतं भव्यं भविष्यञ्च आत्मनोथ परस्य वा ॥ १८ ॥

सर्वज्ञानाति देवेशो कुलचक्रमनुस्मरन् ।

इति भैरव स्तोतसि ब्रह्मयामले द्वादशसाहस्त्रकेनव
नवतिमः पटलः ॥

देव्युवाच

यदा पुण्यानुसारेण मन्त्रसिद्धिर्नजायते ।

३४९अ ग्] दुष्टाश्रयं जराग्रस्तं व्यादिभिर्वा [ग: व्याधि-]
विवाधितम् ॥ १ ॥

न च शक्नोति तत्कर्तुं यच्छिवोक्तं महागमे ।

अनुष्ठानं महादेव तदा ब्रूहि विधिर्वरः ॥ २ ॥

भैरव उवाच

द्वादशच्छदकं चक्रं कृत्वा तत्कर्णिकायुतम् ।

न्यसेत् पूर्वदलारभ्य अङ्कमाला वरानने ॥ ३ ॥

पञ्चपङ्क्ति तथा पक्षं शुक्तिपुंतत्व [ग: -पुंस्तस्य]
संख्यया ।

ऋतुपर्वतदिग्भागशक्तिभिः शुक्तिपूरिता ॥ ४ ॥

पङ्क्तित्रय तथैकेन द्वित्रियेनान्तिमाधिकम् [ग: द्वित्र-] ।

कृत्वान्यसेत् तदग्रे तु क्रमान्यद्गुणपूर्वकम् [ग: क्रमाण्यद्-] ॥ ५ ॥

द्विरेकेण तथा षट्भित्रि [ग: षड्भिस्त्रि] द्वयेनैक संख्यया ।

पूषादि पङ्क्तिभूतैश्च त्रिद्वयेनैक योजितम् ॥ ६ ॥

मध्यङ्क्रमाद् विलक्ष्येत [ग: विलक्षेत] चारं प्राणस्य शोभने ।

शतानि नवपूर्णानि नाडीचक्र पृथक् पृथक् ॥ ७ ॥

तदा क्रम्य वहेद्यस्य प्राणैस्तु घटिका कृतम् ।

समानि पञ्चभिस्त्रीणि जीवते रविसंस्थया ॥ ८ ॥

तद्वारतिथि वलाया [ग: वेलायां] प्रत्याहानि क्रमाख्यया ।

३४९अ ख्) निरूप्यमरणङ्कालेे श्लेष्मादिभिर्यदा विना ॥ ९ ॥

दशद्वयन्तथैकञ्च भवेत् पञ्चदशाधिका ।

शुक्त्या षण्माशिकः [ग: -सिकः] कालस्त्रिमासं [ख: ?]

पञ्चविंशतिः [ख: ?] ॥ १० ॥

घटिकाभिः समुद्दिष्टं विंशषट्काद्विमाशिकम् [ग: - सिकम्] ।

सप्तविंशति [ग: सप्त-] देवेशो माससमेकं सजीवति ॥ ११ ॥

ततोर्ध्वं तिथयो देवि अष्टाविंशद्भिः [ख: -विंशन्ति?] षोडशः

[ग: -श] ।

उनत्रिंशैर्दशः [ख: ऊन?-] प्रोक्तात्रिंशद्भि [ग:

प्रोक्तास्त्रिंशद्भिः] खरसंख्यया ॥ १२ ॥

एकाधिके त्रिकेद्वाभ्यां द्विकश्चैकत्रयेण तु ।

अधिकेन सजीवे तमध्यं पङ्क्तित्रयेन [ग: -ण] तु ॥ १३ ॥

वामे समास्तु द्विगुणोमासास्तु द्विगुणा स्मृता । [ख: ?]

चतुर्गुणा दहोरात्रात् सौम्यकाल प्रभावतः ॥ १४ ॥ [ख: ?]

विषुवस्तु यदाह्येवं पूर्वोत्पादं सजीवति ।

अथवान्य प्रकारेण चक्रेतन्तु निरूपयेत् ॥ १५ ॥

सरद्वादशकं प्रोक्तोन्यस्त्वा मध्ये सदाशिवम् ।

यम्पर्यङ्क समाशीनं कुर्याच्चन्द्रकलाधरम् ॥ १६ ॥

तत्कोष्ठा चरितं नामं स्वजमन्यस्य वा प्रिये ।

हंसाक्षर समायुक्तं दलस्थो बिन्दुना [ख: ?] स्वराः [ख: ?] ॥ १७

॥

न्यस्त्वा [ख: ?] दूर्वाङ्कुरेणैव तस्य विन्दुर्ध्व शोणिताः ।

उपवास त्रयोक्तस्तु [ख: ?] शुक्लामृत्यं चतुर्दशी ॥ १८ ॥

पूज्यदेवस्तु तद्भर्जत्वदग्रे [ख: ?] वेष्म्यदावृतम् ।

कन्या कर्तृंत [ग: कर्तृत] सूत्रेण त्रिगुणेन शितावृतम् ॥ १९ ॥

३४९ब् ग्) सितचन्दनदिग्धन्तु कर्पूरे [ग: -रा] क्षोदधूसराम् ।

सिद्धार्था क्षतसंयुक्तं कृतरक्षं निवेशयेत् ॥ २० ॥

पीठाग्रतो महादेवि शरावपुटमध्यगम् ।

अष्टाङ्गुल [ग: -लं] खनित्वा तु महास्त्र कृतरक्षकम्॥ २१॥

नियमस्थं स्ततोमासं नयैकं जपसंयुतम्।

पूजां कृत्वा विशेषेण साधकः ससमुद्धरेत्॥ २२॥

धूपं दत्वा प्रपूजित्वा दत्वा तद्वीरभोजनम् [ख: * *
*?भोजनं]।

यान्यक्षराणि ते मासा मात्रास्तु तिथवद्यथा [ग: तिथि-]॥ २३॥

अक्षरस्था तु या मात्राकाल तुर्यगतास्तुता।

विन्दवोघटिका प्रोक्ता [ग: प्रोक्तास्] तन्मासं दिनसंख्यया॥ २४॥

द्वात्रिंशाक्षर कङ्कालं [ख: कङ्का *?] केशरेषु [ख:
*?शरेषु] च यत्कृतम्।

घटिकादि विभक्त्यन्तं [ख: ?] बिन्दुकेन विलक्षयेत्॥ २५॥

या मात्रा घटिका वाथ मासोवादिनसंख्यया।

अधिको वा यथा हीन आत्म?वर्णाश्वजायते [ख: ?] ॥ २६॥

निरूपिते [ख: ?] तदा [ख: ?] तस्यै [ख: ?] तत्स्वरूपं विलक्षयेत्।

नष्टे तु मरणं विन्द्यात् कृष्णे व्यालभयं भवेत्॥ २७॥

नीले व्याधिर्विनिर्दिष्टः [ग: व्याधिवि-] सितेकार्यागम स्फुटम्।

३४९ब् ख्] पीते वै रिप्रचूरित्वं श्यामे विद्वेषमाप्नुयात्॥ २८॥

अतिरक्ते विजानीयाशस्त्र [ग: -च्छस्त्र] घातान्यनेकधा।

विचित्रके भवेत्कुष्ठं छिन्नाङ्गेङ्ग विनाशनः [ग: -नम्] ॥ २९ ॥

सिद्धहानिविरूपे [ग: सिद्धिहानिर्-] तु सुरूपे सिद्धसाधनम्।

यथावस्थेन मृत्युस्तु न च वै कारिक [ग: -कं] क्वचित्॥ ३० ॥

द्वादशाव्दन्तु वै कालं ज्ञात्वासिद्धयर्घमाचरेत्।

अथान्यं मन्दवुद्धीनां योगाभ्यास विवर्जनम्॥ ३१ ॥

स्वशरीरे प्रवक्ष्यामि कालज्ञानं सुशोभनम्।

छाया या तु प्रभो ते वै मध्याह्ने चार्धरात्रतः॥ ३२ ॥

लक्षयीत यथाकालं तन्मेनिगदत [ग: -तः] च्छृणु [ग: शृणु]।

पञ्चविंशति तत्वानि क्रमान्यस्त्वात्म गोचरे॥ ३३ ॥

वक्रमण्डल देशे तु श्वरषोडशकं [ग: स्वर-] प्रिये ।

ललाट वक्र नेत्राभ्यां श्रवने [ग: -णे] नासमण्डयोः ॥ ३४ ॥

दक्षवामान्त योगेन विन्यसे तु स्वरां [ग: स्वरं] क्रमात् ।

दशनोष्टोत्तरोष्ठे च विद्धौजिह्वा विसर्गिणा ॥ ३५ ॥

अंसवाहु कराङ्गुल्य नखाकाद्येन दक्षिणे ।

पाद्य [ग: पा?द्य] वामे नितंवे तु जङ्घा पादाङ्गुली नखा ॥ ३६ ॥

दक्षेटाद्य तरेताद्या दक्षवामे च पृष्ठके ।

उदरे तु हकारो वै पुन्तत्वं [ग: पुंस्तत्वं] हृदये न्यसेत् ॥ ३७ ॥

मूर्त्यष्टकं [ख: -कंन्] ततो मूर्तौ लान्तीशं मूर्ध्निविन्यसेत्।

ध्यात्वा संवत्सरं कालं चक्रं सर्वत्र संस्थिते ॥ ३८ ॥

३५०अ ग्] ऊर्ध्वनाड्या नयेत् तावद् यावद् व्योमाख्यमण्डलम्।

कृत्वा तु चात्मगा सृष्टियोगकालन्तु [ग: सृष्टिर्-] या च वै ॥ ३९ ॥

या दृशीं पश्यते छायां तादृशं कालमादिशेत्।

अशिरां मृत्युकाले तु विर्वाहुं [ग: विवाहुं] व्याधिमादिशेत्॥ ४० ॥

जङ्घपादाङ्गुलीनान्तु नाशे भृत्यधनक्षयम्।

क्रूरजन्तु समारोहे मृत्युस्यान्नात्रसंशयः ॥ ४१ ॥

परिक्ष्य लक्षयित्वा तु मन्त्री कार्यं समारभेत्।

अतोन्यं संप्रवक्ष्यामि यच्छरीरे विलक्ष्यते [ग: विलक्षते] ॥ ४२ ॥

चक्षुचन्द्रमदृष्ट्वा [ग: चक्षुश्-] तु षड्दिनं जीवितं भवेत् ।

त्रिदिनं घोषनाशे तु दिनैकन्तु महापथे ॥ ४३ ॥

गुल्फ प्रस्पन्दने मुक्ते घटिका सप्तमादिसेत् [ग: -शेत्] ।

कोटौ त्रीणि तथा जिह्वा न दृष्ट्वा घटिकाद्वयम् ॥ ४४ ॥

नासाग्रे घटिकात्वेका न तूर्ध्वन्तु समादिशेत् ।

ध्रुवकालो यमाख्यात [ग: -तम्] आत्मनस्य परस्य वा ॥ ४५ ॥

३५०अ ख्] ज्ञात्वा शरीरिणो भावं ततोत्क्रान्तिं समारभेत् ।

कृत्वा पद्मसुशुक्लन्तु क्षुरिके संयजेत्मभि [ग: -भिः] ॥ ४६ ॥

यजित्वा विधिना तत्र मंत्रैः शास्त्रसमुद्भवैः ।

प्रयोजयेत् ततोत्मानं मन्त्रेणाथ शिवेथवा ॥ ४७ ॥

युक्तः सर्वगतो भूत्वा यथेष्टं पदमाप्नुयात् ।

देव्युवाच

प्रयोगमन्त्रयजनं मासनं योजनं विभोः [ग: विभो] ॥ ४८ ॥

ग्रहणोत् क्रामणं छेदं आत्मनस्तु परस्य वा ।

यथावत् स्वसमाचक्ष्व भक्ताया मम भैरव ॥ ४९ ॥

भैरव उवाच

यतः सप्तमको वण्णः [ग: वर्ण] कतः षोडशकोधमः।

यान्तोयश्च रधस्ता [ग: -स्तात्] तु रुद्रचन्द्र शिखाकुलः [ग: -लम्] ॥ ५०
॥

क्षुरिकेशो महादेवि क्षिप्रसंघारकारकः [ग: -संहारकारकम्]
।

स तु ह्रस्व स्वरोपेत वक्रपञ्चकमुत्तमम्॥ ५१ ॥

दीर्घयुक्तो हृदादीनां वाचकत्वेन संस्थितः।

कूटमेति च यो मन्त्रः सोर्द्धचन्द्र शिखायुतः॥ ५२॥

नादाग्निस्तु महामायातदूर्ध्वा [ग: -दूर्ध्वां]
शिखसंयुताम्।

शिवाग्निरुद्रसंयुक्तं वह्निव्योमार्द्ध [ग: -व्योमेर्द्ध] योजितम् ॥

५३ ॥

खाग्निसंघोग्निमारूढ रुद्रस्थोयं महाक्षरः ।

पुटेपूर्वत्रयेणायं विलोमेनात्म वत्मनि [ग: वर्त्मनि] ॥ ५४ ॥

सप्तग्रन्थि समायोग ग्रन्थि ग्रन्थीश्वरात्मकम् ।

करणञ्च ततो देवि विलोमेनानुलोमतः ॥ ५५ ॥

वामदक्ष त्रयोगेन [ग: -ण] उभयात्मेन मध्यगम् ।

रुद्रचन्द्रविहीनेन सिन्घेनामित [ग: सिंहे-] तेजसा ॥ ५६ ॥

विसर्गथः [ग: विसर्गस्थः] कृतेनैव आसनं भैरवात्मकम् [ख:

भेर-] ।

अनन्त कर्णिके देवि वह्निमण्डलमध्यगम्॥ ५७ ॥

३५०ब् ग्] सर्वत्राध्वनि तद्रूपं विचिन्त्यं [ग: चि-] पूजनन्तथा ।

रजसा सोज्ज्वले नैतत् [ख: नै *?] कृत्वा तत्र स्थितं यजेत्॥ ५८ ॥

करस्थन्दिक् पथस्थञ्च नाडिस्थञ्चार्घ्य पात्रकम् ।

यजित्वा चाग्निकार्यञ्च कृत्वा तु वलिकर्मकम्॥ ५९॥

मित्रास्तु गुरुविद्यानां दत्वा सर्वं [ग: सर्व] यथोचितम् ।

समार्घ्य सर्वथा सर्वं यत्याल्यन्तु शिवाशिवम्॥ ६० ॥

कृतनिर्द्वन्द्व तात्मा [ग: वात्मा] तु पश्चाच्चैत [ग: -तत्] समारभेत् ।

वामजङ्घा वहिः सव्यापर्यङ्क सदृशा क्रियाः ॥ ६१ ॥

कृत्वानिवेशयेदग्रौ अवकाशे दधोमुखौ [ग: अधौमुखौ] ।

स्फिक्कटिर्नाभि हृद्ग्रीवा वक्त्रनासाक्षि बिन्दुकम् ॥ ६२ ॥

ललाटचन्द्र मार्गान्तं ऋजुं कृत्वा [ख: ?] त्वनुस्मरेत् ।

३५०ब् ख्) क्षुरेशं हृत्कजारूढं मृणालाख्या नियोजितम् ॥ ६३ ॥

सप्तग्रन्थि कृताधारं जाज्वलं स्वमरीचिभिः ।

गुल्फो [ग: गुल्फौ] कटिस्व [ग: कटिश्च] नाभिश्च हृस्थं [ग:
हृत्स्थं] यावत् कजासनम् ॥ ६४ ॥

विपरीतं गले बिन्दो [ग: बिन्दौ] शक्तौ चोर्ध्वलयाश्रयम् ।

नियोज्येवं समालोक्य शिवाग्निगुल्फगोचरात् [गः शिवाग्निर्-] ॥ ६५ ॥

वह्निशक्त्या समायुक्तं विसर्गान्तं महाक्षरम् ।

तदेव पतितं कृत्वा सप्तमन्तु तयापुनः ॥ ६६ ॥

आदिमान्त निपातेन क्षुरीशे ज्ञानकर्तरी ।

नियोज्य सर्वग्रन्थीनां छेदनाय महात्मने ॥ ६७ ॥

आपूर्या पात्त्य संछित्त्या ज्ञानसूत्रं सुतानितम् ।

छेदा [गः छेदश्] चोर्ध्वमुखं याति व्रजने [गः -ते] नैव संयुतम्
॥ ६८ ॥

ज्वलन्तं प्रणवं ध्यात्वा त्रिशूलं भित्त्यग्रन्थयः ।

क्रमेत् तावल्लयं यावदेकोच्चाराद् विलोमका ॥ ६९ ॥

लयेक्षिप्य तु तां सत्तां ग्रन्थिर्या सर्वधारिणी ।

विषं शोषकमार्गेण कटौ तद्व [गः तद्वत्] समाहरेत् ॥ ७० ॥

समुत्थिता तु सा माया प्रधाने कटिमस्तके ।

तया सह तथा या याद्ग्रन्थिभेदात् [गः -दान्] प्रतिप्रति ॥ ७१ ॥

तथा लय प्रवेशौ तु नाभौ स्फोटादि रूपिणी ।

समाहत्य नयेदूर्ध्वं हृदाद्ये [गः -द्यं] ग्रन्थि तुर्यकम् ॥ ७२ ॥

भित्वाभित्वा महादेवि रावच्छेदं यथा भवेत् ।

लयं कृत्वा प्रविष्ट्वा च हृदयं वाहनेत् ततः ॥ ७३ ॥

रविचन्द्राग्नितो यानि ज्योति [ग: ज्योतिः] शक्तिमहामृतम् [ग: शक्तिर्-] ।

तत्रस्थन्तच्चितोतच्चञ्छित्वा [ग: -तस्तत्वञ्छित्वा] योगं समारभेत्
॥ ७४ ॥

प्रयन्न त्रितयं पूर्वङ्कृत्वा नादक्रमोदितम् [ग: नादङ्-] ।

शक्तिमार्गं [ग: -मार्ग] विधानेन प्रयोगेन [ग: -ण] समाविशेत् ॥
७५ ॥

३५१अ ग्) तेनोत् क्षिप्यनिकृन्त्येवं हृत्पद्मो द्वेष्टयेन्मनि ।

आक्षिपेत् सर्वसंयुक्तं छादितं प्रगुणी कृतम् ॥ ७६ ॥

गलके हिक्वयायुक्तं [ग: हिक्क-] भ्रूमध्ये [ख: ?] शूलभेदितम्

[ख: * *?भेदितं] ।

योजयेच्छक्तिरन्ध्रे तु प्रेर्येच्छाक्तेन वायुना ॥ ७७ ॥

लयं कृत्वा विशेत्कर्ण नाड्यच्छेद्यनियोजयेत् ।

एवं बिन्दौ तथा शक्तौ स्थाने स्थाने लयालयम् ॥ ७८ ॥

छेदं नियोजनं कृत्वा न्यगतो तु [ग: अगतस्तु] क्षणाद् व्रजेत् ।

शतायुरपि देवेशो सप्तोच्चारन्न जीवति ॥ ७९ ॥

अजितेपि हि देवेशि शरीरे योग सिद्धयः ।

प्रत्यक्षा [ख: ?] साधकेन्द्रस्य [ख: ?] योगेस्मिन् वरानने ॥ ८० ॥

३५१अ ख्) नात्र [ग: नात्रः] प्राणः [ग: प्राण] जपः प्रोक्तो ध्यान

केवलयोजना ।

स्थिरचित्तस्य देवेशो सद्योत् क्रान्ति प्रसिध्यति ॥ ८१ ॥

अथलक्षादि संयुक्तं प्राणात् प्राणजित [ग: -जितं] क्वचित् ।

एकोच्चारान्वयो नासाच्छारीरन्तृणवत्त्यजेत् [ग: -च्छरीरन्-] ॥ ८२ ॥

क्षुरिकेशन्तु सर्वत्र प्रतिग्रन्थौ [ग: -ग्रन्थे] निवेशितम् ।

कृत्वा जपेन्महनादं विलोमगतिलालितम् ॥ ८३ ॥

दिना प्रयोगसंघेन ग्रन्थि बीजाश्रये [ख: ?] स्थितः [ख: ?] ।

क्षुरिकोच्चारयोगेन शतायुरपि मानवः ॥ ८४ ॥

दिनस्यार्द्धन्न जीवेत जपमात्राद्गणांविके ।

प्रयोगराजसर्वस्वं विनयेत् कुलसंपदम् ॥ ८५ ॥

कथितन्तु [ग: -स्तु] वरारोहे सद्योमुक्ति [ग: -मुक्तिः] प्रसिद्धये ।

देव्युवाच

मंत्रयोगविभागस्तु सूचितोत्र न सौ विभो ॥ ८६ ॥

प्रख्यापितोत्र चोत्क्रान्तौ लयो मन्त्रे शिवेथवा ।

भैरव उवाच

ग्रन्थिच्छेदात् ततो देवि शिवे मन्त्रेथवा [ख: मन्त्रे * *?] प्रिये [ख: ?]
॥ ८७ ॥

लयो यो दीक्षया ख्यातः सोत्रयोगो वरानने ।

त्र्यहमे नाथयोगेन खगतेनैश्वरेण [ग: -नेश्वरेण] तु ॥ ८८ ॥

सदा नादेन ध्वनिना शिवान्तेन वरानने ।

निरालंवी कृतो यस्तु आत्मनस्य परस्य वा ॥ ८९ ॥

सद्योनिर्वाणतामेति देवि नास्त्यत्र संशयः ।

योत्मनः पूरकः सोहि दृष्टा [ग: दृष्टस्-] तस्यैव रेचकः ॥ ९० ॥

किन्तु प्रेरणके नैव प्रधानोदेह रेचकः ।

रेचक द्वितये नैव प्रयोगः पूरको भवेत् ॥ ९१ ॥

सकले चलयं गौरि साधकस्य समाचरेत् ।

प्रतिच्छेदो हि सर्वत्र सर्वमन्त्र क्रमेषु च ॥ ९२ ॥

फलयोगत्व [ग: -गस्त्व] युक्तस्तु कृतोयं सर्वतो मुखः ।

अथवाभ्यास युक्तस्तु साधकेन कदाचनः [ग: -न] ॥ ९३ ॥

उत्क्रामयेत् महादेवि कारणा नलगोचरम् ।

भुवनं तत्वमेवं वा कलामन्त्र पदानि वा ॥ ९४ ॥

रुद्रशक्ति समूहं वा प्राक् शरीरे [ग: -रेः] नियोजितम् ।

३५१ब् ग्] प्रयोगेन [ग: -ण] नियुक्तन्तु सद्योनिर्वाणतां ददेत् ॥ ९५ ॥

मृगपक्षिणमन्यं वा दूरस्थमपि योजितम् ।

प्रयोगेन [ग: -ण] वरारोहे पतते पृतिवी तले ॥ ९६ ॥

नास्तिरक्षयिता तस्य स्वयं वा भैरवेश्वरः।

अथ किं वहुनोक्तेन कालेश्वर यथा स्वयम्॥ ९७॥

मुक्तकाला [ग: -कालत्] करोत्येषा मन्त्रा [ग: मन्त्रान्]
मन्त्रेश्वरामपि [ग: -नपि]।

कथितं सरहस्यन्तु क्षुरिकेशं महात्मने॥ ९८॥

३५१ब् ख्) अनंभ्यस्तन्तथा [ग: अनभ्यस्तन्तथा] भ्यस्तं
सद्योनिर्वाणकारकम्।

अकाले नैव युञ्जीत तपस्वीनाङ्ग्रहं प्रिये॥ ९९॥

लिङ्गभेदो भवेद् देवि तथा चैव मनिच्छताम्।

व्यर्थं पशुग्रहं यद्वन्न कर्तव्यं कुदुंविनाः [ग: -नाम्] ॥

१०० ॥

तेनादौ कीर्तितः काल व्यास संक्षिप्त लक्षणः ।

रुजार्ता विभवैर्हीना [ग: -नाः] कान्तादिभिर्विमानिनाः ॥ १०१ ॥

तामसा [ग: राजसा] राजसा [ग: तमसा] वापि क्वचिद् दृश्यति मानवाः ।

तेषां न योजयेन्मन्त्री प्रयोगमिदमुत्तमः [ग: -मम्] ॥ १०२ ॥

न दद्याद् दुष्टबुद्धीनां परिक्षा [ग: परिक्ष्या] परिवर्जिताम् ।

क्वचित् प्रमादायान्येते राजानं ब्राह्मणं गुरुम् ॥ १०३ ॥

तस्मात् तेषु न दातव्यं लेख्यनापि [ग: लेख्ये-] न दर्शयेत् ।

न वाचयेत् तु तेषाग्रे न च व्याख्या समाचरेत्॥ १०४॥

विनीतं सुप्रियं शान्तं कामार्थरति निस्पृहम् [ग: निःस्पृहम्]।

ज्ञात्वा सम्यक् प्रदातव्यं प्रयोगं क्षुरिकोद्भवम्॥ १०५॥

उपकारापमानाभ्यां तोष क्रोधौ [ग: क्रोधो] न यस्य वै।

ख्यातव्यं तस्य देवेशि रावमार्गसमन्वितम्॥ १०६॥

स्मरणं संस्मरं नित्यं [ग: नित्यं?] शक्तियुक्तं महात्मने।

अव्युच्छेदविधानेन अभ्यासञ्च प्रकीर्तितम्॥ १०७॥

यथा शुष्के मृतन्तद्व [ग: -तद्वत्] पूरयं [ग: -येत्] सर्वग्रन्तिषु।

जिनेत् प्राणं महासत्व तुटियोगान्तया वतम्॥ १०८॥

यथालक्षञ्च तत्वञ्च समत्वगतिवासनात्।

जित्वा सर्वमवाप्नोति तन्त्रे विज्ञानसंपदः [गः -दम्]॥ १०९॥

इति भैरवस्त्रोतसि महातन्त्रे विद्यापीठे ब्रह्मयामले
नवाक्षरविधाने पिचुमते द्वादशसाहस्त्रके शतसंख्यात्मकः
पटलः॥

देव्युवाच

ज्ञात्वा कालं महादेव मंत्राराधनतत्परः।

न तु देहं त्यजेद् यस्तु तस्य कालविवञ्चनम्॥ १॥

कथयस्व यथावस्व [गः -वस्थ] कालकामान्धकान्तक।

भैरव उवाच

षोडशच्छदकं पद्म [ग: पद्मं] कृषो भाससमन्वितम्॥ २

॥

न्यसेन्मध्ये सकारेन्द्र बिन्दुकारकलाधरम्।

द्वात्रिंशकेसरावस्थं सितवर्णं [ग: -वर्ण] गणं परम्॥

३॥

३५२अ ग्] सान्तं काद्यं न्यसेद् देवि कजोयन्त्र गतन्तुतः [ग: -

तम्]।

षोडशस्वरसंयुक्तं बिन्दुभिश्च [ख: ?] समन्वितम् [ख: ?]॥ ४

॥

३५२अ ख्] न्यस्तं पूर्वदलारभ्य स्रवन्तन्तु सुधाकणैः ।

प्रणवन्तु सकारेन्दोयन् [ग: -दोर्यन्] मध्यस्थं सुधास्रवम् ॥

५ ॥

तदासने तु सन्तिष्ठेत् प्रस्फुरत् कमलासनः [ग: -नम्] ।

चण्डेकापालिनि स्वाहा पत्राग्रेषु चतुर्गुणः [ग: -णम्] ॥ ६ ॥

वेष्टकञ्च ह काली स्वहृत्पद्मे तु विचिन्तयेत् ।

ग्रन्थीश्वरास्तु देवेशे दर्शयेत् पूर्वयोजिता ॥ ७ ॥

अङ्गुष्ठादि क्रमात् न्यस्तममृतेश विराजितम् [ख: ?] ।

दशग्रन्थिगता न्यस्त्वा कृत्वा व्योम्नि तथा विधम् ॥ ८ ॥

अधोमुखन्तु सिंच्यन्तं [ग: सिच्यन्तं] परिवेष्टय ततो [ग: ततः] पुनः ।

ॐ क्ष्मूँ [ख: ?] जूँ [ख: ?] तथा स्वाहा ञुँ [ग: जूँ] क्ष्मूँ ॐ समन्ततः ॥ ९ ॥

कृत्वामृतं सकारीशं हृत्पद्मे तु विचिन्तयेत् ।

भित्वा व्योमं हृदोद् देशा [ग: देशास्] तथा विन्द्वष्टकं प्रिये ॥ १० ॥

भ्रूगुल्फजानुसंस्थन्तु नाभौ हृद्गलकान्तरे ।

पादाङ्गुष्ठ * निर्द्वान्तं ललाटे के च भैरवि ॥ ११ ॥

कुण्डलीक ततो [ग: ततः] शक्ति [ग: शक्तिर्] भित्वा बिन्दुत्रयं व्रजेत् ।

क्रियाज्ञानात्म बिन्दुं वा गत्वा मृततनुं शिवम्॥ १२॥

स्फटिकाभा ग्रन्थयस्तु ध्यात्वा क्षोभं समाचरेत्।

महाधवल कल्लोल्ल [गः कल्लोलं] परामृत परिप्लुतम्॥ १३॥

आनयीत ततो हंसं यावन्तद्भृदि मण्डलम्।

अमृते नैव निष्प्रान्तं पूरयित्वा परे लये॥ १४॥

आस्था [गः आस्थां] कृत्वा स्थितिस्तावद् यावत् कालो [गः काल] वहिः कृतः।

तत्काल वञ्चनं [गः पञ्चनं] कृत्वा मन्त्रेशे संप्रदापयेत्॥ १५॥

अमृतीश विधानेन मृत्युञ्जय गुणास्पदा ।

तद्रव्य [ग: तद्रूव्य] कृतसंभार यजनाग्निपरायनम् [ग: –

णम्] ॥ १६ ॥

कल्पजीवी महासत्व यावत् मन्त्रो [ग: मन्त्रः] प्रसिद्धयति ।

वञ्चयित्वा तु कल्पान्त [ग: कल्पान्तस्] तिष्ठते निरुपद्रवः ॥ १७ ॥

विज्ञानज्ञानयुक्तस्य सम्यग्भावक्रियावतः ।

अर्द्धमासाद् भवेत् सिद्धिः [क: सिद्धि] स्वच्छताकालवञ्चनम्

॥ १८ ॥

निश्चितं तावयुक्तस्य मन्त्र [ग: मन्त्रस्] तन्मयतामति [ग: – म

*?] ।

प्रवर्तते महादेवि तेन मृत्युञ्जयो मतः ॥ १९ ॥

देव्युवाच

तृप्ताहं देव देवेश परजज्ञाना मृतात्वहम् ।

सिद्धसाधनसंयुक्तः किङ्कर्तव्य [ग: -व्यं] मयाविभोः ॥

२० ॥

भैरव उवाच

अनुग्रहत्व या कार्यो [ग: कार्यः] प्राणिनां भुक्ति मुक्तिभिः ।

ज्ञानदीक्षो पदेशेन इष्टप्राप्ति [ग: -प्तिः] फलेन तु ॥ २१ ॥

व्याख्यानमभिषेकञ्च सोपदेश गुरुत्वता ।

देया देवा [ग: देवाः] सुरादीनां शक्तीनां कुलपूजिताम्॥

२२॥

३५२ब् ख्] ३५३ ग्] अत्रये शुद्धभाविष्टा प्रपन्नाः

साधकेश्वराः।

त्वत्प्रसादात् प्रयास्यन्ति वैहाय सपदोन्तमम्॥ २३॥

समानविभवा [ग: -वाः] सर्वे ये तूत्तरप्रसाधकाः।

भविष्यन्ति महात्मानः साधकादेशकारिणः॥ २४॥

साधनानि तथा सिद्धा मन्त्रा मन्त्रेश्वरादयः।

प्रत्यक्षस्तु भविष्यन्ति मत्प्रसादाद् [क: -दा] गणांबिके॥ २५॥

सुधियो मे पठन्ते तु श्लोकमेकमपि प्रिये।

विधिना तत्र [गः तत्र?] राजस्य ते यान्ति परमां गतिम्॥ २६॥

मन्त्रात्मकपदं वापि अणिमादिसमन्वितम्।

शृण्वंल्लिखेत् पठन्देवि [गः पठेद् देवि] योगिमन्मत तां

व्रजेत्॥ २७॥

अप्राप्तसमयस्यापि सकृत्तन्त्रप्रवाचकात्।

ददते योगिसङ्घस्तु कौलं समयमुत्तमम्॥ २८॥

चरुकं संप्रदायञ्च विधिनापि गुणाः [कः गुणा] प्रिये।

ददते योगिसङ्घस्तु भक्तियुक्तस्तु मन्त्रिणः॥ २९॥

लिखितं तिष्ठते यत्र गृहे देशे महात्मने।

तत्रापदो ह्यशेषस्तु [ख: ह्यशे *?स्तु] दूरं यान्ति गुहं प्रिये

॥ ३० ॥

ब्रह्मयामलतन्त्रेदं लक्षपादाधिकाङ्गतम् ।

शतकोट्यज्वलातन्त्रात् सारात् सारतरोत्तरम् ॥ ३१ ॥

स्थितं द्वादशसाहस्रं पञ्चसूत्रोज्ज्वलं मतम् ।

मया ते कथितं भद्रे भद्रसिद्धिप्रदायकम् ॥ ३२ ॥

इति भैरवस्रोतसि महातन्त्रे विद्यापीठे ब्रह्मयामले
नवाक्षरविधाने पिचुमते द्वादशसाहस्रके एकोत्तरशतिमः
पटलः समाप्तः ॥ ॥

[ख: सम्वत् * *? माघशुक्लाष्टश्याम आदित्यदिने

राजाधिराजपरमेश्वरश्रीबलदेव * *? श्रीपशुपति वास्तव्य?

श्रीजयाजर * * * * * * * * * *? ना हृदय मातृहृदय आप्त

झङ्कार भैरवमानवादि चतुविध चरुभेद

आप्तप्कालिंगाश्रय विशेषा तालकादि व्रत आप्तत्र पर्याटन

आप्त *? ब्रह्महत्यादि पञ्चपातकभेद आप्तता? वेधस्तो

भाधि कर्म आ *?कुलज्ञान आ * *?मेलापक आ * * * *? निष्ट

आ *?ष्क। च्छाया रुद्रक्षुरिको द्वार आ *?ह्यमृत्युञ्जय

प्रयोग आ *? पिचुमते पत्राङ्क समाप्तः ॥]